


ॐ

स्वामी शरण कृत

# ऋग्वेद

## सरल पाठ सम्पूर्ण संहिता


प्रकाशक:

पालीवाल प्रकाशन

117/एच-1/02 पाण्डु नगर, जे.के. मन्दिर के सामने,

कानपुर - 208005

E-mail : paliwalprakashanvedicsahitya@gmail.com

website : www.vedayan.simplesdite.com

संस्करण : आषाढ पूर्णिमा, 5116 युगाब्द, 2071 वि. (जुलाई 2013 ई.)

मूल्य : ग्यारह सौ रुपये मात्र

ॐ

# ।।अथ षष्ठ मण्डलम्।।

## सूक्त 1

4339. त्वम् हि अग्ने प्रथमो मनोता,
अस्याः धियः अभवः दस्म होता।
त्वम् सीम् वृषन् अकृणोः दुस्तरीतु
सहः विश्वस्मै सहसे सहध्यै।।1।।
4340. अधा होता नि असीदः यजीयान्
इडः पदे इषयन् ईड्यः सन्।
तम् त्वा नरः प्रथमम् देवयन्तो
महः राये चितयन्तः अनु ग्मन्।।2।।
4341. वृता इव यन्तम् बहुभिः वसव्यैः
त्वे रयिम् जागृवांसः अनु ग्मन्।
रुशन्तम् अग्निम् दर्शतम् बृहन्तम्
वपा-वन्तम् विश्वहा दीदि-वासम्।।3।।
4342. पदम् देवस्य नमसा व्यन्तः
श्रवस्यवः श्रव आपन् अमृक्तम्।
नामानि चित् दधिरे यज्ञियानि
भद्रायाम् ते रणयन्त सम्-दृष्टौ।।4।।
4343. त्वाम् वर्धन्ति क्षितयः पृथिव्याम्
त्वाम् राय उभयासः जनानाम्।
त्वम् त्राता तरणे चेत्यः भूः
पिता माता सदम् इत् मानुषाणाम्।।5।।
4344. सपर्येण्यः स प्रियः विक्षु अग्निः
होता मन्द्रः नि षसादा यजीयान्।
तम् त्वा वयम् दम आ दीदिवांसम्
उप ज्ञुबाधः नमसा सदेम।।6
4345. तम् त्वा वयम् सुध्यः नव्यम् अग्ने
सुम्नायवः ईमहे देवयन्तः।
त्वम् विशः अनयः दीद्यानः
दिवः अग्ने  बृहता रोचनेन।।7।।
4346. विशाम् कविम् विश्पतिम् शश्वतीनाम्
नितोशनम् वृषभम् चर्षणीनाम्।
प्रेति-इषणिम् इषयन्तम् पावकम्
राजन्तम् अग्निम् यजतम् रयीणाम्।।8।।
4347. सः अग्ने ईजे शशमे च मर्तः यः ते
आनट् सम्-इधा हव्य-दातिम्।
यः आहुतिम् परि वेदा नमोभिः विश्वा
इत् सः वामा दधते त्वा-ऊतः।।9।।
4348. अस्मा उ ते महि महे विधेम
नमःभिः अग्ने सम्-इधा उत हव्यैः।
वेदी सूनो सहसो गीःभिः उक्थैः आ
ते भद्रायाम् सुमतौ यतेम।।10।।
4349. आ यः ततन्थ रोदसी वि भासा
श्रवःभिः च श्रवस्यः तरुत्रः।
बृहत्-भिः वाजैः स्थविरेभिः अस्मे
रेवत्-भिः अग्ने वितरम् वि भाहि।।11।।
4350. नृ-वत् वसो सदम् धेहि अस्मे
भूरि तोकाय तनयाय प्रश्वः।
पूर्वीः इषः बृहती आरे-अघा
अस्मे भद्रा सौश्रवसानि सन्तु ।।12।।
4351. पूर्णि अग्ने पुरुधा त्वा-या
वसूनि राजन् वसुता ते अश्याम्।
पूरुणि हि त्वे पुरु-वार सन्ति
अग्ने वसु विधते राजनि त्वे ।।13।।

## सूक्त 2

4352. त्वम् हि क्षैत-वत यशः अग्ने मित्रः न पत्यसे।
त्वम् विचर्षणे श्रवः वसो पुष्टिम् न पुष्यसि।।1।।
4353. त्वाम् हि स्म चर्षणयः यज्ञेभिः गीःभिः ईडते।
त्वाम् वाजी याति अवृको रजः-तूः विश्व-चर्षणिः।।2।।
4344. सजोषसः त्वा दिवः नरः यज्ञस्य केतुम् इन्धते।
यत् ह स्यः मानुसः जनः सुम्नयुः जुहे अध्वरे।।3।।
4355. ऋधत् यः ते सुदानवे धिया मर्तः शशमते।
ऊती ष बृहतः दिवः अंहः न तरति।।4।।
4356. सम्-इधा यः ते आहुतिम्
निशितिम् मर्त्यः नशत्।
वया-वन्तम् स पुष्यति
क्षयम् अग्ने शत-आयुषम्।।5।।
4357. त्वेषः ते धूम ऋण्वति दिवि सन् शुक्र आततः।
सूरः न हि धुता त्वम् कृपा पावक रोचसे।।6।।
4358. अध हि विक्षु ईड्यः असि प्रियः नः अतिथिः।
रण्वः पुरि-इव जूर्यः सूनुः न त्रययाय्यः।।7।।
4359. क्रत्वा हि द्रोणे अज्यसे अग्ने वाजी न कृत्व्यः।
परिज्मा-इव स्वधा गयः अत्यः न ह्वर्यः शिशुः।।8।।
4360. त्वम् त्या चित् अच्युता अग्ने पशुः न यवसे।
धाम ह यत् ते अजर वना वृश्चन्ति शिक्वसः।।9।।
4361. वेषि हि अध्वरि-यताम् अग्ने होता दमे विशाम्।
सम्-ऋधः विश्पते कृणु जुषस्व हव्यम् अङ्गिरः।।10।।
4362. अच्छ नः मित्र-महः देव
देवान् अग्ने वोचः सुमतिम् रोदस्योः।
वीहि स्वस्तिम् सुक्षितिम् दिवः नॄन् द्विषः अंहांसि
दुः-इता तरेम ता तरेम तव अवसा तरेम।।11।।

## सूक्त 3

4363. अग्ने स क्षेषत् ऋतेजाः
उरु ज्योतिः नशते देव-युः ते।
यम् त्वम् मित्रेण वरुणः सजोषाः
देव पासि तयजसा मर्तम् अंहः।।1।।
4364. ईजे यज्ञेभिः शशमे शमीभिः
ऋधत्-वाराय अग्नये ददाश।
एव चन तम् यशसाम् अजुष्टिः
न अंहः मर्तम् नशते न प्र-दृप्तिः।।2।।
4365. सूरः न यस्य दृशतिः अरेपाः
भीमा यत् एति शुचतः ते आ धीः।
हेषस्वतः शुरुधः न अयम् अक्तोः
कुत्र चित् रण्वः वसतिः वनेजाः।।3।।
4366. तिग्मम् चित् एम महि वर्पः
अस्य भसत् अश्वः न यमसाम आसा।
विहजेहमानः परशुः न जिह्वम्
द्रविः न द्रवयति दारु धक्षत्।।4।।
4367. सः इत् अस्ता-इव प्रति धात्
सिष्यन् शिशीत् तेजः अयसः न धाराम्।
चित्र-ध्रजतिः अरतिः यः अक्तोः
वेः न द्रु-सद्वा रघुपत्म-जंहा।।5।।
4368. सः ईम् रेभः न प्रति वस्ते
उस्त्राः शोचिषा ररपीति मित्र-महाः।
नक्तम् यः ईम् अरुषः यः दिवा नृन्
अमर्त्यः अरुषः यः दिवा नृन।।6।।
4369. दिवः न यस्य विधतः नवीनोत्
वृषा रुक्षः ओषधीषु नूनोत्।
धृणा न यः ध्रजसा पत्मना यन्
आ रोदसी वसुना दम् सुपत्नी।।7।।
4370. धायः-भिः वा यः युज्येभिः अर्कैः
विद्युत् न दविद्योत् स्वेभिः शुष्मैः।
शर्धः वा यः मरुतम् ततक्ष
ऋभुः न त्वेषः रभसानःअद्यौत्।।8।।

## सूक्त 4

4371. यथा होतः मनुषः देवताता
यज्ञेभिः सूनो सहसः यजासि।
एव नः अद्य समना समानान्
उशन् अग्ने उशतः यक्षि देवान्।।1।।
4372. सः नः विभावा चक्षणिः न
अग्निः वन्दरु वेद्यः चनः धात्।
विश्व-आयुः यः अमृतः मर्त्येषु
उषःभुत् भूत् अतिथिः जात-वेदाः।।2।।
4373. द्यावः न यस्य पनयन्ति अभ्वम्
भासंसि वस्ते सूर्यः न शुक्रः।
वि यः इनोति अजरः पावकः
अश्नस्य चित् शिश्नथत् पूर्व्याणि।।3।।
4374. वद्मा हि सूनो असि अद्न-सद्वा
चक्रे अग्निः जनुषा अज्म अन्नम्।
सः त्वम् नः ऊर्जसने ऊर्जम् धाः
राजा-इव जेः अवृके क्षेषि अन्तरिति।।4।।
4375. नितिक्ति यः वारणम् अन्नम् अत्ति
वायुः न राष्ट्री अति एति अक्तून्।
तुर्याम यः ते आ-दिशाम् अरातीः
अत्यः न हुतः पततः परिहुत्।।5।।
4376. आ सूर्यः न भानुमत्-भिः अर्कैः
अग्ने ततन्थ रोदसी वि भासा।
चित्रः नयत् परि तमांसि अक्तः
शोचिषा पत्मन् औशिजः न दीयन्।।6।।
4377. त्वाम हि मन्द्र-तमम् अर्क-शोकैः
ववृमहे महि नः श्रोषि अग्ने।
इन्द्रम् न त्वा शवसा देवता
वायुम् पृणन्ति राधसा नृतमाः।।7।।
4378. नू नः अग्ने अवृकेभिः स्वस्ति
वेषि रायः पथिभिः पर्षि अह।
ता सूरिभ्यः गृणते रासि सुम्नम्
मदेम शतहिमाः सुवीरा।।8।।

## सूक्त 5

4379. हुवे वः सूनुम् सहसः युवानम्
अद्रोघ-वाचम् मतिभिः यविष्ठम्।
यः इन्वति द्रविणानि प्रचेताः
विश्व-वाराणि परुवार अध्रक्।।1।।
4380. त्वे वसूनि पुरु-अनीक होतः
दोषा वस्तोः आ ईरिरे यज्ञियासः।
क्षामइव विश्वा भुवनानि यस्मिन्
सम् सौभगानि दधिरे पावके।।2।।
4381. त्वम् विक्षु प्रदिवः सीदः आसु
क्रत्वा रथीः अभवः वार्याणाम्।
अतः इनोषि विधते चिकित्वः
वि आनुषक् जातवेदः वसूनि।।3।।
4382. यः नः सनुत्यः अभिदासत् अग्ने
यः अन्तरः मित्र-महः वनुष्यात्।
तम् अजरेभिः वृषभिः तव सचै
तप तपिष्ठ तपसा तपस्वान्।।4।।
4383. यः ते यज्ञेन सम्-इधा यः उक्थै

अर्केभिः सूनो सहसः ददाशत्।
सः मर्त्येषु अमृत प्रचेताः
राया द्युम्नेन श्रवसा वि भाति।।5।।
4384. सः तत् कृधि इषितः तूयम् अग्ने
स्पृधः बाधस्व सहसा सहस्वान्।
यत् शस्यसे द्युभिः अक्तः वचःभिः
तत् जुषस्व जारितुः घोषि मन्म।।6।।
4385. अश्याम तम् कामम् अग्ने तव ऊती
अश्याम रयिम् रयिवः सुवीरम्।
अश्याम वाजम् अभि वाजयन्तः
अश्याम द्युम्नम् अजर अजरम् ते।।7।।

## सूक्त 6

4386. प्र नव्यसा सहसः सूनुम् अच्छ
यज्ञेन गातुम् अवः इच्छमानः।
वृश्वत्-वनम् कृष्ण-यामम् रुशन्तम्
वीती होतारम् दिव्यम् जिगाति।।1।।
4387. स विश्वतानः तन्यतुः रोचनस्थाः
अजरेभिः नानदत्-भिः यविष्ठः।
यः पावकः पुरुतमः पुरुणि
पृथूनि अग्निः अनयाति भर्वन्।।2।।
4388. वि ते विष्वक् वातजूतासः अग्ने
भामासः शुचे शुचयः चरन्ति।
विम्रक्षासः दिव्याः नवग्वाः
वना वनन्ति धृषता रुजन्तः।।3।।
4389. ये ते शुक्रासः शुचयः शुचिष्मः
क्षाम् वपन्ति वि-सितासः अश्वाः।
अध भ्रमः ते उर्विया वि भाति
यातयमानः अधि सान पृश्नेः।।4।।
4390. अध जिह्वा पपापतीति प्र वृष्णः
गोषु-युधः न अशनिः सृजाना।
शूरस्य-इव प्रसितिः क्षातिः अग्ने
दुवर्तुः भीमः दयते वनानि।।5।।
4391. आ भानुना पार्थिवानि ज्रयांसि
महः तोदस्य धृषता ततन्थ।
सः बाधस्व अप भया सहःभिः
स्पृधः वनुष्यन् वनुषः नि जूर्व।।6।।
4392. सः चित्र चित्रम् चितयन्तम् अस्मे
चित्र-क्षत्र चित्र-तमम् वयः-धाम्।
चन्द्रम् पुरुवीरम् बृहन्तम् चन्द्र
चन्द्राभिः गृणते युवस्व।।7।।

## सूक्त 7

4393.मूर्धानम् दिवः अरतिम् पृथिव्याः
वैश्वानरम् ऋते आ जातम् अग्निम्।
कविम् सम्-राजम् अतिथिम् जनानाम्
आसन् आ पात्रम् जनयन्त देवाः।।1।।
4394. नाभिम् यज्ञानाम् सदनम् रयीणाम्
महाम् आ-हावम् अभि सम् नवन्त।
वैश्वानरम् रथ्यम् अध्वराणाम्
यज्ञस्य् केतुम् जनयन्त देवाः।।2।।
4395. त्वत् विप्रः जायते वाजी अग्ने
त्वत् वीरासः अभिमाति-सहः।
वैश्वानर त्वम् अस्मासु धेहि
वसूनि राजन् स्पृहयाय्याणि।।3।।
4396. त्वाम् विश्वे अमृत जायमानम्
न देवाः अभि सम् नवन्ते।
तव ऋतु-भिः अमृत-त्वम् आयन्
वैश्वानर यत् पित्रोः अदीदेः।।4।।
4397. वैश्वानर तव तानि व्रतानि
महानि अग्ने नकिः आ दधर्ष।
यत् जायमानः पित्रोः उपस्थे
अविन्दः केतुम् वयुनेषु अह्नाम्।।5।।
4398. वैश्वनरस्य वि-मितानि चक्षसा
सानूनि दिवः अमृतस्य केतुना।
तस्य इत् उ विश्वा भुवना अधि
मुर्धनि वयाःइव रुरुहुः सप्त विस्त्रुहः।।6।।
4399. वि यः रजांसि अमिमीत सुक्रतुः
वैश्वानरः वि दिवः रोचना कविः।
परि यः विश्वा भुवनानि पप्रथे
अदब्धः गोपाः अमृतस्य रक्षिता।।7।।

## सूक्त 8

4400. पृक्षस्य वृष्णो अरुषस्य नू सहः
प्र नु वोचम् विदथा जातवेदसः।
वैश्वानराय मतिः नव्यसी शुचिः
सोमःइव पवते चारुः अग्नये।।1।।
4401. सः जायमानः परमे विओमनि
व्रतानि अग्निः व्रतपाः अरक्षत।
वि अन्तरिक्षम् अमिमीत सुक्रतुः
वैश्वानरः महिना नाकम् अस्पृशत्।।2।।
4402. वि अस्तभ्नात् रोदसी मित्रः अद्भुतः
अन्त-वावत् अकृणोत् ज्योतिषा तमः।
वि चर्मणी-इव धिषणे अवर्तयत्
वैश्वानरः विश्वम् अधत्त वृष्ण्यम्।।3।।
4403. अपाम् उपस्थे महिषाः अगृभ्णत
विशः राजानम् उप तस्थुः ऋग्मियम्

आ दूतः अग्निम् अभरत् विवस्वतः
वैश्वानरम् मातारिश्वा परावतः।।4।।
4404. युगेयुगे विदथ्यम् गृणतभ्यः
अग्ने रयिम् यशसम् धेहि नव्यसीम्।
पव्या-इव राजन् अघशसम् अजर
नीचा नि वृश्च वनिनम् न तेजसा।।5।।
4405. अस्माकम् अग्ने मघवत्-सु धारय
अनामि क्षत्रम् अजरम् सुवीर्यम्।
वयम् जयेम शतिनम् सहस्त्रिणम्
वैश्वानर वाजम् अग्ने तव उति-भिः।।6।।
4406. अदब्धेभिः तव गोपाभिः इष्टे
अस्माकम् पाहि त्रिसधस्थ सूरीन्।
रक्ष च नः ददुषाम् शर्धः अग्ने
वैश्वानर प्र च तारीः स्तवानः।।7।।

## सूक्त 9

4407. अहः च कृष्णम् अहः अर्जुनम्
च वि वर्तेते रजसी वेद्याभिः।
वैश्वावरः जायमानः न राजा अव
अतिरत् ज्योतिषा अग्नेः तमांसि।।1।
4408. न अहम् तन्तुम् न वि जानामि ओतुम्
न यम् वयन्ति सम्-अरे अतमानाः।
कस्य स्वित् पुत्र इह वक्त्वानि
परः वदाति अवरेण पित्रा।।2।।
4409. सः इत तन्तम् सः वि जानाति
ओतुम् सः वक्त्वानि ऋतु-था वदाति।
यः ईम् चिकेतत् अमृतस्य गोपाः
अवः चरन् परः अन्येन पश्यन्।।3।।
4410. अयम् होता प्रथमः पश्यत
इमम् इदम् ज्यतिः अमृतम् मर्त्येषु।
अयम् सः जज्ञे ध्रुवः आ निसत्तः
अमर्त्यः तन्वा वर्धमानः।।4।।
4411. ध्रुवम् ज्योतिः निहितम् दृशये कम्
मनः जविष्ठम् पतयत्-सु अन्तरिति।
विश्वे देवाः समनसः सकेताः एकम्
क्रतुम् अभि वि यन्ति साधु।।5।।
4412. वि मे कर्णा पतयतः वि चक्षुः वि
इदम् ज्योतिः हृदये आ-हितम् यत्।
वि मे मनः चरति दूरे-आधीः किम्
स्वित् वक्ष्यामि किम् नु मनिष्ये।।6।।
4413.विश्वे देवाः अनमस्यन् भियानाः
त्वाम् अग्ने तमसि तस्थिवांसम्।
वैश्वानरः अवतु ऊतये नः अमर्त्यः अवतु ऊतये नः।।7।।

## सूक्त 10

4414. पुरः वः मन्द्रम् दिव्यम् सु-वृक्तिम्
प्रयति यज्ञे अग्निम् अध्वरे दधिध्वम्।
पुरः उक्थेभिः सः हि नः विभावा
सुअध्वरा करति जातवेदाः।।1।।
4415. तम् द्युमः पुरुअनीक होतः
अग्ने अग्नि-भिः मनुषः इधानः।
स्तोमम् यम् अस्मै ममता-इव
शूषम् घृतम् न शचि मतयः पवन्ते।।2।
4416. पिपाय सः श्रवसा मर्त्येषु
यः अग्नये ददाश विप्रः उक्थैः।
चित्राभिः तम् उतिभिः चित्र-शोचिः
व्रजस्य साता गोमतः दधाति।।3।।
4417. आ यः पप्रौ जायमानः उर्वी
दूरे-दृशा भासा कृष्णअध्वा।
अध बहु चित् तमः ऊर्म्यायाः
तिरः शोचिषा ददृशे पावकः।।4।।
4418. नु नः चित्रम् पुरु-वाजाभिः उति
अग्ने रयिम् मघवत्-भ्यः च धेहि।
ये राधसा श्रवसा च अति अन्यान्
सु-वीर्येभिः च अभि सन्ति जनान्।।5।।
4419. इमम् यज्ञम् चनः धाः अग्ने उशन्
यम् ते आसानः जुहुते हविष्मान्।
भरत्-वाजेषु दधिषे सु-वृक्तिम्
अवीः वाजस्य गध्यस्य सातौ।।6।।
4420. वि द्वेषांसि इनुहि वर्धय
इडाम् मदेम शतहिमाः सु-वीराः।।7।।

## सूक्त 11

4421. यजस्व होतः इषितः यजीयान्
अग्ने बाधः मरुताम् न प्रयुक्ति।
आ नः मित्रावरुणा नासत्या
द्यावा होत्राय पृथिवि ववृत्याः।।1।।
4422. त्वम् होता मन्द्र-तमः नः
अध्रक् अन्तः देवः विदथा मर्त्येषु।
पावकया जुह्वा वह्निः आसा अग्ने
यजस्व तन्वम् तव स्वाम्।।2।।
4423.धन्या चित् हि त्वे धिषणा वष्टि
प्र देवान् जन्म गृणते यजध्यै।
वेपिष्ठः अङ्गिरसाम् यत् ह विप्रः
मधु छन्दः भनति रेभः इष्टौ।।3।।
4424. अदिद्युतत् सु अपाकः विभावा
अग्ने यजस्व रोदसी उरूची।

आयुम् न यम् नमसा रात-हव्याः
अञ्जन्ति सु-प्रयसम् पञ्च जनाः।।4।।
4425. वृञ्जे ह यत् नमसा बर्हिः अग्नौ
अयामि स्त्रुक् घृतवती सुवृक्तिः।
अभ्यक्षि सद्म सदने पृथिव्याः
अश्रायि यज्ञः सूर्ये न चक्षुः।।5।।
4426. दशस्य नः पुरु-अनीक होतः
देवेभिः अग्ने अग्नि-भिः इधानः।
रायः सूनो सहसः ववसानाः
अति स्त्रसेम वृजनम् न अंहः।।6।।

## सूक्त 12

4427. मध्ये होता दुरोणे बर्हिषः राट्
अग्निः तोदस्य रोदसी यजधयै।
अयम् सः सूनुः सहसः ऋतवा
दूरात् सूर्यः न शोचिषा ततान।।1।।
4428. आ यस्मिन् त्वे सु अपाके यजत्र
यक्षत् राजन् सर्वताताइव नु द्यौः।
त्रिसधस्थः ततरुषः न जंहः
हव्या मघानि मानुषा यजध्यै।।2।।
4429. तेजिष्टा यस्य अरतिः वनेराट्
तोदः अध्वन् न बृधसानः अद्यौत्।
अद्रोघः न द्रविता चेतति त्मन्
अमर्त्यः अवत्रः ओषधीषुः।।3।।
4430. सः अस्माकेभिः एतरि न शूषैः
अग्निः स्तवे दमे आ जातवेदाः।
द्रुअन्नः वन्वन् क्रत्वा न अर्वा
उस्त्रः पिताइव जारयायि यज्ञै।।4।।
4431. अध स्म अस्य पनयन्ति भासः
वृथा यत् तक्षत् अनुयाति पृथ्वीम्।
सद्यः यः स्पन्द्रः विसितः धवीयान्
ऋणः न तायुः अति धन्व राट्।।5।।
4432. सः त्वम् नः अर्वन् निदायाः
विश्वेभिः अग्ने अग्नि-भिः इधानः।
वेषि रायः वि यासि दुच्छुनाः,
मदेम शतहिमाः सुवीराः।।6।।

## सूक्त 13

4433. त्वत् विश्वा सुभग सौभगानि
अग्ने वि यन्ति वनिनः न वयाः।
श्रुष्टी रयिः वाजः वृत्र-तूर्ये दिवः
वृष्टिः ईड्यः रितिः अपाम्।।1।।
4434. त्वम् भगः नः आ हि रत्नम् इषे
परिज्मा-इव क्षयसि दस्मवर्चाः।
अग्ने मित्रः न बृहतः ऋतस्य
असि क्षत्ता वामस्य देव भूरेः।।2।।
4435. सः सत्-पतिः शवसा हन्ति वृत्रम्
अग्ने विप्रः वि पणेः भर्ति वाजम्।
यम् त्वम् प्रचेतः ऋतजात राया
सजोषाः नप्त्रा अपाम् हिनोषि।।3।।
4436. यः ते सूनो सहसः गीःभिः उक्थैः
यज्ञैः मर्तः निशितिम् वेद्या आनट्।
विश्वम् सः देव प्रति वा अरम् अग्ने
धत्ते धान्यम् पत्यते वसव्यैः।।4।।
4437. ता नृभ्यः आ सौश्रवसा सुवीरा
अग्ने सूनो सहसः पुष्यसे धाः।
कृणोषि यत् शवसा भूरि पश्वः
वयः वृकाय अरये जसुरये।।5।।
4438. वद्मा सूनो सहसः नः विहायाः
अग्ने तोकम् तनयम् वाजि नः दाः।
विश्वाभिः गीःभिः अभि पूर्तिम्
अश्याम् मदेम शतहिमाः सुवीराः।।6।।

## सूक्त 14

4439. अग्ना यः नर्त्यः दुवः धियम् जुजोष धीतिभिः।
भसत् नु सः प्र पूर्व्यः इषम् वुरीत अवसे।।1।।
4440. अग्नि इत् हि प्रचेताः अग्निः वेधःतमः ऋषिः।
अग्निम् होतारम् ईडते यज्ञेषु मनुषः विशः।।2।।
4441. नाना हि अग्ने अवसे स्पर्धन्ते रायः अर्यः।
तूर्वन्तः दस्युम् आयवः व्रतैः सीक्षन्तः अव्रतम्।।3।।
4442. अग्निः अप्साम् ऋति-सहम्
वीरम् ददाति सत्-पतिम्।
यस्य त्रसन्ति शवसः सम्-चक्षि शत्रवः भिया।।4।।
4433. अग्नि हि विद्मना निदः देवः मर्तः उरुष्याति।
सहवा यस्य अवृतः रयिः वाजेषु अवृतः।।5।।
4444. अच्छ नः मित्रमहः देव देवना
अग्ने वोचः सुमतिम् रोदस्योः।
वीहि स्वस्तिम् सुक्षितिम् दिवः नृन् द्विषः अहासि
दुःइता तरेम ता तरेम तव अवसा तरेम।।6।।

## सूक्त 15

4445. इमम् सु वः अतिथिम् उषःबुधम्
विश्वासाम् विशाम् पतिम् ऋञ्जसे गिरा।
वेति इत् दिवः जनुषा कत् चित् आ शुचिः
ज्योक् चित् अत्ति गर्भः यत् अच्युतम्।।1।।
4446. मित्रम् न यम् सुधितम् भृगवः दधुः
वनस्पतौ ईडयम् ऊर्ध्वशोचिषम्।
सः त्वम् सुप्रितः वीतहव्ये अद्भुत

प्रशस्तिभिः महयसे दिवे दिवे।।2।।
4447. सः त्वम् दक्षस्य अवृकः वृधः
भूः अर्यः परस्य अन्तरस्य तरुषः।
रायः सूनो सहसः मर्त्येषु आ छर्दिः यच्छ
वीतहव्याय सप्रथः भरत्-वाजाय सप्रथः।।3।।
4448. द्युतानम् वः अतिथिम् स्वनरम्
अग्निम् होतारम् मनुषः सुअध्वरम्।
विप्रमा न द्युक्षवचसम् सुवृक्तिभिः
हव्यवाहम् अरतिम् देवम् ऋञ्जसे।।4।।
4449. पावकया यः चितयन्त्या कृपा
क्षामन् रुरुचे उषसः न भानुना।
तूर्वन् न यामन् एतशस्य नु रणे
आ यः घृणे न ततृषाणः अजरः।।5।।
4450. अग्निम्-अग्निम् वः सम्-इधा दुवस्यत
प्रियम्-प्रियम् वः अतिथिम् गृणीषणि।
उप वः गीःभिः अमृतम् विवासत् देवः देवेषु
वनते हि वार्यम् देवः देवेषु वनते हि नः दुवः।।6।।
4451. सम्-इद्धम् अग्निम् सम्-इधा गिरा
गृणे शुतिम् पावकम् पुरः अध्वरे ध्रुवम्।
विप्रम् होतारम् पुरुवारम् अद्रुहम्
कविम् सुम्नैः ईमहे जातवेदसम्।।7।।
4452. त्वम् दूतम् अग्ने अमृतम् युगे-युगे
हव्य-वाहम् दधिरे पायुम् ईड्यम्।
देवासः च मर्तासः च जागृविम्
विभुम् विश्पतिम् वमसा नि सेदिरे।।8।।
4453. वि-भूषन् अग्ने उभयान् अनु व्रता
दूतः देवानाम् रजसी सम् ईयसे
यत् ते धीतिम् सुमतिम् आवृणीमहे
अध स्म नः त्रि-वरूथः शिवः।।9।।
4454. तम् सुप्रतीकम् सुदृशम् सुञ्चम्
अविद्वांसः विदुःतरम् सपेम।
सः यक्षत् विश्वा वयनानि विद्वान्
प्र हव्यम् अग्निः अमृतेषु वोचत्।।10।।
4455. तम् अग्ने पासि उत तम् पिपर्षि
यः ते आनट् कवये शूर धीतिम्।
यज्ञस्य वा निशितिम् वा उत्-इतिम्
वा तम् इत् पृणक्षि शवसा उत राया।।11।।
4456. त्वम् अग्ने वनुष्यतः नि पाहि
त्वम् नः सहसा-वन् अवद्यात्।
सम् त्वा ध्वस्मन्-वत् अभि एतु पाथः
तम् रयिः स्पृहयाय्यः सहस्त्री।।12।।
4457. अग्निः होता गृहपतिः सः राजा
विश्वा वेद जनिम जात-वेदाः।
देवानाम् उत यः मर्त्यानाम्
यजिष्ठः सः प्र यजताम् ऋतवा।।13।।
4458. अग्ने यत् अद्य विशः अध्वरस्य
होतरिति पावक-शोचे वेः त्वम् हि यज्वा।
ऋता यजासि महिना वि यत् भूः
हव्या वह यविषठ या ते अद्य।।14।।
4459. अभि प्रयांसि सुधितानि हि रव्यः
नि त्वा दधीत रोदसी यजध्यै।
अव नः मघवन् वाज-सातौ अग्ने विश्वानि
दुःइता तरेम ता तरेम तव अवसा तरेम।।15।
4460. अग्ने विश्वेभिः सुअनीक देवैः
ऊर्णा-वन्तम् प्रथम् सीद योनिम्
कुलायिनम् घृत-वन्तम् सवित्रे
यज्ञम् नय यजमानाय साधु।।16।।
4461. इमम् उ त्यम् अथर्ववत् अग्निम् मन्थन्ति वेधसः।
यम् अङ्कूयन्तम् आ अनयन् अमूरम् श्याव्याभ्यः।।17।।
4462. जनिष्व देव-वीतये सर्वताता स्वस्तये।
आ देवान् वक्षि अमृतान् ऋत
वृधः यज्ञम् देवेषु पिस्पृशः।।18।।
4463. वयम् त्वा गृहपते जनानाम्
अग्ने अकर्म सम्-इधा बृहन्तम्।
अस्थूरि नः गार्ह-पत्यानि सन्तु
तिग्मेन नः तेजसा सम् शिशाधि।।19।।

## सूक्त 16

4464. त्वम् अग्ने यज्ञानाम् होता विश्वेषाम् हितः।
देवेभिः मानुषे जने।।1।।
4465. सः नः मन्द्राभिः अध्वरे जिह्वाभिः यज महः।
आ देवान् वक्षि यक्षि च।।2।।
4466. वेत्थ हि वेधः अध्वनः पथः च देव अञ्जसा।
अग्ने यज्ञेषु सुक्रतो ।।3।।
4467.त्वाम् ईडे अध द्विता भरतः वाजिभिः शुनम्।
ईजे यज्ञेषु यज्ञियम्।।4।।
4468. त्वाम् इमा वार्या पुरु दिवः-दासाय सुन्वते।
भरत्-वाजाय दाशुषे।।5।।
4469. त्वाम् दूतः अमर्त्यः आ वह दैव्यम् जनम्।
शृण्वन् विप्रस्य सु-स्तुतिम्।।6।।
4470. त्वाम् अग्ने सु-आध्यः मर्तासः देव-वीतये।
यज्ञेषु देवम् ईडते।।7।।
4471. तव प्र यक्षि सम्-दृशम् उत क्रतुम् सुदानवः।
विश्वे जुषन्त कामिनः।।8।।
4472. त्वम् होता मनुःहितः वह्निः आसा विदुःतरः।
अग्ने यक्षि दिवः विशः।।9।।

4473. अग्ने आ याहि वीतये गृणानः हव्य-दातये।
नि होता सत्सि बर्हिषि।।10।।
4474. तम् त्वा समित्-भिः अङ्गिरः घृतेन वर्धयामसि।
बृहत् शोच यविष्ठय।।11।।
4475. सः नः पृथु श्रवाय्यम् अच्छ देव विवाससि।
बृहत् अग्ने सुवीर्यम्।।12।।
4476. त्वाम् अग्ने पुष्करात् अधि अथर्वा निः अमन्थत।
मूर्ध्नो विश्वस्य वाघतः।।13।।
4477. तम् उ त्वा दध्यङ् ऋषिः पुत्रः ईधे अथर्वणः।
वृत्रहनम् पुरम्-दरम्।।14।।
4478. तम् उ त्वा पाथ्यः वृषा सम् ईधे दस्युहन्-तमम्।
धनम्-जयम् रणे-रणे।।15।।
4479. आ इहि उ सु ब्रवाणि ते अग्ने इत्था इतराः गिरः।
एभिः वर्धासे इन्दुभिः।।16।।
4480. यत्र क्व च ते मनः दक्षम् दधसे उत्-तरम्।
तत्र सदः कृणवसे।।17।।
4481. नहि ते पूर्तम् अक्षिपत् भुवत् नेमानाम् वसो।
अथ दुवः वनवसे।।18।।
4482. आ अग्नि अगामि भारतः वृत्रहा पुरुचेतनः।
दिवःदासस्य सत्-पतिः।।19।।
4483. सः हि विश्वा अति पार्थिवा रयिम् दाशत्
महित्वना।
वन्वन् अवातः अस्तृतः।।20।।
4484. सः प्रत्नवत् नवीयसा अग्ने द्युम्नेन सम्-यता।
बृहत् ततन्थ भानुना।।21।।
4485. प्र वः सरवायः अग्नये स्तोमम् यज्ञम् च धृष्णुया।
अर्च गाय च वेधसे।।22।।
4486. सः हि यः मानुषा युगा सीदत् होता कविक्रतुः।
दूतः च हव्य-वाहनः।।23।।
4487. ता राजाना शचि-व्रता आदित्यान् मारुतम् गणम्।
वसो यक्षि इह रोदसी।।24।।
4488. वस्वी ते अग्ने सम्-दृष्टिः इषयते मर्त्याय।
ऊर्जा नपात् अमृतस्य।।25।।
4489. क्रत्वा दाः अस्तु श्रेष्ठ अद्य त्वा वन्वन् सु-रेक्णाः।
मर्तः आनाश सुवृक्तिम्।।26।।
4490. ते ते आग्ने त्वा ऊताः इषयन्तः विश्वम् आयुः।
तरन्तः अर्यः अरातीः वन्वन्तः अर्यः अरातीः।।27।।
4491. अग्निः तिग्मेन शोचिषा
यासत् विश्वम् नि अत्रिणम्।
अग्निः नः वनते रयिम्।।28।।
4492. सुवीरम् रयिम् आ भर जात-वेदः विचर्षणे।
जहि रक्षासि सुक्रतो ।।29।।
4493. त्वम् नः पाहि अंहसः जात-वेदः अघयतः।
रक्ष नः ब्रह्मणः कवे।।30।।
4494. यः नः अग्ने दुःएवः आ मर्तः वधाय दाशति।
तस्मात् नः पाहि अहसः।।31।।
4495. त्वम् तम् देव जिह्वया परि बाधस्व दुः कृतम्।
मर्तः यः नः जिघांसति।।32।।
4496. भरत्-वाजाय सप्रथः शर्म यच्छ सहन्त्य।
अग्ने वरेण्यम् वसु।।33।
4497. अग्नि वृत्राणि जङ्घनत् द्रविणस्युः विपन्यया।
सम्-अद्धः शुक्रः आहुतः।।34।।
4498. गर्भे मातुः पितुः पिता वि-दिद्युतानः अक्षरे।
सीदन् ऋतस्य योनिम् आ।।35।।
4499. ब्रह्म प्रजा-वत् आ भर जात-वेदः विचर्षणे।
अग्ने यत् दीदयत् दिवि।।36।।
4500. उप त्वा रण्व-सन्दृशम् प्रयस्वन्तः सहःकृत।
अग्ने ससृज्महे गिरः।।37।।
4501. उप छायाम्-इव घृणेः अगन्म शर्म ते वयम्।
अग्ने हिरण्य-संदृशः।।38।।
4502. यः उग्रः-इव शर्यहा तिग्म-श्रृङ्गः न वंसगः।
अग्ने पुरः रुरोजिथ।।39।।
4503. आ यम् हस्ते न खादिनम्
शिशुम् जातम् न बिभ्रति।
विशाम् अग्निम् सुअध्वरम्।।40।।
4504. प्र देवम् देव-वीतय भरत वसुवित्-तमम्।
आ स्वे योनौ नि सीदतु।।41।।
4505. आ जातम् जात-वेदसि प्रियम् शिशीत अतिथिम्।
स्योने आ गृहपतिम्।।42।।
4506. अग्ने युक्ष्व हि ये तव अश्वासः देव साधवः।
अरम् वहन्ति मन्यवे।।43।।
4507. अच्छ नः याहि आ वह अभि प्रयांसि वीतये।
आ देवान् सोन पीतये।।44।।
4508. इत अग्ने भारत द्युमत् अजस्त्रेण दविद्युतत्।
शोच वि भाहि अजर।।45।।
4509. वीती यः देवम् मर्तः दुवस्येत्
अग्निम् ईडीत अध्वरे हविष्मान्
होतारम् सत्य-यजम् रोतस्योः
उत्तान-हस्त नमसा आ विवासेत्।।46।।
4510. आ ते अग्ने ऋचा हविः हृदा तष्टम् भरामसि।
ते ते भवन्तु उक्षणः ऋषभासः वशाः उत।।47।।
4511. अग्निम् देवासः अग्नियम् इन्धते वृत्रहन्-तमम्।
येन वसूनि आभृता तृहडा रक्षांसि वाजिना।।48।।

## सूक्त 17

4512. पिब सोमम् अभि यम् उग्र

तर्दः गव्यम् महि गृणानः इन्द्र।
वि यः धृष्णो वधिषः वज्रहस्त
विश्वा वृत्रम् अमित्रिया शवः-भिः।।1।।
4513. सः ईम् पाहि यः ऋजीषी तरुत्रः
यः शिप्र-वन् वृषभः यः मतीनाम्।
यः गोत्र-भित् वज्रभृत् यः अरिस्थाः
सः इन्द्र चित्रान् अभि तृन्धि वाजान्।।2।।
4514. एव पाहि प्रत्नथा मन्दतु त्वा
श्रुधि ब्रह्म ववृधस्व उत गीःभिः।
आविः सूर्यम् कृणुहि पीपिहि इषः
जहि शत्रून् अभि गाः इन्द्र तृन्धि।।3।।
4515. ते त्वा मदाः बृहत् इन्द्र स्वधावः
इमे पीताः उक्षयन्त द्युमन्तम्।
महाम् अनूनम् तवसम् वि भूतिम्
मत्सरासः जर्हषन्त प्रसहम्।।4।।
4516. येभिः सूर्यम् उषसम् मन्दसानः
अवासयाः अप दृह्ळानि दर्द्रत्।
महाम् अद्रिम् परि गाः इन्द्र सन्तम्
नुत्थाः अच्युतम् सदसः परि स्वात्।।5।।
4517. तव क्रत्वा तव तत् दंसनाभिः
आमासु पक्वम् शच्या नि दीधः।
और्णोः दुरः उस्त्रियाभ्यः वि दृह्ळा उत्
ऊर्वात् गाः असृजः अङ्गिरस्वान्।।6।।
4518. पप्राथ क्षाम् महि दंसः वि उर्वीम्
उप द्याम् ऋष्वः बृहत् इन्द्र स्तभायः।
अधारयः रोदसी देवपुत्रे प्रत्ने मातरा यह्वी ऋतस्य।।7।।
4519. अध त्वा विश्वे पुरः इन्द्र देवाः
एकम् तवसम् दधिरे भराय।
अदेवः यत् अभि औहिष्ट देवान्
स्वःसाता वृणते इन्द्रम् अत्र।।8।।
4520. अध द्यौः चित् ते अप सा नु वज्रात्
द्विता अनमत् भियसा स्वस्य मन्योः।
अहिम् यत् इन्द्रः अभि ओहसानम्
नि चित् विश्व-आयु शयथे जघान।।9।।
4521. अध त्वष्टा ते महः उग्र वज्रम्
सहस्त्र-भृष्टिम् ववृतत् शत-अश्रिम्।
निकामम् अर-मनसम् येन नवन्तम्
अहिम् सम पिणक् ऋजीषिन्।।10।।
4522. वर्धान् यम् विश्वे मरुतः सजोषाः
पचत् शतम् महिषान् इन्द्र तुभ्यम्।
पूषा विषणुः त्रीणि सरांसि धावन्
वृत्रहनम् मदिरम् अंशुम् अस्मै।।11।।
4523. आ क्षोदः महि वृतम् नदीनाम्
परि-स्थितम् असृजः ऊर्मिम् अपाम्।
तासाम् अनु प्रवतः इन्द्र पन्थाम् प्र
आर्दयः नीचीः अपसः समुद्रम्।।12।।
4524. एव ता विश्वा चकृ-वासम् इन्द्रम्
महाम् उग्रम् अजुर्यम् सहः-दाम्।
सु-वीरम् त्वा सु-आयुधम् सु-वज्रम् आ
ब्रह्म नव्यम् अवसे ववृत्यात्।।13।।
4525. सः नः वाजाय श्रवसे इषे च
राये धेहि द्युमतः इन्द्र विप्रान्।
भरत्-वाजे नृवतः इन्द्र सूरीन्
दिवि च स्म एधि पार्ये नः इन्द्र।।14।।
4526. अया वाजम् देव-हितम्
सनेम् शतहिमाः सु-वीराः।।15।।

## सूक्त 18

4527. तम् स्तुहि अभिभूति ओजाः
वन्वन् अवातः पुरुहूतः इन्द्रः।
अषाहडम् उग्रम् सहमानम् आभिः
गीःभिः वर्ध वृषभम् चर्षणीनाम्।।1।।
4528. सः युध्मः सत्वा खजकृत् समत्-वा
तुविम्रक्षः नदनुमान् ऋजीषी।
बृहत्-रेणुः च्यवनः मानुषीणाम्
एकः कृष्टीनाम् अभवत् सहवा।।2।।
4529. त्वम् ह नु त्यत् अदमयः दस्यून्
एकः कृष्टीः अवनोः आर्याय।
अस्ति स्चित् नु वीर्यम् तत् ते इन्द्र
न स्वित् अस्ति तत् ऋतुथा वि वोचः।।3।।
4530. सत् इत् हि ते तुविजातस्य
मन्ये सहः सहिष्ठ तुरतः तुरस्य।
उग्रम् उग्रस्य तवसः तवीयः
अरध्रस्य रध्रतुरः बभूव।।4।।
4531. तत् नः प्रत्नम् सख्यम् अस्तु युष्मे
इत्था वदत्-भिः वलम् अङ्गिरःभिः।
हन् अच्युतच्युत् दस्म इषयन्तम्
ऋणोः पुरः वि दुरः अस्य विश्वाः।।5।।
4532. सः हि धीभिः हव्यः अस्ति उग्रः
ईशानकृत् महति वृत्रतूर्ये।
सः तोकसाता तमये सः वज्री
वितन्तसाय्यः अभवत् समत्-सि।।6।।
4533. सः मज्मना जनिम मानुषाणाम्
अमर्त्येन नाम्ना अति प्र सर्स्त्रे।
सः द्युम्नेन सः शवासा उत राया
सः वीर्येण नृतमः सम्-ओंकाः।।7।।

4534. सः यः न मुहे न मिथु जनः भूत्
सुमन्तुनामा चुमुरिम् धुनिम् च
वृणक् पिप्रुम् शम्बरम् शुष्णुम् इन्द्रः
पुराम् च्यौत्नाय शयथाय नु चित्।।8।।
4545. उत्-अवता त्वक्षसा पन्यसा च
वृत्रहत्याय रथम् इन्द्र तिष्ठ।
धिष्व वज्रम् हस्ते आ दक्षिणत्रा
अभि प्र मन्द पुरुदत्र मायाः।।9।।
4536. अग्नि न शुष्कम् वनम् इन्द्र हेति
रक्षः नि धक्षि अशनिः न भीमा।
गंभीररया ऋष्वया यः रूरोज
अध्वनयत् दुःइता दंभयत् च।।10।।
4537. आ सहस्रम् पथिभिः इन्द्र राया
तुविद्युम्न तुविवाजेभिः अर्वाक्।
याहि सूनो सहसः यस्य नु चित्
अदेवः ईशे पुरुहूत योतोः।।11।।
4538. प्र तुविद्युम्नस्य स्थविस्य
घृष्वे ररप्.शे महिमा पृथिव्याः।
न अस्य शत्रुः न प्रतिमानम् अस्ति
न प्रतिस्थिः पुरुमायस्य सह्योः।।12।।
4539. प्र तत् ते अद्य करणम् कृतम् भूत्
कुत्सम् यत् आयुम् अतिथिग्वम् अस्मै।
पुरू सहस्त्र नि शिशाः अभि क्षाम्
उत् तूर्वयाणम् धृषता निनेथ।।13।।
4540. अनु त्वा अहिघ्ने अध देव देवाः
मदन् विश्वे कवितमम् कवीनाम्।
करः यत्र वरिवः बाधिताय
दिवे जनाय तन्वे गृणानः।।14।।
4541. अनु द्यावापृथिवी तत् ते ओजः
अमर्त्याः जिहते इन्द्र देवाः।
कृष्व कृत्नो अकृतम् यत् ते अस्ति
उक्थम् नवीयः जनयस्व यज्ञैः।।15।।

## सूक्त 19

4542. महान् इन्द्रः नृवत् आ चर्षणिप्राः
उत द्विबर्हाः अमिनः सहःभिः।
अस्मद्र्यक ववृधे वीर्याय
उरुः पृथुः सुकृतः कर्तृभिः भूत्।।1।।
4543. इन्द्रम् एव धिषणा सातये
धात् बहन्तम् ऋष्वम् अजरम् युवानम्।
अषाहेडन शवसा शूशु-वांसम्
सद्यः चित् यः ववृधे असामि।।2।।
4544. पृथू करस्ना बहुला गभस्ति
अस्सद्र्यक सम् मिमीहि श्रवांसि।
यूथाइव पश्वः पशुपाः दमूनाः
अस्मान् इन्द्र अभि आ ववृत्स्व आजौ।।3।।
4545. तम् वः इन्द्रम् चतिनम् अस्य शाकैः
इह नूनम् वाजयन्तः हुवेम।
यथा चित् पूर्वे जरितारः आसुः
अनेद्याः अनवद्याः अरिष्टाः।।4।।
4546. धृतव्रतः धनदाः सः हि वामस्य वसुनः पुरुक्षुः।
सम् जग्मिरे पथ्याः रायः अस्मिन्
समुद्रे न सिन्धवः यादमानाः।।5।।
4547. शविष्ठम् नः आ भर शूर शवः
ओजिष्ठम् ओजः अभिभूते उग्रम्।
विश्वा द्युम्ना वृष्ण्या मानुषाणाम्
अस्मभ्यम् दाः हरिवः मादयध्यै।।6।।
4548. यः ते मदः पृतनाषाट् अमृध्रः
इन्द्र तम् नः आ भर शूशुवासम्।
येन तोकस्य तनयस्य सातौ
मसीमहि जिगीवांसः त्वा-ऊताः।।7।।
4549. आ नः भर वृषणम् शष्मम् इन्द्र
धनस्पृतम् शूशुवांसम् सुदक्षम्।
येन वंसाम पृतनासु शत्रून् तव
ऊतिभिः उत जामीन् अजामीन्।।8।।
4550. आ ते शुष्मः वृषभः एतु पश्र्वात्
आ उत्तरात् अधरात् आ पुरस्तात्।
आ विश्वतः अभि सम् एतु अर्वाड
इन्द्र द्युम्नम् स्वःवत् धेहि अस्मे।।9।।
4551. नृवत् ते इन्द्र नृतमाभिः ऊती
वंसीमहि वामम् श्रोमतेभिः।
ईक्षे हि वस्वः उभयस्य राजन्
धाः रत्नम् महि स्थूरम् बृहन्तम्।।10।।
4552. मरुत्वन्तम् वृषभम् ववृधानम्
अकव-अरिम् द्विव्यम् शासम् इन्द्रम्।
विश्वसहम् अवसे नूतानाय
उग्रम् सहःदाम् इह तम् हुवेम।।11।।
4553. जनम् वज्रिन् महि चित् मन्यमानम्
एभ्यः नृभ्यः रन्धय येषु अस्मि।
अध हि त्वा पृथिव्याम् शूरसातौ
हवामहे तनये गोषु अप्-सु।।12।।
4554. वयम् ते एभिः पुरुहूत सरण्यैः
शत्रोः-शत्रोः उत्-तरे इत् स्याम।
घ्नन्तः वृत्राणि उभयानि शूर
राया मदेम बृहता त्वा-ऊताः।।13।।

## सूक्त 20

4555. द्यौ न यः इन्द्र अभि भूम अर्यः
तस्थौ रयिः शवसा पृत्-सु जनान।
तम् नः सहस्त्रभरम् उर्वरासाम्
दद्धि सूनो सहसः वृत्रतुरम्।।1।।
4556. दिवः न तुभ्यम् अनु इन्द्र सत्रा
असुर्यम् देवेभिः धायि विश्वम्।
अहिम् यत् वृत्रम् अपः वव्रिवंसम्
हन् ऋजीषिन् विष्णुना सचानः।।2।।
4557. तूर्यन् ओजीयान् तवसः तवीयान्
कृतब्रह्मा इन्द्र वृद्धमहाः।
राजा अभवत् मधुनः सोम्यस्य
विश्वासाम् यत् पुराम् दर्त्नुम् आवत्।।3।।
4558. शतैः अपद्रन् पणयः इन्द्र अत्र
दशओणये कवये अर्कसातौ।
वधैः शुष्णस्य अशुषस्य मायाः
पित्वः न अरिरेचीत् किम् चन प्र।।4।।
4559. महः द्रुहः अप विश्वआयु धायि
वज्रस्य यत् पतने पादि शुष्णः।
उरु सः सरथम् सारथये कः
इन्द्रः कुत्साय सूर्यस्य सातौ।।5।।
4560. प्र श्येनः न मदिरम् अशुम् अस्मै
शिरः दासस्य नमुचेः मेथायन्।
प्र आवत् नमीम् साप्यम् ससन्तम्
पृणक् राया सम् इषा सम् स्वस्ति।।6।।
4561. वि पिप्रोः अहिमायस्य दृहडाः
पुरः वज्रिन् शवसा न दर्द।
सुदामन् तत् रेक्णः अप्रमृष्यम्
ऋजिश्वने दात्रम् दाशुषे दाः।।7।।
4562. सः वेतसुम् दशमायम् दशओणिम्
तूतुजिम् इन्द्रः स्वभिष्टिसुम्नः।
आ तुग्रम् शश्वत् इभम् द्योतनाय
मातुः न सीम् उप सृज इयध्यै।।8।।
4563. सः ईम् स्पृधः वनते अप्रतिइतः
बिभ्रत् वज्रम् वृत्रहनम् गभस्तौ।
तिष्ठत् हरी अधि अस्ताइव गर्ते
वचःयुजा वहतः इन्द्रम् ऋष्वम्।।9।।
4564. सनेम् ते अवसा नव्यः इन्द्र
प्र पूरवः स्तवन्ते एना यज्ञैः
सप्त यत् पुरः शर्म शारदीः दर्त्
हन् दासीः पुरुकुत्साय शिक्षन्।।10।।
4565. त्वम् वृधः इन्द्र पूर्व्यः भूः
वरिवस्यन् उशने काव्याय।
परा नववास्त्वम् अनुदेयम्
महे पित्रे ददाथ स्वम् नपातम्।।11।।
4566. त्वम् धुनिः इन्द्र धुनिमतीः
ऋणोः अपः सीराः न स्त्रवन्तीः।
प्र यत् समुद्रम् अति शूर पर्षि
पारय तुर्वशम् यदुम् स्वस्ति।।12।।
4567. तव ह त्यत् इन्द्र विश्वम् आजौ
सस्तः धुनी चुमुरी या ह सिष्वप्।
दीदयत् इत् तुभ्यम् सोमेभिः सुन्वन्
दभीतिः इध्मभृतिः पक्थी अर्कैः।।13।।

## सूक्त 21

4568. इमाः उ त्वा पुरुतमस्य
कारोः हव्यम् वीर हव्याः हवन्ते।
धियः रथेस्थाम् अजरम् नवीयः
रयिः विभूतिः ईयते वचस्या।।1।।
4569. तम् स्तुषे इन्द्रम् यः विदामनः
गिर्वाहसम् गीःभिः यज्ञवृद्धम्।
यस्म दिवम् अति मह्रा पृथिव्याः
पुरुमायस्य रिरिचे महित्वम्।।2।।
4570. सः इत् तमः अवयुनम् ततन्वत्
सूर्यण वयुनवत् चकार।
कदा ते मर्ताः अमृतस्य धार्म
इयक्षन्तः न मिनन्ति स्वधावः।।3।।
4571. यः ता चकार सः कुह स्वित् इन्द्रः
कम् आ जनम् चरति कासु विक्षु।
कः ते यज्ञः मनसे शम् वराय
कः अर्कः इन्द्र कतमः सः होता।।4।।
4572. इदा हि ते वेविषतः पुराजाः
प्रत्नसः आसुः पुरुकृत् सखायः।
ये मध्यमासः उत नूतनासः
उत अवमस्य पुरुहूत बोधि।।5।।
4573. तम् पृचछन्तः अवरासः पराणि
प्रत्ना ते इन्द्र श्रुत्या अनु येमुः।
अर्चामसि वीर ब्रह्मवाहः यात्
एव विद्म तात् त्वा महान्तम्।।6।।
4574. अभि त्वा पाजः रक्षसः वि
तस्थे जज्ञानम् अभि तत् सु तिष्ठ।
तव प्रत्नेन युज्येन सख्या
वज्रेण धृष्णो अप ता नुदस्व।।7।।
4575. सः तु श्रुधि इन्द्र नूतनस्य
ब्रह्मण्यतः वीर कारुधायः।

त्वम् हि आपिः प्रदिवि पितृणाम्
शश्वत् बभूथ सुहवः आइष्टौ।।8।।
4576. प्र ऊतये वरुणम् मित्रम् इन्द्रम्
मरुतः कृष्व अवसे नः अद्य।
प्र पूषणम् विष्णुम् अग्निम् पुरम्-धिम्
सवितारम् ओषधीः पर्वतान् च।।9।।
4577. इमे उ त्वा पुरुशाक प्रयज्यो
जरितारः अभि अर्चन्ति अर्कैः।
श्रुधि हवम् आ हुवतः हुवानः न
त्वावान् अन्यः अमृत त्वत् अस्ति।।10।।
4578. नु मे आ वाचम् उप याहि विद्वान्
विश्वेभिः सूनो सहसः यजत्रैः।
ये अग्निजिहवाः ऋतसापः आसुः
ये मनुम् चक्रुः उपरम् दसाय।।11।।
4579. सः नः बोधि पुरःएता सुगेषु
उत दुःगेषु पथिकृत् विदानः।
ये अश्रमासः उरवः वहिष्ठाः
तेभिः नः इन्द्र अभि वक्षि वाजम्।।12।।

## सूक्त 22

4580. यः एकः इत् हव्यः चर्षणीनाम्
इन्द्रम् तम् गीःभिः अभि अर्च आभिः।
यः पत्यते वृषभः वृष्ण्यवान्
सत्यः सत्वा पुरुमाय सहस्वान्।।1।।
4581. तम् नः पूर्वे पितरः नवग्वाः
सप्त विप्रासः अभि वाजयन्तः।
नक्षत्-दाभम् ततुरिम् पर्वतेस्थाम्
अन्द्रोघ-वाचम् मतिभिः शविष्ठम्।।2।।
4582. तम् ईमहे इन्द्रम् अस्य रायः
पुरुवीरस्य नृवतः पुरुक्षोः।
यः अस्कृधोयुः अजरः स्वःवान्
तम् आ भर हरिवः मादयध्यै।।3।।
4583. तत् नः वि वोचः यदि ते पुरा चित्
जरितारः आनशुः सुम्नम् इन्द्र।
कः ते भागः किम् वयः दुध्र खिद्वः
पुरुहूत पुरुवसो असुरघ्नः।।4।।
4584. तम् पृच्छन्ती वज्रहस्तम् रथेस्थाम्
इन्द्रम् वेपी वक्वरी यस्य नु गीः।
तुविग्राभम् तुविकूर्मिम् रभःदाम्
गातुम् इषे नक्षते तुम्नम् अच्छ।।5।।
4585. अया ह त्यम् मायया ववृधानम्
मनःजुवा स्वतवः पर्वतेन।
अच्युता चित् वीडिता सुओजः
रुजः वि दृहडा धृषता विरप्शिन्।।6।।
4586. तम् वः धिया नव्यस्या शविष्ठम्
प्रत्नम् प्रत्नवत् परितंसयध्यै।
सः नः वक्षत् अनिमानः सुवहना
इन्द्रः विश्वानि अति दुःगहानि।।7।।
4587. आ जनाय द्रुहवणे पार्थिवानि
दिव्यानि दीपयः अन्तरिक्षा।
तप वृषन् विश्वतः शोचिषा तान्
ब्रहमद्विषे शोतय क्षाम् अपः च।।8।।
4588. भवः जनस्य दिव्यस्य राजा
पार्थिवस्य जगतः त्वेषस्दृक्।
धिष्व वज्रम् दक्षिणे इन्द्र हस्ते
विश्वाः अजुर्य दयसे वि मायाः।।9।।
4589. आ सम्-यतम् इन्द्र नः स्वस्तिम्
शत्रुतूर्याय बृहतीम् अमृधाम्।
यया दासानि आर्याणि वृत्रा
करः वज्रिन् सुतुका नाहुषाणि।।10।।
4590. सः नः नियुत्-भिः पुरुहूत वेधः
विश्ववाराभिः आ गहि प्रयज्यो।
न याः अदेवः वरते न देवः आ
आभिः याहि तूयम् आ मद्र्यद्रिक्।।11।।

## सूक्त 23

4591. सुते इत् त्वम् निमिश्लः इन्द्र सोमे
स्तोमे ब्रहमणि शस्यमाने उक्थे।
यत् वा युक्ताभ्याम् मघवन् हरिभ्याम्
बिभ्रत् वज्रम् बाहवोः इन्द्र यासि।।1।।
4592. यत् वा दिवि पार्ये सिस्विम्
इन्द्र वृत्रहत्ये अवसि शूरसातौ।
यत् वा दक्षस्य बिभ्युषः अबिभ्यत्
अरन्धयः शर्धतः इन्द्र दस्यून्।।2।।
4593. पाता सुतम् इन्द्रः अस्तु
सोमम् प्रनेनीः उग्रः जरितारम्।
ऊती कर्ता वीराय सुस्वये लोतम्
दाता वसु स्तुवते कीरये चित्।।3।।
4594. गन्ता इयन्ति सवना हरिभ्याम्
बभ्रिः वज्रम् पपिः सोमम् ददिः गाः।
कर्ता वीरम् नर्यम् सर्ववीरम्
श्रोता हवम् गृणतः स्तोमवाहा।।4।।
4595. अस्मै वयम् यत् ववान तत् विविष्मः
इन्द्राय यः नः प्रदिवः अपस्कः।
सुते सोमे स्तुमसि शंसत् उक्था
इन्द्राय ब्रहम वर्धनम् यथा असत्।।5।।

4596. ब्रह्माणि हि चकृषे वर्धनानि
तावत् ते इन्द्र मतिभिः विविष्मः।
सुते सोमे सुतपाः शम्-तमानि
रान्द्या क्रियास्म वक्षणानि यज्ञैः।।6।।
4597. सः नः बोधि पुरोडाशम् रराणः
पिब तु सोमम् गो-ऋजीकम् इन्द्र आ।
इदम् बर्हिः यजमानस्य सीद
उरुम् कृधि त्वायतः लोकम्।।7।।
4598. सः मन्दस्व हि अनु जोषम् उग्र
प्र त्वा यज्ञासः इमे अश्नुवन्तु।
प्र इमे हवासः पुरुहूतम् अस्मे
आ त्वा इयम् धीः अवसे इन्द्र यम्याः।।8।।
4599. तम् वः सखायः सम् यथा सुतेषु
सोमेभिः ईम् पृणत भोजम् इन्द्रम्।
कुवित् तस्मै असति नः भराय
न सुस्विम् इन्द्रः अवसे मृधाति।।9।।
4600. एव इत् इन्द्रः सुते अस्तावि सोमे
भरत्-वाजेषु क्षयत् इत् मघोनः।
असत् यथा जरित्रे उत सूरिः
इन्द्रः रायः विश्ववारस्य दाता।।10।।

## सूक्त 24

4601. वृषा मदः इन्द्रे श्लोकः उक्था
सचा सोमेषु सुतपाः ऋजीषी।
अर्चत्र्यः मघवा नृभ्यः उक्थैः
द्युक्षः राजा गिराम् अक्षित ऊतिः।।1।।
4602. ततुरिः वीरः नर्यः विचेताः
श्रोता हवम् गृणतः उर्विऊतिः।
वसुः शसः नराम् कारुधायाः
वाजी स्तुतः विदथे दाति वाजम्।।2।।
4603. अक्षः न चक्रयोः शूर बृहन्
प्र ते मह्ना रिरिचे रोदस्योः।
वृक्षस्य नु ते पुरुहूत वयाः
वि ऊतयः रुरुहु इन्द्र पूर्वीः।।3।।
4604. शचीवतः ते पुरुशाक शाकाः
गवाम्-इव स्त्रुतयः सम्-चरणीः।
वत्सानाम् न तन्तयः ते इन्द्र
दामन्-वन्तः अदामानः सुदामन्।।4।।
4605. अन्यत् अद्य कर्वरम् अन्यत् श्वः
असत् च सत् मुहुः आक्रिः इन्द्रः।
मित्रः नः अत्र वरुणः च पूषा अर्यः
वशस्य परिएता अस्ति।।5।।
4606. वि त्वत् आपः न पर्वतस्य पृष्ठात्
उक्थेभिः इन्द्र अनयन्त यज्ञैः।
तम् त्वा आभिः सिस्तुतिभिः वाजयन्तः
आजिम न जग्मुः गिर्वाहः अश्वाः।।6।।
4607. न यम् जरन्ति शरदः न मासाः
न द्यावः इन्द्रम् अवकर्शयन्ति।
वृद्धस्य चित् वर्धतासम् अस्य तनूः
स्तोमेभिः उक्थैः च शस्यमाना।।7।।
4608. न वीडवे नमते स्थिराय
न शर्धते दस्युजूताय स्तवान्।
अज्राः इन्द्रस्य गिरयः चित् ऋष्वाः
गंभीरे चित् भवति गाधम् अस्मै।।8।।
4609. गंभीरेण नः उरुणा अमत्रिन्
प्र इषः यन्धि सुतपावन् वाजान्।
स्थाः सु ऊर्ध्वः ऊती अरिषण्यन्
अक्तोः विउष्टौ परितक्म्यायाम्।।9।।
4610. सचस्व नायम् अवसे अभीके
इतः वा तम् इन्द्र पाहि रिषः।
अमा च एनम् अरण्ये पाहि
रिषः मदेम शतहिमाः सुवीराः।।10।।

## सूक्त 25

4611. या ते ऊतिः अवमा या परमा
या मध्यमा इन्द्र शुष्मिन् अस्ति।
ताभिः सु वृत्रहत्ये अवीः नः
एभिः च वाजैः महान् नः उग्र।।1।।
4612. आभिः स्पृधः मिथतीः अरिषण्यन्
अमित्रस्यव्यथय मन्युम् इन्द्र।
आभिः विश्वाः अभियुजः विषूचीः
आर्याय विशः अव तारीः दासीः।।2।।
4613. इन्द्र जामयः उत ये अजामयः
अर्वाचीनासः वनुषः युयुज्रे।
त्वम् एषाम् विथुरा शवासि
जहि वृष्ण्यानि कृणुहि पराचः।।3।।
4614. शूरः वा शूरम् वनते शरीरैः
तनूरुचा तरुषि यत् कृण्वैते ।
तोके वा गोषु तनये यत् अप्-सु
वि क्रन्दसी उर्वरासु ब्रवैते।।4।।
4615. नहि त्वा शूरः न तुरः न धृष्णुः
न त्वा योधः मन्यमानः युयोध।
इन्द्र नकिः त्वा प्रति अस्ति एषाम्
विश्वा जातानि अभि असि तानि।।5।।
4616. सः पत्यते उभयोः नृम्णम् अयोः
यदि वेधसः सम्-इथे हवन्ते।

वृत्रे वा महः नृवति क्षये वा
व्यचस्वन्ता यदि वितन्तसैते।।6।।
4617. अध स्म ते चर्षणयः यत् एजान्
इन्द्र त्राता उत भव वरूता।
अस्माकासः ये नृतमासः अर्यः
इन्द्र सूरयः दधिरे पुरः नः।।7।।
4618. अनु ते दायि महे इन्द्रियाय
सत्रा ते विश्वम् अनु वृत्रहत्ये।
अनु क्षत्रम् अनु सहः यजत्र
इन्द्र देवेभिः अनु ते नृसत्द्ये।।8।।
4619. एव नः स्पृधः सम् अज समत्-सु
इन्द्र ररन्धि मिथतीः अदेवीः।
विद्याम वस्तोः अवसा गृणन्तः
भरत्-वाजाः उत ते इन्द्र नूनम्।।9।।

## सूक्त 26

4620. श्रुधि नः इन्द्र हवयामसि त्वा
महः वाजस्य सातौ ववृषाणाः।
सम् यत् विशः अयन्त शूरसातौ
उग्रम् नः अवः पार्ये अहन् दाः।।1।।
4621. त्वाम् वाजी हवते वाजिनेयः
महः वाजस्य गध्यस्य सातौ।
त्वाम् वृत्रेषु इन्द्र सत्-पातिम् तरुत्रम्
त्वाम् चष्टे मुष्टिहा गोषु युध्यन्।।2।।
4622. त्वम् कविम् चोदयः अर्कसातौ
त्वम् कुत्साय दुष्णम् दाशुषे वर्क्।
त्वम् शिरः अमर्मणः परा अहन्
अतिथिग्वाय शंस्यम् करिष्यन्।।3।।
4623. त्वम् रथम् प्र भरः योधम् ऋष्वम्
आवः युध्यन्तम् वृषभम् दशद्युम्।
त्वम् तुग्रम् वेतसवे सचा अहन्
त्वम् तुजिम् गृणन्तम् इन्द्र तूतोः।।4।।
4624. त्वम् तत् उक्थम् इन्द्र बर्हणा करिति
कः प्र यत् शता सहस्त्रा शूर दर्षि।
अव गिरे दासम् शंबरम् हन् प्र
आवः दिवःदासम् चित्राभिः ऊतीः।।5।।
4625. त्वम् श्रद्धाभिः मन्दसानः सोमैः
दभीतये चुमुरिम् इन्द्र सिस्वप्।
त्वम् रजिम् पिठीनसे दशस्यन्
षष्टिम् सहस्त्रा शच्या सचा अहन्।।6।।
4626. अहम् चन तत् सूरिभिः आनश्याम्
तव ज्यायः इन्द्र सुम्नम् ओजः।
त्वया यत् स्तवन्ते सधवीर वीराः
त्रिवरूथेन नहुषा शविष्ठ।।7।
4627. वयम् ते अस्याम् इन्द्र द्युम्नहूतौ
सखायः स्याम महिन प्रेष्टाः।
प्रातर्दनिः क्षत्रश्रीः अस्तु श्रेष्ठः
घने वृत्राणाम् सनये धनानाम्।।8।।

## सूक्त 27

4628. किम् अस्य मदे किम् अस्य पीतौ
इन्द्रः किम् अस्य सख्ये चकार।
रणाः वा ये निसदि किम् ते अस्य
पुरा विविद्रे किम् नूतनासः।।1।।
4629. सत् अस्य मदे सत् अस्य पीतौ
इन्द्रः सत् अस्य सख्ये चकार।
रणाः वा ये निसदि सत् ते अस्य
पुरा विविद्रे सत् नूतनासः।।2।।
4630. नहि नु ते महिमनः समस्य
न मघवन् मघवत्-त्वस्य विद्म।
न राधसः राधसः नूतनस्य
इन्द्र नकिः ददृशे अन्द्रियम् ते।।3।।
4631. एतत् त्यत् ते इन्द्रियम् अचेति
येन अवधीः वरशिखस्य शेषः।
वज्रस्य यत् ते निहतलस्य शुष्मात्
स्वानात् चित् इन्द्र परमः ददार।।4।।
4632. वधीत् इन्द्रः वरशिखस्य शेषः
अभिआवर्तिने चायमानाय शिक्षन्।
वृचीवतः यत् हरियूपीयायाम् हन्
पूर्वे अर्धे भियसा अपरः दर्त्।।5।।
4633. त्रिंशत्-शतम् वर्मिणः इन्द्र साकम्
यव्यावत्याम् पुरुहूत श्रवस्या।
वृचीवन्तः शरवे पत्यमानाः
पात्रा भिन्दानाः नि-अर्थानि आयन्।।6।।
4634. यस्य गावौ अरुषा सुयवस्यू
अन्तः सु चरतः रेरिहाणा।
सः सृञ्जयाय तुर्वशम् परा अदात्
वृचीवतः दैववाताय शिक्षन्।।7।।
4635. द्वयान् अग्ने रथिनः विंशतिम् गाः
वधूमतः मघवा मह्यम् सम्-राट्।
अभिआवर्ती चायमानः ददाति
दुःनशा इयम् दक्षिणा पार्थवानाम्।।8।।

## सूक्त 28

4636. आ गावः अग्मन् उत भद्रम् अक्रन्
सीदन्तु गोस्थे रणयन्तु अस्मे।
प्रजावतीः पुरुरूपाः इह स्युः
इन्द्राय पूर्वीः उषसः दुहानाः।।1।।

4637. इन्द्रः यज्वने पृणते च शिक्षति
उप इत् ददाति न स्वम् मुषायति।
भूयःभूयः रयिम् इत् अस्य वर्धयन्
अभिन्ने खिल्ये नि दधाति देवयुम्।।2।।
4638. न ता नशन्ति न दभाति तस्करः
न आसाम् आमित्रः व्यथि आ दधर्षति।
देवान् च याभिः यजते ददाति च
ज्योक् इत् ताभिः सचते गोपतिः सह।।3।।
4639. न ताः अर्वा रेणुककाटः अश्नुते न
संस्कृत-त्रम् उप यन्ति ताः अभि।
उरुगायम् अभयम् तस्य ताः अनु
गावः मर्तस्य वि चरन्ति यज्वनः।।4।।
4640. गावः भगः गावः इन्द्र मे अच्छान्
गावः सोमस्य प्रथमस्य भक्षः।
इमाः याः गावः सः जनासः इन्द्रः
इचछामि इत् हृदा मनसा चित् इन्द्रम्।।5।।
4641. यूयम् गावः मेदयथ कृशम् चित्
अश्रीरम् चित् कृणुथ सुप्रतीकम्।
भद्रम् गृहम् कृणुथ भद्रवाचः
बृहत् वः वयः उच्यते सभासु।।6।।
4642. प्रजावतीः सुयवसम् रिशन्तीः
शुद्धाः अपः सुप्रपाने पिबन्तीः।
मा वः स्तेनः ईशत मा अघशंसः
परि वः हेतिः रुद्रस्य वृज्याः।।7।।
4643. उप इदम् उपपर्चनम् आसु गोषु उप पृच्यताम्।
उप ऋषभस्य रेतसि उप इन्द्र तव वीर्ये।।8।।

## सूक्त 29

4644. इन्द्रम् वः नरः सख्याय सेपुः
महः यन्तः सुमतये चकानाः।
महः हि दाता वज्रहस्तः अस्ति
महाम् रण्वम् अवसे यजधवम्।।1।।
4645. आ यस्मिन् हस्ते नर्याः मिमिक्षुः
आ रथे हिरणयये रथेस्थाः।
आ रश्मयः गभस्त्योः स्थूरयोः आ
अध्वन् अश्वासः वृषणः युजानाः।।2।।
4646. श्रिये ते पादा दुवः आ मिमिक्षुः
धृष्णुः वज्री शर्वसा दक्षिणवान्।
वसानः अस्कम् सुरभिम् दृशे
कम् स्वः न नृतो इषिरः बभूथ।।3।।
4647. सः सोमः आमिश्लतमः सुतः भूत्
यस्मिन् पक्तिः पच्यते सन्ति धानाः।
इन्द्रम् नरः स्तुवन्तः ब्रहम-काराः
उक्था शंसन्तः देववाततमाः।।4।।
4648. न ते अन्तः शवसः धायि अस्य
वि तु बाबधे रोदसी महित्वा।
आ तात सूरिः पृणति तूतुजानः
यूथा-इव अप्-सु सम्-ईजमानः ईती।।5।।
4649. एव इत् इन्द्रः सुहवः ऋष्वः अस्तु
ईति अनूती हिरिशिप्रः सत्वा।
एव हि जातः असमाति-ओजाः
पुरु च वृत्रा हनति नि दस्यून्।।6।।

## सूक्त 30

4650. भूयः इत् ववृधे वीर्याय एकः अजुर्यः दयते वसूनि।
प्र रिरिचे दिवः इन्द्र पृथिव्याः
अर्धम् इत् अस्य प्रति रोदसी उभे।।1।।
4651. अध मन्ये बृहत् असुर्यम् अस्य
यानि दाधार नकिः आ मिनाति।
दिवे-दिवे सूर्यः दर्शतः भूत् वि
सद्मानि उर्विया सुक्रतुः धात्।।2।।
4652. अद्य चित् नु चित् तत् अपः नदीनाम्
यत् आभ्यः अरदः गातुम् इन्द्र।
नि पर्वताः अद्मसदः न सेदुः
त्वया दृहडानि सुक्रतो रजांसि।।3।।
4653. सत्यम् इत् तत् न त्वावान् अन्यः
अस्ति इन्द्र देवः न मर्त्यः ज्यायान्।
अहन् अहिम् परिशयानम् अर्णः
अव असृजः अपः अच्छ समुद्रम्।।4।।
4654. त्वम् अपः वि दुरः विषुचीः इन्द्र
दृहडम् अरुजः पर्वतस्य।
राजा अभवः जगतः चर्षणीनाम्
साकम् सूर्यम् जनयन् द्याम् उषसम्।।5।।

## सूक्त 31

4655. अभूः एकः रयिपते रयीणाम्
आ हस्तयोः अधिथाः इन्द्र कृष्टीः।
वि तोके अपसु तनये च सूरे
अवोचन्त चर्षणयः विवाचः।।1।
4656. त्वम् भिया इन्द्र पार्थिवानि विश्वा
अच्युता चित् च्यवयन्ते रजांसि।
द्यावाक्षामा पर्वतासः वनानि
विश्वम् दृहडम् भयते अज्मन् आ ते।।2।।
4657. त्वम् कुत्सेन अभि शुष्णम् इन्द्र
अशुषम् युध्य कुयवम् गोइष्टौ।
दश प्रपित्वे अध सूर्यस्य
मुषायः चक्रम् अविवेः रपांसि।।3।।

4658. त्वम् शतानि अव शम्बरस्य
पुरः जघन्थ अप्रतीनि दस्योः।
अशिक्षः यत्र शच्या शचिवः दिवःदासाय
सुन्वते सुतक्रे भरत्-वाजाय गृणते वसूनि।।4।।
4659. सः सत्यसत्वन् महते रणाय
रथम् आ तिष्ठ तुविनृम्ण भिमम्।
याहि प्रपथिन् अवसा उप मद्रिक्
प्र च श्रुत श्रवय चर्षणिभ्यः।।5।।

## सूक्त 32

4660. अपूर्व्या पुरुतमानि अस्मै,
महे वीराय तवसे तुराय।
विरप्शिने वज्रिणे शम्-तमानि
वचासि आसा स्थविराय तक्षम्।।1।।
4661. सः मातरा सूर्येण कवीनाम्
अवासयत् रुजत् अद्रिम् गृणानः।
सुआधीभिः ऋक्वभिः वावशानः
उत् उस्त्रियाणाम् असृजत् निदानम्।।2।।
4662. सः वह्निभिः ऋक्वभिः गोषु शश्वत्
मितज्ञुभिः पुरुकृत्वा जिगाय।
पुरः पुरःहा सखिभिः सखियन्
दृहडाः रुरोज कविभिः कविः सन्।।3।।
4663. सः नीव्याभिः जरितारम् अच्छ
महः वाजेभिः महत्-भिः च शुष्मैः।
पुरुवीराभिः वृषभ क्षितीनाम्
आ गिर्वणः सुविताय प्र याहि।।4।।
4664. सः सर्गेण शवसा तक्तः अत्यैः
अपः इन्द्रः दक्षिणतः तुराषाट्।
इत्था सृजानाः अनपवृत् अर्थम्
दिवे-दिवे विविषुः अप्रमृष्यम्।।5।।

## सूक्त 33

4665. यः ओजिष्ठः इन्द्र तम् सु नः दाः
मदः वृषन् सु-अभिष्टिः दास्वान्।
सौवश्व्यम् यः वनवत् सुअश्वः
वृत्रा समत्-सु ससहत् अमित्रान्।।1।।
4666. त्वाम् हि इन्द्र अवसे विवाचः
हवन्ते चर्षणयः शूरसातौ।
त्वम् विप्रेभिः वि पणीन् अशायः
त्वाऊतः इत् सनिता वाजम् अर्वा।।2।।
4667. त्वम् तान् इन्द्र उभयान् अमित्रान्
दासा वृत्राणि आर्या च शूर।
वधीः वनाइव सुधितेभिः अत्कैः
आ पृत्-सु दर्षि नृणाम् नृतम।।3।
4668. सः त्वम् नः इन्द्र अकवाभिः ऊती
सखा विश्वआयुः अविता वृधे भू।
स्वःसाता यत् हवयामसि त्वा
युध्यन्तः नेमधिता पृत्-सु शूर।।4।।
4669. नूनम् नः इन्द्र अपराय च स्याः
भव मृडीकः उत नः अभिष्टौ।
इत्था गृणन्तः महिनस्य शर्मन्
दिवि स्याम पार्ये गोसतमाः।।5।।

## सूक्त 34

4670. सम् च त्वे जग्मुः गिरः इन्द्र पूर्वीः
वि च त्वत् यन्ति विभ्वः मनीषाः।
पुरा नूनम् च स्तुतयः ऋषीणाम्
पस्वृधे इन्द्रे अधि उक्थअर्का।।1।।
4671. पुरुहूतः यः पुरुगूर्तः ऋभ्वा
एकः पुरुप्रशस्तः अस्ति यज्ञैः।
रथः न महे शवसे युजानः
अस्माभिः इन्द्रः अनुमायद्यः भूत्।।2।।
4672. न यम् हिसन्ति धीतयः न वाणीः
इन्द्रम् नक्षन्ति इत् अभि वर्धयन्तीः।
यदि स्तोतारः शतम् यत् सहस्त्रम्
गृणन्ति गिर्वणसम् शम् तत् अस्मै।।3।।
4673. अस्मै एतत् दिवि अर्चाइव मासा
मिमिक्षः इन्द्रे नि अयामि सोमः।
जनम् न धन्वत् अभि सम् यत् आपः
सत्रा ववृधुः हवनानि यज्ञैः।।4।।
4674. अस्मै एतत् महि आङ्गूषम् अस्मै
इन्द्राय स्तोत्रम् मतिभिः अवाचि।
असत् यथा महित वृत्रतूर्ये
इन्द्रः विश्वआयुः अविता वृधः च।।5।।

## सूक्त 35

4675. कदा भुवन सथक्षयाणि ब्रह्म
कदा स्तोत्रे सहस्त्रपोष्यम् दाः।
कदा स्तोमम् वासयः अस्य राया
कदा धियः करसि वाजरत्नाः।।1।।
4676. कर्हि स्वित् तत् इन्द्र यत् नृभिः नृन्
वीरैः वीरान् नीडयासे जय आजीन्।
त्रिधातु गाः अधि जयासि गोषु
इन्द्र द्युम्नम् स्वःवत् धेहि अस्मे।।2।।
4677. कर्हि स्वित् तत् यत् जरित्रे
विश्वप्सु ब्रह्म कृणवः शविष्ठ।
कदा धियः न नियुतः युवासे
कदा गोमघा हवनानि गच्छाः।।3।।

4678. सः गो-मघाः जरित्रे अश्वचन्द्राः
वाजश्रवसः अधि धेहि पृक्षः।
पीपिहि इषः सुदुघाम् इन्द्र धेनुम्
भरत्-वाजेषु सुरुचः रुरुच्याः।।4।।
4679. तम् नूनम् वृजनम् अन्यथा चित्
शूरः यत् शक्र वि दुरः गृणीषे।
मा अरम् शुक्रदुघस्य धेनोः
आङ्गिरसान् ब्रह्मणा विप्र जिन्व।।5।।

## सूक्त 36

4680. सत्रा मदासः तव विश्वजन्याः
सत्रा रायः अध ये पार्थिवासः।
सत्रा वाजानाम् अभवः विभक्ता
यत् देवेषु धारयथाः असुर्यम्।।1।।
4681. अनु प्र येजे जनः ओजः अस्य
सत्रा देधिरे अनु वीर्याय।
स्यूमगृभे दुधये अर्वते च
क्रतुम् वृञ्जन्ति अपि वृत्रहत्ये।।2।।
4682. तम् सध्रीचीः ऊतयः वृष्ण्यानि
पौस्यानि नियुतः सुश्वुः इन्द्रम्।
समुद्रम् न सिन्दवः उक्थशुष्माः
उरुव्यचसम् गिरः आ विशन्ति।।3।।
4683. सः रायः खाम् उप सृज गृणानः
पुरुचन्द्रस्य त्वम् इन्द्र वस्वः।
पतिः बभूथ असमः जनानाम्
एकः विश्वस्य भुवनस्य राजा।।4।।
4684. सः तु श्रुधि श्रुत्या यः दुवःयुः
द्यौः न भूम अभि रायः अर्यः।
असः यथा नः शवसा चकानः
युगे-युगे वयसा चेकितानः।।5।।

## सूक्त 37

4685. अर्वाक् रथम् विश्ववारम् ते उप
इन्द्र युक्तासः हरयः बहन्तु।
कीरिः चित् हि त्वा हवते स्वःवान्
ऋधीमहि सधमादः ते अद्य।।1।।
4686. प्रो द्रोणे हरयः कर्म अग्मन्
पुनानासः ऋज्यन्तः अभूवन्।
इन्द्र नः अस्य पूर्व्यः पपीयात्
द्युक्षः मदस्य सोम्यस्य राजा।।2।।
4687. आ-सस्राणासः शवसानम् अच्छ
इन्द्रम् सुचक्रे रथ्यासः अश्वाः।
अभि श्रवः ऋज्यन्तः वहेयुः नु
चित् नु वायोः अमृतम् वि दस्येत्।।3।।
4688. वरिष्ठः अस्य दक्षिणाम् इयर्ति
इन्द्रः मघोनाम् तुविकूर्मि-तमः।
यया वज्रिवः परियासि अहः
मघा च धृष्णो दयसे वि सूरीन्।।4।।
4689. इन्द्र वाजस्य स्थविरस्य दाता
इन्द्रः गीःभिः वर्धताम् वृद्धमहाः।
इन्द्रः वृत्रम् हनिष्ठः अस्तु सत्वा
आ ता सूरिः वृणति तूतुजानः।।5।।

## सूक्त 38

4690. अपात् इतः उत् नः चित्रतमः
महीम् भर्षत् द्युमतीम् इन्द्रहूतिम्।
पन्यसीम् धीतिम् दैव्यस्य यामन्
जनस्य रातिम् वनते सुदानुः।।1।।
4691. दूरात् चित् आ वसतः अस्य कर्णा
घोषात् इन्द्रस्य तन्यति ब्रुवाणः।
आ इयम् एनम् देवहूतिः ववृत्यात्
मद्र्यक् इन्द्रम् इयम् ऋच्यमाना।।2।।
4692. तम् वः धिया परमया पुराजाम्
अजरम् इन्द्रम् अभि अनूषि अर्कैः।
ब्रह्म च गिरः दधिरे सम् अस्मिन्
महान् च स्तोमः अधि वर्धत् इन्द्रे।।3।।
4693. वर्धात् यम् यज्ञः उत सोमः इन्द्रम्
वर्धात् ब्रह्म गिरः उक्था च मन्म।
वर्ध अह एनम् उषसः यामन् अक्तोः
वर्धान् मासाः शरदः द्यावः इन्द्रम्।।4।।
4694. एव जज्ञानम् सहसे असामि
ववृधानम् राधसे च श्रुताय।
महाम् उग्रम् अवसे विप्र नूनम्,
आ विवासेम वृत्र-तूर्येषु।।5।।

## सूक्त 39

4695. मन्द्रस्य कवेः दिव्यस्य वह्नेः
विप्रमन्मनः वचनस्य मध्वः।
अपाः नः तस्य सचनस्य देव
इषः युवस्व गृणते गो-अग्राः।।1।।
4696. अयम् उशानः परि अद्रिम् उस्त्राः
ऋतधीति-भिः ऋतयुक् युजानः।
रुजत् अरुग्णम् वि वलस्य सानुम्
पणीन् वचःभिः अभि योधत् इन्द्रः।।2।।
4697. अयम् द्योतयत् अद्युतः वि अक्तून्
दोषा वस्तोः शरदः इन्दुः इन्द्र।
इमम् केतुम् अदधुः नु चित् अह्नाम्
शुचिजन्मनः उषसः चकार।।3।।

4698. अयम् रोचयत् अरुचः रुचानः
अयम् वासयत् वि ऋतेन पूर्वीः।
अयम् ईयते ऋतयुक्-भिः अश्वैः
स्वःविदा नाभिना चर्षणि-प्राः।।4।।
4699. नु गृणानः गृणते प्रत्न राजन्
इषः पिन्व वसुदेयाय पूर्वीः।
अपः ओषधीः अविषा वनानि
गाः अर्वतः नृन् ऋवसे रिरीहि।।5।।

## सूक्त 40

4700. इन्द्र पुब तुभ्यम् सुतः मदाय
अव स्य हरी वि मुच सखाया।
उत प्र गाय गणे आ निसद्य
अथ यज्ञाय गृणते वयः धाः।।1।।
4701. अस्य पिब यस्य जज्ञानः इन्द्र
मदाय क्रत्वे अपिवः विरप्शिन्।
तम् ते गावः नरः आपः अद्रिः
इन्दुम् सम् अह्यन् पीतये सम् अस्मै।।2।।
4702. सम्-इद्धे अग्नौ सुते इन्द्र सोमे
आ त्वा वहन्तु हरयः वहिष्ठाः।
त्वायता मनसा जोहवीमि इन्द्र
आ याहि सुविताय महे नः।।3।।
4703. आ याहि शश्वत् उशता ययाथ
इन्द्र महा मनसा सोम-पेयम्।
उप ब्रह्माणि शृणवः इमा नः
अथ ते यज्ञः तन्वे वयः धात्।।4।।
4704. यत् इन्द्र दिवि पार्ये यत् ऋधक्
यत् वा स्वे सदने यत्र वा असि।
अतः नः यज्ञम् अवसे नियुत्वान्
सजोषाः पाहि गिर्वणः मरुत्-भिः।।5।।

## सूक्त 41

4705. अहेडमानः उप याहि यज्ञम्
तुभ्यम् पवन्ते इन्दवः सुतासः।
गावः न वज्रिन् स्वम् ओकः अच्छ
इन्द्र आ गहि प्रथमः यज्ञियानाम्।।1।।
4706. या ते काकुत् सुकृता या वरिष्ठा
यया शश्वत् पिबसि मध्वः ऊर्मिम्।
तया पाहि प्र ते अध्वर्युः अस्थात्
सम् ते वज्रः वर्तताम् इन्द्र गव्युः।।2।।
4707. एषः द्रप्सः वृषभः विश्वरुपः
इन्द्राय वृष्णे सम् अकारि सोमः।
एतम् पिब हरिवः स्थातः उग्र
यस्य ईशिषे प्रदिवि यः ते अनम्।।3।।
4708. सुतः सोमः असुतात् इन्द्र वस्यान्
अयम् श्रेयान् चिकितुषे रणाय।
एतम् तितिर्वः उप याहि यज्ञम्
तेन विश्वाः तविषीः आ पृणस्व।।4।।
4709. हवयामसि त्वा आ इन्द्र याहि
अर्वाङ् अरम् ते सोमः तन्वे भवाति।
शतक्रतो मादयस्व सुतेषु प्र
अस्मान् अव पृतनासु प्र विक्षु।।5।।

## सूक्त 42

4710. प्रति अस्मै पिपीषते विश्वानि विदुषे भर।
अरम्-गमाय जग्मये अपश्चात्-दघ्वने नरे।।1।।
4711. आ ईम् एनम् प्रतिएतन सोमेभिः सोम-पातमम्।
अमत्रेभिः ऋजिषिणम् इन्द्रम् सुतेभिः इन्दुभिः।।2।।
4712. यदि सुतेभिः इन्दुभिः सोमेभिः प्रतिभषथ।
वेद विश्वस्य मेधिरः धृषत् तम्-तम् इत् आ ईषते।।3।।
4713. अस्मै-अस्मै इत् अन्धसः अध्वर्यो प्र भर सुतम्।
कुवित् समस्य जेन्यस्य शर्धतः अभिशस्तेः अवस्परते।।4।।

## सूक्त 43

4714. यस्य त्यत् शंबरम् मदे दिवःदासाय रन्धयः।
अयम् सः सोमः इन्द्र ते सुतः पिब।।1।।
4715. यस्य तीव्रसुतम् मदम् मध्यम् अन्तम् च रक्षसे।
अयम् सः सोमः इन्द्र ते सुतः पिब।।2।।
4716. यस्य गाः अन्तः अश्मनः मदे दृहडाः अव-असृजः।
अयम् सः सोमः इन्द्र ते सुतः पिब।।3।।
4717. यस्य मन्दानः अन्धसः माघोनम् दधिषे शवः।
अयम् सः सोमः इन्द्र ते सुतः पिब।।4।।

## सूक्त 44

4718. यः रयिवः रयिम्-तमः यः द्युम्नैः द्यम्नवत्-तमः।
सोमः सुतः इन्द्र सः ते अस्ति स्वधापते मदः।।1।।
4719. यः शग्मः तुविशग्म ते रायः दामा मतीनाम्।
सोमः सुतः सः इन्द्र ते अस्ति स्वधा-पते मदः।।2।।
4720. येन वृद्धः न शवसा तुरः न स्वाभिः ऊतिभिः।
सोमः सुतः सः इन्द्र ते अस्ति स्वधा-पते मदः।।3।।
4721. त्यम् वः अप्रहनम् गृणीषे शवसः पतिम् इन्द्रम्।
विश्वसहम् नरम् महिष्टम् विश्व-चर्षणिम्।।4।।
4722. यम् वर्धयन्ति इत् गिरः पतिम् तुरस्य राधसः।
तम् इत् नु अस्य रोदसी देवी शुष्मम् सपर्यतः।।5।।
4723. तत् वः उक्थस्य बर्हणा इन्द्राय उप-स्तृणीषणि।
विपः न यस्य ऊतयः वि यत् रोहन्ति सक्षितः।।6।।
4724. अविदत् दक्षम् मित्रः नवीयान्
पपानः देवेभ्यः वस्यः अचैत्।
ससवान् स्तौलाभिः धौतरीभिः

उरुष्या पायुः अभवत् सखिभ्यः।।7।।
4725. ऋतस्य पथि वेधाः अपायि
श्रिये मनासि देवासः अक्रन्।
दधानः नाम महः वचःभिः
वपुः दृशये वेन्यः वि आवरित्यावः।।8।।
4726. द्युमत्-तमम् दक्षम् धेहि अस्मे
सेध जनानाम् पूर्वीः अपातीः।
वर्षीयः वयः कृणुहि शचीभिः
धनस्य सातौ अस्मान् अविजड्ढि।।9।।
4727. इन्द्र तुभ्यम् इत् मघवन् अभूम
वयम् दात्रे हरिवः मा वि वेनः।
मकिः आपि ददृशे मर्त्यत्रा किम्
अङ्ग रध्रचोदनम् त्वा आहुः।।10।।
4728. मा जस्वने वृषभ नः ररीथाः
मा ते रेवतः सख्ये रिषाम।
पूर्वीः ते इन्द्र निःसिधः जनेषु
जहि असुस्वीन् प्र वृह अपृणतः।।11।।
4729. उत् अभ्रणिइव स्तनयन् इयर्ति
इन्द्रः राधांसि अश्व्यानि गव्या।
त्वम् असि प्रदिवः कारुधायाः मा
त्वा अदामानः आ दभन् मधोनः।।12।।
4730. अध्वर्यो वीर प्र महे सुतानाम्
इन्द्राय भर सः हि अस्य राजा।
यः पूर्व्याभिः उत नूतनाभिः गीःभिः
ववृधे गृणताम् ऋषीणाम्।।13।।
4731. अस्य मदे पुरु वर्पासि विद्वान्
इन्द्रः वृत्राणि अप्रति जघान।
तम् प्र होषि मधुमन्तम् अस्मै
सोमम् वीराय शिप्रिणे पिबध्यै।।14।।
4732. पाता सुतम् इन्द्रः अस्तु सोमम्
हन्ता वृत्रम् वज्रेण मन्दसानः।
गन्ता यज्ञम् परावतः चित् अच्छ
वसुः धिनाम् अविता कारुधायाः।।15।।
4733. इदम् त्यत् पात्रम् इन्द्रपानम्
इन्द्रस्य प्रियम् अमृतम् अपायि।
मत्सत् यथा सौमनसाय देवम्
वि अस्मत् द्वेषः युयवत् वि अंहः।।16।।
4734. एना मन्दानः जहि शूर शत्रन्
जामिम् अजामिम् मघवन् अमित्रान्।
अभिसेनान् अभि आदेदिशानान्
पराचः इन्द्र प्र मृण जहि च।।17।।
4735. आसु स्म नः मघवन् इन्द्र पृत्-सु
अस्मभ्यम् माहे वरिवः सुगम् कः।
अपाम् तोकस्य तनयस्या जेषे
इन्द्र सुरीन् कृणुहि स्म नः अर्धम्।।18।।
4736. आ त्वा हरयः वृषणः युजानाः
वृषरथासः वृषरश्मयः अत्याः।
अस्मत्राञ्चः वृषणः वज्रवाहः
वृष्णे मदाय सुयुजः वहन्तु।।19।।
4737. आ ते वृषन् वृषणः द्रोणम् अस्थुः
घृतप्रुषः न ऊर्मयः मदन्तः।
इन्द्र प्र तुभ्यम् वृभ्यम् वृषभिः सुतानाम्
वृषणे भरन्ति वृषभाय सोमम्।।20।।
4738. वृषा असि दिवः वृषभः पृथिव्याः
वृषा सिन्धूनाम् वृषभः स्तियानाम्।
वृष्णे ते इन्दुः वृषभ पीपाय
स्वादुः रसः मधुपेयः वराय।।21।।
4739. अयम् देवः सहसा जायमानः
इन्द्रेण युजा पणिम् अस्तभायत्।
अयम् स्वस्य पितुः आयुधानि
इन्दुः अमुष्णात् अशिवस्य मायाः।।22।।
4740. अयम् अकृणोत् उषसः सुपत्नीः
अयम् सूर्ये अदधात् ज्योतिः अन्तः।
अयम् त्रिधातु दिवि रोतनेषु
त्रितेषु विन्दत् अमृतम् नि-गूहडम्।।23।।
4741. अयम् द्यावापृथिवी वि स्कभायत्
अयम् रथम् अयुनक् सप्तरश्मिम्।
अयम् गोषु शच्या पक्वम् अन्तः
सोमः दाधार दशयंत्रम् उत्सम्।।24।।

## सूक्त 45

4742. यः आ अनयत् परावतः सुनीती तुर्वशम् यदुम्।
इन्द्रः सः नः युवा सखा।।1।।
4743. अविप्रे चित् वयेः दधत् अनाशुना चित् अर्वता।
इन्द्रः जेता हितम् धनम्।।2।।
4744. महीः अस्य प्रनीतयः पूर्वीः उत प्रशस्तयः।
न अस्य क्षीयन्ते ऊतयः।।3।।
4745. सखायः ब्रह्मवाहसे अर्चत प्र च गायत।
सः हि नः प्रमतिः मही।।4।।
4746. त्वम् एकस्य वृत्रहन् अविता द्वयोः असि।
उत ईदृशे यथा वयम्।।5।।
4747. नयसि इत् अति द्विषः कृणोषि उक्थशंसिनः।
नृभिः सुवीरः उच्यसे।।6।।
4748. ब्रह्माणम् ब्रह्मवाहसम् गीःभिः सखायम् ऋग्मियम्
गाम् न दोहसे हुवे।।7।।
4749. यस्य विश्वानि हस्तयोः ऊचुः वसूनि नि द्विता।

वीरस्य पृतनासहः।।8।।
4750. वि दृहडानि चित् अद्रिवः जनानाम् शचीपते।
वृह मायाः अनानत।।9।।
4751. तम् त्वा सत्य सोमपाः इन्द्र वाजानाम् पते।
अहूमहि श्रवस्यवः।।10।।
4752. तम् त्वा यः पुरा आसिथ यः वा नूनम् हिते धने।
हव्यः सः श्रधि हवम्।।11।।
4753. धीभिः अर्वत्-भिः अर्वतः वाजान् इन्द्र श्रवाय्यान्।
त्वया जेष्म हितम् धनम्।।12।।
4754. अभूः वीर गिर्वणः महान् इन्द्र धने
हिते भरे वितन्तसाय्यः।।13।।
4755. या ते ऊतिः अमित्रहन् मक्षुजवःतमा असति।
तया नः हिनुहि रथम्।।14।।
4756. सः रथेन रथितमः अस्माकेन अभि-युग्वना।
जेषि जिष्णो हितम् धनम्।।15।।
4757. यः एकः इत् तम् स्तुहि कृष्टीनाम् विचर्षणिः।
पतिः जज्ञे वृषक्रतुः।।16।।
4758. यः गृणताम् इत् आसीथ आपिः ऊती शिवः सखा।
सः त्वम् नः इन्द्र मृडय।।17।।
4759. धिष्व वज्रम् गभस्त्योः रक्षःहत्याय वज्रिवः।
ससहीष्ठाः अभि स्पृधः।।18।।
4760. प्रत्नम् रयीणाम् युजम् सखायम् कीरिचोदनम्।
ब्रह्मवाहःतमम् हुवे।।19।।
4761. सः हि विश्वानि पार्थिवा एकः वसूनि पत्यते।
गिर्वणःतमः अध्रिगुः।।20।।
4762. सः नः नियुत्-भिः आ पृण
कामम् वाजेभिः अश्विभिः।
गोमत्-भिः गोपते धृषत्।।21।।
4763. तत् वः गाय सुते सचा पुरुहूताय सत्वने।
शम् यत् गवे न शाकिने।।22।।
4764. न घ वसुः नि यमते दानम् वाज्रस्य गोमतः।
यत् सीम् उप श्रवत् गिरः।।23।।
4765. कुवित्-सस्य प्र हि व्रजम् गोमन्तम् दस्युहा गमत्।
शचीभिः अप नः वरत्।।24।।
4766. इमाः त्वा शतक्रतो अभि प्र नोनुवुः गिरः।
इन्द्र वत्सम् न मातरः।।25।।
4767. दुःनशम् सख्यम् तव गौः असि पीर गव्यते।
अश्वः अश्वयते भव।।26।।
4768. सः मन्दस्व हि अन्धसः राधसे तन्वा महे।
न स्तोतारम् निदे करः।।27।।
4769. इमा उ त्वा सुते-सुते नक्षन्ते गिर्वणः गिरः।
वत्सम् गावः न धेनवः।।28।।
4770. पुरुतमम् पुरूणाम् स्तोतृणाम् विवाचि।
वाजेभिः वाजयताम्।।29।।
4771. अस्माकम् इन्द्र भूतु ते स्तोमः वाहिष्टः अन्तमः।
अस्मान् राये महे हिनु।।30।।
4772. अधि बृबुः पणीनाम् वर्षिष्टे मूर्धन् अस्थात्।
उरुः कक्षः न गाङ्गयः।।31।।
4773. यस्य वायोःइव द्रवत् भद्रा रातिः सहस्त्रिणी।
सद्यः दानाय महते।।32।।
4774. तत् सु नः विश्वे अर्यः आ सदा गृणन्ति कारवः।
बृबुम् सहस्त्रदातमम् सूरिम् सहस्त्र-सातमम्।।33।।

## सूक्त 46

4775. त्वाम् इत् हि हवामहे साता वाजस्य कारवः।
त्वाम् वृत्रेषु इन्द्र सत्-पतिम्
नरः त्वाम् काष्ठासु अर्वतः।।1।।
4776. सः त्वम् नः चित्र वज्रहस्त
धृष्णुया महः स्तवानः अद्रिवः।
गाम् अश्वम् रथ्यम् इन्द्र सम्
किर सत्रा वाजम् न जिग्युषे।।2।।
4777. यः सत्रा-हा विचर्षणिः इन्द्रम् हूमहे वयम्।
सहस्त्र-मुष्क तुविनृम्ण सत्-पते भव समत्-सु।।3।।
4778. बाधसे जनान् वृषभाइव
मन्युना घृषौ मीहडे ऋचीषम।
अस्माकम् बोधि अविता महाधने तनूषु अप्-सु सूर्ये।।4।।
4779. इन्द्र ज्येष्ठम् नः आ भर ओजिष्ठम् पपुरि श्रवः।
येन इमे चित्र वज्रहस्त रोदसी आ उभे सुशिप्र प्राः।।5।।
4780. त्वाम् उग्रम् अवसे चर्षणि-
सहम् राजन् देवेषु हूमहे।
विश्वा सु नः विथुरा पिब्दना
वसो अमित्रान् सु-सहान् कृधि।।6।।
4781. यत् इन्द्र नाहुषीषु आ ओजः,
नृम्णम् च कृष्टिषु।
यत् वा पञ्च क्षितीनाम् द्युम्नम्
आ भर सत्रा विश्वानि पौस्या।।7।।
4782. यत् वा तृक्षौ मघ वन् द्रुह्यौ आ
जने यत् पूरौ कत् च वृष्णण्यम्।
अस्मभ्यम् तत् रिरीहि सम्
नृसखे अमित्रान् पृत्-सु तुर्वणे।।8।।
4783. इन्द्र त्रिधातु शरणम् त्रिवरूथम् स्वस्तिमत्।
छर्दिः यच्छ मघवत्-भ्यः च
महयम् च यवय दिद्युम् एभ्यः।।9।।
4784. ये गव्यता मनसा शत्रुम्
आदभुः अभि-प्रघ्नन्ति धृष्णुया।
अध स्म नः मघवन् इन्द्र

गिर्वणः तनूपाः अन्तमः भव।।10।।
4785. अध स्म नः वृधे भव इन्द्र नायम् अव युधि।
यत् अन्तरिक्षे पतयन्ति पर्णिनः दिद्यवः ग्ममूर्धानः।।11।।
4786. यत्र शूरासः तन्वः वितन्वते प्रिया शर्म पितॄणाम्।
अध स्म यच्छ तन्वे तने च
छर्दिः अचित्तम् यवय द्वेषः।।12।।
4787. यत् इन्द्र सर्गे अर्वतः चोदयासे महाधने।
असमने अध्वनि वृजिने पथि श्येनान्-इव श्रवस्यतः।।13।।
4788. सिन्धून्-इव प्रवणे आशुया
यतः यदि क्लोशम् अनु स्वानि।
आ ये वयः न वर्वृतति
आमिषि गृभीताः बाह्वोः गवि।।14।।

## सूक्त 47

4789. स्वादुः किल अयम् मधुमान् उत अयम्
तीव्रः किल अयम् रसवान् उत अयम्।
उतो नु अस्य पपिवांसम् इन्द्रम्
न कः चन सहते आहवेषु।।1।.
4790. अयम् स्वादुः इह मदिष्ठः आस
यस्य इन्द्रः वृत्रहत्ये ममाद।
पुरूणि यः च्यौत्ना शम्बरस्य
वि नवतिम् नव च देह्यः हन्।।2।।
4791. अयम् मे पीतः उत् इयर्ति वाचम्
अयम् मनीषाम् उशतीम् अजीगः।
अयम् षट् उर्वीः अमिमीत धीरः
न याभ्यः भुवनम् कत् चन आरे।।3।।
4792. अयम् सः यः वरिमाणम् पृथिव्याः
वर्ष्माणम् दिवः अकृणोत् अयम् सः।
अयम् पीयूषम् तिसृषु प्रवत्-सु
सोमः दाधार उरु अन्तरिक्षम्।।4।।
4793. अयम् विदत् चित्रदृशीकम् अर्णः
शुक्रसद्मनाम् उषसाम् अनीके।
अयम् महान् महता स्कम्भनेन
उत् द्याम् अस्तभ्नात् वृषभः मरुत्वान्।।5।।
4794. धृषत् पिब कलशे सोमम् इन्द्र
वृत्रहा शूर समअरे वसूनाम्।
माध्यन्दिने सवने आ वृषस्व
रयिस्थानः रयिम् अस्मासु धेहि।।6।।
4795. इन्द्र प्र नः पुरएताइव पश्य
प्र नः नय प्रतरम् वस्यः अच्छ।
भव सुपारः अतिपारयः नः
भव सुनीतिः उत वामनीति।।7।।
4796. उरुम् नः लोकम् अनु नेषि विद्वान्
स्वःवत् ज्योतिः अभयम् स्वस्ति।
ऋष्वा ते इन्द्र स्थविरस्य बाहू
उप स्थेयाम शरणा बृहन्ता।।8।।
4797. वरिष्ठे नः इन्द्र वन्धुरे धाः
वहिष्ठयोः शतवन् अश्वयोः आ।
इषम् आ वक्षि इषाम् वर्षिष्ठाम्
मा नः तारीत् मघवन् रायः अर्यः।।9।।
4798. इन्द्र मृड मह्यम् जीवातुम् इच्छ
चोदय धियम् अयसः न धाराम्।
यत् किम् च अहम् त्वायुः इदम् वदामि
तत् जुषस्व कृधि मा देव-वन्तम्।।10।।
4799. त्रातारम् इन्द्रम् अवितारम् इन्द्रम्
हवे-हवे सु-हवम् शूरम् इन्द्रम्।
ह्वयामि शक्रम् पुरुहूतम् इन्द्रम्
स्वस्ति नः मघवा धातु इन्द्रः।।11।।
4800. इन्द्र सुत्रामा स्व-वान् अवःभिः
सु-मृडीकः भवतु विश्ववेदाः।
बाधताम् द्वेषः अभयम् कृणोतु
सुवीर्यस्य पतयः स्याम।।12।।
4801. तस्य वयम् सुमतौ यज्ञियस्य
अपि भद्रे सौमनसे स्याम।
सः सु-त्रामा स्व-वान् इन्द्रः अस्मे
आरात् चित् द्वेषः सनुतः युयोतु।।13।।
4802. अव त्वे इन्द्र प्रवतः न ऊर्मिः
गिरः ब्रह्माणि नियुतः धवन्ते।
उरु न राधः सवना पुरूणि
अपः गाः वज्रिन् युवसे सम् इन्दून्।।14।।
4803. कः ईम् स्तवत् कः पृणात् कः यजाते
यत् उग्रम् इत् मघवा विश्वहा अवेत्।
पादौ-इव प्रहरन् अन्यम् अन्यम्
कृणोति पूर्वम् अपरमम् शचीभिः।।15।।
4804. शृण्वे वीरः उग्रम्-उग्रम् दमयन्
अन्यम्-अन्यम् अति-नेनीयमानः।
एधमान-द्विट् उभयस्य राजा
चोष्कूयते विशः इन्द्रः मनुष्यान्।।16।।
4805. परा पूर्वेषाम् सख्या वृणक्ति
वितर्तुराणः अपरेभिः एति।
अननु-भूतीः अव-धून्वानः पूर्वीः इन्द्रः शरदः
तर्तरीति।।17।।
4806. रूपम्-रूपम् प्रतिरूपः बभूव
तत् अस्य रूपम् प्रतिचक्षणाय।
इन्द्रः मायाभिः पुरुरूपः ईयते
युक्ताः हि अस्य हरयः शता दश।।18।।

4807. युजानः हरिता रथे भूरि त्वष्टा इह राजति।
कः विश्वाहा द्विषतः पक्षः आसते
उत आसीनेषु सूरिषु।।19।।
4808. अगव्यूति क्षेत्रम् आ अगन्म देवाः
उर्वी सती भूमिः अहूरणा अभूत्।
बृहस्पते प्र चिकित्स गो-इष्टौ
इत्था सते जरित्रे इन्द्र पन्थाम्।।20।।
4809. दिवे-दिवे सदृशीः अन्यम् अर्धम्
कृष्णाः असेधत् अप सद्मनः जाः।
अहन् दासा वृषभः वस्नयन्ता
उदव्रजे वर्चिनम् शम्बरम् च।।21।।
4810. प्रस्तोकः इत् नु राधसः ते इन्द्र
दश कोशयीः दश वाजिनः अदात्।
दिवःदासात् अतिथिग्वस्य राधः
शाम्बरम् वसु प्रति अग्रभिष्म।।22।।
4811. दश अश्वान् दश कोशान् दश वस्त्रा अधिभोजना।
दशो हिरण्य-पिण्डान् दिवःदासात् असानिषम्।।23।।
4812. दश रथान् प्रष्टिमतः शतम् गाः अथर्वभ्यः।
अश्वथः पायवे अदात्।।24।।
4813. महि राधः विश्वजन्याम् दधानान्
भरत्-वाजान् सार्ञ्जयः अभि अयष्ट।।25।।
4814. वनस्पते वीड्वङ्गः हि भूयाः
अस्मत्-सखा प्रतरणः सुवीरः।
गोभिः सम्-नद्धः असि वीडयस्व
आस्थाता ते जयतु जेत्वानि।।26।।
4815. दिवः पृथिव्याः परि ओजः उत्-भृतम्
वनस्पतिभ्यः परि आभृतम् सहः।
अपाम् ओज्मानम् परि गोभिः आवृतम्
इन्द्रस्य वज्रम् हविषा रथम् यज।।27।।
4816. इन्द्रस्य वज्रः नरुताम् अनीकम्
मित्रस्य गर्भः वरुणस्य नाभिः।
सः इमाम् नः हव्यदातिम् जुषाणः
देव रथ प्रति हव्या गृभाय।।28।।
4817. उप श्वासय पृथिवीम् उत द्याम्
पुरुत्रा ते मनुताम् विस्थितम् जगत्।
सः दुन्दुभे सजूः इन्द्रेण देवैः
दूरात् दवीयः अप सेध शत्रून्।।29।।
4818. आ क्रन्दय बलम् ओजः नः आ धाः
निः स्तनिहि दुःइता बाधमानः।
अप प्रोथ दुन्दुभे दुच्छनाः इतः
इन्द्रस्य मुष्टिः असि वीडयस्व।।30।।
4819. आ अमूः अज प्रति-आवर्तय
इमाः केतुमत् दुन्दुभिः वावदीति।
सम् अश्वपर्णाः चरन्ति नः नरः
अस्माकम् इन्द्र रथिनः जयन्तु।।31।।

## सूक्त 48

4820. यज्ञा-यज्ञा वः अग्रये गिरा-गिरा च दक्षसे।
प्र-प्र वयम् अमृतम् जातवेदसम्
प्रियम् मित्रम् न शंसिषम्।।1।।
4821. ऊर्जः नपातम् सः हिन अयम्
अस्म-युः दाशेम हव्यदातये।
भुवत् वाजेषु अविता भुवत् वृधः उत त्राता तनूनाम्।।2।।
4822. वृषा हि अग्ने अजरः महान् विभासि अर्चिषा।
अजस्त्रेण शोचिषा शोशुचत्
शुचे सुदीति-भिः सु दीदिहि।।3।।
4823. महः देवान् यजसि यक्षि
आनुषक् तव क्रत्वा उत दंसना।
अर्वाचः सीम् कृणुहि अग्ने
अवसे रास्व वाजा उत वंस्व।।4।।
4824. यम् आपः अद्रयः वना गर्भम् ऋतस्य पिप्रति।
सहसा यः मथितः जायते
नृभिः पृथिव्याः अधि सानवि।।5।।
4825. आ यः पप्रौ भानुना रोदसी
उभे धूमेन धावते दिवि।
तिरः तमः ददृशे ऊर्म्यासु आ श्यावासु
अरुषः वृषा आ श्यावाः अरुषः वृषा।।6।।
4826. बृहत्-भिः अग्ने अर्चिभिः शुक्रेण देव शोचिषा।
भरत्-वाजे सम्-इधानः यविष्ठय रेवत्
नः शुक्र दीदिहि द्युमत् पावक दीदिहि।।7।।
4827. विश्वासाम् शतम् विशाम्
असि त्वम् अग्ने मानुषीणाम्।
शतम् पूःभिः यविष्ठ पाहि अंहसः सम्-एद्धारम्
शतम् हिमाः स्तोतृभ्यः ये च ददाति।।8।।
4828. त्वम् नः चित्रः ऊत्या वसो राधांसि चोदय।
अस्य रायः त्वम् अग्ने रथीः
असि विदाः गाधम् तुचे तु नः।।9।।
4829. पर्षि तोकम् तनयम् पर्तृभिः
त्वम् अदब्धैः अप्रयुत्वभिः।
अग्ने हेडांसि दैव्या युयोधि नः अदेवानि ह्वरांसि च।।10।।
4830. आ सखायः सबःदुघाम् धेनुम्
अजध्वम् उप नव्यसा वचः।
सृजध्वम् अनप-स्फुराम्।।11।।
4831. या शर्धाय मारुताय स्वभानवे श्रवः अमृत्यु धुक्षत।
या मृडीके मरुताम् तुराणाम् या सुम्नैः एव-यावरी।।12।।
4832. भरत्-वाजाय अव धुक्षत द्विता।

धेनुम् च विश्वदोहसम् इषम् च विश्वभोजसम्।।13।।
4833. तम् वः इन्द्रम् न सुक्रतुम् वरुणम्-इव मायिनम्।
अर्यमणम् न मन्द्रम् सृप्र-भोजसम्
विषणुम् न स्तुषे आदिशे।।14।।
4834. त्वेषम् शर्धः न मारुतम् तुविस्वानि
अनर्वाणम् पूषणम् सम् यथा शता।
सम् सहस्त्रा कारिषत् चर्षणिभ्यः आ आविः
गूहडा वसु करत् सुवेदा नः वसु करत्।।15।।
4835. आ मा पूषन् उप द्रव शंसिषम्
नु ते अपिकर्णे आघृणे।
अघाः अर्यः अरातयः।।16।।
4836. मा काकम्बीरम् उत् वृहः वनस्पतिम्
अशस्तीः वि हि नीनशः।
मा उत सूरः अहरिति एव
चन ग्रीवाः आदधते वेरितिवे।।17।।
4837. दृतेःइव ते अवृकम् अस्तु सख्यम्।
अच्छिद्रस्य दधन्-वतः सुपूर्णस्य दधन्-वतः।।18।।
4838. परः हि मर्त्यैः असि समः देवैः उत श्रिया।
अभि ख्यः पूषन् पृतनासु नः
त्वम् अव नूनम् यथा पुरा।।19।।
4839. वामी वामस्य धूतयः प्रनीतिः अस्तु सूनृता।
देवस्य वा मरुतः मर्त्यस्य वा ईजानस्य प्रयज्यवः।।20।।
4840. सद्यः चित् यस्य चर्कृतिः
परि द्याम् देवः न एति सूर्यः।
देधिरे नाम यज्ञियम् मरुतः
वृत्रहम् शवः ज्येष्ठम् वृत्रहम् शवः।।21।।
4841. सकृत् ह द्यौः अजायत सकृत् भूमिः अजायत।
पृश्न्य दुग्धम् सकृत् पयः तत् अन्यः न अनु
जायते।।22।।

## सूक्त 49

4842. स्तुषे जनम् सुव्रदम् नव्यसीभिः
गीःभिः नित्रवरुणा सुम्नयन्ता।
ते आ गमन्तु ते इह श्रुवन्तु
सुक्षत्रासः वरुणः मित्रः अग्निः।।1।।
4843. विशःविशः ईड्यम् अध्वरेषु अदृप्त-क्रतुम् युवत्योः।
दिवः शिशुम् सहसः सुनुम् अग्निम्
यज्ञस्य केतुम् अरुषम् यजध्यै।।2।।
4844. अरुषस्य दुहितरा विरूपे
स्तृभिः अन्या पिपिशे सूरः अन्या।
मिथःतुरा विचरन्ती पावके
मन्म श्रुतम् नक्षतः ऋच्यमाने।।3।।
4845. प्र वायुम् अच्छ बृहती मनीषा
बृहत्-रयिम् विश्ववारम् रथप्राम्।
द्युतत्-यामा नियुतः पत्यमानः
कविः कविम् इयक्षसि प्रयजेयो।।4।।
4846. सः मे वपुः छदयत् अश्विनोः यः
रथः विरुक्मान् मनसा युजानः।
येन नरा नासत्या इपयध्यै
वर्तिः यातः तनयाय त्मने च।।5।।
4847. पर्जन्यवाता वृषभा पृथिव्याः
पुरीषाणि जिन्वतम् अप्यानि।
सत्यश्रुतः कवयः यस्य गीःभिः
जगतः स्थातः जगत् आ कृणुध्वम्।।6।।
4848. पावीरवी कन्या चित्र-आयुः
सरस्वती वीर-पत्नी धियम् धात्।
ग्नाभिः अच्छद्रम् शरणम् सजोषाः
दुःआधर्षम् गृणते शर्म यंसत्।।7।।
4849. पथः-पथः परि-पतिम् वचस्या
कामेन कृतः अभि आनट् अर्कम्।
सः नः रासत् शुरुधः चन्द्रअग्राः
धियम्-धियम् सीसधाति प्र पूषा।।8।।
4850. प्रथमभाजम् यशसम् वयःधाम्
सुपाणिम् देवम् सुगभस्तिम् ऋभ्वम्।
होता यक्षत् यजतम् पस्त्यानाम्
अग्निः त्वष्टारम् सुहवम् विभावा।।9।।
4851. भुवनस्य पितरम् गीःभिः आभिः
रूद्रम् दिवा वर्धय रुद्रम् अक्तौ।
बृहन्तम् ऋष्वम् अजरम् सुसुम्नम्
ऋधक् हवेम कविना इषितासः।।10।।
4852. आ युवानः कवयः यज्ञियासः
मरुतः गन्त गृणतः वरस्याम्।
अचित्रम् चित् हि जिन्वथ नृधन्तः
इत्था नक्षन्तः नरः अङ्गिरस्वत्।।11।।
4853. प्र वीराय प्र तवसे तुराय
अज यूथाइव पशुरक्षिः अस्तम्।
सः पिस्पृशति तन्वि श्रुतस्य
स्तृभिः न नाकम् वचनस्य विपः।।12।।
4854. यः रजांसि विममे पार्थिवानि
त्रिः चित् विष्णुः मनवे बाधिताय।
तस्य ते शर्मन् उप-दद्यमाने
राया मदेम तन्वा तना च।।13।।
4855. तत् नः अहिः बुध्यः अत्-भिः अर्कैः
तत् पर्वतः तत् सविता चनः धात्।
तत् ओषधीभिः अभि रातिसाचः
भगः पुरम्-धिः जिन्वतु प्र राये।।14।।

4856. नु नः रयिम् रथ्यम् चर्षणि-प्राम्
पुरुवीरम् महः ऋतस्य गोपाम्।
क्षयम् दात अजरम् येन जनान् स्पृधः अदेवीः
अभि च क्रमाम विशः आदेवीः अभि अश्नवाम।।15।।

## सूक्त 50

4857. हुवे वः देवीम् अदितिम् नमःभिः
मृडीकाय वरुणम् मित्रम् अग्निम्।
अभि-क्षदाम् अर्यमणम् सुशेवम्
त्रातृन् देवान् सवितारम् भगम् च।।1।।
4858. सु-ज्योतिषः सूर्य दक्षपितृन्
अनागाःत्वे सु-महः वीहि देवान्।
द्विजन्मानः ये ऋतसापः सत्याः
स्वःवन्तः यजताः अग्नि-जिह्वाः।।2।।
4859. उत द्यावापृथिवी क्षत्रम् उरु
बृहत् रोदसी शरणम् सुसुम्ने।
महः करथः वरिवः यथा नः
अस्मे क्षयाय धिषणे अनेहः।।3।।
4860. आ नः रुद्रस्य सूनवः नमन्ताम्
अद्य हूतासः वसवः अधृष्टाः।
यत् ईम् अर्भे महति वा हितासः
बाधे मरुतः अह्वाम देवान्।।4।।
4861. मिम्यक्ष येषु रोदसी नु
देवी सिसक्ति पूषा अभ्यर्धयज्वा।
श्रुत्वा हवम् मरुतः यत् ह याथ
भूम रेजन्ते अध्वनि प्रविक्ते।।5।।
4862. अभि त्यम् वीरम् गिर्वणसम् अर्च
इन्द्रम् ब्रह्मणा जरितः नवेन।
श्रवत् इत् हवम् उप च स्तवानः
रासत् वाजान् उप महः गृणानः।।6।।
4863. ओमानम् आपः मानुषीः अमृक्तम्
धात तोकाय तनयाय शम् योः।
यूयम् हि स्थ भिषजः मातृतमाः
विश्वस्य स्थातुः जगतः जनित्रीः।।7।।
4864. आ नः देवः सविता त्रायमाणः
हिरण्यपाणिः यजतः जगम्यात्।
यः दत्रवान् उषसः न प्रतीकम्
वि ऊर्णुते दाशुषे वार्याणि।।8।।
4865. उत त्वम् सूनो सहसः नः अद्य
आ देवान् अस्मिन् अध्वरे ववृत्याः।
स्याम अहम् ते सदम् इत् रातौ
तव स्याम् अग्ने अवसा सुवीरः।।9।।
4866. उत त्या मे हवम् आ जग्म्यातम्
नासत्या धीभिः युवम् अङ्ग विप्रा।
न महः तमसः अमुमुक्तम्
तूर्वतम् नरा दुःइतात् अभीके।।10।।
4867. ते नः रायः द्युमतः वाजवतः
दातारः भूत नृवतः पुरुक्षोः।
दशस्यन्तः दिव्याः पार्थिवासः
गोजाताः अप्याः मृडत च देवाः।।11।।
4868. ते नः रुद्रः सरस्वती सजोषाः
मीहुडष्मन्तः विष्णुः मृडन्तु वायुः।
ऋभुक्षाः वाजः दैव्यः विधाता
पर्जन्यावाता पिप्यताम् इषम् नः।।12।।
4869. उत स्यः देवः सविता भगः नः
अपाम् नपात् अवतु दानु पप्रिः।
देवेभिः जनिभिः सजोषाः द्यौः देवेभिः पृथिवी
समुद्रैः।।13।।
4870. उत नः अहिः बुध्न्यः श्रृणोतु
अजः एकपात् पृथिवी समुद्रः।
विश्वे देवाः ऋतवृधः हवानाः
स्तुताः मन्त्राः कविशस्ताः अवन्तु।।14।.
4871. एवा नपातः मम तस्य धीभिः
भरत्-वाजाः अभि अर्चन्ति अर्कैः।
ग्नाः हुतासः वसवः अधृष्टाः
विश्वे स्तुतासः भूत यजत्राः।।15।।

## सूक्त 51

4872. उत् उ त्यत् चक्षुः महि मित्रयोः
आ एति प्रियम् वरुणयोः अदब्धम्।
ऋतस्य शुचि दर्शतम् अनीकम्
रुक्मः न दिवः उत्-इता वि अद्यौत्।।1।।
4873. वेद यः त्रीणि विदथानि एषाम्
देवानाम् जन्म सनुतः आ च विप्रः।
ऋजु मर्तेषु वृजिना च पश्यन्
अभिः चष्टे सूरः अर्यः एवान्।।2।।
4874. स्तुषे उ वः महः ऋतस्य गोपान्
अदितिम् मित्रम् वरुणम् सुजातान्।
अर्यमणम् भगम् अदब्ध-धीतीन
अच्छ वोचे सधन्यः पावकान्।।3।।
4875. रिशादसः सत्-पतीन् अदब्धान्
महः राज्ञः सुवसनस्य दातृन्।
यूनः सुक्षत्रान् क्षयतः दिवः नृन्
आदित्यान् यामि अदितिम् दुवःयु।।4।।
4876. द्यौः पितः पृथिवि मातः अध्रुक्
अग्ने भ्रातः वसवः मृडत नः।

विश्वे आदित्याः अदिते सजोषाः
अस्मभ्यम् शर्म बहुलम् वि यन्त।।5।।
4877. मा नः वृकाय वृक्ये समस्मै
अघयते रीरधत यजत्राः।
यूयम् हि स्थ रथ्यः नः तनूनाम्
यूयम् दक्षस्य वचसे बभूव।।6।।
4878. मा वः एनः अन्यकृतम् भुजेम
मा तत् कर्म वसवः यत् चयध्वे।
विश्वस्य हि क्षयथ विश्व-देवाः
स्वयम् रिपुः तन्वम् रिरिषीष्ट।।7।।
4879. नमः इत् उग्रम् नमः आ विवासे
नमः दाधार पृथिवीम् उत द्याम्।
नमः देवेभ्यः नमः ईशे एषाम्
कृतम् चित् एनः नमसा आ विवासे।।8।।
4880. ऋतस्य वः रथ्यः पूतदक्षान्
ऋतस्य पस्त्यसदः अदब्धान्।
तान् आ नमःभिः उरुचक्षसः नृन्
विश्वान् वः आ नमे महः यजत्राः।।9।।
4881. ते हि श्रेष्ठवर्चसः ते उ नः
तिरः विश्वानि दुःइता नयन्ति।
सुक्षत्रासः वरुणाः मित्रः अग्निः
ऋतधीतयः वक्मराजसत्याः।।10।।
4882. ते नः इन्तद्रः पृथिवी क्षाम वर्धन्
पूषा भगः अदितिः पञ्च जनाः।
सुशर्माणः सुअवसः सुनीथाः
भवन्तु नः सुत्रात्रासः सुगोपाः।।11।।
4883. नु सद्मानम् दिव्यम् नंशि देवाः
भारत्-नाजः सुमतिम् याति होता।
आसानेभिः यजमानः मियेधैः
देवानाम् जन्म वसुयुः ववन्द।।12।।
4884. अप त्यम् वृजिनम् रिपुम् स्तेनम् अग्ने दुआध्यम्।
दविष्टम् अस्य सत्-पते कृधि सुगम्।।13।।
4885. ग्रावाणः सोमानः हि कम् सखित्वनाय वावशुः।
जहि नि अत्रिणम् पणिम् वृकः हि सः।।14।।
4886. यूयम् हि स्थ सुदानवः इन्द्रज्येष्ठाः अभिद्यवः।
कर्त नः अध्वन् आ सुगम् गोपाः अमा।।15।।
4887. अपि पन्थाम् अगन्महि स्वस्तिगाम् अनेहसम्।
येन विश्वाः परि द्विषः वृणक्ति विन्दते वसु।।16।।

## सूक्त 52

4888. न तत् दिवा न पृथिव्या अनु मन्ये
न यज्ञेन न उत शमीभिः आभिः।
उब्जन्तु तम् सुभ्वः पर्वतासः नि
हियताम् अतियाजस्य यष्टा।।1।।
4889. अति वा यः मरुतः मन्यते नः
ब्रह्म वा यः क्रियमाणम् निनित्सात्।
तपूंषि तस्मै वृजिनानि सन्तु
ब्रह्मद्विषम् अभि तम् शोचतु द्यौः।।2।।
4890. किम् अङ्ग त्वा ब्रह्मणः सोम गोपाम्
किम् अङ्ग त्वा आहुः अभिशस्तिपाम् नः।
किम् अङ्ग नः पश्यसि निद्यमानान्
ब्रह्मद्विषे तपुषिम् हेतिम् अस्य।।3।।
4891. अवन्तु माम् उषसः जायमानाः
अवन्तु मा सिन्धवः पिन्वमानाः।
अवन्तु मा पर्वतासः ध्रुवासः
अवन्तु मा पितरः देवहूतौ।।4।।
4892. विश्वदानीम् सुमनसः स्याम
पश्येम नु सूर्यम् उत्-चरन्तम्।
तथा करत् वसुपतिः वसूनाम्
देवान् ओहानः अवसा आगमिष्ठः।।5।।
4893. इन्द्रः नेदिष्ठम् अवसा आगमिष्ठः
सरस्वती सिन्धुभिः पिन्वमाना।
पर्जन्यः नः ओषधीभिः मयःभुः
अग्निः सुशंसः सुहवः पिताइव।।6।।
4894. विश्वे देवासः आ गत श्रृणुत मे इमम् हवम्।
आ इदम् बर्हिः नि सीदत।।7।।
4895. यः वः देवाः घृतस्नुना हव्येन प्रतिभीषति।
तम् विश्वे उप गच्छथ।।8।।
4896. उप नः सूनवः गिरः शृण्व्तु अमृतस्य ये।
सुमडीकाः भवन्तु नः।।9।।.
4897. विश्वे देवाः ऋतवृधः ऋतुभिः हवनश्रुतः।
जुषन्ताम् युज्यम् पयः।।10।।
4898. स्तोत्रम् इन्द्रः मरुत्-गणः
त्वष्ट्ऋमान् मित्रः अर्यमा।
इमा हव्या जुषन्त नः।।11।।
4899. इमम् नः अग्ने अध्वरम् होतः वयुनशः यज।
चिकित्वान् दैव्यम् जनम्।।12।।
4900. विश्वे देवाः श्रृणुत इमम् हवम्
मे ये अन्तरिक्षे ये उप द्यवि स्थ।
ये अग्नि-जिह्वाः उत वा यजत्राः
आसद्य अस्मिन् बर्हिषि मादयध्वम्।।13।।
4901. विश्वे देवाः मम श्रृण्वन्तु यज्ञियाः
उभे रोदसी अपाम् नपात् च मन्म।
मा वः वचांसि परिचक्ष्याणि वोचम्
सुम्नेषु इत् वः अन्तमाः मदेम।।14।।
4902. ये के च ज्मा महिनः अहिमायाः

दिबः जज्ञिरे अपाम् सधस्थे।
ते अस्मभ्यम् इषये विश्वम् आयुः
क्षपः उस्रा वरिवस्यन्तु देवा।।15।।
4903. अग्निपर्जन्यौ अवतम् धियम् मे
अस्मिन् हवे सुहवा सुस्तुतिम् नः।
इडाम् अन्यः जनयत् गर्भम् अन्यः
प्रजावतीः इषः आ धत्तम् अस्मे।।16।।
4904. स्तीर्णे बर्हिषि सम्-इधाने अग्नौ
सुउक्तेन महा नमसा आ विवासे।
अस्मिन् नः अद्य विदथे यजत्राः
विश्वे देवाः हविषि मादयध्वम्।।17।।

## सूक्त 53

4905. वयम् उ त्वा पथः पते रथम् न वाजसातये।
धिये पूषन् अयुज्महि।।1।।
4906. अभि नः नर्यम् वसु वीरम् प्रयत-दक्षणम्।
वामम् गृहपतिम् नय।।2।।
4907. अदित्सन्तम् चित् आघृणे पूषन् दानाय चोदय।
पणेः चित् वि म्रद मनः।।3।।
4908. वि पथः वाजसातये चिनुहि वि मृधः जहि।
साधन्ताम् उग्र नः धियः।।4।।
4909. परि तृन्धि पणीनाम् आरया त्हदया कवे।
अथ ईम् अस्मभ्यम् रन्धय।।5।।
4910. वि पूषन् आरया तुद पणेः इच्छ हृदि प्रियम्।
अथ ईम् अस्मभ्यम् रन्धय।।6।।
4911. आ रिख किकिरा कृणु पणीनाम् हृदया कवे।
अथ ईम् अस्मभ्यम् रन्धय।।7।।
4912. याम् पूषन् ब्रह्मचोदनीम् आराम् बिभर्षि आघृणे।
तया समस्य हृदयम् आ रिख किकिरा कृणु।।8।।
4913. या ते अष्ट्रा गोओपशा आघृणे पशुसाधनी।
तस्याः ते सुम्नम् ईमहे।।9।।
4914. उत नः गोसनिम् धियम् अश्वसाम् वाजसाम् उत।
नृवत् कृणुहि वीतये।।10।।

## सूक्त 54

4915. सम् पूषन् विदुषा नय यः अञ्जसा अनुशासति।
यः एव इदम् ब्रवत्।।1।।
4916. सम् उ पूष्णा गमेमहि यः गृहान् अभिशासति।
इमे एव इति च ब्रवत्।।2।।
4917. पूष्णः चक्रम् न रिष्यति न कोशः अव पद्यते।
नो अस्य व्यथते पविः।।3।।
4918. यः अस्मै हविषा अविधत्
न तम् पूषा अपि मृष्यते।
प्रथमः विन्दते वसु।।4।।
4919. पूषा गाः अनु एतु नः पूषा रक्षतु अर्वतः।
पूषा वाजम् सनोतु नः।।5।।
4920. पूषन् अनु प्र गाः इहि यजमानस्य सुन्वतः।
अस्माकम् स्तुवताम् उत।।6।।
4921. माकिः नेशत् माकीम् रिषत्
माकीम् सम् शारि केवटे।
अथ अरिष्टाभिः आ गहि।।7।।
4922. शृण्वन्तम् पूषणम् वयम् इर्यम् अनष्टवेदसम्।
ईशानम् रायः ईमहे।।8।।
4923. पूषन् तव व्रते वयम् न रिष्येम कदा चन।
स्तोतारः ते इह स्मसि।।9।।
4924. परि पूषा परस्तात् हस्तम् दधातु दक्षिणम्।
पुनः नः नष्टम् आ अजतु।।10।।

## सूक्त 55

4925. आ इहि वाम् विमुचः नपात् आघृणे सम् सचावहै
रथीः ऋतस्य नः भव।।1।।
4926. रथितमम् कपर्दिनम् ईशानम् राधसः महः।
रायः सखायम् ईमहे।।2।।
4927. रायः धारा असि आघृणे वसोः राशिः अजअश्व।
धीवतः-धीवतः सखा।।3।।
4928. पूषणम् नु अजअश्वम् उप स्तोषाम वाजिनम्।
स्वसुः यः जारः उच्यते।।4।।
4929. मातुः दिधिषुम् अब्रवम् स्वसुः जारः श्रृणोतु नः।
भ्राता इन्द्रस्य सखा मम।।5।।
4930. आ अजासः पूषणम् रथे निश्रृम्भाः ते जनश्रियम्।
देवम् वहन्तु बिभ्रतः।।6।।

## सूक्त 56

4931. यः एनम् आदिदेशाति करम्भअत् इति पूषणम्।
न तेम देवः आदिशे।।1।।
4932. उत घ सः रथितमः सख्या सत्-पतिः युजा।
इन्द्रः वृत्राणि जिघ्नते।।2।।
4933. उत अदः परुषे गवि सूरः चक्रम् हिरण्ययम्।
नि ऐरयत् रथितमः।।3।।
4934. यत् अद्य त्वा पुरुस्तुत ब्रवाम दस्त्र मन्तुमः।
तत् सु नः मन्म साधय।।4।।
4935. इमम् च नः गोएषणम् सातये सीसधः गणम्।
आरात् पूषन् असि श्रुतः।।5।।
4936. आ ते स्वस्तिम् ईमहे आरेअघाम् उपवसुम्।
अद्य च सर्वतातये श्वः च सर्वतातये।।6।।

## सूक्त 57

4937. इन्द्र नु पूषणा वयम् सख्याय स्वस्तये।
हुवेम वाजसातये।।1।।

4938. सोमम् अन्यः उप असदत् पातवे चम्वोः सुतम्।
करम्भम् अन्यः इच्छति।।2।।
4939. अजाः अन्यस्य वह्नयः हरी अन्यस्य सम्-भृता।
ताभ्याम् वृत्राणि जिघ्नते।।3।।
4940. यत् इन्द्रः अनयत् रितः महिः अपः वृषन्-तमः।
तत्र पूषा अभवत् सचा।।4।।
4941. ताम् पूष्णः सुमतिम् वयम् वृक्षस्य प्र वयाम्-इव।
इन्द्रस्य च आ रभामहे।।5।।
4942. उत् पूषणम् युवामहे अभीशून्-इव सारथिः।
मह्यै इन्द्रम् स्वस्तये।।6।।

## सूक्त 58

4943. शुक्रम् ते अन्यत् यजतम् ते अन्यत्
विषुरूपे अहनी द्यौःइव असि ।
विश्वाः हि मायाः अवसि स्वधावः
भद्रा ते पूषन् इह रातिः अस्तु।।1।।
4944. अजअश्वः पशुपाः वाजस्त्यः
धियम्-जिन्वः भुवने विश्वे अर्पितः।
अष्ट्राम् पूषा शिथिराम् उत्-वरीवृजत्
सम्-चक्षाणः भुवना देवः ईयते।।2।।
4945. याः ते पूषन् नावः अन्तारिति
समुद्रे हिरण्ययीः अन्तरिक्षे चरन्ति।
ताभिः यासि दूत्याम् सूर्यस्य
कामेन कृत श्रवः इच्छमानः।।3।
4946. पूषा सुबन्धुः दिवः आ पृथिव्याः
इडः पतिः मघवा दस्मवर्चाः।
यम् देवासः अददुः सूर्यायै
कामेन कृतम् तवसम् सुअञ्चम्।।4।।

## सूक्त 59

4947. प्र नु वोच सुतेषु वाम् विर्या यानि चक्रथुः।
हतासः वाम् पितरः देवशत्रवः इन्द्राग्नि जीवथः युवम्।।1।।
4948. बट् इत्था महिमा वाम् इन्द्राग्नी पनिष्ठः आ।
समानः वाम् जनिता भ्रातरा युवम् यमौ इहेहमातरा।।2।।
4949. ओकिवांसा सुते सचा अश्वा सप्तीइव आदने।
इन्द्रा नु अग्नि अवसा इह ।
वज्रिणा वयम् देवाः हवामहे।।3।।
4950. यः इन्द्राग्नी सुतेषु वाम् स्तवत् तेषु ऋतवृधा।
जोषवाकम् वदतः पज्रहोषिणा न देवाः भसथः चन।।4।।
4951. इन्द्राग्नी कः अस्य वाम् देवौ मर्तः चिकेतति।
विषूचः अश्वान् युयुजानः ईयते एकः समाने आ रथे।।5।।
4952. इन्द्राग्नी अपात् इयम्
पूर्वा आ अगात् पत्-वतीभ्यः।
हित्वी शिरः जिह्वया वावदत्
चरत् त्रिंशत् पदा नि अक्रमीत्।।6।।
4953. इन्द्राग्नी आ हि तन्वते नरः धन्वानि बाह्वोः।
मा नः अस्मिन् महाधने परा वर्क्तम् गोइष्टिषु।।7।।
4954. इन्द्राग्नी तपन्ति मा अघाः अर्यः अरातयः।
अप द्वेषांसि आ कृतम् युयुतम् सूर्यात् अधि।।8।।
4955. इन्द्राग्नी युवोः अपि वसु दिव्यानि पार्थिवा।
आ नः इह प्र यच्छतम् रयिम् विश्वायु-पोषसम्।।9।।
4956. इन्द्राग्नी उक्थवाहसा स्तोमेभिः हवमश्रुता।
विश्वाभिः गीःभिः आ गतम् अस्य सोमस्य पीतये।।10।।

## सूक्त 60

4957. श्नथत् वृत्रम् उत सनोति वाजम्
इन्द्रा यः अग्नी सहुरी सपर्यात्।
इरज्यन्ता वसव्यस्य भूरेः,
सहःतमा सहसा वाजयनता।।1।।
4958. ता योधिष्टम् अभि गाः इन्द्र नूनम्
अपः स्वः उषसः अग्ने ऊह्डाः।
दिशः स्वः उषसः इन्द्र चित्राः
अपः गाः अग्ने युवसे नियुत्वान्।।2।।
4959. आ वृत्रहना वृत्रहभिः शुष्मै
इन्द्र यातम् नमःभिः अग्ने अर्वाक्।
युवम् राधःभिः अकवेभिः इन्द्र
अग्ने अस्मे भवतम् उत्-तमेभिः।।3।।
4960. ता हुवे ययोः इदम् पप्ने विश्वम् पुरा कृतम्।
इन्द्राग्नी न मर्धतः।।4।।
4961.उग्रा विघनिना मृधः इन्द्राग्नी हवामहे।
ता नः मृडाताः ईदृशे।।5।।
4962. हतः वृत्राणि आर्या हतः दासानि सत्-पती।
हतः विश्वाः अप द्विषः।।6।।
4963. इन्द्राग्नी युवाम् इमे अभि स्तोमाः अनूषत।
पिबतम् शम्-भुव सुतम्।।7।।
4964. या वाम् सन्ति पुरुस्पृहः नियुतः दाशषे नरा।
इन्द्राग्नी ताभिः आ गतम्।।8।।
4965. ताभिः आ गच्छतम् नरा उप इदम् सवनम् सुतम्।
इन्द्राग्नी सोम पीतये।।9।।
4966. तम् ईडिष्व यः अर्चिषा वना विश्वा परिस्वजत्।
कृष्णा कृणोति जिह्वया।।10।।
4967. यः इद्धे आ-विवासति सुम्नम् इन्द्रस्य मर्त्यः।
द्युम्नाय सुतराः अपः।।11।।
4968. ता नः वाजवतीः इषः आशून् पिपृतम् अर्वतः।
इन्द्रम् अग्निम् च वोह्डवे।।12।।
4969. उभा वाम् इन्द्राग्नी आहुवध्यै
उभा राधसः सह मादयध्यै।

उभा दातारौ इषाम् रयीणाम्
उभा वाजस्य सातये हुवे वाम्।।13।।
4970. आ नः गव्येभिः अश्व्यैः वसव्यैः उप गच्छतम्।
सखायौ देवौ सखयाय शम्-भुवा इन्द्राग्नी ता
हवामहे।।14।।
4971. इन्द्राग्नी श्रृणुतम् हवम् यजमानस्य सुन्वतः।
वीतम् हव्यानि आ गतम् पिबतम् सोम्यम् मधु।।15।।

## सूक्त 61

4972. इयम् अददात् रभसम् ऋणच्युतम्
दिवःदासम् वध्र्यश्वाय दाशुषे।
या शश्वन्तम् आ चखाद अवसम्
पणिम् ता ते दात्राणि तविषा सरस्वति।।1।।
4973. इयम् शुष्मेभिः बिसखाःइव अरुजत्
सानु गिरीणाम् तविषेभिः ऊर्मिभिः।
पारावत घ्निम् अवसे सुवृक्तिभिः
सरस्वतीम् आ विवासेम धीतिभिः।।2।।
4974. सरस्वति देवनिदः नि बर्हय
प्रजाम् विश्वस्य बृसयस्य मायिनः।
उत क्षितिभ्यः अवनीः अविन्दः
विषम् एभ्यः अस्त्रवः वाजिनीवति।।3।।
4975. प्र नः देवी सरस्वती वाजेभिः वाजनिवती।
धीनाम् अवित्री अवतु।।4।।
4976. यः त्वा देवि सरस्वति उपब्रूते धने हिते।
इन्द्रम् न वृत्रतूर्ये।।5।।
4977. त्वम् देवि सरस्वति अव वाजेषु वाजिनि।
रद पूषाइव नः सनिम्।।6।।
4978. उत स्या नः सरस्वती घोरा हिरण्यवर्तनिः।
वृत्रघ्नी वष्टि सुस्तुतिम्।।7।।
4979. यस्याः अनन्तः अह्रुतः त्वेषः चरिष्णुः अर्णवः।
अमः चरति रोरुवत्।।8।।
4980. सा नः विश्वाः अति द्विषः स्वसृः अन्याः
ऋतवरी।
अतन् अहाइव सूर्यः।।9।।
4981. उत नः प्रिया प्रियासु सप्तस्वसा सुजुष्टा।
सरस्वती स्तोम्या भूत्।।10।।
4982. आ पप्रुषी पार्थिवानि उरु रजः अन्तारिक्षम्।
सरस्वती निदः पातु।।11।।
4983. त्रिसधस्था सप्तधातुः पञ्च जाता वर्धयन्ती।
वाजे-वाजे हव्या भूत्।।12।।
4984. प्र या महिम्ना महिना आसु चेकिते
द्युम्नेभिः अन्याः अपसाम् अपःतमा।
रथ-इव बृहती विभ्वने कृता
उपस्तुत्या चिकितुषा सरस्वती।।13।।
4985. सरस्वति अभि नः नेषि वस्यः मा
अप स्फरीः पयसा मा नः आ धक्।
जुषस्व नः सख्या वेश्या च मा
त्वत् क्षेत्राणि अरणानि गन्म।।14।।

## सूक्त 62

4986. स्तुषे नरा दिवः अस्य प्रसन्ता
अश्विना हुवे जरमाणः अर्कैः
या सद्यः उस्त्रा वि-उषि ज्मः अन्तान्
युयूषतः परि उरु वरांसि।।1।।
4987. ता यज्ञम् आ शुचिभिः चक्रमाणा
रथस्य भानुम् रुरुचुः रजःभिः।
पुरु वरांसि अमिता मिमाना
अपः धन्वानि अति याथः अज्रान्।।2।।
4988. ता ह त्यत् वर्तिः यत् अरध्रम् उग्रा
इत्था धियः ऊहथुः शश्वत् अश्वैः।
मनः-जवेभिः इषिरैः शयध्यै
परि व्यथिः दाशुषः मर्त्यस्य।।3।।
4989.ता नव्यसः जरमाणस्य मन्म
उप भूषतः युयुजानसप्ती।
शुभम् पृक्षम् इषम् ऊर्जम् वहन्ता
होता यक्षत् प्रत्नः अध्रुक् युवाना।।4।।
4990. ता वल्गू दस्त्रा पुरुशाकतमा
प्रत्ना नव्यसा वचसा आ विवासे।
या शंसते स्तुवते शम्-भविष्ठा बभूवतुः गृणते
चित्रराती।।5।।
4991. ता भुज्युम् विभिः अत्-भ्यः समुद्रात्
तुग्रस्य सूनुम् ऊहथुः रजःभिः।
अरेणुभुः योजनेभिः भुजन्ता
पतत्रिभिः अर्णसः निः उपस्थात्।।6।।
4992. वि जयुषा रथ्या यातम् अद्रिम्
श्रुतम् हवम् वृषणा वध्रिमत्याः।
दशस्यन्ता शयवे पिप्यथुः
गाम् च्यवाना सुमतिम् भुरण्यू।।7।।
4993. यत् रोदसी प्रदिवः अस्ति भूम
हेडः देवानाम् उत सर्त्यत्रा।
तत् आदित्याः वसवः रुद्रियासः
रक्षःयुजे तपुः अघम् दधात।।8।।
4994. यः ईम् राजानौ ऋतु-था विदधत्
रजसः मित्रः वरुणः चिकेतत्।
गम्भीराय रक्षसे हेतिम् अस्य
द्रोघाय चित् वचसे आनवाय।।9।।

4995. अन्तरैः चक्रैः तनयाय वर्तिः
द्युमता आ यातम् नृवता रथेन।
सनुत्येन त्यजसा मर्त्यस्य
वनुष्यताम् अपि शीर्षा ववृक्तम्।।10।।
4996. आ परमाभिः उत मध्यमाभिः ।
नियुत्-भिः यातम् अवमाभिः अर्वाक्।
दृहडस्य चित् गोमतः वि व्रजस्य
दुरः वर्तम् गृणते चित्रराती।।11।।

## सूक्त 63

4997. क्व त्या वल्गू पुरुहूता अद्य
दूतः न स्तोमः अविदत् नमस्वान्।
आ यः अर्वाक् नासत्या ववर्त
प्रेष्ठा हि असथः अस्य मन्मन्।।1।।
4998. अरम् मे गन्तम् हवनाय अस्मै
गृणाना यथा पिबाथः अन्धः।
परि ह त्यत् वर्तिः याथः रिषः न
यत् परः न अन्तरः तुतुर्यात्।।2।।
4999. अकारि वाम् अन्धसः वरीमन्
अस्तारि बर्हिः सुप्रअयनतमम्।
उत्तानहस्तः युवयुः ववन्द
आ वाम् नक्षन्तः अद्रयः आञ्जन्।।3।।
5000. ऊर्ध्वः वाम् अग्निः अध्वरेषु अस्थात्
प्र रातिः एति जूर्णिनी घृताची।
प्र होता गूर्तमनाः उराणः अयुक्त,
यः नासत्या हवीमन्।।4।।
5001. अधि श्रिये दुहिता सूर्यस्य
रथम् तस्थौ पुरुभुजा शतऊतिम्।
प्र मायाभिः मायिना भूतम् अत्र
नरा नृतू जनिमन् यज्ञियानाम्।।5।।
5002. युवम् श्रीभिः दर्शताभिः आभिः
शुभे पुष्टिम् ऊहथुः सूर्यायाः।
प्र वाम् वयः वपुषे अनु पप्तन्
नक्षत् वाणी सुस्तुता धिष्ण्या वाम्।।6।।
5003. आ वाम् वयः अश्वासः वहिष्ठाः
अभि प्रयः नासत्या वृहन्तु।
प्र वाम् रथः मनःजवाः असर्जि
इषः पृक्षः इषिधः अनु पूर्वी।।7।।
5004. पुरु हि वाम् पुरुभुजा देष्णम्
धेनुम् नः इषम् पिन्वतम् असक्राम्।
स्तुतः च वाम् माध्वी सुस्तुतिः च
रसाः च ये वाम् अनु रातिम् अग्मन्।।8।।
5005. उत मे ऋज्रे पुरयस्य रध्वी
सुमीहेड शतम् पेरुके च पक्वा
शाण्डः दात् हिरणिनः स्मत्दिष्टीन्
दश वशासठः अभिसाचः ऋष्वान्।।9।।
5006. सम् वाम् शत नासत्या सहस्त्रा
अश्वानाम् पुरुपन्थाः गिरे दात्।
भरत्-वाजाय वीर नु गिरे दात् हता
रक्षासि पुरुदंससा स्युरितिस्युः।।10।।
5007. आ वाम् सुम्ने वरिमन् सूरिभिः।।11।।

## सूक्त 64

5008. उत् श्रिये उषसः रोचमानाः
अस्थुः अपाम् न ऊर्मयः रुशन्तः।
कृणोति विश्वा सुपथा सुगानि
अभूत् वस्वी दक्षिणा मघोनी।।1।।
5009. भद्रा ददृक्षे उर्विया वि भासि
उत् ते शोचिः भानवः द्याम् अपप्तन्।
आविः वक्षः कृणुषे शुम्भमाना
उषः देवि रोचमाना महःभिः।।2।।
5010. वहन्ति सीम् अरुणासः रुशन्तः
गावः सुभगाम् उर्विया प्रथानाम्।
अप ईजते शूरः अस्ताइव शत्रून्
बाधते तमः अजिरः न वोहडा।।3।।
5011. सुगा उत ते सुपथा वर्वतेषु
अवाते अपः तरसि स्वभानो।
सा नः आ वह पृथयामन् ऋष्वे
रयिम् दिवः दुहितः इषयध्यै।।4।।
5012. सा आ वह या उक्षभिः अवाता
उषः वरम् वहसि जोषम् अनु।
त्वम् दिवः दुहितः या ह देवी
पूर्वहूतौ महना दर्शता भूः।।5।।
5013. उत् ते वयः चित् वसतेः अपप्तन्
नरः च ये पितुभाजः विउष्टौ।
अमा सते वहसि भूरि वामम्,
उषः देवि दाशुषे मर्त्याय।।6।।

## सूक्त 65

5014. एषा स्या नः दुहिता दिवःजाः
क्षितीः उच्छन्तीः मानुषाः अजीगः।
या भानुना रुशता राम्यासु
अज्ञायि तिरः तमसः चित् अक्तून्।।1।।
5015. वि तत् ययुः अरुणयुक्-भिः अश्वैः
चित्रम् भान्ति उषसः चन्द्ररथाः।
अग्रम् यज्ञस्य बृहतः नयन्तीः
वि ताः बाधन्ते तमः ऊर्म्यायाः।।2।।

5016. श्रवः वाजम् इषम् ऊर्जम् वहन्तीः
नि दाशुषे उषसः मर्त्याय।
मघोनीः वीरवत् पत्यमानाः
अवः धात विधते रत्नम् अद्य।।3।।
5017. इदा हि वः विधते रत्नम् अस्ति
इदा वीराय दाशुषे इषसः।
इदा विप्राय जरते यत् उक्था
नि स्म मावते वहथ पुरा चित्।।4।।
5018. इदा हि ते उषः अद्रिसानो इत्यद्रिसानो
गोत्रा गवाम् अङ्गिरसः गृणन्ति।
वि अर्केण बिभिदुः ब्रह्मणा च
सत्य नृणाम् अभवत् देवहूतिः।।5।।
5019. उच्छ दिवः दुहित प्रत्नवत् नः
भरद्राजवत् विधते मघोनि।
सुवीरम् रयिम् गृणते रिरीहि
उरुगायम् अधि धहि श्रवः नः।।6।।

## सूक्त 66

5020. वपुः नु तत् चिकितुषे चित् अस्तु
समानम् नाम धेनु पत्यमानम्।
मर्तेषु अन्यत् दोहसे पीपाय
सकृत् शुक्रम् दुदुहे पृश्निः ऊधः।।1।।
5021. ये अग्नयः न शोशुचन् इधानाः
द्विः यत् त्रिः मरुतः ववृधन्त।
अरेणवः हिरण्ययासः एषाम्
साकम् नृम्णै पौंस्येभिः च भूवन्।।2।।
5022. रुद्रस्य ये मीहडुषः सन्ति
यान् चो नु दाधृविः भरधयै।
विदे हि माता महः मही सा सा
इत् पृश्निः सुभ्वे गर्भम् आ अधात्।।
5023. न ये ईषन्ते जनुषः अया नु
अन्तः सन्तः अवद्यानि पुनानाः।
निः यत् दुह्रे शुचयः अनु जोषम्
अनु श्रिया तन्वम् उक्षमाणाः।।4।।
5024. मक्षु न येषु दोहसे चित् अयाः
आ नाम धृष्णु मारुतम् दधानाः।
न ये स्तौनाः अयासः मह्न नु
चित् सुदानुः अव यासत् उग्रान्।।5।।
5025. ते इत् उग्राः शवसा धृष्णुसेनाः
उभे युजन्त रोदसी सुमेके।
अध स्म एषु रोदसी स्वशोचिः
आ अमवत्-सु तस्थौ न रोकः।।6।।
5026. अनेनः वः मरुतः यामः अस्तु
अनश्वः चित् यम् अजति अरथीः।
अमवसः अनभीशुः रजःतूः
वि रोदसी पथ्याः याति साधन्।।7।।
5027. न अस्य वर्ता न तरुता नु अस्ति
मरुतः यम् अवथ वाजसातौ।
तोके वा गोषु तनये यम्
अप्-सु सः व्रजम् दर्ता अध द्यो।।8।।
5028. प्र चित्रम् अर्कम् गृणते तुराय
मारुताय स्वतवसे भरध्वम्।
ये सहांसि सहसा सहन्ते,
रेजते अग्ने पृथिवी मखेभ्यः।।9।।
5029. त्विषिमन्तः अध्वरस्यइव दिद्युत्
तृषु-च्यवसः जुह्वः न अग्नेः।
अर्चत्रयः धुनयः न वीराः
भ्राजत्-जन्मानः मरुतः अधृषटाः।।10।।
5030. तम् वृधन्तम् मारुतम् भ्राजत्-ऋष्टिम्
रुद्रस्य सूनुम् हवसा आ विवासे।
दिवः शर्धाय शुचयः मनीषाः
गिरयः न आप उग्राः अस्पृध्रन्।।11।।

## सूक्त 67

5031. विश्वेषाम् वः सताम् ज्येष्ठतमा
गीःभिः मित्रावरुणा ववृधध्यै।
सम् या रश्माइव यमतुः यमिष्ठा
द्वा जनान् असमा बाहुभिः स्वैः।।1।।
5032. इयम् मत् वाम् प्र स्तृणीते मनीषा
उप प्रिय नमसा बर्हिः अच्छ।
यन्तम् नः मित्रावरुणौ अधृष्ठम्
छर्दिः यत् वाम् वरूथ्यम् सूदानु।।2।।
5033. आ यातम् मित्रावरुणा सुशस्ति
उप प्रिया नमसा हूयमाना।
सम् यौ अप्नःस्थः अपसाइव जनान्
श्रुधयतः चित् यतथः महित्वा।।3।।
5034. अश्वा न या वाजिना पूतबन्धू
ऋता यत् गर्भम् अदितिः भरध्यै।
प्र या महि महान्ता जायमाना
घोरा मर्ताय रिपवे नि दिधः।।4।।
5035. विश्वे यत् वाम् महना मन्दमानाः
क्षत्रम् देवासः अदधुः सजोषाः।
परि यत् भूथः रोदसी चित् उर्वी
सन्ति स्पशः अदब्धासः अमूराः।।5।।
5036. ता हि क्षत्रम् धारयेथे अनु
द्युन् दृहेथे सानुम् उपमात्इव द्योः।

दृहडः नक्षत्रः उत विश्वदेवः
भूमिम् आ अतान् द्याम् धासिना आयोः।।6।।
5037. ता विग्रम् धैथे जठरम् पृणध्यै
आ यत् सद्म सभृतयः पृणन्ति।
न मृष्यन्ते युवतयः अवाताः
वि यत् पयः विश्वजिन्वा भरन्ते।।7।।
5038. ता जिह्वया सदम् आ इदम् सुमेधाः
आ यत् वाम् सत्यः अरतिः ऋते भूत्।
तत् वाम् वहित्वम् घृतअनौ अस्तु
युवम् दाशुषे वि चयिष्टम् अंहः।।8।।
5039. प्र यत् वाम् मित्रावरुणा स्पूर्धन्
प्रिया धाम युवधिता मिनन्ति।
न ये देवासः ओहसा न मताः
अयज्ञसाचः अप्यः न पुत्राः।।9।।
5040. वि यत् वाचम् कीस्तासः भरन्ते
शंसन्ति के चित् निविदः मनानाः।
आत् वाम् ब्रवाम सत्यानि उक्था
नकिः देवेभिः यतथः सहित्वा।।10।।
5041. अवोः इत्था वाम् छर्दिषः अभिष्टौ
युवोः मित्रावरुणौ अस्कृधोयु।
अनु यत् गावः स्फुरान् ऋजिप्यम्
धृष्णुम् यत् रणे वृषणम् युनजन्।।11।।

## सूक्त 68

5042. श्रुष्टी वाम् यज्ञः उत्-यतः सजोषाः
मनुष्वत् वृक्तबर्हिषः यजध्यै।
आ यः इन्द्रवरुणौ इषे अद्य
महे सुम्नाय महे आववर्तत्।।1।।
5043. ता हि श्रेष्ठा देवताता तुजा
शूरणाम् शविष्ठा ता हि भूतम्।
मघोनाम् महिष्ठा तुविशुष्मा,
ऋतेन वृत्रतुरा सर्वसेना।।2।।
5044. ता गृणीहि नमस्येभिः शूषैः
सुम्नेभिः इन्द्रावरुणा चकाना।
वज्रेण अन्यः शवसा हन्ति वृत्रम्
सिसक्ति अन्यः वृजनेषु विप्रः।।3।।
5045. ग्नाः च यत् नरः च ववृधन्त
विश्वे देवासः नराम् स्वगूर्ताः।
प्र एभ्यः इन्द्रावरुणा महित्वा,
द्यौः च पृथिवि भूतम् उर्वी।।4।।
5046. सः इत् सुदानुः स्ववान् ऋतवा
इन्द्रा यः वां वरुणा दाशति त्मन्।
इषा सः द्विषः तरेत् दास्वान्
वसत् रयि रयिवतः च जनान्।।5।।
5047. यम् युवम् दाशुअध्वराय देवा
रयिम् धत्थः वसुमन्तम् पुरुक्षुम्।
अस्मे सः इन्द्रावरुणा वसु स्यात्
प्र यः भनक्ति वनुषाम् अशस्तीः।।6।।
5048. उत नः सुत्रात्रः देवगोपाः
सूरिभ्यः इन्द्रावरुणा रयिः स्यात्।
येषाम् शुष्मः पृतनासु सह्वान्
प्र सद्यः द्युम्ना तिरते ततुरिः।।7।।
5049. नु नः इन्द्रावरुणा गृणाना
पृङ्गन् रयिम् सौश्रवसाय देवा।
इत्था गृणन्तः महिनस्य शर्धः
अपः न नावा दुःइता तरेम।।8।।
5050. प्र सम्-राजे बृहते मन्म नु प्रियम्
अर्च देवाय वरुणाय सप्रथः।
अयम् यः उर्वी महिना महिव्रतः
क्रत्वा विभाति अजरः न शोचिषा।।9।।
5051. इन्द्रावरुणा सुतपौ इमम् सुतम्
सुतम् सोमम् पिबतम् मद्यम् धृतव्रता।
युवोः रथः अध्वरम् देववीतये
प्रति स्वसरम् उप याति पीतये।।10।।
5052. इन्द्रावरुणा मधुमत्तमस्य
वृष्णः सोमस्य वृषणा आ वृषेथाम्।
इदम् वाम् अन्धः परिसिक्तम् अस्मे
आसद्य अस्मिन् बर्हिषि मादयेथाम्।।11।।

## सूक्त 69

5053. सम् वाम् कर्मणा सम् इषा हिनोमि
इन्द्राविष्णू अपसः पारे अस्य।
जुषेथाम् यज्ञम् द्रविणम् च धत्तम्
अरिष्टैः नः पथिभिः पारयन्ता।।1।।
5054. या विश्वासाम् जनितारा मतीनाम्
इन्द्रविष्णू कलशा सोमधाना।
प्र वाम् गिरः शस्यमानाः अवन्तु
प्र स्तोमासः गीयमानासः अर्कैः।।2।।
5055. इन्द्राविष्णू मदपती मदानाम्
आ सोमम् यातम् द्रविणो दधाना।
सम् वाम् अञ्जन्तु अक्तुभिः मतीनाम्
सम् स्तोमासः शस्यमानासः उक्थैः।।3।।
5056. आ वाम् अश्वासः अभिमातिसहः
इन्द्राविष्णू सधमादः वहन्तु।
जुषेथाम् विश्वा हवना मतीनाम्
उप ब्रह्माणि श्रृणुतम् गिरः मे।।4।।

5057. इन्द्राविष्णू तत् पनयाय्यम् वाम्
सोमस्य मदे उरु चक्रमाथे।
अकृणुतम् अन्तुरिक्षम् वरीयः
अप्रथतम् जीवसे नः रजांसि ।।5।।
5058. इन्द्राविष्णू हविषा ववृधाना
अग्रअद्वाना नमसा रातहव्या।
घृतासुती घृतआसुती द्रविणम् धत्तम्
अस्मे समुद्रः स्थः कलशः सोमधानः।।6।।
5059. इन्द्राविष्णू पिबतम् मध्वः अस्य
सोमस्य दस्त्रा जठरम् पृणेथाम्।
आ वाम् अन्धासि मदिराणि अग्मन्
उप ब्रह्माणि श्रृणुतम् हवम् मे।।7।।
5060. उभा जिग्यथुः न परा जयेथे
न परा जिग्ये कतरः चन एनोः।
इन्द्रः च विष्णो यत् अपस्पृधेथाम्
त्रेधा सहस्त्रम् वि तत् ऐरयेथाम्।।8।।

## सूक्त 70

5061. घृतवती भुवनानाम् अभि-श्रिया
उर्वी पृथ्वी मधुदुघे सुपेशसा।
द्यावापृथिवी वरुणस्य धर्मणा
विस्कभिते अजरे भूरिरेतसा।।1।।
5062. असश्र्वन्ती भूरिधारे पयस्वती
घृतम् दुहाते सुकृते शुचिव्रते।
राजन्ती अस्य भुवनस्य रोदसी
अस्मे रेतः सिञ्चतम् यत् मनुः हितम्।।2।।
5063. यः वाम् ऋजवे क्रमणाय रोदसी
मर्तः ददाश धिषणे सः साधति।
प्र प्रजाभिः जायते धर्मणः परि
युवोः सिक्ता विषुरूपाणि सव्रता।।3।।
5064. घृतेन द्यावपृथिवी अभिवृते इत्यभिवृते
घृतश्रिया घृतपृचा घतवृधा।
उर्वी पृथ्वी होतृवूर्ये पुरोहिते पुरः
हिते ते इत् विप्राः ईडते सुम्नम् इष्टये।।4।।
5065. मधु नः द्यावापृथिवी मिमिक्षताम्
मधुश्र्वुता मधुदुघे मधुव्रते।
दधाने यज्ञम् द्रविणम् च देवता
महि श्रवः वाजम् अस्मे सुवीर्यम्।।5।।
5066. ऊर्जम् नः द्यौः च पृथिवी च पिन्वताम्
पिता माता विश्वविदा सुदंससा।
सरराणे रोदसी विश्वशम्भुवा
सनिम् वाजम् रयिम् अस्मे सम् इन्वताम्।।6।।

## सूक्त 71

5067. उत् उ स्यः देवः सविता हिरण्यया
बाहू अयंस्त सवनाय सुक्रतुः।
धृतेन पाणी अभि प्रुष्णुते मखोः
युवा सुदक्षः रजसः विधर्मणि।।1।।
5068. देवस्य वयम् सवितुः सवीमनि
श्रेष्ठे स्याम् वसुनः च दावने।
यः विश्वस्य द्विपदः यः चतुःपदः
निवेशने प्रसवे च असि भूमनः।।2।।
5069. अदब्धेभिः सवितः पायुभिः त्वम्
शिवेभिः अद्य परि पाहि नः गयम्।
हिरण्यजिह्वः सुविताय नव्यसे
रक्ष माकिः नः अघशसः ईशत।।3।।
5070. उत् उ स्यः देवः सविता दमूनाः
हिरण्यपाणिः प्रतिदोषम् अस्थात्।
अयःहनुः यजतः मन्द्रजिह्वः
आ दाशुषे सुविति भूरि वामम्।।4।।
5071. उत् उ अयान् उपवक्ताइव बाहू
हिरण्यया सविता सुप्रतीका।
दिवः रोहांसि अरूहत् पृथिव्याः
अरीमत् पतयत् कत् चित् अभ्वम्।।5।।
5072. वामम् अद्य सविताः वामम् उ श्वः
दिवे-दिवे वामम् अस्मभ्यम् सावीः।
वामस्य हि क्षयस्य देव भूरेः
अया धिया वामभाजः स्याम।।6।।

## सूक्त 72

5073. इन्द्रासोमा महि तत् वाम् महित्वम्
युवम् महानि प्रथमानि चक्रथुः।
युवम् सूर्यम् विविदथुः युवम् स्वः
विश्वा तमांसि अहतम् निदः च।।1।।
5074. इन्द्रासोमा वासयथः उषसम्
उत् सूर्यम् नयथः ज्योतिषा सह।
उप द्याम् स्कम्भथुः स्कम्भनेन
अप्रथतम् पृथिवीम् मारम् वि।।2।।
5075. इन्द्रासोमौ अहिम् अपः परिस्थाम्
हथः वृत्रम् अनु वाम् द्यौः अमन्यत।
प्र अर्णांसि ऐरयतम् नदीनाम्
आ समुद्राणि पप्रथुः पुरूणि।।3।।
5076. इन्द्रासोमा पक्वम् आमासु अन्तुः
नि गवाम् इत् दधथुः वक्षणासु।
जगृभथूः अनपिनद्धम् आसु रुशत् चित्रासु जगतीषु अन्तः।4
5077. इन्द्रासोमा युवम् अङ्ग तरुत्रम्
अपत्यसाचम् श्रुत्यम् रराथे।

युवम् शुष्मम् नर्यम् चर्षणिभ्यः
सम् विव्यथुः पृतनासहम् उग्रा।।5।।

## सूक्त 73

5078. यः अद्रिभित् प्रथमजाः ऋतवा
बृहस्पतिः आङ्गिरसः हविष्मान्।
द्विबर्हज्मा प्राघर्मसत् पिता नः
आ रोदसी वृषभः रोरवीति।।1।।
5079. जनाय चित् यः ईवते सोकम्
बृहस्पतिः देवहूतौ चकार।
घ्नन् वृत्राणि वि पुरः दर्दरीति
जयन् शत्रून् अमित्रान् पृत्-सु सहन्।।2।।
5080. बृहस्पतिः सम् अजयत् वसूनि
महः व्रजान् गोमतः देवः एषः।
अपः सिसासन् स्वः अप्रतिइतः
बृहस्पतिः हन्ति अमित्रम् अर्कैः।।3।।

## सूक्त 74

5081. सोमारुद्रा धारयेथाम् असुर्यम्
प्र वाम् इष्टयः अरम् अश्नुवन्तु।
दमे-दमे सप्त रत्ना दधाना शम्
नः भूतम् द्विपदे शम् चतुःपदे।।1।।
5082. सोमारुद्रा वि वृहतम् विषूचीम्
अमीवा या नः गयम् आविवेश।
आरे बाधेथाम् निःऋतिम् पराचैः
अस्मे भद्रा सौश्रवसानि सन्तु।।2।।
5083. सोमारुद्रा युवम् एतानि अस्मे
विश्वा तनूषु भेषजानि धत्तम्।
अव स्यतम् मुञ्चतम् यत् नः अस्ति
तनूषु बद्धम् कृतम् एनः अस्मत्।।3।।
5084. तिग्म आयुधौ तिग्महेती सुशेवौ
सोमारुद्रौ इह सु मृडतम् नः।
प्र नः मुञ्चतम् वरुणस्य पाशात्
गोपायतम् नः सुमनस्यमाना।।4।।

## सूक्त 75

5085. जीमूतस्यइव भवति प्रतीकम्
यत् वर्मी याति समदाम् उपस्थे।
अनाविद्धया तन्वा जय त्वम्
सः वर्मणः माहिमा पिपर्तु।।1।।
5086. धन्वना गाः धन्वना आजिम् जयेम
धन्वना तीव्राः समदः जयेम।
धनुः शत्रोः अपकामम् कृणोति
धन्वना सर्वाः प्रदिशः जयेम।।2।।
5087. वक्ष्यन्तीइव इत् आ गनीगन्ति
कर्णम् प्रियम् सखायम् परिसस्वजाना।
योषाइव शिङ्क्ते वितता अधि
धन्वन् ज्या इयम् समने पारयन्ती।।3।।
5088. ते आचरन्ती इत्याचरन्ती समनाइव
योषा माताइव पुत्रम् बिभुताम् उपस्थे।
अप शत्रून् विध्यताम् संविदाने सम्-विदाने
आर्त्नी इमे विस्फुरन्ती अमित्रान्।।4।।
5089. बह्विनाम् पिता बहुः अस्य पुत्रः
चिश्चा कृणोति समना अवगत्य।
इषुधिः सङ्काः पृतनाः च सर्वाः
पृष्ठे निनद्धः जयति प्रसूतः।5।
5090. रथे तिष्ठन् नयति वीजिनः पुरः
यत्र-यत्र कामयते सुसारथिः।
अभीशूनाम् महिमानम् पनायत
मनः पश्चात् अनु यच्छन्ति रश्मयः।।6।।
5091. तीव्रान् घोषान् कृण्वते वृषपाणयः
अश्वाः रथेभिः सह वाजयन्तः।
अवक्वामन्तः प्रपदैः अमित्रान्
क्षिणन्ति शत्रून् अनपव्ययन्तः।।7।।
5092. रथवाहनम् हविः अस्य नाम
यत्र आयुधम् निहितम् अस्य वर्म।
तर्म रथम् उप शग्मम् सेदेम
विश्वाहा बयम् सुमनस्यमानाः।।8।।
5093. स्वादुसंसदः पितरः वयःधाः
कृच्छ्रेश्रितः शक्तिवन्तः गभीराः।
चित्रसेनाः इषुबलाः अमृध्राः सतवीराः उरवः व्रातसहाः।।9।।
5094. ब्रह्मणासः पितरः सोम्यासः
शिवे नः द्यावापृथिवी अनेहसा।
पूषा नः पातु दुःइतात् ऋतवृधः
रक्ष माकिः नः अघशंसः ईशतः।।10।।
5095. सुपर्णम् वस्ते मृगः अस्याः दन्तः
गोभिः सम्-नद्धा पतति प्रसूता।
यत्र नरः सम् च वि च द्रवन्ति
तत्र अस्मभ्यम् इषवः शर्म यसन्।।11।।
5096. ऋजीते परि नवृङ्ग्धि नः अश्मा भवतु नः तनूः।
सोमः अधि ब्रवीतु नः अदितिः शर्म यच्छतु।।12।।
5097. आ जङ्गन्ति सानु एषाम् जघनान् उप जिघ्नते।
अश्वअजनि प्रचेतसः अश्वान् समत्-सु चोदय।।13।।
5098. अहिःइव भोगैः परि एति बाहुम्
ज्यायाः हेतिम् परिबाधमानः।
हस्तघ्नः विश्वा वयुनानि विद्वान्
पुमान् पुमांसम् परि पातु विश्वतः।।14।।
5099. आलअक्ता या रुरुशीषर्णी अथो यस्याः अयः

मुखम्।
इदम् पर्जन्यरेतसे इष्वै देव्यै बृहत् नमः।।15।।
5100. अवसृष्टा परा पत शरव्ये ब्रह्मसंशिते।
गच्छ अमित्रान् प्र पद्यस्व मा
अमीषाम् कम् चन उत् शिषः।।16।।
5101. यत्र बाणाः सम्-पतन्ति कुमाराः विशिखाःइव।
तत्र नः ब्रह्मणः पतिः अदितिः शर्म
यच्छतु विश्वाहा शर्म यच्छतु।।17।।
5102. मर्माणि ते वर्मणा छादयामि सोमः
त्वा राजा अमृतेन अनु वस्ताम्।
उरोः वरीयः वरुणः ते कृणोतु
जयन्तम् त्वा अनु देवाः मदन्तु।।18।।
5103. यः नः स्वः अरणः यः च निष्टयः जिघांसति।
देवाः तम् सर्वे धूर्वन्तु ब्रहम वर्म मम अन्तरम्।।19।।

## ।। इति षष्ठं मण्डलं ।।

ॐ

# ।।अथ सप्तमम् मण्डलम्।।

## सूक्त 1

5104. अग्निम् नरो दीधिति-भिः,
अरण्योः हस्त-च्युती जनयन्त,
प्र-शस्तम्, दूरे-दृशम् गृह-पतिम् अथर्युम्।।1।।
5105. तम् अग्निम् अस्ते वसवो नि ऋण्वन्,
सु-प्रतिक्षम् अवसे कुतः चित्।
दक्षाय्यो यो दम् आस नित्यः।।2।।
5106. प्र-इद्धो अग्ने दीदिहि पुरो,
नो अजस्रया सूर्म्या यविष्ठ।
त्वाम् शश्वन्त उप यन्ति वाजाः।।3।।
5107. प्र ते अग्नयो अग्नि-भ्यो वरम्,
नि सु-वीरासः शोशुचन्त द्यु-मन्तः।
यत्रा नरः सम् आसते सु-जाताः।।4।।
5108. दा नो अग्ने धिया रयिम्,
सु-वीरम् सु-अपत्यम् सहस्य प्रशस्तम्।
न यम् यावा तरति यातु-मावान्।।5।।
5109. उप यम् एति युवतिः सु-दक्षम्,
दोषा वस्तोः हविष्मती घृताची।
उप स्वा एनम् अरमतिः वसू-युः।।6।।
5110. विश्वा अग्ने अप दह अरातीः,
येभिः तपोः-भि अदहः जरूथम्।
प्र नि-स्वरम् चातयस्व अमीवाम्।।7।।
5111. आ यः ते अग्ने इधते अनीकम्,
वसिष्ठ शुक्र दीदिवः पावक।
उतो न एभिः स्तवथैः इह स्याः।।8।।
5112. वि ये ते अग्ने भिजिरे अनीकम्,
मर्ता नरः पित्र्यासः पुरु-त्रा।
उतो न एभिः सु-मना इह स्याः।।9।।
5113. इमे नरो वृत्र-हत्येषु शूरा,
विश्वा अदेवीः अभि सन्तु मायाः।
ये मे धियम् पनयन्त प्र-शस्ताम्।।10।।
5114. मा शूने अग्ने नि षदाम नृणाम्,
मा अशेषसो अवीरता परि त्वा।
प्रजा-वतीषु दुर्यासु दुर्य।।11।।

5115. यम् अश्वी नित्यम् उप-याति यज्ञम्,
प्रजा-वन्तम् सु-अपत्यम् क्षयम् नः।
स्व-जन्मना शेषसा वावृधानम्।।12।।
5116. पाहि नो अग्ने रक्षसो अजुष्टात्,
पाहि धूर्तेः अररुषो अघायोः।
त्वा युजा पृतना-यून् अभि ष्याम्।।13।।
5117. स इत् अग्निः अग्नीन् अति अस्तु,
अन्यान् यत्र वाजी तनयो वीडु-पाणिः।
सहस्र-पाथा अक्षरा सम्-एति।।14।।
5118. स इत् अग्निः यो वनुष्यतो नि-पाति,
सम्-एद्धारम् अंहसः उरुष्यात्।
सु-जातासः परि चरन्ति वीराः।।15।।
5119. अयम् सो अग्निः आ-हुतः पुरु-त्रा यम्,
ईशानः सम् इत् इन्धे हविष्मान्।
परि यम् एति अध्वरेषु होता।।16।।
5120. त्वे अग्न आ-हवनानि भूरि,
ईशानास आ जुहुयाम नित्या।
उभा कृण्वन्तो वहतू मियेधे।।17।।
5121. इमो अग्ने वीत-तमानि हव्या हव्या,
अजस्रो वक्षि देव-तातिम् अच्छ।
प्रति न ईम् सुरभीणि व्यन्तु।।18।।
5122. मा नो अग्ने-अवीरते परा दा,
दुः-वाससे अमतये मा नो अस्यै।
मा नः क्षुधे मा रक्षस ऋता-वो,
मा नो दमे मा वन आ जुहूर्थाः।।19।।
5123. नू मे ब्रह्माणि अग्न उत् शशाधि,
त्वम् देव मघवत्-भ्यः सु-षूदः।
रातौ स्याम उभयास आ ते यूयम्,
पात स्वस्ति-भिः सदा नः।।20।।
5124. त्वम् अग्ने सु-हवो रण्व-सन्दृक्,
सु-दीती सूनो सहसो दिदीहि।
मा त्वे सचा तनये नित्य आ धक्,
मा वीरो अस्मत् नर्यो वि दासीत्।।21।।
5125. मा नो अग्ने दुः-भृतये सचा,
एषु देव-इद्धेषु अग्निषु प्र वोचः।
मा ते अस्मान् दुः-मतयो भृमात् चित्,
देवस्य सूनो सहसो नशन्त।।22।।
5126. स मर्तो अग्ने सु-अनीक रेवान्,
अमर्त्ये य आ-जुहोति हव्यम्।
स देवता वसु-वनिम् दधाति,
यम् सूरिः अर्थी पृच्छमान एति।।23।।
5127. महो नो अग्ने सु-वितस्य विद्वान्,
रयिम् सूरि-भ्य आ वहा बृहन्तम्।
येन वयम् सहसा-वन् मदेम,
अवि-क्षितास आयुषा सु-वीराः।।24।।
5128. नू मे ब्रह्माणि अग्न उत् शशाधि,
त्वम् देव मघवत्-भ्यः सु-षूदः।
रातौ स्याम उभयास आ ते यूयम्,
पात स्वस्ति-भिः सदा नः।।25।।

## सूक्त 2

5129. जुषस्व नः सम्-इधम् अग्ने अद्य,
शोच बृहत् यजतम् धूमम् ऋण्वन्।
उप स्पृश दिव्यम् सानु स्तूपैः,
सम् रश्मि-भिः ततनः सूर्यस्य।।1।।
5130. नराशंसस्य महिमानम् एषाम्,
उप स्तोषाम यजतस्य यज्ञैः।
ये सु-क्रतवः शुचयो धियम्-धाः,
स्वदन्ति देवा उभयानि हव्या।।2।।
5131. ईडेन्यम् वो असुरम् सु-दक्षम्,
अन्तः दूतम् रोदसी सत्य-वाचम्,
मनुष्वत् अग्निम् मनुना सम्-इद्धम्,
सम् अध्वराय सदम् इत् महेम।।3।।
5132. सपर्यवो भरमाणा अभि-ज्ञु,
प्र वृञ्जते नमसा बर्हिः अग्नौ।
आ-जुह्वानः घृत-पृष्ठम् पृषत्-वत्,
अध्वर्यवो हविषा मर्जयध्वम्।।4।।
5133. सु-आध्यो वि दुरो देव-यन्तो,
अशिश्रयूः रथ-युः देव-ताता।
पूर्वी शिशुम् न मातरा रिहाणे सम्,
अग्रुवो न समनेषु अञ्जन्।।5।।
5134. उत योषणे दिव्ये मही न,
उषसानक्ता सुदुघा-इव धेनुः।
बर्हि-षदा पुरु-हूते मघोनी,
आ यज्ञिये सुविताय श्रयेताम्।।6।।
5135. विप्रा यज्ञेषु मानुषेषु कारू,
मन्ये वाम् जात-वेदसा यजध्यै।
ऊर्ध्वम् नो अध्वरम् कृतम्,
हवेषु ता देवेषु वनथो वार्याणि।।7।।
5136. आ भारती भारतीभिः सु-जोषा,
इड देवैः मनुष्येभिः अग्निः।
सरस्वती सारस्वतेभिः अर्वाक् तिस्रो,
देवीः बर्हिः आ इदम् सदन्तु।।8।।
5137. तत् न तुरीपम् अध पोषयित्नु,
देव त्वष्टः वि रराणः स्यस्व।
यतो वीरः कर्मण्यः सु-दक्षो,

युक्त-ग्रावा जायते देव-कामः।।9।।
5138. वनस्पते अव सृज उप देवान्,
अग्निः हविः शमिता सूदयाति।
स इत उ होता सत्-तरो यजाति,
यथा देवानाम् जनिमानि वेद।।10।।
5139. आ याहि अग्ने सम्-इधानो अर्वाङ्,
इन्द्रेण देवैः स-रथम् तुरेभिः।
बर्हिः नः आस्ताम् अदितिः सु-पुत्राः स्वाहा,
देवा अमृता मादयन्ताम्।।11।।

## सूक्त 3

5140. अग्निम् वो देवम् अग्नि-भिः स-जोषा,
यजिष्ठम् दूतम् अध्वरे कृणुध्वम्।
यो मर्त्येषु नि-ध्रुविः ऋता-वा तपुः,
मूर्धा घृत-अन्नः पावकः।।1।।
5141. प्रोथत् अश्वो न यवसे अविष्यन्,
यदा महः सम्-वरणात्।
वि अस्थात् आत् अस्य वातो अनु वाति,
शोचिः अध स्म ते व्रजनम् कृष्णम् अस्ति।।2।।
5142. उत् यस्य ते नव-जातस्य वृष्णो,
अग्ने चरन्ति अजरा इधानाः।
अच्छ द्याम् अरुषो धूम एति,
सम् दूतो अग्न ईयसे हि देवान्।।3।।
5143. वि यस्य ते पृथिव्याम् पाजो अश्रेत् तृषु,
यत् अन्ना सम्-अवृक्त जम्भैः।
सेना-इव सृष्टा प्र-सितिः त एति,
यवम् न दस्म जुह्व विवेक्षि।।4।।
5144. तम् इत् दोषा तम् उषसि यविष्ठम्,
अग्निम् अत्यम् न मर्जयन्त नरः।
नि-शिशाना अतिथिम् अस्य योनौ,
दीदाय शोचिः आ-हुतस्य वृष्ण।।5।।
5145. सु-सन्दृक् ते सु-अनीक प्रतीकम्,
वि यत् रुक्मो न रोचस उपाके।
दिवो न ते तन्यतुः एति शुष्मः,
चित्रो न सूरः प्रति चक्षि भानुम्।।6।।
5146. यथा वः स्वाहा अग्नये दाशेम,
परि इडाभिः घृतवत्-भिः च हव्यैः।
तेभिः नो अग्ने अमतैः महो-भिः,
शतम् पूः-भिः आयसीभिः नि पाहि।।7।।
5147. या वा ते सन्ति दाशुषे अधृष्टा,
गिरो वा याभिः नृ-वतीः उरुष्याः।
ताभिः नः सूनो सहसो नि पाहि,
स्मत् सूरीन् जरितृन् जात-वेदः।।8।।
5148. निः यत् पूता-इव स्व-धितिः शुचिः,
गात् स्वया कृपा तन्वा रोचमानः।
आ यो मात्रोः उशेन्यो जनिष्ट,
देव-यज्याय सु-क्रतुः पावकः।।9।।
5149. एता नो अग्ने सौभगा दिदीहि,
अपि क्रतुम् सु-चेतसम् वतेम।
विश्वा स्तोतृ-भ्यो गृणते च सन्तु,
यूयम् पात स्वस्ति-भिः सदा नः।।10।।

## सूक्त 4

5150. प्र वः शुक्राय भानवे भरध्वम्,
हव्यम् मतिम् च अग्नये सु-पूतम्।
यो दैव्यानि मानुषा जनूंषि,
अन्तः विश्वानि विद्मना जिगाति।।1।।
5151. स गृत्सो अग्निः तरुणः चित्,
अस्तु यतो यविष्ठो अजनिष्ट मातुः।
सम् यो वना युवते शुचि-दन् भूरि चित्,
अन्ना सम् इत् अत्ति सद्यः।।2।।
5152. अस्य देवस्य सम्-सदि अनीके,
यम् मर्तासः श्येतम् जगृभ्रे।
नि यो गृभम् पौरुषेयीम् उवोच,
दुः-ओकम् अग्निः आयवे शुशोच।।3।।
5153. अयम् कविः अकविषु प्र-चेता,
मर्तेषु अग्निः अमृतो नि धायि।
स मा नो अत्र जुहुरः सहस्वः,
सदा त्वे सु-मनसः स्याम।।4।।
5154. आ यो योनिम् देव-कृतम् ससाद,
क्रत्वा हि अग्निः अमृतान् अतारीत्।
तम् ओषधीः च वनिनः च गर्भम्,
भूमिः च विश्व-धायसम् बिभर्ति।।5।।
5155. ईशे हि अग्निः अमृतस्य भूरे,
ईशे रायः सु-वीर्यस्य दातोः।
मा त्वा वयम् सहसा-वन् अवीराः,
मा अप्सवः परि षदाम मा अदुवः।।6।।
5156. परि-सद्यम् हि अरणस्य रेक्णो,
नित्यस्य रायः पतयः स्याम।
न शेषो अग्ने अन्य-जातम् अस्ति,
अचेतानस्य मा पथो वि दुक्षः।।7।।
5157. नहि ग्रभाय अरणः सु-शेवो,
अन्य-उदर्यो मनसा मन्तवा उ।
अधा चित् ओकः पुनः इत् स एति,
आ नो वाजी अभीषाट् एतु नव्यः।।8।।
5158. त्वम् अग्ने वनुष्यतो नि पाहि,

त्वम् उ नः सहसा-वन् अवद्यात्।
सम् त्वा ध्वस्मन्-वत् अभि एतु,
पाथः सम् रयिः स्पृहयाय्यः सहस्री।।9।।
5159. एता नो अग्ने सौभगा दिदीहि,
अपि क्रतुम् सु-चेतसम् वतेम।
विश्वा स्तोतृ-भ्यो गृणते च सन्तु यूयम्,
पात स्वस्ति-भिः सदा नः।।10।।

## सूक्त 5

5160. प्र अग्नये तवसे भरध्वम्,
गिरम् दिवो अरतये पृथिव्याः।
यो विश्वेषाम् अमृतानाम् उप-स्थे,
वैश्वानरो वावृदे जागृवत्-भिः।।1।।
5161. पृष्टो दिवि धायि अग्निः पृथिव्याम्,
नेता सिन्धूनाम् वृषभः स्तियानाम्।
स मानुषीः अभि विशो वि भाति,
वैश्वानरो वावृधानो वरेण।।2।।
5162. त्वत् अभि विश आयन् असिक्नीः,
असमना जहतीः भोजनानि।
वैश्वानर पूरवे शोशुचानः पूरवे शोशुचानः,
पुरो यत् अग्ने दरयन् अदीदेः।।3।।
5163. तव त्रि-धातु पृथिवी उत द्यौः,
वैश्वानर व्रतम् अग्ने सचन्त।
त्वम् भासा रोदसी आ ततन्थ,
अजस्रेण शोचिषा शोशुचानः।।4।।
5164. त्वाम् अग्ने हरितो वावशाना,
गिरः सचन्ते धुनयो घृताचीः।
पतिम् कृष्टीनाम् रथ्यम् रयीणाम्,
वैश्वानरम् उषसाम् केतुम् अह्नाम्।।5।।
5165. त्वे असुर्यम् वसवो नि ऋण्वन्,
क्रतुम् हि ते मित्र-महो जुषन्त।
त्वम् दस्यून् ओकसो अग्न आजः,
उरु ज्योतिः जनयन् आर्याय।।6।।
5166. स जायमानः परमे वि-ओमन्,
वायुः न पाथः परि पासि सद्यः।
त्वम् भुवना जनयन् अभि क्रन्,
अपत्याय जात-वेदो दशस्यन्।।7।।
5167. ताम् अग्ने अस्मे इषम् आ ईरयस्व,
वैश्वानर द्यु-मतीम् जात-वेदः।
यया राधः पिन्वसि विश्व-वार,
पृथु श्रवो दाशुषे मर्त्याय।।8।।
5168. तम् नो अग्ने मघवत्-भ्यः पुरु-क्षुम्,
रयिम् नि वाजम् श्रुत्यम् युवस्व।
वैश्वानर महि नः शर्म यच्छ,
रुद्रेभिः अग्ने वसु-भिः स-जोषाः।।9।।

## सूक्त 6

5169. प्र सम्-राजो असुरस्य प्र-शस्तिम्,
पुंसः कृष्टीनाम् अनु-माद्यस्य।
इन्द्रस्य-इव प्र तवसः कृतानि,
वन्दे दारुम् वन्दमानो विवक्मि।।1।।
5170. कविम् केतुम् धासिम् भानुम्,
अद्रेः हिन्वन्ति शम् राज्यम् रोदस्योः।
पुरम्-दरस्य गीः-भिः आ विवासे,
अग्नेः व्रतानि पूर्व्या महानि।।2।।
5171. नि अक्रतून ग्रथिनो मृध-वाचः,
पणीन् अश्रद्धान् अवृधान् अयज्ञान्।
प्र-प्र तान् दस्यून् अग्निः विवाय,
पूर्वः चकार अपरान् अयज्यून्।।3।।
5172. यो अपाचीने तमसि मदन्तीः,
प्राचीः चकार नृ-तम् शचीभिः।
तम् ईशानम् वस्वो अग्निम् गृणीषे,
अनानतम् दमयन्तम् पृतन्यून्।।4।।
5173. यो देह्यो अनमयत् वध-स्नैः,
यो अर्य-पत्नी उषसः चकार।
स नि-रुध्या नहुषो यह्वो,
अग्निः विशः चक्रे बलि-हृतः सहो-भिः।।5।।
5174. यस्य शर्मन् उप विश्वे जनास,
एवैः तस्थुः सु-मतिम् भिक्षमाणाः।
वैश्वानरो वरम् आ रोदस्योः,
अग्निः ससाद पित्रोः उप-स्थम्।।6।।
5175. आ देवो ददे बुध्न्या वसूनि,
वैश्वानर उत्-इता सूर्यस्य।
आ समुद्रात् अवरात् आ परस्मात्,
आ अग्निः ददे दिव आ पृथिव्याः।।7।।

## सूक्त 7

5176. प्र वो देवम् चित् सहसानम् अग्निम्,
अश्वम् न वाजिनम् हिषे नमो-भिः।
भवा नो दूतो अध्वरस्य विद्वान्,
त्मना देवेषु विविदे मित-द्रुः।।1।।
5177. आ याहि अग्ने पथ्या अनु स्वा,
मन्द्रो देवानाम् सख्यम् जुषाणः।
आ सानु शुष्मैः नदयन् पृथिव्या,
जम्भेभिः विश्वम् उशधक् वनानि।।2।।
5178. प्राचीनो यज्ञः सु-धितम् हि बर्हिः,
प्रीणीते अग्निः इडितो न होता।

आ मातरा विश्व-वारे हुवानो,
यतो यविष्ठ जज्ञिषे सु-शेवः।।3।।
5179. सद्यो अध्वरे रथिरम् जनन्त,
मानुषासो वि-चेतसो य एषाम्।
विशाम् अधायि विश्पतिः दुरोणे,
अग्निः मन्द्रो मधु-वचा ऋता-वा।।4।।
5180. असादि वृतो वह्निः आ-जगन्वान्,
अग्निः ब्रह्मा नृ-सदने वि-धर्ता।
द्यौः च यम् पृथिवी वावृधाते,
आ यम् होता यजति विश्व-वारम्।।5।।
5181. एते द्युम्नेभिः विश्वम् आ अतिरन्त,
मन्त्रम् ये वा अरम् नर्या अतक्षन्।
प्र ये विशः तिरन्त श्रोषमाणा,
आ ये मे अस्य दीधयन् ऋतस्य।।6।।
5182. नु त्वाम् अग्ने ईमहे वसिष्ठा,
ईशानम् सूनो सहसो वसूनाम्।
इषम् स्तोतृ-भ्यो मघवत्-भ्य आनड्,
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त 8

5183. इन्धे राजा सम् अर्यो नमो-भिः,
यस्य प्रतीकम् आ-हुतम् घृतेन।
नरो हव्येभिः ईडते स-बाध,
आ अग्निः अग्र उषसाम् अशोचि।।1।।
5184. अयम् उ ष्य सु-महान् अवेदि,
होता मन्द्रो मनुषो यह्वो अग्निः।
वि भा अकः ससृजानः पृथिव्याम्,
कृष्ण-पविः ओषधीभिः ववक्षे।।2।।
5185. कया नो अग्ने वि वसः सु-वृक्तिम्,
काम् उ स्वधाम् ऋणवः शस्यमानः।
कदा भवेम पतयः सु-दत्र रायो,
वन्तारो दुष्टरस्य साधोः।।3।।
5186. प्र-प्र अयम् अग्निः भरतस्य शृण्वे,
वि यत् सूर्यो न रोचते बृहत् भाः।
अभि यः पूरुम् पृतनासु तस्थौ,
द्युतानो दैव्यो अतिथिः शुशोच।।4।।
5187. असन् इत् त्वे आ-हवनानि,
भूरि भुवः विश्वेभिः सु-मना अनीकैः।
स्तुतः चित् अग्ने शृण्विषे गृणानः,
स्वयम् वर्धस्व तन्वम् सु-जात।।5।।
5188. इदम् वचः शत-साः सम्-सहस्रम्,
उत् अग्नये जनिषीष्ट द्वि-बर्हाः।
शम् यत् स्तोतृ-भ्य आपये भवाति,
द्यु-मत् अमीव-चातनम् रक्षो-हा।।6।।
5189. नू त्वाम् अग्न ईमहे वसिष्ठा,
ईशानम् सूनो सहसो वसूनाम्।
इषम् स्तोतृ-भ्यो मघवत्-भ्य आनड्,
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त 9

5190. अबोधि जार उषसाम् उप-स्थात्,
होता मन्द्रः कवि-तमः पावकः।
दधाति केतुम् उभयस्य जन्तोः,
हव्या देवेषु द्रविणम् सुकृत्-सु।।1।।
5191. स सु-क्रतुः यो वि दुरः पणीनाम्,
पुनानो अर्कम् पुरु-भोजसम् नः।
होता मन्द्रो विशाम् दमूनाः,
तिरः तमो ददृशे राम्याणाम्।।2।।
5192. अमूरः कविः अदितिः विवस्वान्,
स-संसत् मित्रो अतिथिः शिवोनः।
चित्र-भानुः उषसाम् भाति अग्रे अपाम्,
गर्भः प्र-स्व आ विवेश।।3।।
5193. ईडेन्यो वो मनुषो युगेषु,
समन-गा अशुचत् जात-वेदाः।
सु-सन्दृशा भानुना यो वि-भाति,
प्रति गावः सम्-इधानम् बुधन्त।।4।।
5194. अग्ने याहि दूत्यम् मा रिषण्यो,
देवान् अच्छा ब्रह्म-कृता गणेन।
सरस्वतीम् मरुतो अश्विना अपो यक्षि,
देवान् रत्न-धेयाय विश्वान्।।5।।
5195. त्वाम् अग्ने सम् इधानो वसिष्ठो,
जरूथम् हन् यक्षि राये पुरम्-धिम्।
पुरु-णीथा जात-वेदो जरस्व,
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त 10

5196. उषो न जारः पृथु पाजो अश्रेत्,
दविद्युतत् दीद्यत् शोशुचानः।
वृषा हविः शुचिः आ भाति भाषा,
धियो हिन्वान उशतीः अजीगरिति।।1।।
5197. स्वः न वस्तोः उषसाम् अरोचि,
यज्ञम् तन्वाना उशिजो न मन्म।
अग्निः जन्मानि देव आ वि विद्वान्,
द्रवत् दूतो देव-यावा वनिष्ठाः।।2।।
5198. अच्छा गिरो मतयः देव-यन्तीः,
अग्निम् यन्ति द्रविणम् भिक्षमाणाः।
सु-सन्दृशम् सु-प्रतीकम् सु-अञ्चम्,

हव्य-वाहम् अरतिम् मानुषाणाम्।।3।।
5199. इन्द्रम् नो अग्ने वसु-भिः स-जोषाः,
रुद्रम् रुद्रेभिः आ वहा बृहन्तम्।
आदित्येभिः अदिति विश्व-जन्याम्,
बृहस्पतिम् ऋक्व-भिः विश्व-वारम्।।4।।
5200. मन्द्रम् होतारम् उशिजो यविष्ठम्,
अग्निम् विश ईडते अध्वरेषु।
स हि क्षपा-वान् अभवत् रयीणाम्,
अतन्द्रो दूतो यजथाय देवान्।।5।।

## सूक्त 11

5201. महान् असि अध्वरस्य प्र-केतो,
न ऋते त्वत् अमृता मादयन्ते।
आ विश्वेभिः स-रथम् याहि देवैः,
नि अग्ने होता प्रथमः सद इह।।1।।
5202. त्वाम् ईडते अजिरम् दीत्याय,
हविष्मन्तः सदम् इत् मानुषासः।
यस्य देवैः आ असदो बर्हिः,
अग्ने अहानि अस्मै सु-दिना भवन्ति।।2।।
5203. त्रिः चित् अक़्तोः प्र चिकितुः,
वसूनि त्वे अन्तः दाशुषे मर्त्याय।
मनुष्वत् अग्न इह यक्षि देवान् भवा,
नो दूतो अभिशस्ति-पावा।।3।।
5204. अग्निः ईशे बृहतो अध्वरस्य,
अग्निः विश्वस्य हविषः कृतस्य।
ऋतुम् हि अस्य वसवो जुषन्त,
अथ देवा दधिरे हव्य-वाहम्।।4।।
5205. आ अग्ने वह हविः-अद्याय देवान्,
इन्द्र-ज्येष्ठास इह मादयन्ताम्।
इमम् यज्ञम् दिवि देवेषु धेहि यूयम्,
पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त 12

5206. अगन्म महा नमसा यविष्ठम्,
यो दीदाय सम्-इद्धः स्वे दुरोणे।
चित्र-भानुम् रोदसी अन्तः उर्वी,
सु-आहुतम् विश्वतः प्रत्यञ्चम्।।1।।
5207. स महना विश्वा दुः-इतानि साहवान्,
अग्निः ष्टवे दम आ जातवेदाः।
स नो रक्षिषत् दुः-इतात् अवद्यात्,
अस्मान् गृणतः उत नो मघोनः।।2।।
5208. त्वम् वरुणः त मित्रो अग्ने,
त्वाम् वर्धन्ति मति-भिः वसिष्ठाः।
त्वे वसु सु-षणनानि सन्तु यूयम्,
पात स्वस्ति-भिः सदा नः।।3।।

## सूक्त 13

5209. प्र अग्नये विश्व-शुचे धियम्-धे,
असुर-घ्ने मन्म धीतिम् भरध्वम्।
भरे हविः न बर्हिषि प्रीणानो,
वैश्वानराय यतये मतीनाम्।।1।।
5210. त्वम् अग्ने शोचिषा शोशुचान,
आ रोदसी अपृणा जायमानः।
त्वम् देवान् अभि-शस्तेः अमुञ्चो,
वैश्वानर जात-वेदो महि-त्वा।।2।।
5211. जातो यत् अग्ने भुवना वि अख्यः,
पशून् न गोपाः इर्यः परि-ज्मा।
वैश्वानर ब्रह्मणे विन्द गातुम्,
यूयम् पात स्वस्ति-भिः सदा नः।।3।।

## सूक्त 14

5212. सम्-इधा जात-वेदसे,
देवाय देवहूति-भिः।
हविः-भिः शुक्र-शोचिषे नमस्विनो,
वयम् दाशेम अग्नये।।1।।
5213. वयम् ते अग्ने सम्-इधा विधेम,
वयम् दाशेम सु-ष्टती यजत्र।
वयम् घृतेन अध्वरस्य होतः,
वयम् देव हविषा भद्र-शोचे।।2।।
5214. आ नो देवेभिः उप देव-हूतितम्,
अग्ने याहि वषट्-कृतिम् जुषाणः।
तुभ्यम् देवाय दाशतः स्याम,
यूयम् पात स्वस्ति-भिः सदा नः।।3।।

## सूक्त 15

5215. उप सद्याय मीड्हुष, आस्ये जुहुता हविः।
यो नो नेदिष्ठम् आप्यम्।।1।।
5216. यः पञ्च चर्षणीः, अभि नि-षसाद दमे-दमे।
कविः गृह-पतिः युवा।।2।।
5217. स नो वेदो अमात्यम्, अग्नी रक्षतु विश्वतः।
उत अस्मान् पातु अंहसः।।3।।
5218. नवम् नु स्तोमम् अग्नये, दिवः श्येनाय जीजनम्।
वस्वः कुवित् वनाति नः।।4।।
5219. स्पार्हा यस्य श्रियो दृशे, रयिः वीर-वतो यथा।
अग्रे यज्ञस्य शोचतः।।5।।
5220. स इमाम् वेतु वषट्-कृतम्, अग्निः जुषत नो गिरः।
यजिष्ठो हव्य-वाहनः।।6।।
5221. नि त्वा नक्ष्य विश्पते, द्यु-मन्तम् देव धीमहि।
सु-वीरम् अग्न आ-हुत।।7।।

5222. क्षपः उस्रः च दीदिहि, सु-अग्नयः त्वया वयम्।
सु-वीरः त्वम् अस्म-युः।।8।।
5223. उप त्वा सातये नरो, विप्रासो यन्ति धीति-भिः।
उप अक्षरा सहस्रिणी।।9।।
5224. अग्नी रक्षांसि सेधति, शुक्र-शोचिः अमर्त्यः।
शुचिः पावक ईड्यः।।10।।
5225. स नो राधांसि आ भर, ईशानः सहसो यहो।
भगः च दातु वीर्यम्।।11।।
5226. त्वम् अग्रे वीर-वत् यशो, देवः च सविता भगः।
दितिः च दाति वार्यम्।।12।।
5227. अग्ने रक्षा णो अंहसः, प्रति ष्म देव रीषतः।
तपिष्ठैः अजरो दह।।13।।
5228. अधा मही न आयसी, अनाधृष्टो नृ-पीतये।
पूः भवा शत-भुजिः।।14।।
5229. त्वम् नः पाहि अंहसो, दोषा-वस्तः अघा-यतः।
दिवा नक़्तम् अदाभ्य।।15।।

## सूक्त 16

5230. एना वो अग्निम् नमसा, ऊर्जो नपातम् आ हुवे।
प्रियम् चेतिष्ठम् अरतिम् सु-अध्वरम्,
विश्वस्य दूतम् अमृतम्।।1।।
5231. स योजते अरुषा विश्व-भोजसा स दुद्रवत् सु-आहुतः।
सु-ब्रह्मा यज्ञः सु-शमी वसूनाम् देवम् राधो जनानाम्।।2।।
5232. उत् अस्य शोचिः अस्थात् आ-जुह्वानस्य मीडहुषः।
उत् धूमासो अरुषासो दिवि-स्पृशः,
सम् अग्निम् इन्धते नरः।।3।।
5233. त्म् त्वा दूतम् कण्महे यशः-तमम्,
देवान् आ वीतये वह।
विश्वा सूनो सहसो मर्त-भोजना,
रास्व तत् यत्त्वा ईमहे।।4।।
5234. त्वम् अग्ने गृह-पतिः त्वम् होता नो अध्वरे।
त्वम् पोता विश्व-वार प्र-चेता यक्षि वेषि च वार्यम्।।5।।
5235. कृधि रत्नम् यजमानाय,
सु-क्रतो त्वम् हि रत्न-धा असि।
आ न ऋते शिशीहि विश्वम्,
ऋत्विजम् सु-शंसो यः च दक्षते।।6।।
5236. त्वे अग्ने सु-आहुत, प्रियासः सन्तु सूरयः।
यन्तारो ये मघ-वानो जनानाम्,
ऊर्वान् दयन्त गोनाम्।।7।।
5237. येषाम् इडा घृत-हस्ता दुहोण,
आँ अपि प्राता नि-षीदति।
तान् त्रायस्व सहस्य द्रुहो निदो,
यच्छ नः शर्म दीर्घ-श्रुत्।।8।।
5238. स मन्द्रया च जिह्वया, वह्नि आसा विदुः-टरः।
अग्ने रयिम् मघवत्-भ्यो न,
आ वह हव्य-दातिम् च सूदय।।9।।
5239 ये राधांसि ददति अश्व्या मघा कामेन श्रवसो महः।
तान् अंहसः पिपृहि पर्तृ-भिः,
त्वम् शतम् पूः-भिः यविष्ठ्य।।10।।
5240. देवो वो द्रविणो-दाः पूर्णाम् विवष्टि आ-सिचम्।
उत् वा सिञ्चध्वम् उप वा पृणध्वम्,
आत् इत् वो देव ओहते।।11।।
5241. तम् होतारम् अध्वरस्य प्र-चेतसम्,
वह्निम् देवा अकृण्वत।
दधाति रत्नम् विधते सु-वीर्यम्,
अग्निः जनाय दाशुषे।।12।।

## सूक्त 17

5242. अग्ने भव सु-षमिधा सम्-इद्ध,
उत बर्हिः उर्विया वि स्तृणीताम्।।1।।
5243. उत द्वार उशतीः वि श्रयन्ताम्,
उत देवान् उश आ वह इह।।2।।
5244. अग्ने वीहि हविषा यक्षि,
देवान् सु-अध्वरा कृणुहि जात-वेदः।।3।।
5245. सु-अध्वरा करति जात-वेदा,
यक्षत् देवान् अमृतान् पिप्रयत् च।।4।।
5246. वंस्व विश्वा वार्याणि प्र-चेतः,
स्तया भवन्ति आ-शिषो नो अद्य।।5।।
5247. त्वाम् ऊम् ते दधिरे हव्य-वाहम्,
देवासो अग्न ऊर्ज आ नपातम्।।6।।
5248. ते ते देवाय दाशतः स्याम,
महो नो रत्ना वि दध इयानः।।7।।

## सूक्त 18

5249. त्वे ह यत् पितरः चित् न,
इन्द्र विश्वा वामा जरितारो असन्वन्।
त्वे गावः सु-दुघाः त्वे हि अश्वाः,
त्वम् वसु देव-यते वनिष्ठः।।1।।
5250. राजा-इव हि जनि-भिः क्षेषि,
एव अव द्यु-भिः अभि विदुः कविः सन्।
पिशा गिरो मघवन् गोभिः अश्वैः,
त्वा-यतः शिशीहि राये अस्मान्।।2।।
5251. इमाः उ त्वा पस्पृधानासो अत्र,
मन्द्रा गिरो देव-यन्तीः उप स्थुः।
अर्वाची ते पथ्या राय एतु स्याम,
ते सु-मतौ इन्द्र शर्मन्।।3।।

5252. धेनुम् न त्वा सू-यवसे दुदुक्षन्,
उप ब्रह्माणि ससृजे वसिष्ठः।
त्वाम् इत् मे गो-पतिम् विश्व आह,
आ न इन्द्रः सु-मतिम् गन्तु अच्छ।।4।।
5253. अर्णांसि चित् पप्रथाना सु-दास,
इन्द्रो गाधानि अकृणोत् सु-पारा।
शर्धन्तम् शिम्युम् उचथस्य नव्यः,
शापम् सिन्धूनाम् अकृणोत् अशस्तीः।।5।।
5254. पुरोडा इत् तुर्वशो यक्षुः आसीत्,
राये मत्स्यासो नि-शिता अपि-इव।
श्रुष्टिम् चक्रुः भृगवो द्रुह्यवः च,
सरवा सखायम् अतरत् विषूचोः।।6।।
5255. आ पक्थासो भलानसो भनन्त,
आ अलिनासो विषाणिनः शिवासः।
आ यो अनयत् सध-मा आर्यस्य,
गव्या तृत्सु-भ्यो अजगन् युधा नृन्।।7।।
5256. दुः-आध्यो अदितिम् स्रेवयन्तो,
अचेतसो वि चगृभ्रे परुष्णीम्।
मह्ना अविव्यक् पृथिवीम् पत्यमानः,
पशुः कविः अशयत् चायमानः।।8।।
5257. ईयुः अर्थम् न नि-अर्थम् परुष्णीम्,
आशुः चन इत् अभि-पित्वम् जगाम।
सु-दास इन्द्रः सु-तुकान् अमित्रान्,
अरन्धयत् मानुषे वध्रि-वाचः।।9।।
5258. ईयुः गावो न यवसात् अगोपा,
यथा-कृतम् अभि मित्रम् चितासः।
पृश्नि-निप्रेषितासः श्रुष्टिम् चक्रुः, नि-युतो रन्तयः च।।10।।
5259. एकम् च यो विंशतिम् च श्रवस्या,
वैकर्णयोः जनान् राजा नि अस्तः।
दस्मो न सद्मन् नि शिशाति बर्हिः,
शूरः सर्गम् अकृणोत् इन्द्र एषाम्।।11।।
5260. अध श्रुतम् कवषम् वृद्धम् अप्-सु,
अनु द्रुह्युम् नि वृणक् वज्र-बाहुः।
वृणाना अत्र सख्याय सख्यम्,
त्वा-यन्तोये अमदन् अनु त्वा।।12।।
5261. वि सद्यो विश्वा दृंहितानि,
एषाम् इन्द्रः पुरः सहसा सप्त दर्दः।
वि आनवस्य तृत्सवे गयम् भाक्,
जेष्म पूरुम् विदथे मृध्र-वाचम्।।13।।
5262. नि गव्यवो अनवो द्रुह्यवः च,
षष्टिः शता सुषुपुः षट् सहस्रा।
षष्टिः वीरासो अधि षट् दुवो-यु,
विश्वा इत् इन्द्रस्य वीर्या कृतानि।।14।।
5263. इन्द्रेण एथे तृत्सवो वेविषाणा,
आपो न सृष्टा अधवन्त नीचीः।
दुर्मित्रासः प्रकलवित् मिमाना,
जहुः विश्वानि भोजना सुदासे।15
5264. अर्धम् वीरस्य शृत-पाम् अनिन्द्रम्,
परा शर्धन्तम् नुनुदे अभि क्षाम्।
इन्द्रो मन्युम् मन्यु-म्यो मिमाय,
भेजे पथो वर्तनिम् पत्यमानः।।16।।
5265. आध्रेण चित् तत् उ एकम् चकार,
सिंह्यम् चित् पेत्वेना जघान।
अव स्रक्तीः वैश्या अवृश्चत् इन्द्रः,
प्र अयच्छत् विश्वा भोजना सु-दासे।।17।।
5266. शश्वन्तो हि शत्रोवो रारधुः,
ते भेदस्य चित् शर्धतो विन्द रन्धिम्।
मर्तान् एनः स्तुवतो यः कृणोति,
तिग्मम् तस्मिन् नि जहि वज्रम् इन्द्र।।18।।
5267. आवत् इन्द्रम् यमुना तृत्सवः च,
प्र अत्र भेदम् सर्व-ताता मुषायत्।
अजासः च शिग्रवो यक्षवः च,
बलिम् शीर्षाणि जभ्रुः अश्वानि।19।
5268. न ते इन्द्र सु-मतयो न रायः,
सम्-चक्षे पूर्वा उषसो न नूत्नाः।
देवकम् चित् मान्यमानम् जघन्थ,
अव् त्मना बृहतः शम्बरम् भेत्।।20।।
5269. प्र ये गृहात् अममदुः त्वाया,
पराशरः शतयातुः वसिष्ठः।
न ते भोजस्य सख्यम् मृषन्त अधा,
सूरि-भ्यः सु-दिना वि उच्छान्।।21।।
5270. द्वे नप्तुः देव-वतः सते गोः द्वा
रथा वधू-मन्ता सु-दासः।
अर्हन् अग्ने पैज-वनस्य दानम्,
होता-इव सद्म परि एमि रेभन्।।22।।
5271. चत्वारो मा पैज-वनस्य दानाः,
स्मत्-दिष्टयः कृशनिनो निरेके।
ऋज्रासो मा पृथिवी-ष्ठाः सु-दासः,
तोकम् तोकाय श्रवसे वहन्ति।।23।।
5272. यस्य स्रवो रोदसी अन्तः उर्वी,
शीर्ष्णे-शीर्ष्णे वि-बभाजा वि-भक्ता।
सप्त इत् इन्द्रम् न स्रवतो गृणन्ति,
नि युध्यामधिम् अशिशात् अभीके।।24।।
5273. इमम् नरो मरुतः सश्चत् अनु,
दिवो-दासम् न पितरम् सु-दासः।
अविष्टना पैज-वनस्य केतम् दू-णाशम्,

क्षत्रम् अजरम् दुवो-यु।।25।।

## सूक्त-19

5274. यः तिग्म-शृङ्गो वृषभो,
न भीमः एकः कृष्टीः च्यवयति विश्वाः।
यः शश्वतो अदाशुषो गयस्य,
प्र-यन्ता असि सुस्वि-तराय वेदः।।1।।
5275. त्वम् ह त्यत् इन्द्र कुत्सम्,
आवः शुश्रूषमाणः तन्वा स-मर्ये।
दासम् यत् शुष्णम् कुयवम् नि,
अस्मा अरन्धय आर्जनेयाय शिक्षन्।।2।।
5276. त्वम् धृष्णो धृषता वीत-हव्यम्,
प्र आवो विश्वाभिः ऊति-भिः सु-दासम्।
प्र पौरु-कुत्सिम् त्रसदस्युम् आवः,
क्षेत्र-साता वृत्र-हत्येषु पूरुम्।।3।।
5277. त्वम् नृ-भिः नृ-मणो देव-वीतौ,
भूरीणि वृत्रा हरि-अश्व हंसि।
त्वम् नि दस्युम् चुमुरिम् धुनिम् च,
अस्वापयो दभीतये सु-हन्तु।।4।।
5278. तव त्यौत्नानि वज्र-हस्त तानि,
नव यत् पुरो नवतिम् च सद्यः।
नि-वेशने शत-तमा अविवेषीः अहन्,
च वृतम् नमुचिम् उत अहन्।।5।।
5279. सना ता त इन्द्र भोजनानि,
रात-हव्याय दाशुषे सु-दासे।
वृष्णे ते हरी वृषणा युनज्मि व्यन्तु,
ब्रह्माणि पुरु-शाक वाजम्।।6।।
5280. मा ते अस्याम् सहसा-वन्,
परिष्टौ अघाय भूम हरि-वः परा-दै।
त्रायस्व नो अवृकेभिः वरूथैः,
तव प्रियासः सूरिषु स्याम।।7।।
5281. प्रियास इत् ते मघ-वन् अभिष्टौ,
नरो मदेम शरणे सखायः।
नि तुर्वशम् नि याद्वम् शिशीहि,
अतिथि-ग्वाय शंस्यम् करिष्यन्।।8।।
5282. सद्यः चित् नु ते मघ-वन् अभिष्टौ,
नरः शंसन्ति उक्थ-शास उक्था।
ये ते हवेभिः वि पणीन् अदाशन्,
अस्मान् वृणीष्व युज्याय तस्मै।।9।।
5283. एते स्तोमा नराम् नृ-तम तुभ्यम्,
अस्मत् न्यञ्चो ददतो मघानि।
तेषाम् इन्द्र वृत्र-हत्ये शिवो भूः,
सखा च शूरो अविता च नृणाम्।।10।।
5284. नू इन्द्र शूर स्तवमान ऊती,
ब्रह्म-जूतः तन्वा वावृधस्व।
उप नो वाजान् मिमीहि उप स्तीन्,
यूयम् पात स्वस्ति-भिः सदा नः।।11।।

## सूक्त-20

5285. उग्रो जज्ञे वीर्याय स्वधा-वान्
चक्रिः अपो नर्यो यत् करिष्यन्।
जग्मिः युवा नृ-सदनम् अवो-भिः
त्राता न इन्द्र एनसो महः चित्।।1।।
5286. हन्ता वृत्रम् इन्द्रः शूशुवानः
प्र आवीत् नु वीरो जरिताम् ऊती।
कर्ता सु-दासे अह वा उ लोकम् दाता
वसु मुहुः आ दाशुषे भूत्।।2।।
5287. युध्मो अनर्वा खज-कृत् समत्-वा
शूरः सत्राषाट् जनुषा ईम् अषाळ्हः।
वि आसे इन्द्रः पृतना सु-ओजाः
अध विश्वम् शत्रु-यन्तम् जघान।।3।।
5288. उभे चित् इन्द्र रोदसी महि-त्वा
आ पप्राथ तविषीभिः तुविष्मः।
नि वज्रम् इन्द्रो हरि-वान् मिमिक्षन्
सम् अन्धसा मदेषु वा उवोच।।4।।
5289. वृषा जजान वृषणम् रणाय
तम् उ चित् नारी नर्यम् ससूव।
प्र यः सेना-नीः अध नृ-भ्यो अस्तीनः
सत्वा गो-एषणः सधृष्णुः।।5।।
5290. नू चित् स भ्रेषते जनो न रेषत्
मनो यो अस्य घोरम् आ-विवासात्।
यज्ञैः यः इन्द्रे दधते दुवांसि क्षयत्
स राय ऋत-पाः ऋते-जाः।।6।।
5291. यत् इन्द्र पूर्वो अपराय शिक्षन्
अयत् ज्यायान् कनीयसो देष्णम्।
अमृतः इत् परि आसीत दूरम्
आ चित्र चित्र्यम् भरा रयिम् नः।।7।।
5292. यः त इन्द्र प्रियो जनो ददाशत्
असत् निरेके अद्रि-वः सखा ते।
वयम् ते अस्याम् सु-मतौ चनिष्ठाः
वरूथे अघ्नतो नृ-पीतौ।।8।।
5293. एषः स्तोमो अचिक्रदत् वृषा
त उत स्तामुः मघ-वन् अक्रपिष्ट।
रायः कामो जरितारम् त आ अगन्
त्वम् अङ्ग शक्र वस्व आ शको नः।।9।।

5294. स न इन्द्र त्व-यताया इषे धाः
त्मना च ये मघ-वानो जुनन्ति।
वस्वी षु ते जरित्रे अस्तु शक्तिः
यूयम् पात स्वस्ति-भिः सदा नः।।10।।

## सूक्त-21

5295. असावि देवम् गो-ऋजीकम् अन्धो
नि अस्मिन् इन्द्रो जनुषा ईम् उवोच।
बोधामसि त्वा हरि-अश्व यज्ञैः
बोधा नः स्तोमम् अन्धसो मदेषु।।1।।
5296. प्र यन्ति यज्ञम् विपयन्ति
बर्हिः सोम-मादो विदथे दुध्र-वाचः।
नि उ भ्रियन्ते यशसो गृभात्
आ दूर-उपब्दो वृषणो नृ-षाचः।।2।।
5297. त्वम् इन्द्र स्रवितवा अपः कः
परि-ष्ठिता आहिना शूर पूर्वीः।
त्वत् वावक्रे रथ्यो न धेना
रेजन्ते विश्वा कृत्रिमाणि भीषा।।3।।
5298. भीमो विवेष आयुधेभिः एषाम्
अपांसि विश्वा नर्याणि विद्वान्।
इन्द्रः पुरो जर्हृषाणो वि दूधोत्
वि वज्र-हस्तो महिना जघान।।4।।
5299. न यातव इन्द्र जूजुवुः
नो न वन्दना शविष्ठ वेद्याभिः।
सशर्ध अर्यो विषुणस्य जन्तोः मा
शिश्न-देवा अपि गुः ऋतम् नः।।5।।
5300. अभि क्रत्वा इन्द्र भूः अध ज्मन्
न ते विव्यक् महिमानम् रजांसि।
स्वेन हि वृत्रम् शवसा जघन्थ
न शत्रुः अन्तम् विविदत् युधा ते।।6।।
5301. देवाः चित् ते असुर्याय पूर्वे
अनु क्षत्राय ममिरे सहांसि।
इन्द्रो मघानि दयते वि-षह्य
इन्द्रम् वाजस्य जोहुवन्त सातौ।।7।।
5302. कीरिः चित् हि त्वाम् अवसे
जुहाव ईशानम् इन्द्र सौभगस्य भूरेः।
अवो बभूथ शतम्-ऊते अस्मे
अभि-क्षत्तुः त्वा-वतो वरूता।।8।।
5303. सखायः ते इन्द्र विश्वह स्याम
नमो-वृधासो महिना तरुत्र।
वन्वन्तु स्म ते अवसा सम्-ईक्
अभि-इतिम् अर्यो वनुषाम् शवांसि।।9।।

5304. स न इन्द्र त्व-यताया इषे धाः
त्मना च ये मघ-वानो जुनन्ति।
वस्वी षु ते जरित्रे अस्तु शक्तिः
यूयम् पात स्वस्ति-भिः सदा नः।।10।।

## सूक्त-22

5305. पिब सोमम् इन्द्र मन्दतु
त्वा यम् ते सुषाव हरि-अश्व अद्रिः।
सोतुः बाहु-भ्याम् सु-यतो न अर्वा।।1।।
5306. यः ते मदो युज्यः चारुः
अस्ति येन वृत्राणि हरि-अश्व हंसि।
स त्वाम् इन्द्र प्रभु-वसो ममत्तु।।2।।
5307. बोधा सु मे मघ-वन् वाचम् आ इमाम्
याम् ते वसिष्ठो अर्चति प्र-शस्तिम्।
इमा ब्रह्म सध-मादे जुषस्व।।3।।
5308. श्रुधी हवम् वि-पिपानस्य अद्रेः
बोधा विप्रस्य अर्चतो मनीषाम्।
कृष्वा दुवांसि अन्तमा सचा इमा।।4।।
5309. न ते गिरो अपि मृष्ये तुरस्य
न सु-ष्टुतिम् असुर्यस्य विद्वान्।
सदा ते नाम स्व-यशो विवक्मि।।5।।
5310. भूरि हि ते सवना मानुषेषु भूरि
मनीषी हवते त्वाम् इत्।
मा आरे अस्मत् मघ-वन ज्योक् कः।।6।।
5311. तुभ्य इत् इमा सवना शूर विश्वा
तुभ्यम् ब्रह्माणि वर्धना कृणोमि।
त्वम् नृ-भिः हव्यो विश्वधा असि।।7।।
5312. नू चित् नु ते मन्यमानस्य दस्म
उत अश्नुवन्ति महिमानम् उग्र।
न वीर्यम् इन्द्र ते न राधः।।8।।
5313. ये च पूर्व ऋषयो ये च नूत्ना
इन्द्र ब्रह्माणि जनयन्त विप्राः।
अस्मे ते सन्तु सख्या शिवानि
यूयम् पात स्वस्ति-भिः सदा नः।।9।।

## सूक्त-23

5314. उत् उ ब्रह्माणि ऐरत श्रवस्या
इन्द्रम् स-मर्ये महया वसिष्ठ।
आ यो विश्वानि शवसा ततान
उप-श्रोता मे ईवतो वचांसि।।1।।
5315. अयामि घोष इन्द्र देव-जामिः
इरज्यन्त यत् शुरुधो वि-वाचि।
नहि स्वम् आयुः चिकिते जनेषु तानि

इत् अंहांसि अति पर्षि अस्मान्।।2।।
5316. युजे रथम् गो-एषणम् हरि-भ्याम्
उप ब्रह्माणि जुजुषाणम् अस्थुः।
वि बाधिष्ट स्य रोदसी महि-त्वा
इन्द्रो वृत्राणि अप्रती जघन्वान्।।3।।
5317. आपः चित् पिप्युः स्तर्यो न गावो
नक्षन् ऋतम् जरितारः त इन्द्र।
याहि वायुः न नि-युतो नो अच्छा
त्वम् हि धीभिः दयसे वि वाजान्।।4।।
5318. ते त्वा मदा इन्द्र मादयन्तु
शुष्मिणम् तुवि-राधसम् जरित्रे।
एको देव-त्रा दयसे हि मर्तान्
अस्मिन् शूर सवने मादयस्व।।5।।
5319. एव इत् इन्द्रम् वृषणम् वज्र-बाहुम्
वसिष्ठासो अभि अर्चन्ति अर्कैः।
स नः स्तुतो वीर-वत् धातु गो-मत्
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-24

5320. योनिः त इन्द्र सदने अकारि
तम् आ नृ-भिः पुरु-हूत प्र याहि।
असो यथा नो अविता वृधे च
ददो वसूनि ममदः च सोमैः।।1।।
5321. गृभीतम् ते मन इन्द्र द्वि-बर्हाः
सुतः सोमः परि-षिक्ता मधूनि।
विसृष्ट-धेना भरते सु-वृक्तिः
इयम् इन्द्रम् जोहुवती मनीषा।।2।।
5322. आ नो दिव आ पृथिव्या ऋजीषिन्
इदम् बर्हिः सोम-पेयाय याहि।
वहन्तु त्वा हरयो मद्र्यञ्चम्
आङ्गूषम् अच्छा तवसम् मदाय।।3।।
5323. आ नो विश्वाभिः ऊति-भिः स-जोषा
ब्रह्म जुषाणो हरि-अश्व याहि।
वरीवृजत् स्थविरेभिः सु-शिप्र
अस्मे दधत् वृषणम् शुष्मम् इन्द्र।।4।।
5324. एष-स्तोमो महे उग्राय वाहे
धुरि-इव अत्यो न वाजयन् अधायि।
इन्द्र त्वा अयम् अर्क ईट्टे वसूनाम्
दिवि-इव द्याम् अधि नः श्रोमतम् धाः।।5।।
5325. एवा न इन्द्र वार्यस्य पूर्धि प्र ते
महीम् सु-मतिम् सु-मतिम् वेविदाम्।
इषम् पिन्व मघवत्-भ्यः सु-वीराम्
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-25

5326. आ ते मह इन्द्र ऊती उग्र
स-मन्यवो यत् सम्-अरन्त सेनाः।
पताति दिद्युत् नर्यस्य बाह्वोः
मा ते मनो विष्वद्र्यक् वि चारीत्।।1।।
5327. नि दुः-ग इन्द्र श्नथिहि अमित्रान्
अभि ये नो मर्तासो अमन्ति।
आरे तम् शंसम् कृणुहि निनित्सोः
आ नो भर सम्-भरणम् वसूनाम्।।2।।
5328. शतम् ते शिप्रिन् ऊतयः सु-दासे
सहस्रम् शंसा उत रातिः अस्तु।
जहि वधः वनुषो मर्त्यस्य अस्मे
द्युम्नम् अधि रत्नम् च धेहि।।3।।
5329. त्वा-वतो हि इन्द्र क्रत्वे अस्मि
त्वा-वतो अवितु अवितः शूर रातौ।
विश्वा इत् अहानि तविषी-वः उग्रम्
ओकः कृणुष्व हरि-वो न मर्धीः।।4।।
5330. कुत्सा एते हरि-अश्वाय शूषम्
इन्द्रे सहो देव-जूतम् इयानाः।
सत्रा कृधि सु-हना शूर वृत्रा वयम्
तरुत्राः सनुयाम वाजम्।।5।।
5331. एवा न इन्द्र वार्यस्य पूर्धि
प्र ते महीम् सु-मतिम् वेविदाम।
इषम् पिन्व मघवत्-भ्यः सु-वीराम्
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-26

5332. न सोम इन्द्रम् असुतो ममाद
न अब्रह्माणो मघ-वानम् सु-तासः।
तस्मा उक्थम् जनये यत् जुजोषत्
नृ-वत् नवीयः शृणवत् यथा नः।।1।।
5333. उक्थ उक्थे सोम इन्द्रम् ममाद
नीथे-नीथे मघ-वानम् सुतासः।
यत् ईम् स-बाधः पितरम् न पुत्राः
समान-दक्षा अवसे हवन्ते।।2।।
5334. चकार ता कृणवत् नूनम्
अन्या यानि ब्रुवन्ति वेधसः सुतेषु।
जनीः-इव पतिः एकः समानो नि
मामृजे पुर इन्द्रः सु सर्वाः।।3।।
5335. एवा तम् आहुः उत शृण्व इन्द्र
अको वि-भक्ता तरणिः मघानाम्।
मिथः-तुरः ऊतयो यस्य पूर्वीः
अस्मे भद्राणि सश्वत प्रियाणि।।4।।

5336. एवा वसिष्ठ इन्द्रम् ऊतये नृन्
कृष्टीनाम् वृषभम् सुते गृणाति।
सहस्रिण प नो माहि वाजान् यूयम्
पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-27

5337. इन्द्रम् नरो नेम-धिता हवन्ते
यत् पार्या युनजते धियः ताः।
शूरो नृ-षाता शवसः चकान
आ गो-मति व्रजे भजा त्वम् नः।।1।।
5338. य इन्द्र शुष्मो मघ-वन् ते अस्ति
शिक्ष सखि-भ्यः पुरु-हूत नृ-भ्यः।
त्वम् हि दृडहा मघ-वन् वि-चेता
अपा वृधि परि-वृतम् न राधः।।2।।
5339. इन्द्रो राजा जगतः चर्षणीनाम्
अधि क्षमि विषु-रूपम् यत अस्ति।
ततो ददाति दाशुषे वसूनि चोदत्
राध उप-स्तुतः चित् अर्वाक्।।3।।
5340. नू चित् न इन्द्रो मघ-वा स-हूती
दानो वाजम् नि यमते न ऊती।
अनूना यस्य दक्षिणा पीपाय
वामम् नृ-भ्यो अभि-वीता सखिभ्यः।।4।।
5341. नू इन्द्र राये वरिवः कृधी न
आ ते मनो ववृत्याम् मघाय।
गो-मत् अश्व-वत् रथ-वत् व्यन्तो
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-28

5342. ब्रह्मा ण इन्द्र उप याहि विद्वान्
अर्वाञ्चः ते हरयः सन्तु युक्ताः।
विश्वे चित् हि त्वा वि-हवन्त मर्ता
अस्माकम् इत् शृणुहि विश्वम्-इन्व।।1।।
5343. हवम् त इन्द्र महिमा वि आनड्
ब्रह्म यत् पासि शवसिन् ऋषीणाम्।
आ यत् वज्रम् दधिषे हस्त उग्र घोरः
सन् क्रत्वा जनिष्ठा अषाडहः।।2।।
5344. तव प्र-णीति इन्द्र जोहुवानान्
सम् यत् नृन् न रोदसी निनेथ।
महे क्षत्राय शवसे हि जज्ञे
अतूतुजिम् चित् तूतुजिः अशिश्नत्।।3।।
5345. एभिः न इन्द्र अह-भिः दशस्य
दुः-मित्रासो हि क्षितयः पवन्ते।
प्रति यत् चष्टे अनृतम् अनेना
अव द्विता वरुणो मायी नः सात्।।4।।
5346. वोचेम इत् इन्द्रम् मघ-वानम्
एनम् महो रायो राधसो यत् ददत् नः।
यो अर्चतो ब्रह्म-कृतिम् अविष्ठो
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-29

5347. अयम् सोम इन्द्र तुभ्यम् सुन्व
आ तु प्र याहि हरि-वः तत्-ओकाः।
पिबा तु अस्य सु-सुतस्य चारोः
ददो मघानि मघ-वन् इयानः।।1।।
5348. ब्रह्मन् वीर ब्रह्म-कृतिम् जुषाणो
अर्वाचीन् हरि-भिः याहि तूयम्।
अस्मिन् उ सु सवने मादयस्व
उप ब्रह्माणि शृणव इमा नः।।2।।
5349. का ते अस्ति अरम्-कृतिः सु-उक्तैः
कदा नूनम् ते मघ-वन् दाशेम।
विश्वा मतीः आ ततने त्वा-या अधा
म इन्द्र शृणवो हवा इमा।।3।।
5350. उतो घा ते पुरुष्या इत् आसन्
येषाम् पूर्वेषाम् अशृणोः ऋषीणाम्।
अध अहम् त्वा मघ-वन् जोहवीमि
त्वम् न इन्द्र असि प्र-मतिः पिता-इव।।4।।
5351. वोचेम् इत् इन्द्रम् मघ-वानम्
एनम् महो रायो राधसो यत् ददत् नः।
यो अर्चतो ब्रह्म-कृतिम् अविष्ठ
यूयम् पात् स्वस्ति-भिः सदा नः।।5।।

## सूक्त-30

5352. आ नो देव शवसा याहि शुष्मिन्
भवा वृध इन्द्र रायो अस्य।
महे नृम्माय नृ-पते सु-वज्र महि क्षत्राय पौंष्याय शूर।।1।।
5353. हवन्त उ त्वा हव्यम् वि-वाचि
तनूषु शूराः सूर्यस्य सातौ।
त्वम् विश्वेषु सेन्यो जनेषु त्वम्
वृत्राणि रन्धया सु-हन्तु।।2।।
5354. अहा यत् इन्द्र सु-दिना वि-उच्छान्
दधो यत् केतुम् उप-मम् समत्-सु।
नि अग्निः सीदत् असुरो न होता
हुवानो अन्न सु-भगाय देवान्।।3।।
5355. वयम् ते त इन्द्र ये च देव
स्तवन्त शूर ददतो मघानि।
यच्छा सूरि-भ्य उप-मम् वरूथम्
सु-आभुवो जरणाम् अश्नवन्त।।4।।

5356. वोचेम इत इन्द्रम् मघ-वानम्
एनम् महो रायो राधसो यत् ददत् नः।
यो अर्चतो ब्रह्म-कृतिम् अविष्ठो
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-31

5357. प्र व इन्द्राय मादनम् हरि-अश्वाय गायत।
सखायः सोम-पाव्ने।।1।।
5358. शंस इत् उक्थम् सु-दानव उत द्युक्षम् यथा नरः।
चकृमा सत्य-राधसे।।2।।
5359. त्वम् न इन्द्र वाज-युः त्वम् गव्युः शतक्रतो।
त्वम् हिरण्य-युः वसो।।3।।
5360. वयम् इन्द्र त्वा-यवो अभि प्र णोनुमो वृषन्।
विद्धी तु अस्य नो वसो।।4।।
5361. मा नो निदे च वक्तवे अर्योः रन्धीः अराव्णे।
त्वे अपि क्रतुः मम।।5।।
5362. त्वम् वर्म असि स-प्रथः पुरो-योधः च वृत्र-हन्।
त्वया प्रति ब्रुवे युजा।।6।।
5363. महान् उत असि यस्य ते अनु स्वधा-वरी सहः।
मम्नाते इन्द्र रोदसी।।7।।
5364. तम् त्वा मरुत्वती परि भुवत् वाणी स-यावरी।
नक्षमाणा सह द्यु-भिः।।8।।
5365. ऊर्ध्वासः त्वा अनु इन्दवो भुवन् दस्मम् उप द्यवि।
सम् ते नमन्त कृष्टयः।।9।।
5366. प्र वो महे महि-वधे भरध्वम्
प्र-चेतसे प्र सु-मतिम् कृणुध्वम्।
विशः पूर्वीः प्र चरा चर्षणि-प्राः।।10।।
5367. उरु-व्यचसे महिने सु-वृक्तिम्
इन्द्राय ब्रह्म जनयन्त विप्राः।
तस्य व्रतानि न मिनन्ति धीराः।।11।।
5368. इन्द्रम् वाणीः अनुत्त-मन्युम्
एव सत्रा राजानम् दधिरे सहध्यै।
हरि-अश्वाय बर्हया सम् आपीन्।।12।।

## सूक्त-32

5369. मो षु त्वा वाघतः चन आरे अस्मत नि रीरमन्।
आरात्तात् चित् सध-मादम् न
आ गहि इह वा सन् उप श्रुधि।।1।।
5370. इमे हि ते ब्रह्मकृतः सुते
सचा मधौ न मक्ष आसते।
इन्द्रे कामम् जरितारो वसू-यवो
रथे न पादम् आ दधुः।।2।।
5371. रायः-कामो वज्र-हस्तम्
सु-दक्षिणम् पुत्रो न पितरम् हुवे।।3।।
5372. इम इन्द्राय सुन्विरे सोमासो दधि-आशिरः।
तान् आ मदाय वज्र-हस्त
पीतये हरि-भ्याम् याहि ओक आ।।4।।
5373. श्रवत् श्रुत-कर्ण ईयते वसूनाम्
नु चित् नो मर्धिषत् गिरः।
सद्यः चित् यः सहस्राणि शता
ददत् नकिः दित्सन्तम् आ मिनत्।।5।।
5374. स वीरो अप्रति-ष्कुत इन्द्रेण शूशुवे नृ-भिः।
यः ते गभीरा सवनानि वृत्र-हन् सुनोति आ च धावति।।6।।
5375. भव वरूथम् मघ-वन्
मघोनाम् यत् सम्-अजासि शर्धतः।
वि त्वा-हतस्य वेदनम् भजेमहि
आ दू-णाशो भरा गयम्।।7।।
5376. सुनोता सोम-पाव्ने सोमम् इन्द्राय वज्रिणे।
पचत पक्तीः अवसे कृणुध्वम्
इत् पृणन् इत् पृणते मयः।।8।।
5377. मा स्रेधत सोमिनो दक्षत
महे कृणुध्वम् राय आ-तुजे।
तरणिः इत् जयति क्षेति पुष्यति न देवासः कवत्नवे।।9।।
5378. नकिः सु-दासो रथम् परि आस न रीरमत्।
इन्द्रो यस्या अविता यस्य मरुतो
गमत् स गो-मति व्रजे।।10।।
5379. गमत् वाजम् वाजयन् इन्द्र
मर्त्यो यस्य त्वम् अविता भुवः।
अस्माकम् बोधि अविता रथानाम्
अस्माकम् शूर नृणाम्।।11।।
5380. उत् इत् नु अस्य रिच्यते अंशो धनम् न जिग्युषः।
य इन्द्रो हरि-वान् दभन्ति
तम् रिपो दक्षम् दधाति सोमिनि।।12।।
5381. मन्त्रम् अखर्वम् सु-धितम्
सु-पेशसम् दधात यज्ञियेषु आ।
पूर्वीः चन प्र-सितयः तरन्ति
तम् य इन्द्रे कर्मणा भुवत्।।13।।
5382. कः तम् इन्द्र त्वा-वसुम् आ मर्त्यो दधर्षति।
श्रद्धा इत् ते मघ-वन् पार्ये
दिवि वाजी वाजम् सिषासति।।14।।
5383. मघोनः स्म वृत्र-हत्येषु चोदय ये ददति प्रिया वसु।
त्व प्र-णीती हरि-अश्व सूरि-भिः विश्वा तरेम दुः-इता।।15।।
5384. तव इत् इन्द्र अवमम् वसु,
त्वम् पुष्यसि मध्यमम्।
सत्रा विश्वस्य परमस्य राजसि

नकिः त्वा गोषु वृण्वते।।16।।
5385. त्वम् विश्वस्य धन-दा असि
श्रुतो य ईम् भवन्ति आजयः।
तव अयम् विश्वः पुरु-हूत
पार्थिवो अवस्युः नाम भिक्षते।।17।।
5386. यत् इन्द्र यावतः त्वम् एतावत् अहम् ईशीय।
स्तोतारम् इत् दिधिषेय रद-वसो
न पाप-त्वाय रासीय।।18।।
5387. शिक्षेयम् इत् मह-यते दिवे-दिवे
राय आ कुहचित्-विदे।
नहि त्वत् अन्यत् मघ-वन् न
आप्यम् वस्यो अस्ति पिता चन।।19।।
5388. तरणिः इत् सिसासति वाजम् पुरम्-ध्या युजा।
आ व इन्द्रम् पुरु-हूतम् नमे गिरा
नेमिम् तष्टा-इव सु-द्रुवम्।।20।।
5389. न दुः-ष्टुती मर्तयो विन्दते
वसु न स्रेधन्तम् रयिः नशत्।
सु-शक्तिः इत् मघ-वन् तुभ्यम्
मा-वते देष्णम् यत् पार्ये दिवि।।21।।
5390. अभि त्वा शूर नोनुमो अदुग्धा-इव धेनवः।
ईशानम् अस्य जगतः
स्वः-दृशम् ईशानम् इन्द्र तस्थुषः।।22।।
5391. न त्वा-वान् अन्यो दिव्यो
न पार्थिवो न जातो न जनिष्यते।
अश्व-यन्तो मघ-वन् इन्द्र
वाजिनो गव्यन्तः त्वा हवामहे।।23।।
5392. अभी षतः तत् आ भर इन्द्र ज्यायः कनीयस।
पुरू-वसुः हि मघ-वन् सनात् असि भरे-भरे च हव्यः।।24।।
5393. परा णुदस्व मघवन् अमित्रान्,
सुवेदा नो वसू कृधि।
अस्माकम् बोधि अविता
महा-धने भवा वृधः सखीनाम्।।25।।
5394. इन्द्र क्रतुम् न आ भर पिता पुत्रेभ्यो यथा।
शिक्षा णो अस्मिन् पुरु-हूत यामनि,
जीवा ज्योतिः अशीमहि।।26।।
5395. मा नो अज्ञाता वृजना दुः-आध्यो,
मा अशिवासो अव क्रमुः।
त्वया वयम् प्र-वतः शश्वतीः
अपो अति शूर तरामसि।।27।।

## सूक्त-33

5396. श्वित्यञ्चो मा दक्षिणतः-कपर्दा
धियम्-जिन्वासो अभि हि प्र-मन्दुः।
उत्-तिष्ठन् वोचे परि बर्हिषो
न मे दूरात् अवितवे वसिष्ठाः।।1।।
5397. दूरात् इन्द्रम् अनयन् आ सुतेन
तिरो वैशन्तम् अति पान्तम् उग्रम्।
पाश-द्युम्नस्य वायतस्य सोमात्
सुतात् इन्द्रो अवृणीता वसिष्ठान्।।2।।
5398. अव इत् नु कम् सिन्धुम् एभिः ततार
एव इत् नु कम् भेदम् एभिः जघान।
एव इत् नु कम् दाश-राज्ञे सु-दासम्
प्र आवत् इन्द्रो ब्रह्मणा वो वसिष्ठाः।।3।।
5399. जुष्टी नरो रिषाथ ब्रह्मणा वः पितृणाम्,
अक्षम् अव्ययम् न किल रिषाथ।
यत् शक्वरीषु बृहता रवेण
इन्दे शुष्मम् अदधाता वसिष्ठाः।।4।।
5400. उत् द्याम्-इव इत् तृष्ण-जो नाथितासो
अदीधयुः दाश-राज्ञे वृतासः।
वसिष्ठस्य स्तुवत इन्द्रो अश्रोत्
उरुम् तृत्सु-भ्यो अकृणोत् लोकम्।।5।।
5401. दण्डाः-इव इत् गो-अजनास आसन्
परि-छिन्ना भरता अर्भकासः।
अभवत् च पुर-एता वसिष्ठ आत्
इत् तृत्सूनाम् विशः अप्रथन्त।।6।।
5402. त्रयः कृण्वन्ति भुवनेषु रेतः
तिस्रः प्र-जा आर्या ज्योतिः-अग्राः।
त्रयो घर्मास उषसम् सचन्ते सर्वान्
इत् तान् अनु विदुः वसिष्ठाः।।7।।
5403. सूर्यस्य-इव वक्षथो ज्योतिः
एषाम् समुद्रस्य-इव महिमा गभीरः।
वातस्य-इव प्र-जवो न अन्येन
स्तोमो वसिष्ठा अनु-एतवे वः।।8।।
5404. त इत् निण्यम् हृदयस्य प्र-कैतेः
सहस्र-वल्शम् अभि सम् चरन्ति।
यमेन ततम् परि-धिम् वयन्तो
अप्सरस उप सेधुः वसिष्ठाः।।9।।
5405. वि-द्युतो ज्योतिः परि सम्-जिहानम्
मित्रावरुणा यत् अपश्यताम् त्वा।
तत् ते जन्म उत एकम् वसिष्ठ
अगस्त्यो यत् त्वा विश आ-जभार।।10।।
5406. उत असि मैत्रावरणो वसिष्ठ
उर्वश्या ब्रह्मन मनसो अधि जातः।
द्रप्सम् स्कन्नम् ब्रह्मणा दैव्येन
विश्वे देवाः पुष्करे त्वा अददन्त।।11।।
5407. स प्र-केत उभयस्य प्र-विद्वान्

सहस्र-धान उत वा स-दानः।
यमेन ततम् परि-धिम् वयिष्यन्
अप्सरसः परि जज्ञे वसिष्ठः।।12।।
5408. सत्रे ह जातौ इषिता नमो-बिः
कुम्भे रेतः सिषिचतुः समानम्।
ततो ह मान उत् इयाय मध्यात्
ततो जातम् ऋषिम् आहुः वसिष्ठम्।।13।।
5409. उक्थ-भृतम् साम-भृतम् बिभर्ति
ग्रावाणम् बिभ्रत् प्र वदाति अग्रे।
उप एनम् आध्वम् सु-मनस्यमाना
आ वो गच्छाति प्र-तृदो वसिष्ठः।।14।।

## सूक्त-34

5410. प्र शुक्रा एतु देवी मनीषा
अस्मत् सु-तष्टो रथो न वाजी।।1।।
5411. विदुः पृथिव्या दिवो जनित्रम्
शृण्वन्ति आपो अध क्षरन्तीः।।2।।
5412. आपः चित् श्मै पिन्वन्त पृथ्वीः
वृत्रेषु शूरा मंसन्त उग्राः।।3।।
5413. आ धूः-सु अस्मै दधात
अश्वान् इन्द्रो न वज्री हिरण्य-बाहुः।।4।।
5414. अभि प्र स्थात अह-इव यज्ञम्
यातेव पत्मन् त्मना हिनोत।।5।।
5415. त्मना समत्-सु हितनोत यज्ञम्
दधात केतुम् जनाय वीरम्।।6।।
5416. उत् अस्य शुष्मात् भानुः न आर्त
बिभर्ति भारम् पृथिवी न भूम।।7।।
5417. ह्वयामि देवान् अयातुः अग्रे
साधन् ऋतेन धियम् दधामि।।8।।
5418. अभि वो देवीम् धियम् दधिध्वम्
प्र वो देव-त्रा वाचम् कृणुध्वम्।।9।।
5419. आ चष्ट आसाम् पाथो नदीनाम्
वरुण उग्रः सहस्र-चक्षाः।।10।।
5420. राजा राष्ट्रानाम्पेशो नदीनाम्
अनुत्तम् अस्मै क्षत्रम् विश्व-आयु।।11।।
5421. अविष्टो अस्मान् विश्वासु विक्षु
अद्युम् कृणोत शंसम् निनित्सोः।।12।।
5422. वि एतु दिद्युत द्विषाम् अशेवा
युयोत विष्वक् रपः तनूनाम्।।13।।
5423. अवीत् नो अग्निः हव्य-अत
नमो-भिः प्रेष्ठो अस्मा अधायि स्तोमः।।14।।
5424. स-जूः देवेभिः अपाम् नपातम्
सखायम् कृध्वम् सिवो नो अस्तुः।।15।।
5425. अब्-जाम् उक्थैः अहिम् गृणीषे
बुध्ने नदीनाम् रजः-सु षीदन्।।16।।
5426. मा नो अहिः बुध्नयो रिषे धात्
यज्ञो अस्य स्रिधत् ऋता-योः।।17।।
5427. उत न एषु नृषु श्रवो धुः
प्र राये यन्तु शर्धन्तो अर्यः।।18।।
5428. तपन्ति शत्रुम् स्व ण भूमा
महा-सेनासो अमेभिः एषाम्।।19।।
5429. आ यत् नः पत्नीः गमन्ति अच्छा
त्वष्टा सु-पाणिः दधातु वीरान्।।20।।
5430. प्रति नः स्तोमम् त्वष्टा जुषेत
स्यात् अस्मे अरमतिः वसू-युः।।21।।
5431. ता नो रासन् राति-षाचो वसूनि
आ रोदसी वरुणानी शृणोतु।
वरूत्रीभिः सु-शरणो नो अस्तु त्वष्टा
सु-दत्रो वि दधातु रायः।।22।।
5432. तत् नो रायः पर्वताः तत् न आपः
तत् राति-षाच ओषधीः उत द्यौः।
वनस्पति-भिः पृथिवी स-जोषा उभे
रोदसी परि पासतो नः।।23।।
5433. अनु तत् उर्वी रोदसी जिहाताम्
अनु द्युक्षो वरुण इन्द्र-सखा।
अनु विश्वे मरुतो ये सहासो
रायः स्याम दरुमम् धियध्यै।।24।।
5434. तत् न इन्द्रो वरुमो मित्रो अग्निः
आप ओषधीः वनिनो जुषन्त।
शर्मन् स्याम मरुताम् उप-स्थे यूयम्
पात स्वस्ति-भिः सदा नः।।25।।

## सूक्त-35

5435. शम् न इन्द्राग्नी भवताम् अवो-भिः
सम् न इन्द्रावरुणा रात-हव्या।
शम् इन्द्रासोमा सुविताय शम् योः
शम् न इन्द्रापूषणा वाज-सातौ।।1।।
5436. शम् न भगः शम् उ नः शंसो अस्तु
शम् नः पुरम्-धिः शम् उ सन्तु रायः।
शम् नः सत्यस्य सु-यमस्य शंश-
सम् नो अर्यमा पुरु-जातो अस्तु।।2।।
5437. शम् नो धाता शम् उ धर्ता नो अस्तु
शम् न उरूची भवतु स्वधाभिः।
शम् रोदसी बृहती शम् नो अद्रिः
शम् नो देवानाम् सु-हवानि सन्तु।।3।।
5438. शम् नो अग्निः ज्योतिः-अनीको अस्तु

शम् नो मित्रावरुणौ अश्विना शम्।
शम् नः सु-कृताम् सु-कृतानि सन्तु
शम् न इषिरो अभि वातु वातः।।4।।
5439. शम् नो द्यावापृथिवी पूर्व-हूतौ
शम् अन्तरिक्षम् दृशये नो अस्तु।
शम् न ओषदीः वनिनो भवन्तु
शम् नो रजसः पतिः अस्तु जिष्णुः।।5।।
5440. शम् न इन्द्रो वसु-भिः देवो अस्तु
शम् आदित्येभिः वरुणः सु-शंसः।
शम् नो रुद्रो रुद्रेभिः जलाषः
शम् नः त्वष्टा ग्नाभिः इह शृणोतु।।6।।
5441. शम् नः सोमो भवतु ब्रह्म
शम् नः शम् नो ग्रावाणः शम् उ सन्तु यज्ञाः।
शम् नः स्वरूणाम् मितयो भवन्तु
शम् नः प्र-स्वः शम् उ अस्तु वेदिः।।7।।
5442. शम् नः सूर्य उरु-चक्षा उत् एतु
शम् नः चतस्रः प्र-दिशो भवन्तु।
शम् नः पर्वात ध्रुवयो भवन्तु
शम् नः सिन्धवः शम् उ सन्तु आपः।।8।।
5443. शम् नो अदितिः भवतु व्रतेभिः
शम् नो भवन्तु मरुतः सु-अर्काः।
शम् नो विष्णुः शम् उ पूषा नो अस्तु
शम् नो भवित्रम् शम् उ अस्तु वायुः।।9।।
5444. शम् नो देवः सविता त्रायमाणः
शम् नो भवन्तु उषसो वि-भातीः।
शम् नः पर्जन्यो भवतु प्र-जाभ्यः
शम् नः क्षेत्रस्य पतिः अस्तु शम्-भुः।।10।।
5445. शम् नो देवा विश्व-देवा भवन्तु
शम् सरस्वती सह धीभिः अस्तु।
शम् अभि-षाचः शम् उ राति-षाचः
शम् नो दिव्याः पार्थिवाः शम् नो अप्याः।।11।।
5446. शम् नः सत्यस्य पतयो भवन्तु
शम् नो अर्वन्तः शम् उ सन्तु गावः।
शम् न ऋभवः सु-कृतः सु-हस्ताः
शम् नो भवन्तु पितरो हवेषु।।12।।
5447. शम् नो अज एक-पात् देवो अस्तु
शम् नो अहिः बुध्न्यः शम् समुद्रः।
शम् नो अपाम् नपात् पेरुः अस्तु
शम् नः पृश्नि भवतु देव-गोपा।।13।।
5448. आदित्या रुद्रा वसवो जुषन्त
इदम् ब्रह्म क्रियमाणम् नवीयः।
शृण्वन्तु नो दिव्याः पार्थिवासो
गो-जाता उतये ये यज्ञियासः।।14।।
5449. ये देवानाम् यज्ञिया यज्ञियानाम्
मनोः यजत्रा अमृता ऋत-ज्ञाः।
ते नो रासन्ताम् उरु-गायम् अद्य यूयम्
पात स्वस्ति-भिः सदा नः।।15।।

## सूक्त-36

5450. प्र ब्रह्म एतु सदनात् ऋतस्य
वि रश्मि-भिः ससृजे सूर्यो गाः।
वि सानुना पृथिवी सस्र उर्वी पृथु
प्रतीकम् अधि आ ईधे अग्निः।।1।।
5451. इमाम् वाम् मित्रावरुणा सु-वृक्तिम्
इषम् न कृण्वे असुरा नवीयः।
इनो वाम् अन्यः पद-वीः अदब्धो
जनम् च मित्रो यतति ब्रुवाणाः।।2।।
5452. आ वातस्य ध्रजतो रन्त इत्या
अपीपयन्त धनवो न सूदाः।
महो दिवः सदने जायमानो
अचिक्रदत् वृषभः सस्मिन् ऊधन्।।3।।
5453. गिरा य एता युनजत् हरी
त इन्द्र प्रिया सु-रथा शूर धायू।
प्र यो मन्युम् रिरिक्षतो मिनाति
आ सु-क्रतुम् अर्यमणम् ववृत्याम्।।4।।
5454. यजन्ते अस्य सख्यम् वयः
च नमस्विनः स्व ऋतस्य धामन्।
वि पृक्षो बाबदे नृ-भिः स्तवान
इदम् नमो रुद्राय प्रेष्ठम्।।5।।
5455. आ यत् साकम् यशसो वावशानाः
सरस्वती सप्तथी सिन्धु-माता।
याः सुष्वयन्त सु-दुघाः सु-धाराः
अभि स्वेन पयसा पीप्यानाः।।6।।
5456. उत त्ये नो मरुतो मन्दसाना
धियम् तोकम् च वाजिनो अवन्तु।
मा नः परि ख्यत् अक्षरा चरन्ती
अवीवृधन् युज्यम् ते रयिम् नः।।7।।
5457. प्र वो महीम् अरमतिम् कृणुध्वम्
प्र पूषणम् विदथ्यम् न वीरम्।
भगम् धियो अवितारम् नो अस्याः
सातौ वाजम् राति-षाचम् पुरम्-धिम्।।8।।
5458. अच्छा यम् वो मरुतः श्लोक एतु
अच्छा विष्णुम् निषिक्त-पाम् अवो-भिः।
उत प्र-जायै गृणते वयो धुः
यूयम् पात स्वस्ति-भिः सदा नः।।9।।

## सूक्त-37

5459. आ वो वाहिष्ठो वहतु स्तवध्यै
रथो वाजा ऋभुक्षणो अमृक्तः।
अभि त्रि-पृष्ठैः सवनेषु सोमैः
मदे सु-शिप्रा मह-भिः पृणध्वम्।।1।।
5460. यूयम् ह रत्नम् मघवत्-सु धत्थ
स्वः-दृश ऋभुक्षणो अमृक्तम्।
सम् यज्ञेषु स्वधा-वन्तः पिबध्वम्
वि नो राधांसि मति-भिः दयध्वम्।।2।।
5461. उवोचिथ हि मघ-वन् देष्णम्
महो अर्भस्य वसुनो वि-भागे।
उभा ते पूर्णा वसुना गभस्ती
न सूनृता नि यमते वसव्या।।3।।
5462. त्वम् इन्द्र स्व-यशा ऋभुक्षा
वाजो न साधुः अस्तम् एषि ऋक्वा।
वयम् नु ते दाश्वांसः स्याम ब्रह्म
कृणवन्तो हरि-वो वसिष्ठाः।।4।।
5463. सनिता असि प्र-वतो दाशुषे चित्
याभिः विवेषो हरि-अश्व धीभिः।
ववन्मा नु ते युज्याभिः ऊती
कदा न इन्द्र राय आ दशस्येः।।5।।
5464. वासयसि-इव वेधसः त्वम्
नः कदा न इन्द्र वचसो बुबोधः।
अस्तम् तात्या धिया रयिम् सु-वीरम्
पृक्षो नो अर्वा नि उहीत वाजी।।6।।
5465. अभि यम् देवी निः-ऋतिः
चित् ईशे नक्षन्त इन्द्रम् शरदः सु-पृक्षः।
उप त्रि-बन्धुः जरत्-अष्टिम् एति
अस्व-वेशम् यम् कृणवन्त मर्ताः।।7।।
5466. आ नो राधांसि सवितः स्तवध्या
आ रायो यन्तु पर्वतस्य रातौ।
सदा नो दिव्यः पायुः सिषक्तु
यूयम् पात स्वस्ति-भिः सदा नः।।8।।

## सूक्त-38

5467. उत् उ ष्य देवः सविता ययाम
हिरण्ययीम् अमतिम् याम् अशिश्रेत्।
नूनम् भगो हव्यो मानुषेभिः
वि यो रत्ना पुरु-वसुः दधाति।।1।।
5468. उत् उ तिष्ठ सवितः श्रुधि अस्य
हिरण्य-पाणे प्र-भृतौ ऋतस्य।
वि उर्वीम् पृथ्वीम् अमतिम् सृजान
आ नृ-भ्यो मर्त-भोजनम् सुवानः।।2।।
5469. अपि ष्टुतः सविता देवो अस्तु
यम् आ चित् विश्वे वसवो गृणन्ति।
स नः स्तोमान नमस्यः चनो
धात् विश्वेभिः पातु पायु-भिः नि सूरीन्।।3।।
5470. अभि यम् देवी अदितिः गृणाति
सवम् देवस्य सवितुः जुषाणा।
अभि सम्-राजो वरुणो गृणन्ति
अभि मित्रासो अर्यमा स-जोषा।।4।।
5471. अभि ये मिथो वनुषः सपन्ते
रातिम् दिवो राति-षाचः पृथिव्याः।
अहिः बुध्न्य उत नः शृणोतु
वरूत्री एकधेनु-भिः नि पातु।।5।।
5472. अनु तत् नो जाःपतिः मंसीष्ट
रत्नम् देवस्य सवितः इयानः।
भगम् उग्रो अवसे जोहवीति
भगम् अनुग्रो अध याति रत्नम्।।6।।
5473. शम् नो भवन्तु वाजिनो हवेषु
देव-ताता मित-द्रवः सु-अर्काः।
जम्भयन्तो अहिम् वृकम् रक्षांसि
सनेमि अस्मत् युयवन् अमीवाः।।7।।
5474. वाजे-वाजे अवत वाजिनो
नो धनेषु विप्रा अमृता ऋतज्ञाः।
अस्य मध्वः पिबत मादयध्वम्
तृप्ता यात पथि-भिः देव-यानैः।।8।।

## सूक्त-39

5475. ऊर्ध्वो अग्निः सु-मतिम् वस्वो अश्रेत्
प्रतीची जूर्णि देव-तातिम् एति।
भेजाते अद्री रथ्या-इव पन्थाम्
ऋतम् होता न इषितो यजाति।।1।।
5476. प्र वावृजे सु-प्रया बर्हि एषाम्
आ विश्पती इव बीरिट इयाते।
विशाम् अक्तोः उषसः पूर्व-हूतौ
वायुः पूषा स्वस्तये नियुत्वान्।।2।।
5477. ज्मया अत्र वसवो रन्त देवा
उरौ अन्तरिक्षे मर्जयन्त शुभ्राः।
अर्वाक् पथ उरु-ज्रयः कृणुध्वम्
श्रोता दूतस्य जग्मुषो नो अस्य।।3।।
5478. ते हि यज्ञेषु यज्ञियास ऊमाः
सध-स्थम् विश्वे अभि सन्ति देवाः।
तान् अध्वरे यक्षि अग्ने
श्रुष्टी भगम् नासत्या पुरम्-धिम्।।4।।
5479. आ अग्ने गिरो दिव आ पृथिव्या

मित्रम् वह वरुणम् इन्द्रम् अग्निम्।
आ अर्यमणम् अदितिम् विष्णुम् एषाम्
सरस्वती मरुतो मादयन्ताम्।।5।।
5480. ररे हव्यम् मति-भिः यज्ञियानाम्
नक्षत् कामम् मर्त्यानाम् असिन्वन्।
धात रयिम् अवि-दस्यम् सदा-साम्
सक्षीमहि युज्येभिः नु देवैः।।6।।
5481. नू रोदसी अभि-ष्टुते वसिष्ठैः
ऋतावानो वरुणो मित्रो अग्निः।
यच्छन्तु चन्द्रा उप-मम नो अर्कम्
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-40

5482. ओ श्रुष्टिः विदथ्या सम् एतु
प्रति स्तोमम् दधीमहि तुराणाम्।
यत् अद्य देवः सविता सुवाति
स्याम अस्य रत्निनो वि-भागे।।1।।
5483. मित्रः तत् नो वरुणो रोदसी च
द्यु-भक्तम् इन्द्रो अर्यमा ददातु।
दिद्वेष्टु देवी अदितिः रेक्णो वायुः च
यत नि-युवैते भगः च।।2।।
5484. स इत् उग्रो अस्तु मरुतः सशुष्मी
यम् मर्त्यम् पृषत्-अश्वा अवाथ।
उत ईम् अग्निः सरस्वती जुनन्ति
न तस्य रायः परि-एता अस्ति।।3।।
5485. अयम् हि नेता वरुण ऋतस्य
मित्रो राजानो अर्यमा अपो धुः।
सु-हवा देवी अदितिः अनर्वा
ते नो अंहो अति पर्षन् अरिष्टान्।।4।।
5486. अस्य देवस्य मीडहुषो वया
विष्णोः एषस्य प्र-भृथे हविः-भिः।
विदे हि रुद्रो रुद्रियम् महि-त्वम्
यासिष्टम् वर्तिः अश्विनौ इरा-वत्।।5।।
5487. मा अत्र पूषन् आघृणे इरस्यो
वरूत्री यत् राति-षाचः च रासन्।
मयो-भुवो नो अर्वन्तो नि पान्तु
वृष्टिम् परि-ज्मा वातो ददातु।।6।।
5488. नू रोदसी अभि-ष्टुते वसिष्ठैः
ऋतावानो वरुणो मित्रो अग्निः।
यच्छन्तु चन्द्रा उप-मम नो अर्कम्
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-41

5489. प्रातः अग्निम् प्रातः इन्द्रम्
हवामहे प्रातः मित्रावरुणा प्रातः अश्विना।
प्रातः भमम् पूषणम् ब्रह्मणः पतिम्
प्रातः सोमम् उत रुद्रम् हुवेम।।1।।
5490. प्रातः-जितम् भगम् उग्रम् हुवेम
वयम् पुत्रम् अदितेः यो वि-धर्ता।
आध्रः चित् यम् मन्यमानः तुरः चित्
राजा चित् यम् भगम् भक्षि इति आह।।2।।
5491. भग प्र-णेतः भग सत्य-राधो
भग इमाम् धियम् उत् अव आ ददत् नः।
भग प्र णो जनय गोभिः अश्वैः
भग प्र नृ-भिः नृ-वन्तः स्याम।।3।।
5492. उत इदानीम् भग-वन्तः स्याम
उत प्र-पित्वे उत मध्ये अह्नाम्।
उत उत्-इता मघ-वन् सूर्यस्य
वयम् देवानाम् सु-मतौ स्याम्।।4।।
5493. भग एव भग-वान् अस्तु
देवाः तेन वयम् भग-वन्तः स्याम।
त्म त्वा भग सर्व इत् जोहवीति
स नो भग पुर-एता भव इह।।5।।
5494. सम् अध्वरायो उषसो नमन्त
दधिक्रावा-इव शुचये पदाय।
अर्वाचीनम् वसु-विदम् भगम् नो
रथम्-इव अश्वा वाजिन आ वहन्तु।।6।।
5495. अश्वा-वतीः गो-मतीः न उषासो
वीर-वतीःसदम् उच्छन्तु भद्राः।
घृतम् दुहाना विश्वतः प्र-पीता
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-42

5496. प्र ब्रह्माणो अङिगरसो नक्षन्त
प्र क्रन्दनुः नभन्यस्य वेतु।
प्र धेनव उद-प्रुतो नवन्त
युज्याताम् अद्री अध्वरस्य पेशः।।1।।
5497. सु-गः तो अग्ने सन-वित्तो अध्वा
युक्ष्वा सुते हरितो रोहितः च।
ये वा सद्मन् अरुषा वीर-वाहो
हुवे देवानाम् जनिमानि सत्तः।।2।।
5498. सम् उ वो यज्ञम् महयन् नमो-भिः
प्र होता मन्द्रो रिरिच उपाके।
यज्ञस्व सु पुरु-अणीक देवान्
आ यज्ञियाम् अरमतिम् ववृत्याः।।3।।
5499. यदा वीरस्य रेवतो दुरोणे
स्योन-शीः अतिथिः आ-चिकेतत्।

सु-प्रीतो अग्निः सु-धितो दम
आ स विशे दाति वार्यम् इयत्यै।।4।।
5500. इमम् नो अग्ने अध्वरम् जुषस्व
मरुत-सु इन्द्रे यशसम् कृधी नः।
आ नक्ता बर्हिः सदताम् उषसा
उशन्ता मित्रावरुणा यज इह।।5।।
5501. एव अग्निम् सहस्यम् वसिष्ठो
रायः-कामो विश्व-प्स्न्यस्य स्तौत्।
इषम् रयिम् पप्रथत् वाजम् अस्मे
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-43

5502. प्र वो यज्ञेषु देव-यन्तो अर्चन्
द्यावा नमो-भिः पृथिवी इषध्यै।
येषाम् ब्रह्माणि असमानि विप्रा
विष्वक् वि-यन्ति वनिनो न शाखाः।।1।।
5503. प्र यज्ञ एतु हेत्वो न सप्तिः
उत् यच्छध्वम् स-मनसो घृताचीः।
स्तृणीत बर्हिः अध्वराय साधु
ऊर्ध्वा शोचींषि देव-यूनि अस्थुः।।2।।
5504. आ पुत्रासो न मातरम् वि-भृत्राः
सानौ देवासो बर्हिषः सदन्तु।
आ विश्वाची विदथ्याम् अनक्तु
अग्ने मा नो देव-ताता मृधः कः।।3।।
5505. ते सीषपन्त जोषम् आ यजत्रा
ऋतस्य धाराः सु-दुघा दुहानाः।
ज्येष्ठम् वो अद्य मह आ वसूनाम्
आ गन्तन स-मनसो यति ष्ठ।।4।।
5506. एवा नो अग्ने विक्ष्वा दशस्य
त्वया वयम् सहसा-वन् आस्क्राः।
राया युजा सधमादो अरिष्टा यूयम्
पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-44

5507. दधि-क्राम् वः प्रथमम् अश्विना उषसम्
अग्निम् सम्-इद्धम् भगम् ऊतये हुवे।
इन्द्रम् विष्णुम् पूषणम् ब्रह्मणः
पतिम् आदित्यान् द्यावापृथिवी अपः स्वः।।1।।
5508. दधि-क्राम् उ नमसा बोधयन्त
उत्-ईरामा यज्ञम् उप-प्रयन्तः।
इडाम् देवीम् बर्हिषि सादयन्तो
अश्विना विप्रा सु-हवा हुवेम।।2।।
5509. दधि-क्रावाणम् बुबुधानो अग्निम्
उप ब्रुव उषसम् सूर्यम् गाम्।
ब्रध्नम् मंश्चतोः वरुणस्य बभ्रुम्
ते विश्वा अस्मत् दुः-इता यवयन्तु।।3।।
5510. दधि-क्रावा प्रथमो वाजी अर्वा
अग्रे रथानाम् भवति प्र-जानन्।
सम्-विदानः उषसा सूर्येण
आदित्येभिः वसु-भिः अङ्गिरो-भिः।।4।।
5511. आ नो दधि-क्राः पथ्याम्
अनक्तु ऋतस्य पन्थाम् अनु-एतवा उ।
शृणोतु नो दैव्यम् शर्धो
अग्निः शृण्वन्तु विश्वे महिषा अमूराः।।5।।

## सूक्त-45

5512. आ देवो यातु सविता सु-रत्नो
अन्तरिक्ष-प्रा वहमानो अश्वैः।
हस्ते दधानो नर्या पुरूणि
नि-वेशयन् च प्र-सुवन् च भूम।।1।।
5513. उत् अस्य बाहू शिथिरा बृहन्ता
हिरण्यया दिवो अन्तान् अनष्टाम्।
नूनम् सो अस्य महिमा पनिष्ट सूरः
चित् अस्मा अनु दात् अपस्याम्।।2।।
5514. स घा नो देवः सविता सहा-वा
आ साविषत् वसु-पतिः वसूनि।
वि-श्रयमाणो अमतिम् उरूचीम्
मर्त-भोजनम् अध रासते नः।।3।।
5515. इमा गिरः सवितारम् सु-जिह्वम्
पूर्णगभ-स्तिम् ईडते सु-पाणिम्।
चित्रम् वयो बृहत् अस्मे दधातु
यूयम् पात स्वस्ति-भिः सदा नः।।4।।

## सूक्त-46

5516. इमा रुद्राय स्थिर-धन्वने गिरः
क्षिप्र-इषवे देवाय स्वधा-व्ने।
अषाडहाय सहमानाय वेधसे
तिग्म-आयुधाय भरत शृणोतु नः।।1।।
5517. स हि क्षयेण क्षम्यस्य जन्मनः
साम-राज्येन दिव्यस्य चेतति।
अवन् अवन्तीः उप नो दुरः चर
अनमीवो रुद्र जासु नो भव।।2।।
5518. या ते दिद्युत अव-सृष्टा दिवः परि
क्षमया चरति परि सा वृणक्तु नः।
सहस्रम् ते सु-अपिवात भेषजा
मा नः तोकेषु तनयेषु रीरिषः।।3।।
5519. मा नो वधी रुद्र मा परा दा
मा ते भूम प्र-सितौ हीडितस्य।

आ नो भज बर्हिषि जीव-शंसे
यूयम् पात स्वस्ति-भिः सदा नः।।4।।

## सूक्त-47

5520. आपो यम् वः प्रथमम् देव-यन्त
इन्द्र-पानम् ऊर्मिम् अकृण्वत इडः।
तम् वो वयम् शुचिम् अरिप्रम्
अद्य घृत-प्रुषम् मधु-मन्तम् वनेम।।1।।
5521. तम् ऊर्मिम् आपो मधु-मत्-तमम्
वो अपाम् नपात्अवतु आशु-हेमा।
यस्मिन् इन्द्रो वसु-भिः मादयाते
तम् अश्याम देवयन्तो वो अद्य।।2।।
5522. शत-पवित्राः स्वधया मदन्तीः
देवीः देवानाम् अपि यन्ति पाथः।
ता इन्द्रस्य न मिनन्ति व्रतानि
सिन्धु-भ्यो हव्यम् घृत-वत् जुहोत।।3।।
5523. याः सूर्यो रश्मि-भिः आ-ततान
याभ्य इन्द्रो अरदत् गातुम् ऊर्मिम्।
ते सिन्धवो वरिवो धातनानो यूयम्
पात स्वस्ति-भिः सदा नः।।4।।

## सूक्त-48

5524. ऋभुक्षणो वाजा मादयध्वम्
अस्मे नरो मघवानः सुतस्य।
आ वो अर्वाचः क्रतवो न याताम्
विभ्वो रथम् नर्यम् वर्तयन्तु।।1।।
5525. ऋभुः ऋभुः-भिः अभि वः
स्याम वि-भ्वो विभु-भिः शवसा शवांसि।
वाजो अस्मान् अवतु वाज-सातौ
इन्द्रेण युजा तरुषेम वृत्रम्।।2।।
5526. ते चित् हि पूर्वीः अभि सन्ति
शासा विश्वान् अर्य उपर-ताति वन्वन्।
इन्द्रो वि-भ्वाँ ऋभुक्षा वाजो अर्यः शत्रोः
मिथत्या कृणवन् वि नृम्णम्।।3।।
5527. नू देवासो वरिवः कर्तना नो भूत
नो विश्वे अवसे स-जोषाः।
सम् अस्मे इषम् वसवो ददीरन्
यूयम् पात स्वस्ति-भिः सदा नः।।4।।

## सूक्त-49

5528. समुद्र-ज्येष्ठाः सलिलस्य मध्यात्
पुनाना यन्ति अनि-विशमानाः।
इन्द्रो या वज्री वृषभो रराद
ता आपो देवीः इह माम् अवन्तु।।1।।
5529. या आपो दिव्या उत वा स्रवन्ति
खनित्रिमा उत वा याः स्वयम्-जाः।
समुद्र-अर्था याः शुचयः पावकाः
ता आपो देवीः इह माम् अवन्तु।।2।।
5530. यासाम् राजा वरुणो याति
मध्ये सत्यानृते अव-पश्यन् जनानाम्।
मधुश्चुतः शुचयो याः पावकः
ता आपो देवीः इह माम् अवन्तु।।3।।
5531. यासु राजा वरुणो यासु सोमो
विश्वे देवा यासु ऊर्जम् मदन्ति।
वैश्वानरो यासु अग्निः प्र-विष्टः
ता आपो देवीः इह माम् अवन्तु।।4।।

## सूक्त-50

5532. आ माम् मित्रावरुणा इह रक्षतम्
कुलाययत् वि-श्वयत् मा न आ गन्।
अजका-वम् दुः-दृशीकम् तिरो दधे
मा माम् पद्येन रपसा विदत् त्सरुः।।1।।
5533. यत् वि-जामन् परुषि वन्दनम्
भुवत् अष्ठीवन्तौ परि कुल्फौ च देहत्।
अग्निः तत् शोचन् अप बाधताम्
इतो मा माम् पद्येन रपसा विदत् त्सरुः।।2।।
5534. यत् शल्मलौ भवति यत् नदीषु
यत् ओषधीभ्यः परि जायते विषम्।
विश्वे देवा निः इतः तत् सुवन्तु
मा माम् पद्येन रपसा विदत् त्सरुः।।3।।
5535. याः प्र-वतो नि-वत उत्-वत
उदन्-वतीः अनुदकाः च याः।
ता अस्मभ्यम् पयसा पिन्वमानाः
शिवा देवीः अशिपदा भवन्तु
सर्वा नद्यो अशिमिदा भवन्तु।।4।।

## सूक्त-51

5536. आदित्यानाम् अवसा नूतनेन
सक्षीमहि शर्मणा शम्-तमेन।
अनागाः-त्वे अदिति-त्वे तुरास
इमम् यज्ञम् दधतु श्रोषमाणाः।।1।।
5537. आदित्यासो अदितिः मादयन्ताम्
मित्रो अर्यमा वरुणो रजिष्ठाः।
अस्माकम् सन्तु भुवनस्य गोपाः
पिबन्तु सोमम् अवसे नो अद्य।।2।।
5538. आदित्या विश्वे मरुतः च विश्वे
देवाः च विश्व ऋभवः च विश्वे।
इन्द्रो अग्निः अश्विना तुष्टुवाना
यूयम् पात स्वस्ति-भिः सदा नः।।3।।

## सूक्त-52

5539. आदित्यासो अदितयः स्याम
पूः देव-त्रा वसवो मर्त्य-त्रा।
सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी
भवन्तः।।1।।
5540. मित्रः तत् नो वरुणो मा महन्त
शर्म तोकाय तनयाय गोपाः।
मा वो भुजेम अन्य-जातम् एनो
मा तत् कर्म वसवो यत् चयध्वे।।2।।
5541. तुरण्यवो अङ्गिरसो नक्षन्त
रत्नम् देवस्य सवितुः इयानाः।
पिता च तत् नो महान् यजत्रो
विश्वे देवाः स-मनसो जुषन्त।।3।।

## सूक्त-53

5542. प्र द्यावा यज्ञैः पृथिवी नमो-भिः
स-वाध ईडे बृहती यजत्रे।
ते चित् हि पूर्वे कवयो गृणन्तः
पुरो मही दधिरे देव-पुत्रे।।4।।

5543. प्र पूर्व-जे पितरा नव्यसीभिः
गीः-भिः कृणुध्वम् सदने ऋतस्य।
आ नो द्यावापृथिवी दैव्येन जनेन
यातम् महि वाम् वरूथम्।।2।।
5544. उतो हि वाम् रत्न-धेयानि सन्ति
पुरूणि द्यावपृथिवी सु-दासे।
अस्मे धत्तम् यत् असत् अस्कृधोयु
यूयम् पात स्वस्ति-भिः सदा नः।।3।।

## सूक्त-54

5545. वास्तोः पते प्रति जानीहि अस्मान्
सु-आवेशो अनमीवो भवा नः।
यत् त्वा ईमहे प्रति तत् नो जुषश्व
शम् नो भव द्वि-पदे शम् चतुः-पदे।।1।।
5546. वास्तोः पते प्र-तरणो न एधि
गय-स्फानो गोभिः अश्वेभिः इन्दो।
अजरासः ते सख्ये स्याम पिता-इव
पुत्रान् प्रति नो जुषस्व।।2।।
5547. वास्तोः पते शग्मया सम्-सदा
ते सक्षिमहि रण्वया गातु-मत्या।
पाहि क्षेम उत योगे वरम् नो
यूयम् पात स्वस्ति-भिः सदा नः।।3।।

## सूक्त-55

5548. अमीव-हा वास्तोः पते विश्वा रूपाणि आ-विशन्।
सखा सु-शेव एधि नः।।1।।
5549. यत् अर्जुन सारमेय दतः पिशङ्ग यच्छसे।
वि-इव भ्राजन्त ऋष्टय उप स्रक्वेषु
बप्सतो नि षु स्वप।।2।।
5550. स्तेनम् राय सारमेय तस्करम् वा पुनः-सर।
स्तोतृन् इन्द्रस्य रायसि किम् अस्मान्
दुच्छुना-यसे नि षु स्वप।।3।।
5551. त्वम् सूकरस्य दर्दृहि तव दर्दतु सूकरः।
स्तोतृन् इन्द्रस्य रायसि किम् अस्मान्
दुच्छुना-यसे नि षु स्वप।।4।।
5552. सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः।
ससन्तु सर्वे ज्ञातयः सस्तु अयम् अभितो जनः।।5।।
5553. य आस्ते यः च चरति यः च पश्यति नो जनः।
तेषाम् सम् हन्मो अक्षाणि यथा इदम् हर्म्यम् तथा।।6।।
5554. सहस्र-शृङ्गो वृषभो यः समुद्रात् उत्-आचरत्।
तेना सहस्येन वयम् नि जनान् स्वापयामसि।।7।।
5555. प्रोष्ठे-शया वह्ये-शया नारीः या तल्प-शीवरीः।
स्त्रियो याः पुण्य-गन्धाः ताः सर्वाः स्वापयामसि।।8।।

## सूक्त-56

5556. क ईम् वि-अक्ता नरः स-नीला,
रुद्रस्य मर्या अधा सु-अश्वाः।।1।।
5557. नकिः हि एषाम् जनूंषु वेद,
ते अङ्ग विद्रे मिथो जनित्रम्।।2।।
5558. अभि स्व-पूभिः मिथो वपन्त
वात-स्वनसः श्येना अस्पृध्रन्।।3।।
5559. एतानि धीरो निण्या चिकेत
पृश्निः यत् ऊधो मही जभार।।4।।
5560. सा विट् सु-वीरा मरुत्-भिः अस्तु
सनात् सहन्ती पुष्यन्ती नृम्णम्।।5।।
5561. यामम् येष्ठाः शुभा शोभिष्ठाः श्रिया
सम्-मिश्ला ओजो-भिः उग्राः।।6।।
5562. उग्रम् व ओजः स्थिरा शवांसि
अधा मरुत्-भिः गणः तुविष्मान्।।7।।
5563. शुभ्रो वः शुष्मः क्रुध्मी मनांसि
धुनिः मनिः-इव शर्धस्य धृष्णोः।।8।।
5564. सनेमि अस्मत् युयोत दिद्युम्
मा वो दुः-मतिः इह प्रणङ् नः।।9।।
5565. प्रिया वो नाम हुवे तुराणाम्
आ यत् तृपत् मरुतो वावशानाः।।10।।
5566. स्-आयुधास इष्मिणः सु-निष्का
उत स्वयम् तन्वः शुम्भमानाः।।11।।

5567. शुची वो हव्या मरुतः शुचीनाम्
शुचमि हिनोमि अध्वरम् शुचि-भ्यः।
ऋतेन सत्यम् ऋत-साप आयन्
शुचि-जन्मानः शुचयः पावकाः।।12।।
5568. अंसेषु आ मरुतः थादयो
वो वक्षः-सु रुक्मा उप-शिश्रियाणाः।
वि वि-द्युतो न वृष्टि-भी रुचाना
अनु स्वधाम् आयुधैः यच्छमानाः।।13।।
5569. प्र बुध्न्या व ईरते महांसि
प्र नामानि प्र-यच्यवः तिरध्वम्।
सहस्रियम् दम्यम् भागम् एतम्
गृह-मेधीयम् मरुतो जुषध्वम्।।14।।
5570. यदि स्तुतस्य मरुतो अधि इथ
इत्था विप्रस्य वाजिनो हवीमन्।
मक्षु रायः सुवीर्यस्य दात नू चित्
यम् अन्य आ-दभत् अरावा।।15।।
5571. अत्यासो न ये मरुतः सु-अञ्चो
यक्ष-दृशो न शुभयन्त मर्याः।
ते हर्म्ये-ष्ठाः शिशवो न शुभ्रा
वत्सासो न प्र-क्रीडिनः पयो-धाः।।16।।
5572. दशस्यन्तो नो मरुतो मडन्तु
वरिवस्यन्तो रोदसी सुमेके।
आरे गो-हा नृ-हा वधा वो अस्तु
सुम्नेभिः अस्मे वसवो नमध्वम्।।17।।
5573. आ वो होता जोहवीति सत्तः
सत्रीचीम् रातिम् मरुतो गृणानः।
य ईवतो वृषणो अस्ति गोपाः
अद्वयावी हवते व उक्थैः।।18।।
5574. इमे तुरम् मरुतो रमयन्ति
इमे सहः सहस आ नमन्ति।
इमे शंसम् वनुष्यतो नि पान्ति
गुरु द्वेषो अररुषे दधन्ति।।19।।
5575. इमे रध्रम् चित् मरुतो
जुनन्ति भृमिम् चित् यथा वसवो जुषन्त।
अप बाधध्वम् वृषणः तमांसि
धत्त विश्वम् तनयम् तोकम् अस्मे।।20।।
5576. मा वो दात्रात् मरुतो नि अराम
मा पश्चात् दध्म रथ्यो वि-भागे।
आन नः स्पार्हे भजतना वसव्ये
यत् ईम् सु-जातम् वृषणो वो अस्ति।।21।।
5577. सम् यत् हनन्त मन्यु-भिः
जनासः शूरा यह्वीषु ओषधीशु विक्षु।
अध स्मा नो मरुतो रुद्रियासः
त्रातारो भूत पृतनासु अर्यः।।22।।
5578. भूरि चक्र मरुतः पित्र्याणि
उक्थानि या वः शस्यन्ते पुराचित्।
मरुत्-भिः उग्रः पृतनासु साडहा
मरुत्-भिः इत् सनिता वाजम् अर्वा।।23।।
5579. अस्मे वीरो मरुतः शुष्मी अस्तु
जनानाम् यो असुरो वि-धर्ता।
अपो येन सु-क्षितये तरेम अध
स्वम् ओको अभि वः स्याम।।24।।
5580. तत् न इन्द्रो वरुणो मित्रो
अग्निः आप ओषधीः वनिनो जुषन्त।
शर्मन् स्याम मरुताम् उप-स्थे
यूयम् पात स्वस्ति-भिः सदा नः।।25।।

## सूक्त-57

5581. मध्वो वो नाम मारुतम्
यजत्राः प्र यजेषु शवसा मदन्ति।
ये रेजयन्ति रोदसी चित् उर्वी पिन्वन्ति
उत्सम् यत् अयासु उग्राः।।1।।
5582. नि-चेतारो हि मरुतो गृणन्तम्
प्र-णेतारो यजमानस्य मन्म।
अस्माकम् अद्य विदथेषु बर्हिः
आ वीतये सदत पिप्रियाणाः।।2।।
5583. न एतावत् अन्ये मरुतो यथा इमे
भ्राजन्ते रुक्मैः आयुधैः तनूभिः।
आ रोदसी विश्व-पिशः पिशानाः
समानम् अञ्जि अञ्जते शुभे कम्।।3।।
5584. ऋधक् सा वो मरुतो दिद्युत् अस्तु
यत् व आगः पुरुषता कराम।
मा वः तस्याम् अपि भूम् यजत्रा अस्मे
वो अस्तु सु-मतिः चनिष्ठा।।4।।
5585. कृते चित् अत्र मरुतो रणन्त
अनवद्यासः शुचयः पावकाः।
प्र णो अवत सुमति-भिः यजत्रा
प्र वाजेभिः तिरत पुष्यसे नः।।5।।
5586. उत स्तुतासो मरुतो व्यन्तु
विश्वेभिः नाम-भिः नरो हवींषि।
ददात नो अमृतस्य प्र-जायै
जिगृत रायः सूनृता मघानि।।6।।
5587. आ स्तुतासो मरुतो विश्व ऊती
अच्छा सूरीन् सर्व-ताता जिगात।
ये नः त्मना शतिनो वर्धयन्ति
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-58

5588. प्र साकम्-उक्षे अर्चता गणाय
यो दैव्यस्य धाम्नः तुविष्मान्।
उत क्षोदन्ति रोदसी महि-त्वा
नक्षन्ते नाकम् निः-ऋतेः अवंशात्।।1।।
5589. जनूः चित् वो मरुतः त्वेष्येण
भीमासः तुवि-मन्यवो अयासः।
प्र ये महो-भिः ओजसा उत सन्ति
विश्वो वो यामन् भयते स्वः-दृक्।।2।।
5590. बृहत् वयो मघवत्-भ्यो दधात
जुजोषन् इत् मरुतः सु-ष्टुतिम् नः।
गतो न अध्वा वि तिराति जन्तुम्
प्र णः स्पार्हाभिः ऊति-भिः तिरेत।।3।।
5591. युष्मा-ऊतो विप्रो मरुतः शतस्वी
युष्मा-ऊतो अर्वा सहुरिः सहस्री।
युष्मा ऊतः सम्-राट् उत हन्ति
वृत्रम् प्र तत् वो अस्तु धूतयो देष्णम्।।4।।
5592. तान् आ रुद्रस्य मीडहुषो विवासे
कुवित् नंसन्ते मरुतः पुनः नः।
यत् सस्वर्ता जिहीडिरे यत् आविः
अव तत् एन ईमहे तुराणाम्।।5।।
5593. प्र सा वाचि सु-ष्टुतिः मघोनाम्
इदम् सु-उक़्तम् मरुतो जुषन्त।
आरात् चित् द्वेषो वृषणो युयोत
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-59

5594. यम् त्रायध्व इदम्-इदम् देवासो यम् च नयथ।
तस्मा अग्ने वरुण मित्र अर्यमन् मरुतः शर्म यच्छत।।1।।
5595. युष्माकम् देवा अवसा अहनि
प्रिय ईजानः तरति द्विषः।
प्र स क्षयम् तिरते वि महीः
इषो यो वो वराय दाशति।।2।।
5596. नहि वः चरमम् चन वसिष्ठः परि-मंसते।
अस्माकम् अद्य मरुतः सुते
सचा विश्वे पिबत कामिनः।।3।।
5597. नहि व ऊतिः पृतनासु
मर्धति यस्मा अराध्वम् नरः।
अभि व आ अवर्त् सु-मतिः
नवीयसी तूयम् यात पिपीषवः।।4।।
5598. ओ षु धृष्वि-राधसः यान अन्धांसि पीतये।
इमा वो हव्या मरुतो ररे हि कम्
मो षु अन्यत्र गन्तन।।5।।
5599. आ च नो बर्हिः सदत अविता
च नः स्पार्हाणि दातवे वसु।
अस्रेधन्तो मरुतः सोम्ये मधौ स्वाहा इह मादयाध्वै।।6।।
5600. सस्वः चित् हि तन्वः शुंभमाना
आ हंसासो नील-पृष्ठा अपप्तन्।
विश्वम् शर्धो अभितो मा नि षेद
नरो न रण्वाः सवने मदन्तः।।7।।
5601. यो नो मरुतो अभि दुः-हृणायुः
तिरः चित्तानि वसवो जिघांसति।
द्रुहः पाशान् प्रति स समुचीष्ट
तपिष्ठेन हन्मना हन्तना तम्।।8।।
5602. साम्-तपना इदम् हविः मरुतः तत् जुजुष्टन।
युष्माक ऊती रिशादसः।।9।।
5603. गृह-मेधास आ गत मरुतो मा अप भूतन।
युष्माक ऊती सु-दानवः।।10।।
5604. इह-इह वः स्व-तवसः कवयः सूर्य-त्वचः।
यज्ञम् मरुत आ वृणे।।11।।
5605. त्र्यम्बकम् यजामहे सु-गन्धिम् पुष्टि-वर्धनम्।
उर्वारुकम् इव बन्धनात् मृत्योः मुक्षीय मा अमृतात्।।12।।

## सूक्त-60

5606. यत् अद्य सूर्य ब्रवो अनागा
उत्-यन् मित्राय वरुणाय सत्यम्।
वयम् देव-त्रा अदिते स्याम
तव प्रयासो अर्यमन् गृणन्तः।।1।।
5607. एष स्य मित्रावरुणा नृ-चक्षा उभे
उत् एति सूर्य अभि ज्मन्।
विश्वस्य स्थातुः जगतः च गोपा
ऋजु मर्तेषु वृजिना च पश्यन्।।2।।
5608. अयुक़्त सप्त हरितः सध-स्थात्
या ईम् वहन्ति सूर्यम् घृताचीः।
धामानि मित्रावरुमा युवाकुः
सम् यो यूथा-इव जनिमानि चष्टे।।3।।
5609. उत् वाम् पृक्षासो मधु-मन्तो
अस्थुः आ सूर्यो अरुहत् शुक्रम् अर्णः।
यस्मै आदित्या अध्वनो रदन्ति
मित्रो अर्यमा वरुणः स-जोषाः।।4।।
5610. इमे चेतारो अनृतस्य भूरेः
मित्रो अर्यमा वरुणो हि सन्ति।
इम ऋतस्य वावृधुः दुरोणे
शग्मासः पुत्रा अदितेः अदब्धाः।।5।।
5611. इमे मित्रो वरुणो दू-दभासो
अचेतसम् चित् चितयन्ति दक्षैः।
अपि क्रतुम् सु-चेतसम् वन्ततः

तिरः चित् अंहः सु-पथा नयन्ति।।6।।
5612. इमे दिवो अनि-मिषा पृथिव्याः
चिकित्वांसो अचेतसम् नयन्ति।
प्र-व्राजे चित् नद्यो गाधम् अस्ति
पारम् नो अस्य विष्पितस्य पर्षन्।।7।।
5613. यत् गोपावत् अदितिः शर्म भद्रम्
मित्रो यच्छन्ति वरुणः सु-दासे।
तस्मिन् आ तोकम् तनयम् दधाना
मा कर्म देव-हेडनम् तुरासः।।8।।
5614. अव वेदिम् होत्राभिः यदेत रिपः
काः चित् वरुम-ध्रुतः सः।
परि द्वेषो-भिः अर्यमा वृणक्तु
उरुम् सु-दासे वृषणा उ लोकम्।।9।।
5615. सस्व चित् हि सम्-ऋतिः त्वेषी
एषाम् अपीच्येन सहसा सहन्ते।
युष्मत् भिया वृषणो रेजमाना
दक्षस्य चित् महिना मृडता नः।।10।।
5616. यो ब्रह्मणे सु-मतिम् आ-यजाते
वाजस्य सातौ परमस्य रायः।
सीक्षन्त मन्युम् मघ-वानो अर्य
उरु क्षयाय चक्रिरे सु-धातु।।11।।
5617. इयम् देव पुरो-हितिः युव-भ्याम्
यज्ञेषु मित्रावरुणौ अकारि।
विश्वानि दुः-गा पिपृतम् तिरो नो
यूयम् पात स्वस्ति-भिः सदा नः।।12।।

## सूक्त-61

5618. उत् वाम् चक्षुः वरुणा सु-प्रतीकम्
देवयोः एति सूर्यः ततन्वान्।
अभि यो विश्वा भुवनानि चष्टे
स मन्युम् मर्त्येषु आ चिकेत।।1।।
5619. प्र वाम् स मित्रावरुणौ ऋता-वा
विप्रो मन्मानि दीर्घ-श्रुत् ईयर्ति।
यस्य ब्रह्माणि सु-क्रतू अवाथ
आ यत् क्रत्वा न शरदः पृणैथे।।2।।
5620. प्र उरोः मित्रावरुणा पृथिव्याः
प्र दिव ऋष्वात् बृहतः सुदानू।
स्पशो दधाथे ओषधीषु विक्षु ऋधक्
यतो अनि-मिषम् रक्षमाणा।।3।।
5621. शंसा मित्रस्य वरुणस्य धाम
शष्मो रोदसी बद्बधे महि-त्वा।
अयन् मासा अयज्वनाम् अवीराः
प्र यज्ञ-मन्मा वृजनम् तिराते।।4।।
5622. अमूरा विश्वा वृषणौ इमा वाम्
न यासु चित्रम् ददृशे न यक्षम्।
द्रुहः सचन्ते अनृता जनानाम्
न वाम् निण्यानि अचिते अभूवन्।।5।।
5623. सम् उ वाम् यज्ञम् महयम्
नमो-भिः हुवे वाम् मित्रावरुणा स-बाधः।
प्र वाम् मन्मानि ऋचसे नवानि
कृतानि ब्रह्म जुजुषन् इमानि।।6।।
5624. इयम् देव पुरो-हितिः युव-भ्याम्
यज्ञेषु मित्रावरुणौ अकारि।
विश्वानि दुः-गा पिपृतम् तिरो नो
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-62

5625. उत् सूर्यो बृहत् अर्चींषि अश्रेत्
पुरु विश्वा जनिम मानुषाणाम्।
समो दिवा ददृशे रोचमानः क्रत्वा
कृतः सु-कृतः कर्तृ-भिः भूत्।।1।।
5626. स सूर्य प्रति पुरो न उत् गा
एभिः स्तोमेभिः एतशेभिः एवैः।
प्र नो मित्राय वरुणाय वोचो
अनागसो अर्यम्णे अग्नये च।।2।।
5627. वि नः सहस्रम् शुरुधो रदन्तु
ऋता-वानो वरुणो मित्रो अग्निः।
यच्छन्तु चन्द्रा उप-मम् नो अर्कम्
आ नः कामम् पूपुरन्तु स्तवानाः।।3।।
5628. द्यावाभूमी अदिते त्रासीथाम् नो
ये वाम् जज्ञुः सु-जनिमान ऋष्वे।
मा हेडे भूम वरुणस्य वायोः
मा मित्रस्य प्रिय-तमस्य नृणाम्।।4।।
5629. प्र बाहवा सिसृतम् जीवसे न
आ नो गव्यूतिम् उक्षतम् घृतेन।
आ नो जने श्रवयतम् युवाना
श्रुतम् मे मित्रावरुणा हवा इमा।।5।।
5630. नू मित्रो वरुणो अर्यमा नः
त्मने तोकाय वरुवो दधन्तु।
सु-गा नो विश्वा सु-पथानि सन्तु
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-63

5631. उत् उ एति सु-भगो विश्व-चक्षाः
साधारणः सूर्यो मानुषाणाम्।
चक्षुः मित्रस्य वरुणस्य देवः चर्म-इव
यः सम्-अविव्यक् तमांसि।।1।।

5632. उत् उ एति प्र-सविता जनानाम्
महान् केतुः अर्णवः सूर्यस्य।
समानम् चक्रम् परि-आविवृत्सन्
यत् एतशो वहति धूः-षु युक्तः।।2।।
5633. वि-भ्राजमान उषसाम् उप-स्थात्
रेभैः उत् एति अनु-मद्यमानः।
एष मे देव सविता चच्छन्द
यः समानम् न प्र-मिनाति धाम्।।3।।
5634. दिवो रुक्म उरु-चक्षा उत् एति
दूरे-अर्थः तरणिः भ्राजमानः।
नूनम् जनाः सूर्येण प्र-सूता
अयन् अर्थानि कृणवन् अपांसि।।4।।
5635. यत्रा चक्रुः अमृता गातुम् अस्मै
श्येनो न दीयन् अनु एति पाथः।
प्रति वाम् सूर उत्-इते विधेम
नमो-भिः मित्रावरुणा उत हव्यैः।।5।।
5636. नू मित्रो वरुणो अर्यमानः
त्मने तोकाय वरिवो दधन्तु।
सु-गा नो विश्वा सु-पथानि सन्तु
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-64

5637. दिवि क्षयन्ता रजसः पृथिव्याम्
प्र वाम् घृतस्य निः-णिजो ददीरन्।
हव्यम् नो मित्रो अर्यमा सु-जातो
राजा सु-क्षत्रो वरुणो जुषन्त।।1।।
5638. आ राजाना मह ऋतस्य गोपा
सिन्धु-पती क्षत्रिया यातम् अर्वाक्।
इडाम् नो मित्रावरुणो तवृष्टिम्
अव दिव इन्वतम् जीर-दानू।।2।।
5639. मित्रः तत् नो वरुणो देवो अर्यः
प्र-साधिष्ठेभिः पथि-भिः नयन्तु।
ब्रवत् यथा न आत् अरिः सु-दास
इषा मदेम सह देव-गोपाः।।3।।
5640. यो वाम् गर्तम् मनसा तक्षत् एतम्
ऊर्ध्वाम् धीतिम् कृणवत् धारयत् च।
उक्षेथाम् मित्रावरुणा घृतेन ता
राजाना सु-क्षितीः तर्पयेथाम्।।4।।
5641. एषः स्तोमो वरुण मित्र तुभ्यम्
सोमः शुक्रो न वायवे अयामि।
अविष्टम् धियो जिगृतम् पुरम्-धीः
यूयम् स्वस्ति-भिः सदा नः।।5।।

## सूक्त-65

5642. प्रति वाम् सूर उत्-इते सु-उक्तैः
मित्रम् हुवे वरुणम् पूत-दक्षम्।
ययोः असुर्यम् अक्षितम् ज्येष्ठम्
विश्वस्य यामन् आ-चिता जिगत्नु।।1।।
5643. ता हि देवानाम् असुरा तौ अर्या
ता नः क्षितीः करतम् ऊर्जयन्तीः।
अश्याम मित्रावरुणा वयम् वाम्
द्यावा च यत्र पीपयन् अहा च।।2।।
5644. ता भूरि-पाशौ अनृतस्य सेतू
दुः-अत्येतू रिपवे मर्त्याय।
ऋतस्य मित्रावरुणा पथा वाम्
अपो न नावा दुः-इता तरेम।।3।।
5645. आ नो मित्रावरुणा हव्य-जुष्टिम्
घृतैः गव्यूतिम् उक्षतम् इडाभिः।
प्रति वाम् अत्र वरम् आ जनाय
पृणीतम् उद्नो दिव्यस्य चारोः।।4।।
5646. एष स्तोमो वरुण मित्र तुभ्यम्
सोमः शुक्रो न वायवे अयामि।
अविष्टम् धियो जिगृतम् पुरम्-धीः
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-66

5647. प्र मित्रयोः वरुणयोः स्तोमो न एतु शूष्यः।
नमस्वान् तुवि-जातयोः।।1।।
5648. या धारयन्त देवाः सु-दक्षा दक्ष-पितरा।
असुर्याय प्र-महसा।।2।।
5649. ता नः स्ति-पा तनू-पा वरुण जरितृणाम्।
मित्र साधयतम् धियः।।3।।
5650. यत् अद्य सूर उत्-इते-अनागा मित्रो अर्यमा।
सुवाति सविता भगः।।4।।
5651. सु प्र-अवीः अस्तु स क्षयः प्र नु यामन् सु-दानवः।
ये नो अंहो अति-पिप्रति।।5।।
5652. उत स्व-राजो अदितिः अदब्धस्य व्रतस्य ये।
महो राजान ईशते।।6।।
5653. प्रति वाम् सूर उत्-इते मित्रम् गृणीषे वरुणम्।
अर्यमणम् रिशादसम्।।7।।
5654. राया हिरण्य-या मतिः इयम् अवृकाय शवसे।
इयम् विप्रा मेध-सातये।।8।।
5655. ते स्याम देव वरुण ते मित्र सूरि-भिः सह।
इषम् स्वः च धीमहि।।9।।
5656. बहवः सूर-चक्षसो अग्नि-जिह्वा ऋता-वृधः।
त्रीणि ये येमुः विदथानि
धीति-भिः विश्वानि परिभूति-भिः।।10।।

5657. वि ये दधुः शरदम् मासम् आत् अहः
यज्ञम् अक्तुम् च आत् ऋचम्।
अनाप्यम् वरुणो मित्रो अर्यमा क्षत्रम् राजान आशत।।11।।
5658. तत् वो अद्य मनामहे सु-उक्तैः सूर उत्-इते।
यत् ओहते वरुणो मित्रो अर्यमा यूयम् ऋतस्य रथ्यः।।12।।
5659. ऋता-वान ऋत-जाता ऋता-वृधो
घोरासो अनृत-द्विषः।
तेषाम् वः सुम्ने षुच्छर्दिः-तमे नरः
स्याम ये च सूरयः।।13।।
5660. उत् उ त्यत् दर्शतम् वपुः दिवः एति प्रति-ह्वरे।
यत् ईम् आशुः वहति देव
एतशो विश्वस्मै चक्षसे अरम्।।14।।
5661. शीर्ष्णः-शीर्ष्णो जगतः तस्थुषः
पतिम् समया विश्वम् आ रजः।
सप्त स्वसारः सुविताय सूर्यम् वहन्ति हरितो रथे।।15।।
5662. तत् चक्षुः देव-हितम् शुक्रम् उत्-चरत्।
पश्येम शरदः शतम् जीवेम शरदः शतम्।।16।।
5663. काव्येभिः अदाभ्या आ यातम् वरुण द्यु-मत्।
मित्रः च सोम-पीतये।।17।।
5664. दिवो धाम-भिः वरुण मित्रः च आ यातम् अद्रुहा।
पिबतम् सोमम् आ-तुजी।।18।।
5665. आ यातम् मित्रावरुणा जुषाणौ आ-हुतिम् नरा।
पातम् सोमम् ऋता-वृधा।।19।।

## सूक्त-67

5666. प्रति वाम् रथम् नृपती जरध्यै
हविष्मता मनसा यज्ञियेन।
यो वाम् दूतो न धिष्ण्यौ अजीगः
अच्छा सूनुः न पितरा विवक्मि।।1।।
5667. अशोचि अग्निः सम्-इधानो अस्मे
उपो अदृश्रन् तमसः चित् अन्ताः।
अचेति केतुः उषसः पुरस्तात्
श्रिये दिवो दुहितुः जायमानः।।2।।
5668. अभि वाम् नूनम् अश्विना सु-होता
स्तोमैः सिषक्ति नासत्या विवक्वान्।
पूर्वीभिः यातम् पथ्याभिः अर्वाक्
स्वः-विदा वसु-मता रथेन।।3।।
5669. अवोः वाम् नूनम् अश्विना युवाकुः
हुवे यत् वाम् सुते माध्वी वसू-युः।
आ वाम् वहन्तु स्थविरासो अश्वाः
पिबाथो अस्मे सु-षुता मधूनि।।4।।
5670. प्राचीम् उ देवा अश्विना धियम् मे
अमृधाम् सातये कृतम् वसू-युम्।
विश्वा अविष्टम् वाज आ पुरम्-धीः
ता नः शक्तम् शीच-पती शचीभिः।।5।।
5671. अविष्टम् धीषु अश्विना न आसु
प्रजा-वत् रेतो अह्नयम् नो अस्तु।
आ वाम् तोके तनये तूतुजानाः
सु-रत्नासो देव-वीतिम् गमेम।।6।।
5672. एष स्य वाम् पूर्वगत्वा-इव सख्ये
नि-धिः हितो माध्वी रातो अस्मे।
अहेडता मनसा आ यातम् अर्वाक्
अश्नन्ता हव्यम् मानुषीषु विक्षु।।7।।
5673. एकस्मिन् योगे भुरमा समाने
परि वाम् सप्त स्रवतो रथो गात्।
न वायन्ति सु-भ्वो देव-युक्ता
ये वाम् धूः-षु तरणयो वहन्ति।।8।।
5674. असश्चता मघवत्-भ्यो हि भूतम्
ये राया मघ-देयम् जुनन्ति।
प्र ये बन्धुम् सूनृताभिः तिरन्ते गव्या
पृंचन्तो अश्व्या मघानि।।9।।
5675. नु मे हवम् आ शृणुतम् युवाना
यासिष्टम् वर्तिः अश्विनौ इरा-वत्।
धत्तम् रत्नानि जरतम् च सूरीन्
यूयम् पात स्वस्ति-भिः सदा नः।।10।।

## सूक्त-68

5676. आ शुभ्रा यातम् अश्विना सु-अश्वा
गिरो दस्रा जुजुषाणा युवाकोः।
हव्यानि च प्रति-भृता वीतम् नः।।1।।
5677. प्र वाम् अन्धासि मद्यानि अस्थुः
अरम् गन्तम् हविषो वीतये मे।
तिरो अर्यो हवनानि श्रुतम् नः।।2।।
5678. प्र वाम् रथो मनो-जवा इर्यति
तिरो रजांसि अश्विना शत-ऊतिः।
अस्मभ्यम् सूर्यावसू इयानः।।3।।
5679. अयम् ह यत् वाम् देव-याः
उउ अद्रिः ऊर्ध्वो विवक्ति
सोम-सुत युव-भ्याम् आ वल्गू विप्रो ववृतीत हव्यैः।।4।।
5680. चित्रम् ह यत् वाम् भोजनम् नु अस्ति
नि अत्रये महिष्वन्तम् युयोतम्।
यो वाम् ओमानम् दधते प्रियः सन्।।5।।
5681. उत त्यत् वाम् जुरते अश्विना
भूत् च्यवानाय प्रतीत्यम् हविः-दे।
अधि यत् वर्प इत-ऊति धत्थः।।6।।

5682. उत त्यम् भुज्युम् अश्विना सखायो
मध्ये जहुः दुः-एवासः समुद्रे।
निः ईम् पर्षत् अरावा यो युवाकुः।।7।।
5683. वृकाय चित् जसमानाय शक्तम्
उत श्रुतम् शयवे हूयमाना।
यौ अघ्न्याम् अपिन्वतम् अपो न स्तर्यम्
चित् शक्ति अश्विना शचीभिः।।8।।
5684. एष स्य कारुः जरते सु-उक्तैः
अग्रे बुधान उषसाम् सु-मन्मा।
इषा तम् वर्धत् अघ्न्या पयो-भिः
यूयम् पात स्वस्ति-भिः सदा नः।।9।।

## सूक्त-69

5685. आ वाम् रथो रोदसी बद्बधानो
हिरण्ययो वृष-भिः यातु अश्वैः।
घृत-वर्तनिः पवि-भी रुचान इषाम्
वोड्हा नृ-पतिः वाजिनी-वान्।।1।।
5686. स पप्रथानो अभि पंच भूमा
त्रि-वन्धुरो मनसा आ यातु युक्तः।
विशो येन गच्छथो देवयन्तीः कुत्रा
चित् यामम् अश्विना दधाना।।2।।
5687. सु-अश्वा यशसा आ यातम् अर्वाक्
दस्रा नि-धिम् मधु-मन्तम् पिबाथः।
वि वाम् रथो वध्वा यादमानो
अन्तान् दिवो बाधते वर्तनि-भ्याम्।।3।।
5688. युवोः श्रियम्परि योषा अवृणीत
सूरो दुहिता परि-तक्म्यायाम्।
यत् देव-यन्तम् अवथः शचीभिः
परि घ्रंसम् ओमना वाम् वयो गात्।।4।।
5689. यो ह स्य वाम् रथिरा वस्ते उस्रा
रथो युजानः परि-याति वर्तिः।
तेन नः शम् यो उषसो वि-उष्टौ
नि अश्विना वहतम् यज्ञे अस्मिन्।।5।।
5690. नरा गौरा-इव वि-द्युतम् तृषाणा
अस्माकम् अद्य सवना उप यातम्।
पुरु-त्रा हि वाम् मति-भिः हवन्ते मा
वाम् अन्ये नि यमन् देव-यन्तः।।6।।
5691. युवम् भुज्यम् अव-विद्धम् समुद्रे
उत् ऊहथुः अर्णसो अस्रिधनैः।
पतत्रि-भिः अश्रमैः अव्यथि-भिः
दंसनाभिः अश्विना पारयन्ता।।7।।
5692. नू मे हवम् आ शृणुतम् युवाना
यासिष्टम् वर्तिः अश्विनौ इरा-वत्।
धत्तम् रत्नानि जरतम् च सूरीन्
यूयम् पात स्वस्ति-भिः सदा नः।।8।।

## सूक्त-70

5693. आ विश्व-वारा अश्वना गतम् नः
प्र तत् स्थानम् अवाची वाम् पृथिव्याम्।
अश्वो न वाजी शुन-पृष्ठो अस्थात्
आ यत् सेदथुः ध्रुवसे न योनिम्।।1।।
5694. सिषक्ति सा वाम् सु-मतिः चनिष्ठा
अतापि घर्मो मनुषो दुरोणे।
यो वाम् समुद्रान् सरितः पिपर्ति
एत-ग्वा चित् न सु-युजा युजानः।।2।।
5695. यानि स्थानानि अश्विना दधाथे
दिवो यह्वीषु ओषधीषु विक्षु।
नि पर्वतस्य मूर्धनि सदन्ता
इषम् जनाय दाशुषे वहन्ता।।3।।
5696. चनिष्टम् देवा ओषधीषु अप्सु
यत् योग्या अश्नवैथे ऋषीणाम्।
पुरूणि रत्ना दधतौ नि अस्मे
अनु पूर्वाणि चख्यथुः युगानि।।4।।
5697. शुश्रु-वांसा चित् अश्विना पुरूणि
अभि ब्रह्माणि चक्षाथे ऋषीणाम्।
प्रति प्र यातम् वरम् आ जनाय
अस्मे वाम् अस्तु सु-मतिः चनिष्ठा।।5।।
5698. यो वाम् यज्ञो नासत्या हविष्मान्
कृत-ब्रह्मा स-मर्यो भवाति।
उप प्र यातम् वरम् आ वसिष्ठम् इमा
ब्रह्माणि ऋच्यन्ते युव-भ्याम्।।6।।
5699. इयम् मनीषा इयम् अश्विना गीः
इमाम् सु-वृक्तिम् वृषणा जुषेथाम्।
इमा ब्रह्माणि युव-यूनि अग्मन्
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-71

5700. अप स्वसुः उषसो नक् जिहीते
रिणक्ति कृष्णीः अरुषाय पन्थाम्।
अश्वा-मघा गो-मघा वाम् हुवेम दिवा
नक्तम् शरुम् अस्मत् युयोतम्।।1।।
5701. उप-आयातम् दाशुषे मर्त्याय
रथेन वामम् अश्विना वहन्ता।
युयुतम् अस्मत् अनिराम् अमीवाम्
दिवा नक्तम् माध्वी त्रासीथाम् नः।।2।।
5702. आ वाम् रथम् अवमस्याम्
वि-उष्टौ सुम्ना-यवो वृषणो वर्तयन्तु।

स्यूम-गभस्तिम् ऋतयुक्-भिः अश्वैः
आ अश्विना वसु-मन्तम् वहेथाम्।।3।।
5703. यो वाम् रथो नृ-पती अस्ति वोडहा
त्रि-वन्धुरो वसु-मान् उस्र-यामा।
आ न एना नासत्या उप यातम्
अभि यत् वाम् विश्व-प्सन्यो जिगाति।।4।।
5704. युवम् च्यवानम् जरसो अमुमुक्तम्
नि पेदवे ऊहथुः आशुम् अश्वम्।
नि अंहसः तमसः स्पर्तम् अत्रिम्
नि जाहुषम् शिथिरे यातम् अन्तः।।5।।
5705. इयम् मनीषा इयम् अश्विना गीः
इमाम् सु-वृक्तिम् वृषणा जुषेथाम्।
इमा ब्रह्माणि युव-यूनि अग्मन्
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-72

5706. आ गो-मता नासत्या रथेन
अश्व-वता पुरु-चन्द्रेण यातम्।
अभि वाम् विश्वा नि-युतः सचन्ते
स्पार्हया श्रिया तन्वा शुभाना।।1।।
5707. आ नो देवभिः-उप यातम्
अर्वाक् स-जोषसा नासत्या रथेन।
युवोः हि नः सख्या पित्र्याणि
समानो बन्धुः उत तस्य वित्तम्।।2।।
5708. उत् उ स्तोमासो अश्विनो अबुध्रन्
जामि ब्रह्माणि उषसः च देवीः।
आ-विवासन् रोदसी धिषण्ये इमे
अच्छा विप्रो नासत्या विवक्ति।।3।।
5709. वि च इत् उच्छन्ति अश्विनौ
उषसः प्र वाम् ब्रह्माणि कारवो भरन्ते।
ऊर्ध्वम् भानुम् सविता देवो अश्रेत्
बृहत् अग्नयः सम्-इधा जरन्ते।।4।।
5710. आ पश्चातात् नासत्या आ पुरस्तात्
आ अश्विना यातम् अधरात् उदक्तात्।
आ विश्वतः पाञ्च-जन्येन राया
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-73

5711. अतारिष्म तमसः पारम् अस्य
प्रति स्तोमम् देवयन्तो दधानाः।
पुर-दंसा पुरु-तमा पुरा-जा
अमर्त्या हवते अश्विना गीः।।1।।
5712. नु उ प्रियो मनुषः सादि होता
नासत्या यो यजते वन्दते च।
अश्नीतम् मध्वो अश्विना उपाक
आ वाम् वोचे विदथेषु प्रयस्वान्।।2।।
5713. अहेम यज्ञम् पथाम् उराणा
इमाम् सु-वृक्तिम् वृषणा जुषेथाम्।
श्रुष्टीवा-इव प्र-इषितो वाम् अबोधि
प्रति स्तोमैः जरमाणो वसिष्ठः।।3।।
5714. उप त्या वह्नी गमतो विशम् नो
रक्षो-हणा सम्-भृता वीडु-पाणी।
सम् अन्धांसि अग्मत मत्सराणि
मा नो मर्धिष्टम् आ गतम् शिवेन।।4।।
5715. आ पश्चातात् नासत्या आ पुरस्तात्
आ अश्विना यातम् अधरात् उदक्तात्।
आ विश्वतः पाञ्च-जन्येन राया
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-74

5716. इमा उ वाम् दिविष्टय उस्रा हवन्ते अश्विना।
अयम् वाम् अह्वे अवसे शची-वसू
विशम्-विशम् हि गच्छथः।।1।।
5717. युवम् चित्रम् ददथुः भोजनम्
नरा चोदेथाम् सूनृता-वते।
अर्वाक् रथम् स-मनसा नि यच्छतम्
पिबतम् सोम्यम् मधु।।2।।
5718. आ यातम् उप भूषतम् मध्वः पिबतम् अश्विना।
दुग्धम् पयो वृषणा जेन्यावसू मा नो मर्धिष्टम् आ गतम्।।
5719. अश्वासो ये वाम् उप दाशुषो
गृहम् युवाम् दीयन्ति बिभ्रतः।
मक्षू-यु-भिः नरा हयेभिः अश्विना
आ देवा यातम् अस्म-यू।।4।।
5720. अधा ह यन्तो अश्विना पृक्षः सचन्त सूरयः।
ता यंसतो मघवत्-भ्यो ध्रुवम्
यशः छर्दिः अस्मभ्यम् नासत्या।।5।।
5721. प्र ये ययुः अवृकासो रथा-इव नृ-पातारो जनानाम्।
उत स्वेन शवसा शूशुवुः नर उत क्षियन्ति सु-क्षितिम्।।6।।

## सूक्त-75

5722. वि उषा आवो दिवि-जा ऋतेन
आविः-कृण्वाना महिमानम् आ अगात्।
अप द्रुहः तम् आवः अजुष्टम्
अङ्गिरः-तमा पथ्या अजीगः।।1।।
5723. महे नो अद्य सुविताय बोधि
उषो महे सौभगाय प्र यन्धि।
चित्रम् रयिम् यशसम् धेहि अस्मे
देवि मर्तेषु मानुषि श्रवस्युम्।।2।।

5724. एते त्ये भानवो दर्शतायाः
चित्रा उषसो अमृतास आ अगुः।
जनयन्तो दैव्यानि व्रतानि
आ-पृणन्तो अन्तरिक्षा वि अस्थुः।।3।।
5725. एषा स्या युजाना पराकात् पञ्च
क्षितीः परि सद्यो जिगाति।
अभि-पश्यन्ती वयुना जनानाम्
दिवो दुहिता भुवनस्य पत्नी।।4।।
5726. वाजिनी-वती सूर्यस्य योषा
चित्रा-मघा राय ईशे वसूनाम्।
ऋषि-ष्टुता जरयन्ती मघोनी
उषा उच्छति वह्नि-भिः गृणाना।।5।।
5727. प्रति द्युतानाम् अरुषासो अश्वा
चित्रा अदृश्रन् उषसम् वहन्तः।
शुभ्रा विश्व-पिशा रथेन दधाति रत्नम् विधते जनाय।।6।।
5728. सत्या सत्येभिः महती महत्-भिः
देवी देवेभिः यजता यजत्रैः।
रुजत् दृडहानि ददत् उस्रियाणाम्
प्रति गावः उषसम् वावशन्त।।7।।
5729. नू नो गो-मत् वीर-वत् धेहि रत्नम्
उषो अश्वा-वत् पुरु-भोजो अस्मे।
मा नो बर्हिः पुरुषता निदे कः
यूयम् पात स्वस्ति-भिः सदा नः।।8।।

## सूक्त-76

5730. उत् उ ज्येतिः अमृतम्
विश्व-जन्यम् विश्वानरः सविता देवो अश्रेत्।
क्रत्वा देवानाम् अजनिष्ट चक्षुः आविः
अकः भुवनम् विश्वम् उषाः।।1।।
5731. प्र मे पन्था देव-याना
अदृश्रन् अमर्धन्तो वसु-भिः इष्कृतासः।
अभूत् उ केतुः उषसः पुरस्तात्
प्रतीची आ अगात् अधि हर्म्येभ्यः।।2।।
5732. तानि इत् अहानि बहुलानि आसन्
या प्राचीनम् उत्-इता सूर्यस्य।
यतः परि जार-इव आ-चरन्ती
उषो ददृक्षे न पुनः यती-इव।।3।।
5733. त इत् देवानाम् सध-माद
आसन् ऋता-वानः कवयः पूर्व्यासः।
गूड्हम् ज्योतिः पितरो अनु अविन्दन्
सत्य-मंत्रा अजनयन् उषासम्।।4।।
5734. समान ऊर्वे अधि सम्-गतासः
सम् जानते न यतन्ते मिथः ते।
ते देवानाम् न मिनन्ति व्रतानि
अमर्धन्तो वसु-भिः यादमानाः।।5।।
5735. प्रति वा स्तोमैः ईडते वसिष्ठा
उषः-बुधः सु-भगे तुष्टु-वांसः।
गवाम् नेत्री वाज-पत्नी न उच्छ
उषः सु-जाते प्रथमा जरस्व।।6।।
5736. एषा नेत्री राधसः सूनृतानाम्
उषा उच्छन्ती रिभ्यते वसिष्ठैः।
दीर्घ-श्रुतम् रयिम् अस्मे दधाना
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-77

5737. उपो रुरुचे युवतिः न योषा
विश्वम् जीवम् प्र-सुवन्ती चरायै।
अभूत् अग्निः सम्-इधे मानुषाणाम्
अकः ज्योतिः बाधमाना तमांसि।।1।।
5738. विश्वम् प्रतीची सु-प्रथा उत् अस्थात्
रुशत् वासो बिभ्रती शुक्रम् अश्वैत्।
हिरण्य-वर्णा सुदृशीक-संदृक् गवाम्
माता नेत्री अह्नाम् अरोची।।2।।
5739. देवानाम् चक्षुः सु-भगा वहन्ती
श्वेतम् नयन्ती सु-दृशीकम् अश्वम्।
उषा अदर्शि रश्मि-भिः वि-अक्ता
चित्रा-मघा विश्वम् अनु प्र-भूता।।3।।
5740. अन्ति-वामा दूरे अमित्रम् उच्छ
उर्वीम् गव्यूतिम् अभयम् कृधी नः।
यावय द्वेष आ भर वसूनि
चोदय राधो गृणते मघोनि।।4।।
5741. अस्मे श्रेष्ठेभिः भानु-भिः वि भाहि
उषो देवि प्र-तिरन्ती न आयुः।
इषम् च नो दधती विश्व-वारे गो-मत्
अश्वा-वत् रथ-वत् च राधः।।5।।
5742. याम् त्वा दिवो दुहितः वर्धयन्ति
उषः सु-जाते मति-भिः वसिष्ठाः।
सा अस्मासु धा रयिम् ऋष्वम् बृहन्तम्
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-78

5743. प्रति केतवः प्रथमा अदृश्रन्
ऊर्ध्वा अस्या अञ्जयो वि श्रयन्ते।
उषो अर्वाचा बृहता रथेन ज्योतिष्मता
वामम् अस्मभ्यम् वक्षि।।1।।
5744. प्रति षीम् अग्निः जरते सम्-इद्धः
प्रति विप्रासो मति-भिः गृणन्तः।

उषा याति ज्योतिषा बाधमाना
विश्वा तमांसि दुः-इता अप देवी।।2।।
5745. एता उ त्याः प्रति अदृश्रन् पुरस्तात्
ज्योतिः यच्छन्तीः उषसो वि-भातीः।
अजीजनन् सूर्यम् यज्ञम् अग्निम्
अपाचीनम् तमो अगात् अजुष्टम्।।3।।
5746. अचेति दिवो दुहिता मघोनी विश्वे
पश्यन्ति उषसम् वि-भातीम्।
आ अस्थात् रथम् स्वधया युज्यमानम्
आ यम् अश्वासः सु-युजो वहन्ति।।4।।
5747. प्रति त्वा अद्य सु-मनसो बुधन्त
अस्माकासो मघ-वानो वयम् च।
तिल्विलायध्वम् उषसो वि-भातीः
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-79

5748. वि उषा आवः पथ्या जनानाम्
पञ्च क्षितीः मानुषीः बोधयन्ती।
सुसंदृक्-भिः उक्ष-भिः भानुम् अश्रेत्
वि सूर्यो रोदसी चक्षसा आवः।।1।।
5749. वि अञ्जते दिवो अन्तेषु
अक्तून् विशो न युक्ता उषसो यतन्ते।
सम् ते गावः तम आ वर्तयन्ति ज्योतिः
यच्छन्ति सविता इव बाहू।।2।।
5750. अभूत् उषा इन्द्र-तमा मघोनी
अजीजनत् सुविताय श्रवांसि।
वि दिवोदेवी दुहिता दधाति
अङ्गिरः-तमा सु-कृते वसूनि।।3।।
5751. तावत् उषो राधो अस्मभ्यम्
रास्व यावत् स्तोतृभ्यो अरदो गृणाना।
याम् त्वा जज्ञुः वृषभस्या रवेण
वि दृडहस्य दुरो अद्रेः और्णोः।।4।।
5752. देवम् देवम् राधसे चोदयन्ती
अस्मत्-ञ्यक् सूनृताः ईरयन्ती।
वि-उच्छन्ती नः सनये धियो धा
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-80

5753. प्रति स्तोमेभिः उषसम् वसिष्ठा
गीः-भिः विप्रासः प्रथमा अबुध्रन्।
वि-वर्तयन्तीम् रजसी सम्-अन्ते
आविः-कृण्वतीम् भुवनानि विश्वा।।1।।
5754. एषा स्या नव्यम् आयुः दधाना
गूढ्वी तमो ज्योतिषा उषा अबोधि।
अग्र एति युवतिः अह्नयाणा प्र
अचिकितत् सूर्यम् यज्ञम् अग्निम्।।2।।
5755. अश्वा-वतीः गो-मतीः न उषासो
वीर-वतीः सदम् उच्छन्तु भद्राः।
घृतम् दुहाना विश्वतः प्र-पीता
यूयम् पात स्वस्ति-भिः सदा नः।।3।।

## सूक्त-81

5756. प्रति उ अदर्शि आ-यती उच्छन्ती दुहिता दिवः।
अपो महि व्ययति चक्षसे तमो ज्योतिः कृणोति सूनरी।।1।।
5757. उत् उस्रियाः सृजते सूर्यः सचाँ
उत्-यन् नक्षत्रम् अर्चि-वत्।
तव इत् उषो वि-उषि सूर्यस्य च
सम् भक्तेन गमेमहि।।2।।
5758. प्रति त्वा दुहितः दिव उषो जीराः अभुत्स्महि।
या वहसि पुरु स्पार्हम् वनन्-वति रत्नम् न दाशुषे मयः।।
5759. उच्छन्ती या कृणोषि मंहना
महि प्र-ख्यै देवि स्वः दृशे।
तस्याः ते रत्न-भाज ईमहे
वयम् स्याम मातुः न सूनवः।।4।।
5760. तत् चित्रम् राध आ भर उषो यत् दीर्घश्रुत्-तमम्।
यत् ते दिवो दुहितः मर्त-भोजनम् तत् रास्व भुनजामहै।।
5761. श्रवः सूरिभ्यो अमृतम् वसु-त्वनम्
वाजान् अस्मभ्यम् गो-मतः।
चोदयित्री मघोनः सूनृता-वती उषा उच्छत् अप स्रिधः।।6।।

## सूक्त-82

5762. इन्द्रा वरुणा युवम् अध्वराय नो
विशे जनाय महि शर्म यच्छतम्।
दीर्घ-प्रयज्युम् अति यो वनुष्यति
वयम् जयेम पृतनासु दु-ढ्यः।।1।।
5763. सम्-राट् अन्यः स्व-राट् अन्य
उच्यते वाम् महान्तौ इन्द्रावरुणा महा-वसू।
विश्वे देवासः परमे वि ओमनि सम् वाम्
ओजो वृषणा सम् बलम् दधुः।।2।।
5764. अनु अपाम् खानि अतृन्तम्
ओजसा आ सूर्यम् ऐरयतम् दिवि प्र-भुम्।।
इन्द्रावरुणा मदे अस्य मायिनः
अपिन्वतम् अपितः पिन्वतम् धियः।।3।।
5765. युवाम् इत् युत्-सु पृतनासु वह्नयो
युवाम् क्षेमस्य प्र-सवे मित्-ज्ञवः।
ईशाना वस्वः उभयस्य कारव
इन्द्रावरुणा सु-हवा हवामहे।।4।।

5766. इन्द्रावरुणा यत् इमानि चक्रथुः
विश्वा जातानि भुवनस्य मज्मना।
क्षेमेण मित्रो वरुणम् दुवस्यति
मरुत्-भिः उग्रः शुभम् अन्य ईयते।।5।।
5767. महे शुल्काय वरुणस्य नु त्विष
ओजो मिमाते ध्रुवम् अस्य यत् स्वम्।
अजामिम् अन्यः श्नथयन्तम् आ अतिरत्
दभ्रेभिः अन्यः प्र वृणोति भूयसः।।6।।
5768. न तम् अंहो न दुः-इतानि
मर्त्यम् इन्द्रावरुणा न तपः कुतः चन।
यस्य देवा गच्छथो वीथो अध्वरम्
न तम् मर्तस्य नशते परि-ह्वृतिः।।7।।
5769. अर्वाङ् नरा दैव्येन अवसा आ गतम्
शृणुतम् हवम् यदि मे जुजोषथः।
युवोः हि सख्यम् उत वा यत् आप्यम्
मार्डीकम् इन्द्रावरुणा नि यच्छतम्।।8।।
5770. अस्माकम् इन्द्रावरुणा भरे-भरे
पुरो-योधा भवतम् कृष्टि-ओजसा।
यत् वाम् हवन्ते उभये अध स्पृधि
नरः तोकस्य तनयस्य सातिषु।।9।।
5771. अस्मे इन्द्रो वरुणो मित्रो अर्यमा
द्युम्नम् यच्छन्तु महि शर्म स-प्रथः।
अव-ध्रम् ज्योतिः अदितेः ऋत-वृधो
देवस्य श्लोकम् सवितुः मनामहे।।10।

## सूक्त-83

5772. युवाम् नरा पश्यमानास आप्यम्
प्राचा गव्यन्तः पृथु-पर्शवो ययुः।
दासा च वृत्रा हतम् आर्याणि च
सु-दासम् इन्द्रावरुणा अवसा अवतम्।।1।।
5773. यत्रा नरः सम्-अयन्ते कृत-ध्वजो
यस्मिन् आजा भवति किम् चन प्रियम्।
यत्रा भयन्ते भुवना स्वः-दृशः
तत्रा न इन्द्रावरुणा अधि वोचतम्।।2।।
5774. सम् भूम्या अन्ता ध्वसिरा अदृक्षत
इन्द्रावरुणा दिवि घोष आ अरुहत्।
अस्थुः जनानाम् उप माम् अरातयो
अर्वाक् अवसा हवन-श्रुता आ गतम्।।3।।
5775. इन्द्रावरुणा वधनाभिः अप्रति भेदम्
वन्वन्ता प्र सु-दासम् आवतम्।
ब्रह्माणि एषाम् शृणुतम् हवीमनि
सत्या तृत्सूनाम् अभवत् पुरो-हितिः।।4।।
5776. इन्द्रावरुणौ अभि आ तपन्ति मा
अघानि अर्यो वनुषाम् अरातयः।
युवम् हि वस्व उभयस्य राजथो
अध स्मा नो अवतम् पार्ये दिवि।।5।।
5777. युवाम् हवन्त उभयास आजिषु
इन्द्रम् च वस्वो वरुणम् च सातये।
यत्र राज-भिः दश-भिः नि-बाधितम्
प्र सु-दासम् आवतम् तृत्सु-भिः सह।।6।।
5778. दश राजानः सम्-इता अयज्यवः
सु-दासम् इन्द्रवरुणा न युयुधुः।
तस्या नृणाम् अद्‌म-सदाम् उप-स्तुतिः
देवा एषाम् अभवन् देव-हूतिषु।।7।।
5779. दाश-राज्ञे परि-यत्ताय विश्वतः
सु-दास इन्द्रवरुणौ अशिक्षतम्।
श्वित्यंचो यत्र नमसा कपर्दिनो
धिया धी-वन्तो असपन्त तृत्सवः।।8।।
5780. वृत्राणि अन्यः सम्-इथेषु जिघ्नते
व्रतानि अन्यो अभि रक्षते सदा।
हवामहे वाम् वृषणा सुवृक्ति-भिः
अस्मे इन्द्रावरुणा शर्म यच्छतम्।।9।।
5781. अस्मे इन्द्रो वरुणो मित्रो अर्यमा
द्युम्नम् यच्छन्तु महि शर्म स-प्रथः।
अवध्रम् ज्योतिः अदितेः ऋता-वृधो
देवस्य श्लोकम् सवितुः मनामहे।।10।।

## सूक्त-84

5782. आ वाम् राजानौ अध्वरे ववृत्याम्
हव्येभिः इन्द्रावरुणा नमो-भिः।
प्र वाम् घृताची बाह्वोः दधाना
परि त्मना विषु-रूपा जिगाति।।1।।
5783. युवो राष्ट्रम् बृहत् इन्वति द्यौः
यौ सेतृ-भिः अरज्जु-भिः सिनीथः।
परि नो हेडो वरुणस्य वृज्या
उरुम् न इन्द्रः कृणवत् उ लोकम्।।2।।
5784. कृतम् नो यज्ञम् विदथेषु चारुम्
कृतम् ब्रह्माणि सूरिषु प्र-शस्ता।
उपो रयिः देव-जूतो न एतु
प्र णः स्पार्हाभिः ऊति-भिः तिरेतम्।।3।।
5785. अस्मे इन्द्रावरुणा विश्व-वारम्
रयिम् धत्तम् वसु-मन्तम् पुरु-क्षुम्।
प्र य आदित्यो अनृता मिनाति
अमिता शूरो दयते वसूनि।।4।।
5786. इयम् इन्द्रम् वरुणम् अष्ट
मे गीः प्र आवत् तोके तनये तूतुजाना।

सु-रत्नासो देव-वीतिम् गमेम यूयम्
पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-85

5787. पुनीषे वाम अरक्षसम् मनीषाम्
सोमम् इन्द्राय वरुणाय जुह्वत्।
घृत-प्रतीकाम् उषसम् न देवीम्
ता नो यामन् उरुष्यताम् अभीके।।1।।
5788. स्पर्धन्ते वा उ देव-हूये अत्र
येषु ध्वजेषु दिद्यवः पतन्ति।
युवम् तान् इन्द्रावरुणौ अमित्रान्
हतम् पराचः शर्वा विषूचः।।2।।
5789. आपः चित् हि स्व-यशसः
सदः-सु देवीः इन्द्रम् वरुणम् देवता धुः।
कृष्टीः अन्यो धारयति प्रविक्ता
वृत्राणि अन्यो अप्रतीनि हन्ति।।3।।
5790. स सु-क्रतुः ऋत-चित् अस्तु
होता य आदित्य शवसा वाम् नमस्वान्।
आ-ववर्तत् अवसे वाम् हविष्मान् असत्
इत् सः सुविताय प्रयस्वान्।।4।।
5791. इयम् इन्द्रम् वरुणम् अष्ट मे गीः
प्र आवत् तोके तनये तूतुजाना।
सु-रत्नासो देव-वीतिम् गमेम
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-86

5792. धीरा त्वस्य महिना जनूंषि
वि यस्त-स्तम्भ रोदसी चिदुर्वी।
प्र नाकम् ऋष्वम् नुनुदे बृहन्तम्
द्विता नक्षत्रम् पप्रथत् च भूम।।1।।
5793. उत स्वया तन्वा सम् वदे तत्
कदा नु अन्तः वरुणे भुवानि।
किम् मे हव्यम् अहृणानो जुषेत
कदा मृडीकम् सु-मना अभि ख्यम्।।2।।
5794. पृच्छे तत् एनो वरुण दिदृक्षु
उपो एमि चिकितुषो वि-पृच्छम्।
समानम् इत् मे कवयः चित् आहुः
अयम् ह तुभ्यम् वरुणो हृणीते।।3।।
5795. किम् आग आस वरुण ज्येष्ठम्
यत् स्तोतारम् जिघांससि सखायम्।
प्र तत् मे वोचो दू-दभ स्वधा-वो
अव त्वा अनेना नमसा तुर इयाम्।।4।।
5796. अव द्रुग्धानि पित्र्या सृजा नो
अव या वयम् चकृम् तनूभिः।
अव राजन् पशु-तृपम् न तायुम्
सृजा वत्सम् न दाम्नो वसिष्ठम्।।5।।
5797. न स स्वो दक्षो वरुण ध्रुतिः
सा सुरा मन्युः वि-भीदको अचित्तिः।
अस्ति ज्यायान् कनीयस उप-अरे
स्वप्नः चन इत् अनृतस्य प्र-योता।।6।।
5798. अरम् दासो न मीडहुषे कराणि
अहम् देवाय भूर्णये अनागाः।
अचेतयत् अचितो देवो अर्यो
गृत्सम् राये कवि-तरो जुनाति।।7।।
5799. अयम् सु तुभ्यम् वरुण स्वधा-वो
हृदि स्तोम उप-श्रितः चित् अस्तु।
शम् नः क्षेमे शम् उ योगे नो अस्तु
यूयम् पात स्वस्ति-भिः सदा नः।।8।।

## सूक्त-87

5800. रदत् पथो वरुणः सूर्याय
प्र अर्णांसि समुद्रिया नदीनाम्।
सर्गो न सृष्टो अर्वतीः ऋता-यन्
चकार महीः अवनीः अह-भ्यः।।1।।
5801. आत्मा ते वातो रज आ नवीवोत्
पशुः न भूर्णिः यवसे सस-वान्।
अन्तः मही बृहती रोदसी मे
विश्वा ते धाम वरुण प्रियाणि।।2।।
5802. परि स्पशो वरुणस्य स्मदिष्टा
उभे पश्यन्ति रोदसी सु-मेके।
ऋतावानः कवयो यज्ञधीराः
प्रचेतसो य इषयन्त मन्म।।3।।
5803. उवाच मे वरुणो मेधिराय
त्रिः सप्त नाम अघ्न्या बिभर्ति।
विद्वान् पदस्य गुह्या न वोचत्
युगाय विप्र उपराय शिक्षन्।।4।।
5804. तिस्रो द्यावो नि-हिता अन्तः अस्मिन्
तिस्रो भूमीः उपराः षट्-विधानाः।
गृत्सो राजा वरुणः चक्रे एथम्
दिवि प्र-ईंखम् हिरण्ययम् शुभे कम्।।5।।
5805. अव सिन्धुम् वरणो द्यौः-इव स्थात्
द्रप्सो न श्वेतो मृगः तुविष्मान्।
गम्भीर-शंसो रजसो वि-मानः
सुपार-क्षत्रः सतो अस्य राजा।।6।।
5806. यो मृडयाति चक्रुषे चित् आगो
वयम् स्याम वरुणे अनागाः।
अनु व्रतानि अदितेः ऋधन्तो

यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-88

5807. प्र शुन्ध्युवम् वरुणाय प्रेष्ठाम्
मतिम् वसिष्ठ मीडहुषे भरस्व।
य ईम् अर्वाञ्चम् करते यजत्रम्
सहस्रा-मघम् वृषणम् बृहन्तम्।।1।।
5808. अध नु अस्य सम्-दृशम् जगन्वान्
अग्नेः अनीकम् वरुणस्य मंसि।
स्वः यत् अश्मन् अधि-पा उ अन्धो
अभि मा वपुः दृशये निनीयात्।।2।।
5809. आ यत् रुहाव वरुणः च नावम्
प्र यत् समुद्रम् ईरयाव मध्यम्।
अधि यत् अपाम् स्नु-भिः चराव
प्र प्र-ईंरव ईंखयावहै शुभे कम्।।3।।
5810. वसिष्ठम् ह वरुणो नावि आ अधात्
ऋषिम् चकार सु-अपा महो-भिः।
स्तोतारम् विप्रः सुदिन-त्वे अह्नाम्
यात् नु द्यावः ततनन् यात् उषासः।।4।।
5811. क्व त्यानि नौ सख्या बभूवुः
सचावहे यत् अवृकम् पुरा चित्।
बृहन्तम् मानम् वरुण स्वधावः
सहस्व-द्वारम् जगमा गृहम् ते।।5।।
5812. य आपिः नित्यो वरुण प्रियः
सन् त्वाम् आगांसि कृणवत् सखा ते।
मा त एनस्वन्तो यक्षिन् भुजेम
यन्धि ष्मा विप्र स्तुवते वरूथम्।।6।।
5813. ध्रुवासु त्वा आसु क्षितिषु क्षियन्तो
वि अस्मत् पाशम् वरुणो मुमोचत्।
अवो वन्वाना अदितेः उप-स्थात्
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-89

5814. मो सुवरुण मृत-मयम् गृहम् राजन् अहम् गमम्।
मृडा सु-क्षत्र मृडय।।1।।
5815. यत् एमि प्रस्फुरन्-इव दृतिः न ध्मातो अद्रिवः।
मृड सु-क्षत्र मृडय।।2।।
5816. क्रत्वः समह दीनता प्रति-ईपम् जगमा शुचे।
मृड सु-क्षत्र मृडय।।3।।
5817. अपाम् मध्ये तस्थि-वांसम्
तृष्णा अविदत् जरितारम्।
मृड सु-क्षत्र मृडय।।4।।
5818. यत् किम् च इदम् वरुण दैव्ये जने
अभि-द्रोहम् मनुष्याः चरामसि।
अचित्ती यत् तव धर्म युयोपिम
मा नः तस्मात् एनसो देव रीरिषः।।5।।

## सूक्त-90

5819. प्र वीर-या शुचयो दद्रिरे वाम्
अध्वर्यु-भिः मधु-मन्तः सुतासः।
वह वायो नि-युतो याहि अच्छा
पिबा सुतस्य अन्धसो मदाय।।1।।
5820. ईशानाय प्र-हुतिम् यः त आनट्
शुचिम् सोमम् शुचि-पाः तुभ्यम् वायो।
कृणोषि तम् मर्त्येषु प्र-शस्तम्
जातो-जातो जायते वाजी अस्य।।2।।
5821. राये नु यम् जज्ञतू रोदसी इमे
राये देवी धिषणा धाति देवम्।
अध वायुम् नि-युतः सश्चत स्वा
उत श्वेतम् वसु-धितिम् निरेके।।3।।
5822. उच्छन् उषसः सु-दिना अरि-प्रा
उरु ज्योतिः विविदुः दीध्यानाः।
गव्यम् चित् ऊर्वम् उशिजो वि वव्रुः
तेषाम् अनु प्र-दिवः सस्रुः आपः।।4।।
5823. ते सत्येन मनसा दीध्यानाः
स्वेन युक्तासः क्रतुना वहन्ति।
इन्द्रवायू वीर-वाहम् रथम् वाम्
ईशानयोः अभि पृक्षः सचन्ते।।5।।
5824. ईशानासो ये दधते स्वः णो
गोभिः अश्वेभिः वसु-भिः हिरण्यैः।
इन्द्रवायू सूरयो विश्वम् आयुः
अर्वत्-भिः वीरैः पृतनासु सह्युः।।6।।
5825. अर्वन्तो न श्रवसो भिक्षमाणा
इन्द्रवायू सुष्टुति-भिः वसिष्ठाः।
वाज-यन्तो सु अवसे हुवेम
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-91

5826. कुवित् अङ्ग नमसा ये वृधासः
पुरा देवा अनवद्यास आसन्।
ते वायवे मनवे बाधिताय अवासयन् उषसम् सूर्येण।।1।।
5827. उशन्ता दूता न दभाय गोपा
मासः च पाथः शरदः च पूर्वीः।
इन्द्रवायू सु-ष्टुतिः वाम् इयाना
मार्डीकम् ईहे सुवितम् च नव्यम्।।2।।
5828. पीवो-अन्नान् रयि-वृधः सु-मेधाः
श्वेतः सिषक्ति नि-युताम् अभि-श्रीः।
ते वायवे स-मनसो वि तस्थुः

विश्वा इत् नरः सु-अपत्यानि चक्रुः।।3।।
5829. यावत् तरः तन्वो यावत् ओजो
यावत् नरः चक्षसा दीध्यानाः।
शुचिम् सोमम् शुचि-पा पातम् अस्मे
इन्द्रवायू सदतम् बर्हिः आ इदम्।।4।।
5830. नि-युवाना नि-युतः स्पार्ह-वीरा
इन्द्रवायू स-रथम् यातम् अर्वाक्।
इदम् हि वाम् प्र-भृतम् मध्वो अग्रम्
अध प्रीणाना वि मुमुक्तम् अस्मे।।5।।
5831. या वाम् शतम् नि-युतो याः सहस्रम्
इन्द्रवायू विश्व-वाराः सचन्ते।
आ आभिः यातम् सु-विदत्राभिः
अर्वाक् पातम् नरा प्रति-भृतस्य मध्वः।।6।।
5832. अर्वन्तो न श्रवसो भिक्षमाणा
इन्द्रवायू सुष्टुति-भिः वसिष्ठाः।
वाजयन्तः सु अवसे हुवेम
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-92

5833. आ वायो भूष शुचि-पा उप नः
सहस्रम् ते नि-युतो विश्व-वार।
उपो ने अन्धो मद्यम् अयामि
यस्य देव दधिषे पूर्व-पेयम्।।1।।
5834. प्र सोता जीरो अध्वरेषु अस्थात्
सोमम् इन्द्राय वायवे पिबध्यै।
प्र यत् वाम् मध्वो अग्नियम् भरन्ति
अध्वर्यवो देव-यन्तो शचीभिः।।2।।
5835. प्र याभिः यासि दाश्वांसम् अच्छ
नियुत्-भिः वायो इष्टये दुरोणे।
नि नो रयिम् सु-भोजसम् युवस्व
नि वीरम् गव्यम् अश्व्यम् च राधः।।3।।
5836. ये वायव इन्द्र-मादनास
आदेवासो नि-तोशनासो अर्यः।
घ्नन्तो वृत्राणि सूरि-भिः ष्याम
सासह्वांसो युधा नृ-भिः अमित्रान्।।4।।
5837. आ नो नियुत्-भिः शतिनीभिः
अध्वरम् सहस्रिणीभिः उप याहि यज्ञम्।
वायो अस्मिन् सवने मादयस्व
यूयम् पात स्वस्ति-भिः सदा नः।।5।।

## सूक्त-93

5838. शुचिम् नु स्तोमम् नव-जातम्
अद्य इन्द्राग्नी वृत्र-हणा जुषेथाम्।
उभा हि वाम् सु-हवा जोहवीमि ता वाजम् सद्य उशते धेष्ठा।
5839. ता सानसी शवसाना हि भूतम्
साकम्-वृधा शवसा शूशु-वांसा।
क्षयन्तौ रायो यवसस्य भूरेः
पृंक्तम् वाजस्य स्थविरस्य घृष्वेः।।2।।
5840. उपो ह यत् विदथम् वाजिनः गुः धीभिः
विप्राः प्र-मतिम् इच्छमानाः।
अर्वन्तो न काष्ठाम् नक्षमाणा इन्द्राग्नी जोहुवतो नरः ते।3।
5841. गीः-भिः विप्रः प्र-मतिम् इच्छमान
ईट्टे रयिम् यशसम् पूर्व-भाजम्।
इन्द्राग्नी वृत्रहणा सु-वज्रा
प्र नो नव्येभिः तिरतम् देष्णैः।4।
5842. सम् यत् मही मिथती स्पर्धमाने
तनू-रुचा शूर-साता यतैते।
अदेव-युम् विदथे देवयु-भिः सत्रा हतम् सोम-सुता जनेन।5।
5843. इमाम् उ षु सोम-सुतिम् उप न
आ इन्द्राग्नी सौमनसाय यातम्।
नु चित् हि परि-मम्नाथे अस्मान्
आ वाम् शश्वत्-भिः ववृतीय वाजैः।।6।।
5844. सो अग्ने एना नमसा सम्-इद्धो
अच्छ मित्रम् वरुणम् इन्द्रम् वोचेः।
यत्सीम् आगः चकृमा तत् सु मृड
तत् अर्यमा अदितिः शिश्रथन्तु।।7।।
5845. एता अग्न आशुषाणास इष्टीः
युवोः सचा अभि अश्याम वाजान्।
मा इन्द्रो नो विष्णुः मरुतः परि ख्यन्
यूयम् पात स्वस्ति-भिः सदा नः।।8।।

## सूक्त-94

5846. इयम् वाम् अस्य मन्मनः इन्द्राग्नी पूर्व्य-स्तुतिः।
अभ्रात् वृष्टिः-इव अजनि।।1।।
5847. शृणुतम् जरितुः हवम् इन्द्राग्नी वनतम् गिरः।
ईशाना पिप्यतम् धियः।।2।।
5848. मा पाप-त्वाय नो नरा इन्द्राग्नी मा अभि-शस्तये।
मा नो रीरधतम् निदे।।3।।
5849. इन्द्रे अग्ना नमो वृहत् सु-वृक्तिम् आ ईरयामहे।
धिया धेना अवस्यवः।।4।।
5850. ता हि शश्वन्त ईडते इत्था विप्रास ऊतये।
स-बाधो वाज-सातये।।5।
5851. ता वाम् गीः-भिः विपन्यवः प्रयस्वन्तो हवामहे।
मेध-साता सनिष्यवः।।6।।
5852. इन्द्राग्नी अवसा आ गतम् अस्मभ्यम् चर्षणि-सहा।

मा नो दुः-शंस ईशत।।7।।
5853. मा कस्य नो अररुषो धूर्तिः प्रणङ् मर्त्यस्य।
इन्द्राग्नी शर्म यच्छतम्।।8।।
5854. गो-मत् हिरण्य-वत् वसु यत् वाम् अश्वा-वत् ईमहे।
इन्द्राग्नी तत् वनेमहि।।9।।
5855. यत् सोम आ सुते नर इन्द्राग्नी अजोहवुः।
सप्ती-वन्ता सपर्यवः।।10।।
5856. उक्थेभिः वृत्रहन्-तमा या मन्दाना चित् आ गिरा।
आङ्गूषैः आ-विवासतः।।11।।
5857. तौ इत् दुः-शंसम् मर्त्यम् दुः-विद्वांसम् रक्षस्विनम्।
आ-भोगम् हन्मना हतम् उद-धिम् हन्मना हतम्।।12।।

## सूक्त-95

5858. प्र क्षोदसा धायसा सस्र एषा
सरस्वती धरुणम् आयसी पूः।
प्र-बाबधाना रथ्या-इव याति
विश्वा अपो महिना सिन्धुः अन्याः।।1।।
5859. एका अचेतत् सरस्वती नदीनाम्
शुचिः यती गिर-भ्य आ समुद्रात्।
रायः चेतन्ती भुवनस्य भूरेः
घृतम् पयो दुदुहे नाहुषाय।।2।।
5860. स वावृधे नर्यो योषणासु
वृषा शिशुः वृषभो यज्ञियासु।
स वाजिनम् मघवत्-भ्यो दधाति
वि सातये तन्वम् मामृजीत।।3।।
5861. उत स्या नः सरस्वती जुषाणा
उप श्रवत् सु-भगा यज्ञे अस्मिन्।
मितज्ञु-भिः नमस्यैः इयाना राया
युजा चित् उत्-तरा सखिभ्यः।।4।।
5862. इमा जुह्वाना युष्मत् आ नमो-भिः
प्रति स्तोमम् सरस्वति जुषस्व।
तव शर्मन् प्रिय-तमे दधाना
उप स्थेयाम् शरणम् न वृक्षम्।।5।।
5863. अयम् उ ते सरस्वति वसिष्ठो
द्वारौ ऋतस्य सु-भगे वि आवः।
वर्ध शुभ्रे स्तुवते रासि वाजान्
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-96

5864. बृहत् उ गायिषे वचो-असूर्या नदीनाम्।
सरस्वतीम् इत् महय सुवृक्ति-भिः स्तोमैः वसिष्ठ रोदसी।1।
5865. उभे यत् ते महिना शुभ्रे
अन्धसी अधि-क्षियन्ति पूरवः।
स नो बोधि अवित्री मरुत-सखा चोद राधो मघोनाम्।।2।।
5866. भद्रम् इत् भद्रा कृणवत् सरस्वती
अकव-अरी चेतति वाजिनी-वती।
गृणाना जमदग्नि-वत् स्तुवाना च वसिष्ठवत्।।3।।
5867. जनी-यन्तो मु अग्रवः पुत्री-यन्तः सु-दानवः।
सरस्वन्तम् हवामहे।।4।।
5868. ये ते सरस्व ऊर्मयो मधु-मन्तो घृत-श्चुतः।
तेभिः नो अविता भव।।5।।
5869. पीपि-वांसम् सरस्वतः स्तनम् यो विश्व-दर्शतः।
भक्षीमहि प्र-जाम् इषम्।।6।।

## सूक्त-97

5870. यज्ञे दिवो नृ-षदने पृथिव्या
नरो यत्र देवयवो मदन्ति।
इन्द्राय यत्र सवनानि सुन्वे गमत् मदाय प्रथमम् वयः च।1
5871. आ दैव्या वृणीमहे अवांसि
बृहस्पतिः नो मह आ सखायः।
यथा भवेम मीडहुषे अनागा यो नो दाता परावतः पिता-इव
5872. तम् उ ज्येष्ठम् नमसा हविः-भिः
सु-शेवम् ब्रह्मणः पतिम् गृणीषे।
इन्द्रम् श्लोको महि दैव्यः सिषक्तु
यो ब्रह्मणः देव-कृतस्य राजा।।3।।
5873. स आ नो योनिम् सदतु प्रेष्ठो
बृहस्पतिः विश्व-वारो यो अस्ति।
कामो रायो सु-वीर्यस्य तम् दात् पर्षत्
नो अति सश्वतो अरिष्टान्।।4।।
5874. तम् आ नो अर्कम् अमृताय जुष्टम्
इमे धासुः अमृतासः पुरा-जाः।
शुचि-क्रन्दम् यजतम् पस्त्यानाम्
बृहस्पतिम् अनर्वाणम् हुवेम।।5।।
5875. तम् शग्मासो अरुषासो अश्वा
बृहस्पतिम् सह-वाहो वहन्ति।
सह चित् यस्य नील-वत् सध-स्थम्
नभो न रूपम् अरुषम् वसानाः।।6।।
5876 स हि शुचिः शत-पत्रः शुन्ध्युः
हिरण्य-वाशी इषिरोः स्वः-षा।
बृहस्पतिः सः सु-आवेश ऋष्वः
पुरू सखि-भ्य आ-सुतिम् करिष्ठः।।7।।
5877. देवी देवस्य रोदसी जनित्री
बृहस्पतिम् वावृधतुः महि-त्वा।
दक्षाय्याय दक्षता सखाय करत् ब्रह्मणे सु-तरा सु-गाधा।8।

5878. इयम् वाम् ब्रह्मणः पते सु-वृक्तिः
ब्रह्म इन्द्राय वज्रिणे अकारि।
अविष्टम् धियो जिगृतम् पुरम्-धीः
जजस्तम् अर्यः वनुषाम् अरातीः।।9।।
5879. बृहस्पते युवम् इन्द्रः च वस्वो
दिव्यस्य ईशाथे उत पार्थिवस्य।
धत्तम् रयिम् स्तुवते कीरये चित्
यूयम् पात स्वस्ति-भिः सदा नः।।10।।

## सूक्त-98

5880. अध्वर्यवो अरुणम् दुग्धम् अंशुम्
जुहोतन वृषभाय क्षितीनाम्।
गौरात् वेदीयान् अव-पानम् इन्द्रो
विश्वाहा इत् याति सुत-सोमम् इच्छन्।।1।।
5881. यत् दधिषे प्र-दिवि चारु अन्नम्
दिवे-दिवे पीतिम् इत् अस्य वक्षि।
उत हृदा उत मनसा जुषाण उशन्
इन्द्र प्र-स्थितान् पाहि सोमान्।।2।।
5882. जज्ञानः सोमम् सहसे पपाथ
प्र ते माता महिमानम् उवाच।
आ इन्द्र पप्राथ उरु अन्तरिक्षम् युधा देवेभ्यो वरिवः चकर्थ
5883. यत् योधया महतो मन्यमानान्
साक्षाम तान् बाहु-भिः शाशदानान्।
यत् वा नृ-भिः वृतः इन्द्र अभि-युध्याः
तम् त्वया आजिम् सौश्रवसम् जयेम।।4।।
5884. प्र इन्द्रस्य वोचम् प्रथमा कृतानि
प्र नूतना मघ-वा या चकार।
यदा इत् अदेवीः असहिष्ट माया
अथ अभवत् केवलः सोमो अस्य।।5।।
5885. तव इदम् विश्वम् अभितः पशव्यम्
यत् पश्यसि चक्षसा सूर्यस्य।
गवाम् असि गो-पतिः एकः इन्द्र
भक्षीमहि ते प्र-यतस्य वस्वः।।6।।
5886. बृहस्पते युवम् इन्द्रः च वस्वो
दिव्यस्य ईशाथे उत पार्थिवस्य।
धत्तम् रयिम् स्तुवते कीरये चित्
यूयम पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-99

5887. परो मात्रया तन्वा वृधान
न ते महि-त्वम् अनु अश्नुवन्ति।
उभे ते विद्म रजसी पृथिव्या विष्णो
देव त्वम् परमस्य वित्से।।1।।
5888. न ते विष्णो जायमानो न जातो
देव महिम्नः परम् अन्तम् आप।
उत् अस्तभ्ना नाकम् ऋष्वम् बृहन्तम्
दाधर्थ प्राचीम् ककुभम् पृथिव्याः।।2।।
5889. इरा-वती धेनु-मती हि भूतम्
सू-यवसिनी मनुषे दशस्या।
वि अस्तभ्ना रोदसी विष्णो एते दाधर्थ
पृथिवी पृथिवीम् अभितो मयूखैः।।3।।
5890. उरुम् यज्ञाय चक्रथुः उ लोकम्
जनयन्ता सूर्यम् उषासम् अग्निम्।
दासस्य चित् वृष-शिप्रस्य माया
जघ्नथुः नरा पृतनाज्येषु।।4।।
5891. इन्द्राविष्णू दृंहिता शम्बरस्य
नव पुरो नवतिम् च श्नथिष्टम्।
शतम् वर्चिनः सहस्रम् च साकम्
हथो अप्रति असुरस्य वीरान्।।5।।
5892. इयम् मनीषा बृहती बृहन्ता
उरु-क्रमा तवसा वर्धयन्ती।
ररे वाम् स्तोमम् विदथेषु विष्णो
पिन्वतम् इषो वृजनेषु इन्द्र।।6।।
5893. वषट् ते विष्णो आस आ कृणोमि
तत् मे जुषस्व शिपि-विष्ट हव्यम्।
वर्धन्तु त्वा सु-ष्टुतयो गिरो मे
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-100

5894. नू मर्तो दयते सनिष्यन्
यो विष्णव उरु-गायाय दाशत्।
प्र यः सत्राचा मनसा यजात
एतावन्तम् नर्यम् आ-विवासात्।।1।।
5895. त्वम् विष्णो सु-मतिम् विश्व जन्याम्
अप्र-युताम् एव-यावो मतिम् दाः।
पर्चो यथा नः सुवितस्य भूरेः अश्व-वतः पुरुः-चन्द्रस्य रायः।
5896. त्रिः देवः पृथिवीम् एष एताम्
वि चक्रमे शत-अर्चसम् महि-त्वा।
प्र विष्णुः अस्तु तवसः तवीयान्
त्वेषम् हि अस्य स्थविरस्य नाम।।3।।
5897. वि चक्रमे पृथिवीम् एष एताम्
क्षेत्राय विष्णुः मनुषे दशस्यन्।
ध्रुवासो अस्य कीरयो जनास
उरु-क्षितिम् सु-जनिमा चकार।।4।।
5898. प्र तत् ते अद्य शिपि-विष्ट नाम
अर्यः शंसामि वयुनानि विद्वान्।

तम् त्वा गृणामि तवसम् अतव्यान्
क्षयन्तम् अस्य रजसः पराके।।5।।
5899. किम् इत् ते विष्णो परि-चक्ष्यम्
भूत् प्र यत् ववक्षे शिपि-विष्टो अस्मि।
मा वर्पो अस्मत् अप गूह एतत्
यत् अन्य-रूपः सम्-इथे बभूथ।।6।।
5900. वषट् ते विष्णो आस आ कृणोमि
तत् मे जुषस्व शिपि-विष्ट हव्यम्।
वर्धन्तु त्वा सु-ष्टुतयो गिरो मे
यूयम् पात स्वस्ति-भिः सदा नः।।7।।

## सूक्त-101

5901. तिस्रो वाचः प्र वद ज्योतिः-अग्रा
या एतते दुह्रे मधु-दोघम् ऊधः।
स वत्सम् कृण्वन् गर्भम् ओषधीनाम्
सद्यो जातो वृषभो रोरवीति।।1।।
5902. यो वर्धन ओषधीनाम् यो अपाम्
यो विश्वस्य जगतो देव ईशे।
स त्रि-धातु शरणम् शर्म यंसत्
त्रि-वर्तु ज्योतिः सु-अभिष्टि अस्मे।।2।।
5903. स्तरीः उ त्वत् भवति सूत
उ त्वत् यथा-वशम् तन्वम् चक्र एषः।
पितुः पयः प्रति गृभ्णाति माता
तेन पिता वर्धते तेन पुत्रः।।3।।
5904. यस्मिन् विश्वानि भुवनानि तस्थुः
तिस्रो द्यावः त्रेधा सस्रुः आपः।
त्रयः कोशास उप-सेचनासो मध्वः
श्चोतन्ति अभितो वि-रप्शम्।।4।।
5905. इदम् वचः पर्जन्याय स्व-राजे
हृदो अस्तु अन्तरम् तत् जुजोषत्।
मयोभुवो वृष्टयः सन्तु अस्मे सुपिप्पला ओषधीः देव-गोपाः।
5906. स रेतो-धा वृषभः शश्वतीनाम्
तस्मिन् आत्मा जगतः तस्थुषः च।
तत् मा ऋतम् पातु शत-शारदाय
यूयम् पात स्वस्ति-भिः सदा नः।।6।।

## सूक्त-102

5907. पर्जन्याय प्र गायत दिवः पुत्राय मीडहुषे।
स नो यवसम् इच्छतु।।1।।
5908. यो गर्भम् ओषधीनाम् गवाम् कृणोति अर्वताम्।
पर्जन्यः पुरुषीणाम्।।2।।
5909. तस्मा इत् आस्ये हविः जुहोता मधुमत्-तमम्।
इडाम् नः सम्-यतम् करत्।।3।।

## सूक्त-103

5910. सम् वत्सरम् शशयाना ब्राह्मणा व्रत-चारिणः।
वाचम् पर्जन्य-जिन्विताम् प्र मण्डूका अवादिषुः।।1।।
5911. दिव्या आपो अभि यत् एनम् आयन
दृतिम् न शुष्कम् सरसी शयानम्।
गवाम् अह न मायुः वत्सिनीनाम्
मण्डूकानाम् वग्नुः अत्रा सम् एति।।2।।
5912. यत् ईम् एनान् उशतो अभि अवर्षीत्
तृष्या-वतः प्रावृषि आ-गतायाम्।
अक्खलीकृत्य पितरम् न पुत्रो
अन्यो अन्यम् उप वदन्तम् एति।।3।।
5913. अन्यो अन्यम् अनु गृभ्णाति एनोः
अपाम् प्र-सर्गे यत् अमन्दिषाताम्।
मण्डूको यत् अभि-वृष्टः कनिष्कन्
पृश्निः सम्-पृंक्ते हरितेन वाचम्।।4।।
5914. यत् एषाम् अन्यो अन्यस्य वाचम्
शाक्तस्य-इव वदति शिक्षमाणः।
सर्वम् तत् एषाम् समृधा-इव पर्व
यत् सु-वाचो वदथन अधि अप्-सु।।5।।
5915. गो-मायुः एको अज-मायुः एकः
पृश्नः एको हरित एक एषाम्।
समानम् नाम बिभ्रतो वि-रूपाः
पुरु-त्रा वाचम् पिपिशुः वदन्तः।।6।।
5916. ब्राह्मणासा अति-रात्रे न सोमे
सरो न पूर्णम् अभितो वदन्तः।
संवत्सरस्य तत् अहः परि ष्ठ
यत् मण्डूकाः प्रावृषीणम् बभूव।।7।।
5917. ब्राह्मणासः सोमिनो वाचम् अक्रत
ब्रह्म कृण्वन्तः परिवत्सरीणम्।
अध्वर्यवो घर्मिणः सिष्विदाना
आविः भवन्ति गुह्या न के चित्।।8।।
5918. देव-हितिम् जुगुपुः द्वादशस्य
ऋतुम् नरः न प्र मिनन्ति एते।
संवत्सरे प्रावृषि आ-गतायाम्
तप्ता घर्मा अश्नुवते वि-सर्गम्।।9।।
5919. गा-मायुः अदात् अज-मायुः
अदात् पृश्निः अदात् हरितो नो वसूनि।
गवाम् मण्डूका ददतः शतानि,
सहस्र-सावे प्र तिरन्ते आयुः।।10।।

## सूक्त-104

5920. इन्द्रासोमा तपतम् रक्ष उब्जतम्
नि अर्पयतम् वृषणा तमो-वृधः।

परा शृणीतम् अचितो नि ओषतम्
हतम् नुदेथाम् नि शिशीतम् अत्रिणः।।1।।
5921. इन्द्रासोमा सम् अघ-शंसम् अभि अघम्
तपुः ययस्तु चरुः अग्निवान्-इव।
ब्रह्म-द्विषे क्रव्य-अदे घोर-चक्षषे
द्वेषो धत्तम् अनवायम् किमीदिने।।2।।
5922. इन्द्रासोमा दुः-कृतो वव्रे अन्तः
अनारम्भणे तमसि प्र विध्यतम्।
यथा न अतः पुनः एकः चन उत्-अयत्
तत् वाम् अस्तु सहसे मन्यु-मत् शवः।।3।।
5923. इन्द्रासोमा वर्तयतम् दिवो वधम्
सम् पृथिव्या अघ-शंसाय तर्हणम्।
उत् तक्षतम् स्वर्यम् पर्वतेभ्यो
येन रक्षो वावृधानम् नि-जूर्वथः।।4।।
5924. इन्द्रासोमा वर्तयतम् दिवः परि
अग्नि-तप्तेभिः युवम् अश्महन्म-भिः।
तपुः-वधेभिः अजरेभिः अत्रिणो
नि पर्शाने विध्यतम् यन्तु नि-स्वरम्।।5।।
5925. इन्द्रासोमा परि वाम् भूतु विश्वत
इयम् मतिः कक्ष्या अश्वा-इव वाजिना ।
याम् वाम् होत्राम् परि-हिनोमि मेधया
इमा ब्रह्माणि नृपती-इव जिन्वतम्।।6।।
5926. प्रति स्मरेथाम् तुजयत्-भिः एवैः
हतम् द्रुहो रक्षसो भंगुरा-वतः।
इन्द्रासोमा दुः-कृते मा सु-गम् भूत्
यो नः कदा चित् अभि-दासति द्रुहा।।7।।
5927. यो मा पाकेन मनसा चरन्तम्
अभि-चष्टे अनृतेभिः वचो-भिः।
आप-इव काशिना सम्-गृभीता
असन् अस्तु असत इन्द्र वक्ता।।8।।
5928. ये पाक-शंसम् वि-हरन्त एवैः
ये वा भद्रम् दूषयन्ति स्वधाभिः।
अहये वा तान् प्र-ददातु सोम
आ वा दधातु निः-ऋतेः उप-स्थे।।9।।
5929. यो नो रसम् दिप्सति पित्वो अग्ने
यो अश्वानाम् यो गवाम् यः तनूनाम्।
रिपुः स्तेनः स्तेय-कृत् दभ्रम् एतु
नि ष हीयताम् तन्वा तना च।।10।।
5930. परः सो अस्तु तन्वा तना च
तिस्रः पृथिवीः अधो अस्तु विश्वाः।
प्रति शुष्यतु यशो अस्य देवा
यो नो दिवा दिप्सति यः च नक़्तम्।।11।।
5931. सु-विज्ञानम् चिकितुषे जनाय
सत् च असत् च वचसी पस्पृधाते।
तयोः यत् सत्यम् यतरत् ऋजीयः
तत् इत् सोमो अवति हन्ति असत्।।12।।
5932. न वा उ सोमो वृजिनम् हिनोति
न क्षत्रियम् मिथुया धारयन्तम्।
हन्ति रक्षो हन्ति असत् वदन्तम्
उभौ इन्द्रस्य प्र-सितौ शयाते।।13।।
5933. यदि वा अहम् अनृत-देव आस
मोघम् वा देवान् अपि-ऊहे अग्ने।
किम् अस्मभ्यम् जात-वेदो हृणीषे
द्रोघ-वाचः ते निः-ऋथम् सचन्ताम्।।14।।
5934. अद्य मुरीय यदि यातु-धानो अस्मि
यदि वा आयुः ततप पूरुषस्य।
अधा स वीरैः दश-भिः वि यूया यो
मा मोघम् यातु-धान इति आह।।15।।
5935. यो मा अयातुम् यातु-धान इति आह
यो वा रक्षाः शुचिः अस्मि इति आह।
इन्द्रः तम् हन्तु महता वधेन
विश्वस्य जन्तोः अधमः पदीष्ट।।16।।
5936. प्र या जिगाति खर्गला-इव नक़्तम्
अप द्रुहा तन्वम् गूहमाना।
वव्रान् अनन्तान् अवसा पदीष्ट
ग्रावाणो घ्नन्तुः रक्षस उपब्दैः।।17।।
5967. वि तिष्ठध्वम् मरुतो विक्षु इच्छत
गृभायत रक्षसः सम् पिनष्टन।
वयो ये भूत्वी पतयन्ति नक़्त-भिः
ये वा रिपो दधिरे देवे अध्वरे।।18।।
5938. प्र वर्तय दिवः अश्मानम् इन्द्र
सोम-शितम् मघ-वन् सम् शिशाधि।
प्राक़्तात् अपाक़्तात् अधरात् उदक़्तात्
अभि जहि रक्षसः पर्वतेन।।19।।
5939. एत उ त्ये पतयन्ति श्व-यातव इन्द्रम्
दिप्सन्ति दिप्सवो अदाभ्यम्।
शिशीते शक्रः पिशुनेभ्यो वधम् नूनम्
सृजत् अशनिम् यातुमत्-भ्यः।।20।।
5940. इन्द्रो यातूनाम् अभवत् परा-शरो
हविः-मथीनाम् अभिआ-विवासताम्।
अभि इत् उ शक्रः परशुः यथा वनम्
पात्रा-इव भिन्दन् सत एति रक्षसः।।21।।
5941. उलूक-यातुम् शुशुलूक-यातुम्
जहि श्व-यातुम् उत कोक-यातुम्।
सुपर्ण-यातुम् उत गृध्रयातुम्
दृषदा-इव प्र मृण रक्ष इन्द्र।22

5942. मा नो रक्षो अभि नट् यातु-मावताम्
अप उच्छतु मिथुना या किमीदिना।
पृथिवी नः पार्थिवात् पातु अंहसो
अन्तरिक्षम् दिव्यात् पातु अस्मान्।।23।।
5943. इन्द्र जहि पुमांसम् यातु-धानम्
उत स्त्रियम् मायया शाशदानाम्।
वि-ग्रीवासो मूर-देवा ऋदन्तु
मा ते दृशन् सूर्यम् उत् चरन्तम्।।24।।
5944. प्रति चक्ष्व वि चक्ष्व इन्द्रः च सोम जागृतम्।
रक्षो-भ्यो वदम् अस्यतम् अशनिम् यातुमत्-भ्यः।।25।।

## ।। इति सप्तमम् मण्डलम् ।।

ॐ

# ।।अथ अष्टमम् मण्डलम्।।

## सूक्त 1

5945. मा चित् अन्यत् वि शंसत
सखायः मा रिषण्यत।
इन्द्रम् इत् स्तोता वृषणम् सचा
सुते मुहुः उक्था च शंसत।।1।।
5946. अवक्रक्षणम् वृषभम् यथा
अजुरम् गाम् न चर्षणीसहम्।
विद्वेषणम् सम्-वनना उभयम्
करम् महिष्ठम् उभयाविनम्।।2।।
5947. यत् चित् हि त्वा जनाः इमे
नाना हवन्ते ऊतये।
अस्माकम् ब्रह्म इदम् इन्द्र भूतु
ते अहा विश्वा च वर्धनम्।।3।।
5948. वि तर्तूर्यन्ते मघवन्
विपःचितः अर्यः विपः जनानाम्।
उप क्रमस्व पुरुरूपम् आ भर
वाजम् नेदिष्ठम् ऊतये।।4।।
5949. महे चन त्वाम् अद्रिवः
परा शुल्काय देयाम्।
न सहस्राय न अयुताय वज्रिवः
न शताय शतामघ।।5।।
5950. वस्यान् इन्द्र असि मे पितुः उत भ्रातुः अभुञ्जतः।
माता च मे छदयथः समा वसो वसुत्वनाय राधसे।।6।।
5951. क्व इयथ क्व इत् असि पुरुत्रा चित् हि ते मनः।
अलर्षि युध्म खजकृत् पुरन्दर प्र गायत्राः अगासिषुः।।7।।
5952. प्र अस्मै गायत्रम् अर्चत,
ववातुः यः पुरन्दरः।
याभिः काण्वस्य उप बर्हिः आ
सदम् यासत् वज्री भिनत् पुरः।।8।।
5953. ये ते सन्ति दशग्विनः,
शतिनः ये सहस्रिणः।
अश्वासः ये ते वृषणः रघुद्रुवः
तेभिः नः तूयम् आ गहि।।9।।
5954. आ तु अद्य सबर्दुघाम्,
हुवे गायत्रवेपसम्।
इन्द्रम् धेनुम् सुदुघाम् अन्याम्
इषम् उरुधाराम् अरम्-कृतम्।।10।।
5955. यत् तुदत् सूरः एतशम्,
वंकू वातस्य पर्णिना।
वहत् कुत्सम् आर्जुनेयम् शतक्रतुः
तसरत् गन्धर्वम् अस्तृतम्।।11।।
5956. यः ऋते चित् अभिश्रिषः,
पुरा जत्रुभ्यः आतृदः।
सम्-धाता सम्-धिम् मघवा
पुरुवसुः इष्कर्ता विह्रुतम् पुनः।।12।।
5957. मा भूम निष्ट्याः इव इन्द्र त्वत् अरणाः इव।
वनानि न प्रजहितानि अद्रिवः दुरोषासः अमन्महि।।13।।
5958. अमन्महि इत् अनाशवः अनुग्रासः च वृत्रहन्।
सकृत् सु ते महता शूर राधसा अनु स्तोमम्
मुदीमहि।।14।
5959. यदि स्तोमम् मम श्रवत् अस्माकम् इन्द्रम् इन्दवः।
तिरः पवित्रम् ससृवांसः आशवः मन्दन्तु तुग्र्यवृधः।।15।।
5960. आ तु अद्य सधस्तुतिम् ववातुः
सख्युः आ हि गहि।
उपस्तुतिः मघोनाम् प्र त्वा अवतु
अध ते वश्मि सुस्तुतिम्।
5961. सोता हि सोमम् अद्रिभिः आ
ईम् एनम् अप्सु धावत।
गव्या वस्त्रइव वासयन्तः इत्,
नरः निः धुक्षणभ्यः।।17।।
5962. अध ज्मः अध वा दिवः बृहतः रोचनात् अधि।
अया वर्धस्व तन्वा गिरा मम आ जाता सुक्रते पृण।।18।।
5963. इन्द्राय सु मदिन्तमम् सोमम् सोता वरेण्यम्।
शक्रः एनम् पीपयत् विश्वया
धिया हिन्वानम् न वाजयुम्।।19।।
5964. मा त्वा सोमस्य गल्दया,

सदा याचन् अहम् गिरा।
भूर्णिम् मृगम् न सवनेषु
चुक्रुधम् कः ईशानम् न याचिषत्।।20।।
5965. मदेन इषितम् मदम्,
उग्रम् उग्रेण शवसा।
विश्वेषाम् तरुतारम् मदच्युतम्
मदे हि स्म ददाति नः।।21।।
5966. शेवारे वार्या पुरु देवः मर्ताय दाशुषे।
सः सुन्वते च स्तुवते च रासते विश्वगूर्तः
अरिस्तुतः।।22।।
5967. आ इन्द्र याहि मत्स्व,
चित्रेण देव राधसा।
सरः न प्रासि उदरम् सपीतिभिः
आ सोमेभि उरु स्फिरम्।।23।।
5968. आ त्वा सहस्रम् आ शतम् युक्ताः रथे हिरण्यये।
ब्रह्मयुजः हरयः इन्द्र केशिनः वहन्तु सोमपीतये।।24।।
5969. आ त्वा रथे हिरण्यये हरी मयुरशेप्या।
शितिपृष्ठा वहताम् मध्वः अन्धसः
विवक्षणस्य पीतये।।25।।
5970. पिब तु अस्य गिर्वणः सुतस्य पूर्वपाःइव।
परिकृतस्य रसिनः इयम् आसुतिः चारुः मदाय पत्यते।26।
5971. यः एकः अस्ति दसना महान् उग्रः अभि व्रतैः।
गमत् सः शिप्री न सः योषत् आ
गमत् हवम् न परि वर्जति।।27।।
5972. त्वम् पुरम् चरिष्ण्वम् वधैः शुष्णस्य सम् पिणक्।
त्वम् भाः अनु चरः अध द्विता
यत् इन्द्र हव्यः भुवः।।28।।
5973. मम त्वा सूरे उत्इते मम मध्यन्दिने दिवः।
मम प्रपित्वे अपिशर्वरे वसो आ स्तोमासः अवृत्सत।।29।।
5974. स्तुहि स्तुहि इत् एते घ ते महिष्ठासः मघोनाम्।
निन्दितअश्वः प्रपथी परमज्याः अघस्य मेध्यअतिथे।।30।।
5975. आ यत् अश्वान् वनन्-वतः श्रद्धया अहम् रथे
रुहम्।
उत वामस्य वसुनः चिकेतति यः अस्ति याद्वः
पशुः।।31।।
5976. यः ऋज्रा मह्यम् ममहे सहा त्वचा हिरण्यया।
एषः विश्वानि अभि अस्तु
सौभगा आसंगस्य स्वनत्-रथः।।32।।
5977. अध प्लायोगिः अति दासत् अन्यान्
आसङ्गः अग्ने दशभिः सहस्त्रैः।
अध उक्षणः दश मह्यम् रुशन्तः
नडाःइव सरसः निः अतिष्ठन्।।33।।
5978. अनु अस्य स्थूरम् ददृशे पुरस्तात्
अनस्थः ऊरुः अवरम्बमाणः।
शश्वती नारी अभिचक्ष्य आह
सुभद्रम् अर्य भोजनम् बिभर्षि।।34।।

## सूक्त 2

5979. इदम् वसो सुतम् अन्धः पिब सुपूर्णम् उदरम्।
अनाभयिन् ररिमा ते।।1।।
5980. नृभिः धूतः सुतो अश्नैः अव्यः वारैः परिपूतः।
अश्वः न निक्तः नदीषु।।2।।
5981. तम् ते यवम् यथा गोभिः स्वादुम् अकर्म
श्रीणन्तः।
इन्द्र त्वा अस्मिन् सधमादे।।3।।
5982. इन्द्रः इत् सोमपाः एकः इन्द्रः सुतपाः विश्वआयुः।
अन्तः देवान् मर्त्यान् च।।4।।
5983. न यम् शुक्रः न दुःआशीः न तृप्राः उरुव्यचसम्।
अपस्पृण्वते सुहार्दम्।।5।।
5984. गोभिः यत् ईम् अन्ये अस्मत्
मृगम् न व्राः मृगयन्ते।
अभित्सरन्ति धेनुभिः।।6।।
5985. त्रयः इन्द्रस्य सोमाः सुतासः सन्तु देवस्य।
स्वे क्षये सुतपाव्नः।।7।।
5986. त्रयः कोशासः श्चोतन्ति तिस्त्रः चम्वः सुपूर्णाः।
समाने अधि भार्मन्।।8।।
5987. शुचिः असि पुरुनिःस्थाः क्षीरैः मध्यतः आशीर्तः।
दध्ना मन्दिष्ठः शूरस्य।।9।।
5988. इमे ते इन्द्र सोमा तीव्राः अस्मे सुतासः।
शुक्राः आशिरम् याचन्ते।।10।।
5989. तान् आशिरम् पुरोडाशम्
इन्द्र इमम् सोमम् श्रीणीहि।
रेवन्तम् हि त्वा शृणोमि।।11।।
5990. हृत्-सु पीतासः युध्यन्ते दुःमदासः न सुरायाम्।
ऊधः न नग्नाः जरन्ते।।12।।
5991. रेवान् इत् रेवतः स्तोता स्यात् त्वावतः मघोनः।
प्र इत् हरिवः श्रुतस्य।।13।।
5992. उक्थम् चन शस्यमानम् अगोः अरिः आ चिकेत।
न गायत्रम् गीयमानम्।।14।।
5993. मा नः इन्द्र पीयत्नवे मा शर्धते परा दाः।
शिक्ष शचीवः शचीभिः।।15।।
5994. वयम् त्वा तदित्-अर्थाः इन्द्र त्वायन्तः सखायः।
कण्वाः उक्थेभिः जरन्ते।।16।।
5995. न घ ईम् अन्यत् आ पपन वज्रिन् अपसः
नविष्टौ।
तव इत् स्तोमम् चिकेत।।17।।

5996. इच्छन्ति देवाः सुन्वन्तम् न स्वप्नाय स्पृहयन्ति।
यन्ति प्रमादम् अतन्द्राः।।18।।
5997. ओ सु प्र याहि वाजेभिः
मा हृणीथाः अभि अस्मान्।
महान्-इव युवजानिः।।19।।
5998. मो सु अद्य दुःनावान् सायम् करत् आरे अस्मत्।
अश्रीरःइव जामाता।।20।।
5999. विद्म हि अस्य वीरस्य भूरिदावरीम् सुमतिम्।
त्रिषु जातस्य मनासि।।21।।
6000. आ तु सिञ्च कण्वमन्तम् न घ विद्म शवसानात्।
यशःतरम् शतम्-ऊतेः।।22।।
6001. ज्येष्ठेन सोतः इन्द्राय सोमम् वीराय शक्राय।
भर पिबत् नर्याय।।23।।
6002. यः वेदिष्ठः अव्यथिषु अश्ववन्तम् जरितृभ्यः।
वाजाम् स्तोतृभ्यः गोमन्तम्।।24।।
6003. पन्यम्-पन्यम् इत् सोतारः आ धावत मद्याय।
सोमम् वीराय शूराय।।25।।
6004. पाता वृत्रहा सुतम् आ घ गमत् न आरे अस्मत्।
नि यमते शतम्-ऊतिः।।26।।
6005. आ इह हरी ब्रह्मयुजा शग्मा वक्षतः सखायम्।
गीःभिः श्रुतम् गिर्वणसम्।।27।।
6006. स्वादवः सोमाः आ याहि श्रीताः सोमाः आ याहि।
शिप्रिन् ऋषिवः शचीवः न अयम् अच्छ सधमादम्।।28।।
6007. स्तुतः च याः त्वा वर्धन्ति महे राधसे नृम्णाय।
इन्द्र कारिणम् वृधन्तः।।29।।
6008. गिरः च याः ते गिर्वाहः उक्था च तुभ्यम् तानि।
सत्रा दधिरे शवासि।।30।।
6009. एव इत् एषः तुविकूर्मिः वाजान् एकः वज्रहस्तः।
सनात् अमृक्तः दयते।।31।।
6010. हन्ता वृत्रम् दक्षिणेन इन्द्रः पुरु पुरुहूतः।
महान् महीभिः शचीभिः।।32।।
6011. यस्मिन् विश्वाः चर्षणयः उत च्यौत्ना ज्रयांसि च।
अनु घ इत् मन्दी मघोनः।।33।।
6012. एषः एतानि चकार इन्द्रः विश्वा यः अति श्रृण्वे।
वाजदावा मघोनाम्।।34।।
6013. प्रभर्ता रथम् गव्यन्तम् अपाकात् चित् यम् अवति।
इनः वसु सः हि वोह्ळा।।35।।
6014. सनिता विप्रः अर्वत्-भिः हन्ता वृत्रम् नृभिः शूरः।
सत्यः अविता वृधन्तम्।।36।।
6015. यजध्व एनम् प्रियमेधाः इन्द्रम् सत्राचा मनसा।
यः भूत् सोमैः सत्यमद्वा।।37।।
6016. गाथश्रवसम् सत्पतिम् श्रवःकामम् पुरुत्मानम्।
कण्वासः गात वाजिनम्।।38।।
6017. यः ऋते चित् गाः पदेभ्यः दात्
सखा नृभ्यः शचीवान् ये।
अस्मिन् कामन् अश्रियन्।।39।।
6018. इत्था धीवन्तम् अद्रिवः काण्वम् मेध्यअतिथिम्।
मेषः भूतः अभि यन् अयः।।40।।
6019. शिक्षा विभिन्दो अस्मै चत्वारि अयुता ददत्।
अष्टा परः सहस्त्रा।।41।।
6020. उत सु त्ये पयःवृधा माकी रणस्य।
नप्त्या जनित्वानाय ममहे।।42।।

## सूक्त 3

6021. पिबा सुतस्य रसिनः मत्स्व नः इन्द्र गोमतः।
आपिः नः बोधि सधमाद्यः वृधे
अस्मान् अवन्ते ते धियः।।1।।
6022. भूयाम ते सुमतौ वाजिनः
वयम् मा नः स्तः अभिमातये।
अस्मान् चित्राभिः अवतात् अभिष्टिभिः
आ नः सुम्नेषु यमय।।2।।
6023. इमाः उ त्वा पुरुवसो गिरः वर्धन्तु याः मम।
पावकवर्णाः शुचयः विपःचितः अभि स्तोमैः अनूषत।।3।।
6024. अयम् सहस्रम् ऋषिभिः सहःकृतः समुद्रःइव पप्रथे।
सत्यः सः अस्य महिमा गृणे शवः यज्ञेषु विप्रराज्ये।।4।।
6025. इन्द्रम् इत् देवतातये इन्द्रम् प्रयति अध्वरे।
इन्द्रम् सम्-ईके वनिनः हवामहे
इन्द्रम् धनस्य सातये।।5।।
6026. इन्द्रः मह्वा रोदसी पप्रथत्
शवः इन्द्रः सूर्यम् अरोचयत्।
इन्द्रे ह विश्वा भुवनानि येमिरे इन्द्रे सुवानासः
इन्दवः।।6।।
6027. अभि त्वा पूर्वपीतये इन्द्र स्तोमेभिः आयवः।
सम्-ईचीनासः ऋभवः सम्
अस्वरन् रुद्राः गृणन्त पूर्व्यम्।।7।।
6028. अस्य इत् इन्द्रः ववृधे वृष्ण्यम्
शवः मदे सुतस्य विष्णवि।
अद्य तम् अस्य महिमानम्
आयवः अनु स्तुवन्ति पूर्वथा।।8।।
6029. तते त्वा यामि सुवीर्यम् तत् ब्रह्म पूर्वचित्तये।
प्रस्कण्वम् आविथ।।9।।
6030. येना समुद्रम् असृजः महीः
अपः यत् इन्द्र वृष्णि ते शवः।
सद्यः सः अस्य महिमा न
सम्-नशे यम् क्षोणीः अनुचक्रदे।।10।।
6031. शग्धि नः इन्द्र यत् त्वा रयिम् यामि सुवीर्यम्।

शग्धि वीजीय प्रथमम् सिसासते
शग्धि स्तोमाय पूर्व्य।।11।।
6032. शग्धि नः अस्य यत् ह पौरम्
आविथ धियः इन्द्र सिसासतः।
शग्धि यथा रूशमम् श्यावकम्
कृपम् इन्द्र प्र आवः स्वःनरम्।।12।।
6033. कत् नव्यः अतसीनाम् तुरः गृणीत मर्त्यः।
नहि नु अस्य महिमानम्
इन्द्रियम् स्वः गृणन्तः आनशुः।।13।।
6034. कत् उ स्तुवन्तः ऋतयन्त
देवता ऋषिः कः विप्रः ओहते।
कदा हवम् मघवन् इन्द्र
सुन्वतः कत् स्तुवतः आ गमः।।14।।
6035. उत् उ त्ये मधुमत्-तमाः गिरः स्तोमासः ईरते।
सत्राजितः धनसाः अक्षितऊतयः वाजयन्तः रथाःइवः।।15।।
6036. कण्वाःइव भृगवः सुर्याःइव
विश्वम् इत् धीतम् आनशुः।
इन्द्रम् स्तोमेभिः महयन्तः
आयवः प्रियमेधासः अस्वरन्।।16।।
6037. युक्ष्व हि वृत्रहन्-तम हरी इन्द्र परावतः।
अर्वाचीनः मघवन् सोमपीतये
उग्रः ऋष्वेभिः आ गहि।।17।।
6038. इमे हि ते कारवः वावशुः
धिया विप्रासः मेधसातये।
सः त्वम् नः मघवन् इन्द्र गिर्वणः
वेनः न श्रृणुधि हवम्।।18।।
6039. निः इन्द्र बृहतीभ्यः वृत्रम् धनुभ्यः अस्फुरः।
निः अर्बुदस्य मृगयस्य मायिनः
निः पर्वतस्य गाः आजः।।19।।
6030. निः अग्नयः रुरुचुः निः उ
सूर्यः निः सोमः इन्द्रियः रसः।
निः अन्तरिक्षात् अधमः महाम्
अहिम् कृषे तत् इन्द्र पौस्यम्।।20।।
6041. यम् मे दुः इन्द्रः मरुतः पाकस्थामा कौरयाणः।
विश्वेषाम् त्मना शोभिष्ठम् उपइव दिवि धावमानम्।।21।।
6042. रोहितम् मे पाकस्थामा सुधुरम् कक्ष्यप्राम्।
अदात् रायः विबोधनम्।।22।।
6043. यस्मै अन्ये दश प्रति धुरम् वहन्ति वह्नयः।
अस्तम् वयः न तुग्र्यम्।।23।।
6044. आत्मा पितुः तनूः वासः ओजःदाः अभिअञ्जनम्।
तुरीयम् इत् रोहितस्य पाकस्थामानम्
भोजम् दातारम् अब्रवम्।।24।।

## सूक्त 4

6045. यत् इन्द्र प्राक् अपाक् उदक्
न्यक् वा हूयसे नृभिः।
सिम पुरु नृसूतः असि आनवे असि प्रशर्ध तुर्वशे।।1।।
6046. यत् वा रुशमे श्यावके कृपे इन्द्र मादयसे सचा।
कण्वासः त्वा ब्रह्मभिः स्तोमबाहसः
इन्द्र आ यच्छन्ति आ गहि।।2।।
6047. यथा गौरः अपा कृतम् तृष्यन् एति अव इरिणम्।
आ-पित्वे नः प्र-पित्वे तूयम् आ
गहि कण्वेषु सु सचा पिब।।3।।
6048. मन्दन्तु त्वा मघवन् इन्द्र
इन्दवः राधःदेयाय सुन्वते।
आ-मुष्य सोमम् अपिबः चमू
सुतम् ज्येष्ठम् तत् दधिषे सहः।।4।।
6049. प्र चके सहसा सहः बभञ्ज मन्युम् ओजसा।
विश्वे ते इन्द्र पृतनायवः यहो नि वृक्षाःइव येमिरे।।5।।
6050. सहस्रेणइव सचते यवियुधा
यः ते आनट् उपस्तुतिम्।
पुत्रम् प्रावर्गम् कृणते सुवीर्ये दाश्नोति नमउक्तिभिः।।6।।
6051. मा भेम मा श्रमिष्म उग्रस्य सख्ये तव।
महत् ते वृष्णः अभिचक्षयम्
कृतम् पश्येम तुर्वशम् यदुम्।।7।।
6052. सव्याम् अनु स्फिग्यम् ववसे
वृषा न दानः अस्य रोषति।
मध्वा सम्-पृक्ताः सारघेण धेनवः
तूयम् आ इहि द्रव पिब।।8।।
6053. अश्वी रथी सुरूपः इत् गोमान् इत् इन्द्र ते सखा।
श्वात्रभाजा वयसा सचते सदा चन्द्रः याति सभाम् उप।।9।।
6054. ऋश्यः न तृष्यम् अवपानन् आ
गहि पिब सोमम् वशान् अनु।
निमेघमानः मघवन् दिवे-दिवे ओजिष्ठम् दधिषे
सहः।।10।।
6055. अध्वर्यो द्रावय त्वम् सोमम् इन्द्रः पिपासति।
उप युयुजे वृषणा हरी आ च जगाम वृत्रहा।।11।।
6056. स्वयम् चित् सः मन्यते दाशुरिः
जनः यत्र सोमस्य तृम्पसि।
इदम् ते अनम् युज्म् सम्-उक्षितम्
तस्य आ इहि प्र द्रव पिब।।12।।
6057. रथेस्थाय अध्वर्यवः सोमम् इन्द्राय सोतन।
अधि ब्रध्नस्य अद्रयः वि चक्षते
सिन्वन्तः दाशुअध्वरम्।।13।।
6058. उप ब्रध्नम् ववाता वृषणा

हरी इन्द्रम् अपसु वक्षतः।
अर्वाञ्चम् त्वा सप्तयः अध्वरश्रियः
वहन्तु सवना इत् उप।।14।।
6059. प्र पूषणम् वृणीमहे युज्याय पुरुवसुम्।
सः शक्र शिक्ष पुरुहूत नः धिया तुजे राये विमोचन।।15।।
6060. सम् नः शिशीहि भुरिजोःइव
क्षुरम् रास्व रायः विमोचन।
त्वे तत् नः सुवेदम् उस्त्रियम्
वसु यम् स्वम् हिनोषि मर्त्यम्।।16।।
6061. वेभि त्वा पूषन् ऋञ्जसे वेमि स्तोतवे आघृणे।
न तस्य वेमि अरणम् हि तत्
वसो स्तुषे पज्राय साम्ने।।17।।
6062. परा गावः यवसम् कत् चित्
आघृणे नित्यम् रेक्णः अमर्त्य।
अस्माकम् पूषन् अविता शिवः
भव महिष्ठः वाजसातये।।18।।
6063. स्थूरम् राधः शतअश्वम् कुरुङ्गस्य दिविष्टिषु।
राज्ञः त्वेषस्य सुभगस्य रातिषु तुर्वशेषु अमन्महि।।19।।
6064. धिभिः सातानि काण्वस्य
वाजिनः प्रियमेधैः अभिद्युभिः।
षष्टिम् सहस्त्रा अनु निःमाजाम्
अजे निः यूथानि गदाम् ऋषिः।।20।।
6065. वृक्षाः चित् मे अभिपित्वे अरराणुः।
गाम् भजन्त मेहना अश्वम् भजन्त मेहना।।21।।

## सूक्त 5

6066. दूरात् इहइव यत् सती अरुणप्सुः अशिश्वितत् ।
वि भानुम् विश्वधा अतनत्।।1।।
6067. नृवत् दस्त्रा मनःयुजा रथेन पृथुपाजसा ।
सचेथे अश्विना उषसम्।।2।।
6068. युवाभ्याम् वाजिनीवसू प्रति स्तोमाः अदृक्षत।
वाचम् दूतः यथा ओहिषे।।3।।
6069. पुरुप्रिया नः ऊतये पुरुमन्द्रा पुरुवसू।
स्तुषे कण्वासः अश्विना।।4।।
6070. मंहिष्ठा वाजसातमा इषयन्ता शुभः पती।
गन्तारा दाशुषः गृहम्।।5।।
6071. ता सुदेवाय दाशुषे सुमेधाम् अवितारिणीम्।
घृतैः गव्यतिम् उक्षतम्।।6।।
6072. आ नः स्तोमम् उप द्रवत्,
तूर्यम् श्येनेभिः आशुभिः।
यातम् अश्वेभिः अश्विना।।7।।
6073. येभिः तिस्त्रः परावतः दिवः विश्वानि रोचना।
त्रीन् परिदीयथः।।8।।
6074. उत नः गोमतीः इषः उत सातीः अहःविदा।
वि पथः सातये सितम्।।9।।
6075. आ नः गोमन्तम् अश्विना सुवीरम् सुरथम् रयिम्।
वोहडम् अश्वतीः इषः।।10।।
6076. ववृधाना शुभः पती दस्त्रा हिरण्यवर्तनी।
पिबतम् सोम्यम् मधु।।11।।
6077. अस्मभ्यम् वाजिनीवसू मघवत्-भ्यः च सप्रथः।
छर्दिः यन्तम् अदाभ्यम्
6078. नि सु ब्रह्म जनानाम् या अविष्टम् तूयम् आ गतम्।
मो सु अन्यान् उप अरतम्।।13।।
6079. अस्य पिबतम् अश्विना युवम् मदस्य चारुणः।
मध्वः रातस्य धिष्ण्या।।14।।
6080. अस्मे आ वहतम् रयिम् शतवन्तम् सहस्त्रिणम्।
पुरुक्षुम् विश्वधायसम्।।15।।
6081. पुरुत्रा चित् हि वाम् नरा विह्वयन्ते मनीषिणः।
वाघत्-भिः अश्विना आ गतम्।।16।।
6082. जनासः वृक्तबर्हिषः हविष्मन्तः अरम्-कृतः।
युवाम् हवन्ते अश्विना।।17।।
6083. अस्माकम् अद्य वाम् अयम्
स्तोमः वार्हिष्ठः अन्तमः।
युवाभ्याम् भूतु अश्विना।।18।।
6084. यः ह वाम् मधुनः दृतिः आहितः रथचर्षणे।
ततः पिबतम् अश्विना।।19।।
6085. तेन नः वाजिनीवसू पश्वे तोकाय शम् गवे।
वहतम् पीवरीः इषः।।20।।
6086. उत नः दिव्याः इषः उत सिन्दून् अहःविदा।
अप द्वाराइव वर्षथः।।21।।
6087. कदा वाम् तौग्र्यः विधत् समुद्रे जहितः नरा।
यत् वाम् रथः विभिः पपात्।।22।।
6088. युवम् कण्वाय नासत्या अपिरिप्ताय हर्म्ये।
शश्वत् ऊतीः दशस्यथः।।23।।
6089. ताभिः आ यातम् ऊतिभिः नव्यसीभिः सुशस्तिभिः।
यत् वाम् वृषण्वसू हुवे।।24।।
6090. यथा चित् कण्वम् आवतम् प्रियमेधम् उपस्तुतम्।
अत्रिम् शिजारम् अश्विना।।25।।
6091. यथा उत कृत्व्ये धने अशुम् गोषु अगस्त्यम्।
यथा वाजेषु सोभरिम्।।26।।
6092. एतावत् वाम् वृषण्वसू अतः वा भूयः अश्विना।
गृणन्तः सुम्नम् ईमहे।।27।।
6093. रथम् हिरण्यवन्धुरम् हिण्यअभीशुम् अश्विना।
आ हि स्थाथः दिविस्पृशम्।।28।।
6094. हिरण्ययी वाम् रभिः ईषा अक्षः हिरण्ययः।

उभा चक्रा हिरण्यया।।29।।
6095. तेन नः वाजिनीवसू परावतः चित् आ गतम्।
उप इमाम् सुस्तुतिम् मम।।30।।
6096. आ वहेथे पराकात् पूर्वीः अश्नन्तौ अश्विना।
इषः दासीः अमर्त्या।।31।।
6097. आ नः द्युम्नै आ श्रवःभिः,
आ राया यातम् अश्विना।
पुरुचन्द्रा नासत्या।।32।।
6098. आ इह प्रुषितप्सवः वयः वहन्तु पर्णिनः।
अच्छ सुअध्वरम् जनम्।।33।।
6099. रथम् वाम् अनुगायसम् यः इषा वर्तते सह।
न चक्रम् अभि बाधते।।34।।
6100. हिरण्ययेन रथेन द्रवत्पाणिभिः अश्वैः।
धीजवना नासत्या।।35।।
6101. युवम् मृगम् जागृवासम् स्वदथः वा वृषण्वसू।
ता नः पृङ्क्तम् इषा रयिम्।।36।।
6102. ता मे अश्विना सनीनाम् विद्यातम् नवानाम्।
यथा चित् चैद्यः कशुः शतम् उष्ट्रानाम्
ददत् सहस्रा दशा गोनाम्।।37।।
6103. यः मे हिरण्यसंदृशः दश राज्ञः अमहत।
अधःपदाः इत् चैद्यस्य कृष्टयः
चर्मम्नाः अभितः जनाः।।38।।
6104. माकिः एना पथा गात् येन इमे यन्ति चेदयः।
अन्यः न इत् सूरिः ओहते भूरिदावत्-तरः जनः।।39।।

## सूक्त 6

6105. महान् इन्द्रः यः ओजसा पर्जन्यः वृष्टिमान्-इव।
स्तोमैः वत्सस्य ववृधे।।1।।
6106. प्रजाम् ऋतस्य पिप्रतः प्र यत् भरन्त वह्नयः।
विप्राः ऋतस्य धारया।।2।।
6107. कण्वाः इन्द्रम् यत् अक्रत स्तोमैः यज्ञस्य साधनम्।
जामि ब्रुवते आयुधम्।।3।।
6108. सम् अस्य मन्यवे विशः विश्वाः नमन्त कृष्टयः।
समुद्रायइव सिन्धवः।।4।।
6109. ओजः तत् अस्य तित्विषे उभे यत् सम्-अवर्तयत्।
इन्द्रः चर्मइव रोदसी।।5।।
6110. वि चित् वृत्रस्य दोधतः वज्रेण शतपर्वणा।
शिरः बिभेद वृष्णिना।।6।।
6111. इमाः अभि प्र नोनुमः विपाम् अग्रेषु धीतयः।
अग्नेः शोचिः न दिद्युतः।।7।।
6112. गुहा सतीः उप त्मना प्र यत् शोचन्त धीतयः।
कण्वाः ऋतस्य धारया।।8।।
6113. प्र तम् इन्द्र नशीमहि रयिम् गोमन्तम् अश्विनम्।
प्र ब्रह्म पूर्वचित्तये।।9।।
6114. अहम् इत् हि पितुः परि मेधाम् ऋतस्य जग्रभ।
अहम् सूर्यःइव अजनि।।10।।
6115. अहम् प्रत्नेन मन्मना गिरः शुभामि कण्ववत्।
येन इन्द्रः शुष्मम् इत् दधे।।11।।
6116. ये त्वाम् इन्द्र न तुस्तुवुः ऋषयः ये च तुस्तुवुः।
मम इत् वर्धस्व सु-स्तुतः।।12।।
6117. यत् अस्य मन्युः अध्वनीत् वि वृत्रम् पर्वशः रुजन्।
अपः समुद्रम् ऐरयत्।।13।।
6118. नि शुष्णे इन्द्र धर्णसिम् वज्रम् जघन्थ दस्यवि।
वृषा हि इग्र श्रृण्विषे।।14।।
6119. न द्यावः इन्द्रम् ओजसा न अन्तरिक्षाणि
वज्रिणम्।
न विव्यचन्त भूमयः।।15।।
6120. यः ते इन्द्र महीः अपः स्तभुयमानः आ अशयत्।
नि तम् पद्यासु शिश्नथः।।16।।
6121. यः इमे रोदसी मही समीची सम्-अजग्रभीत्।
तमःभिः इन्द्र तम् गुहः।।17।।
6122. यः इन्द्र यतयः त्वा भृगवः ये च तुस्तुवुः।
मम इत् उग्र श्रुधि हवम्।।18।।
6123. इमाः ते इन्द्र पृश्नयः घृतम् दुहते आशिरम्।
एनाम् ऋतस्य पिप्युषीः।।19।।
6124. याः इन्द्र प्रस्वः त्वा आसा गर्भम् अचक्रिरन्।
परि धर्मइव सूर्यम्।।20।।
6125. त्वाम् इत् शवसः पते कण्वाः उक्थेन ववृधुः।
त्वाम् सुतासः इन्दवः।।21।।
6126. तव इत् इन्द्र प्रनीतिषु उत प्रशस्तिः अद्रिवः।
यज्ञः वितन्तसाय्यः।।22।।
6127. आ नः इन्द्र महीम् इषम् पुरम् न दर्षि गोमतीम्।
उत प्रजाम् सुवीर्यम्।।23।।
6128. उत त्यत् आशुअश्व्यम् यत् इन्द्र नाहुषीषु आ।
अग्रे विक्षु प्रदीदयत्।।24।।
6129. अभि व्रजम् न तत्निषे सूरः इपाकचक्षसम्।
यत् इन्द्र मृडयासि नः।।25।।
6130. यत् अङ्ग तविषीयसे इन्द्र प्राजसि क्षितीः।
महान् अपारः ओजसा।।26।।
6131. तम् त्वा हविष्मतीः विशः उप ब्रुवते ऊतये।
उरुज्रयसम् इन्दुभिः।।27।।
6132. उपह्वरे गिरीणाम् सम्-गथे च नदीनाम्।
धिया विप्रः अजायत।।28।।
6133. अतः समुद्रम् उत्-वतः चिकित्वान् अव पश्यति।
यतः विपानः एजति।।29।।
6134. आत् इत् प्रत्नस्य रेतसः ज्योतिः पश्यन्ति

वासरम्।
परः यत् इध्यते दिवा।।30।।
6135. कण्वासः इन्द्र ते मतिम् विश्वे वर्धन्ति पौस्यम्।
उतो शविष्ठ वृष्ण्यम्।।31।।
6136. इमाम् मे इन्द्र सु-स्तुतिम् जुषस्व प्र सु माम् अव।
उत प्र वर्धय मतिम्।।32।।
6137. उत ब्रह्मण्या वयम् तुभ्यम् प्रवृद्ध वज्रिवः।
विप्राः अतक्ष्म जीवसे।।33।।
6138. अभि कण्वाः अनूषत आपः न प्रवता यतीः।
इन्द्रम् वनन्-वती मतिः।।34।।
6139. इन्द्रम् उक्थानि ववृधुः समुद्रम्इव सिन्धवः।
अनुत्तमन्युम् अजरम्।।35।।
6140. आ नः याहि परावतः हरिभ्याम् हर्यताभ्याम्।
इमम् इन्द्र सुतम् पिब।।36।।
6141. त्वाम् इत् वृत्रहन्-तम जनासः वृक्तबर्हिषः।
हवन्ते वाजसातये।।37।।
6142. अनु त्वा रोदसी उभे चक्रम् न वर्ति एतशम्।
अनु सुवानासः इन्दवः।।38।।
6143. मन्दस्व सु स्वःनरे उत इन्द्र शर्यणावति।
मत्स्व विवस्वतः मती।।39।।
6144. ववृधानः उप द्यवि वृषा वज्री अरोरवीत्।
वृत्रहा सोमपातमः।।40।।
6145. ऋषिः हि पूर्वजाः असि एकः ईशानः ओजसा।
इन्द्र चोष्कूयसे वसु।।41।।
6146. अस्माकम् त्वा सुतान् उप वीतपृष्ठाः अभि प्रयः।
शतम् वहन्तु हरयः।।42।।
6147. इमाम् सु पूर्व्याम् धियम् मधोः घृतस्य पिप्युषीम्।
कण्वाः उक्थेन ववृधुनः।।43।।
6148. इन्द्रम् इत् विमहीनाम् मेधे वृणीत मर्त्यः।
इन्द्रम् सनिष्युः ऊतये।।44।।
6149. अर्वाञ्चम् त्वा पुरुस्तुत प्रियमेध-स्तुता हरी।
सोमपेयाय वक्षतः।।45।।
6150. शतम् अहम् तिरिन्दिरे सहस्त्रम् पर्शौ आ ददे।
राधासि याद्वानाम्।।46।।
6151. त्रीणि शतानि अर्वताम् सहस्त्रा दश गोनाम्।
ददुः पज्राय साम्ने।।47।।
6152. उत् आनत् ककुहः दिवम् उष्ट्रान् चतुःयुजः ददत्।
श्रवसा याद्वम् जनम्।।48।।

## सक्त 7

6153. प्र यत् वः त्रि-स्तुभम् इषम् मरुतः विप्रः अक्षरत्।
वि पर्वतेषु राजथ।।1।।
6154. यत् अङ्ग तविषीयवः यामम् शुभ्राः अचिध्वम्।
नि पर्वताः अहासत।।2।।
6155. उत् ईरयन्त वायुभिः वाश्रासः पृश्निमातरः।
धुक्षन्त पिप्युषीम् इषम्।।3।।
6156. वपन्ति मरुतः मिहम् प्र वेपयन्ति पर्वतान्।
यत् यामम् यान्ति वायुभिः।।4।।
6157. नि यत् यामाय वः गिरिः नि सिन्धवः विधर्मणे।
महे शुष्माय येमिरे।।5।।
6158. युष्मान् उ नक्तम् ऊतये युष्मान् दिवा हवामहे।
युष्मान् प्रयति अध्वरे।।6।।
6159. उत् उ त्ये अरुणप्सवः चित्राः यामेभिः ईरते।
वाश्राः अधि स्नुना दिवः।।7।।
6160. सृजन्ति रश्मम् ओजसा पन्थाम् सूर्याय यातवे।
ते भानुभिः वि तस्थिरे।।8।।
6161. इमाम् मे मरुतः गिरम् इमम् स्तोमम् ऋभुक्षणः।
इमम् मे वनत हवम्।।9।।
6162. त्रीणि सरासि पृश्नयः दुःदुह्रे वज्रिणे मधु।
उत्सम् कवन्धम् उद्रिणम्।।10।।
6163. मरुतः यत् ह वः दिवः सुम्नयन्तः हवामहे।
आ तु नः उप गन्तन।।11।।
6164. यूयम् हि स्थ सुदानवः रुद्राः ऋभुक्षणः दमे।
उत प्रचेतसः मदे।।12।।
6165. आ नः रयिम् मदच्युतम् पुरुक्षुम् विश्वधायसम्।
इयर्त मरुतः दिवः।।13।।
6166. अधिइव यत् गिरीणाम् यामम् शुभ्राः अचिध्वम्।
सुवानैः मन्दध्वे इन्दुभिः।।14।।
6167. एदावतः चित् एषाम् सुम्नम् भिक्षेत मर्त्यः।
अदाभ्यास्य मन्मभिः।।15।।
6168. ये द्रप्साःइव रोदसी धमन्ति अनु वृष्टिभिः।
उत्सम् दुहन्तः अक्षितम्।।16।।
6169. उत् उ स्वानेभिः ईरते उत् सथैः उत् वायुभिः।
उत् स्तोमैः पृश्निमातरः।।17।।
6170. येन आव तुर्वशम यदुम् येन कण्वम् धनस्पृतम्।
राये सु तस्य धीमहि।।18।।
6171. इमाः उ वः सुदानवः घृतम् न पिप्युषीः इषः।
वर्धान् काण्वस्य मन्मभिः।।19।।
6172. क्व नूनम् सुदानवः मदथ वृक्तबर्हिषः।
ब्रह्मा कः वः सपर्यति।।20।।
6173. नहि स्म यत् ह वः पुरा स्तोमेभिः वृक्तबर्हिषः।
शर्धान् ऋतस्य जिन्वथ।।21।।
6174. सम् उ त्ये महतीः अपः सम् क्षोणी सम् उ सूर्यम्।
सम् वज्रम् पर्वशः दधुः।।22।।
6175. वि वृत्रम् पर्वशः ययुः वि पर्वतान् अराजिनः।
चक्राणाः वृष्णि पौस्यम्।।23।।

6176. अनु त्रितस्य युध्यतः शुष्मम् आवन् उत क्रतुम्
अनु इन्द्रम् वृत्रतूर्ये।।24।।
6177. विद्युतहस्ताः अभिद्यवः शिप्राः शीर्षन्
हिरण्ययीः शुभ्राः वि अञ्जत श्रिये।।25।।
6178. उशना यत् परावतः उक्ष्णः रंध्रम् अयातन।
द्यौः न चक्रदत् भिया।।26।।
6179. आ नः मखस्य दावने अश्वैः हिरण्यपाणिभिः।
देवासः उप गन्तन।।27।।
6180. यत् एषाम् पृषतीः रथे प्रष्टिः वहति रोहितः।
यान्ति शुभ्राः रिणन् अपः।।28।।
6181. सुसोमे शर्यणावति आर्जीके पस्त्यवति।
ययुः निचक्रया नरः।।29।।
6182. कदा गच्छाथ मरुतः इत्था विप्रम् हवमानम्।
मार्डीकेभिः नाधमानम्।।30।।
6183. कत् ह नूनम् कधप्रयः यत् इन्द्रम् अजहातन।
कः वः सखित्वे ओहते।।31।।
6184. सहो सु नः वज्रहस्तैः कण्वासः अग्निम् मरुत्-भिः।
स्तुषे हिरण्यवाशीभिः।।32।।
6185. ओ सु वृष्णाः प्रयज्यूम् आ नव्यसे सुविताय।
ववृत्याम् चित्रवाजान्।।33।।
6186. गिरयः चित् नि जिहते पर्शानासः मन्यमानाः।
पर्वताः चित् नि येमिरे।।34।।
6187. आ अक्ष्णयावानः वहन्ति अन्तरिक्षेण पततः।
धातारः स्तुवते वयः।।35।।
6188. अग्निः हि जनि पूर्वयः छन्दः न सूरः अर्चिषा।
ते भानुभिः वि तस्थिरे।।36।।

## सूक्त 8

6189. आ नः विश्वाभिः ऊतिभिः अश्विना गच्छतम्
युवम्।
दस्त्रा हिरण्यवर्तनी पिबतम् सोम्यम् मधु।।1।।
6190. आ नूनम् यातम् अश्विना रथेन सूर्यत्वचा।
भुजी हिरण्यपेशसा कवी गंभीरचोतसा।।2।।
6191. आ यातम् नहुषः परि आ अन्तरिक्षात् सुवृक्तिभिः।
पिबाथः अश्विना मधु कण्वानाम् सवने सुतम्।।3।।
6192. आ नः यातम् दिवः परि
आ अन्तरिक्षात् अधप्रिया।
पुत्रः कण्वस्य वाम् इह सुसाव सोम्यम् मधु।।4।।
6193. आ नः यातम् उपश्रुति अश्विना सोमपीतये।
स्वाहा स्तोमस्य वर्धना प्र कवी धीतिभिः नरा।।5।।
6194. यत् चित् हि वाम् पुरा ऋषयः जुहूरे अवसे नरा।
आ यातम् अश्विना आ गतम्
उप इमाम् सुस्तुतिम् मम।।6।।
6195. दिवः चित् रोचनात् अधि आ नः गन्तम् स्वःविदा।
धीभिः वत्सप्रचेतसा स्तोमेभिः हवनश्रुता।।7।।
6196. किम् अन्ये परि आसते
अस्मत् स्तोमेभिः अश्विना।
पुत्रः कण्वस्य वाम् ऋषिः गीःभिः वत्सः अवीवृधत्।।8।।
6197. आ वाम् विप्रः इह अवसे अह्वत् स्तोमेभिः
अश्विना।
अरिप्रा वृत्रहन्-तमा ता नः भूतम् मयःभुवा।।9।।
6198. आ यत् वाम् योषणा रथम् अतिष्ठत् वाजिनीवसू।
विश्वानि अश्विना युवम् प्र धीतानि अगच्छतम्।।10।।
6199. अतः सहस्त्रनिर्निजा रथेन आ यातम् अश्विना।
वत्सः वाम् मधुमत् वचः अशसीत् काव्यः कविः।।11।।
6200. पुरुमन्द्रा पुरुवसू मनोतरा रयीणाम्।
स्तोमम् मे अश्विनौ इमम् अभि वह्नी अनूषाताम्।।12।।
6201. आ नः विश्वानि अश्विना धत्तम् राधासि अह्रया।
कृतम् नः ऋत्वियवतः मा नः रीरधतम् निदे।।13।।
6202. यत् नासत्या परा वति यत् वा स्थः अधि अम्बरे।
अतः सहस्त्रनिर्निजा रथेन आ यातम् अश्विना।।14।।
6203. यः वाम् नासत्यौ ऋषिः गीःभिः वत्सः अवीवृधत्।
तस्मै सहस्त्रनिर्निजम् इषम् धत्तम् घृश्वुतम् ।।15।।
6204. प्र अस्मै ऊर्जम् घृतश्र्वुतम्
अश्विना यच्छतम् युवम्।
यः वाम् सुम्नाय तुस्तवत् वसुयात् दानुनः पती।।16।।
6205. आ नः गन्तम् रिशादसा इमम् स्तोमम् पुरुभुजा।
कृतम् नः सुश्रियः नरा दातम् अभिष्टये।।17।।
6206. आ वाम् विश्वाभिः ऊतिभिः प्रियमेधाः अहूषत।
राजन्तौ अध्वराणाम् अश्विना यामहूतिषु।।18।।
6207. आ नः गन्तम् मयःभुवा अश्विना शम्-भुवा युवम्।
यः वाम् विपन्यू धीतिभिः गीःभिः वत्सः अवीवृधत्।।19।।
6208. याभिः कण्वम् मेधअतिथिम्
याभिः वशम् दशव्रजम्।
याभिः गोशर्यम् आवतम् ताभिः नः अवतम् नरा।।20।।
6209. याभिः नरा त्रसदस्युम् आवतम् कृत्व्ये धने।
ताभिः सु अस्मान् अश्विना प्र अवतम् वाजसातये।।21।।
6210. प्र वाम् स्तोमाः सुवृक्तयः गिरः वर्धन्तु अश्विना।
पुरुत्रा वृत्रहन्-तमा ता नः भूतम् पुरुस्पृहा।।22।।
6211. त्रीणि पदानि अश्विनोः आविः सन्ति गुहा परः।
कवी ऋतस्य पत्मभिः अर्वाक् जीवेभ्यः परि।।23।।

## सूक्त 9

6212. आ नूनम् अश्विना युवम् वत्सस्य गन्तम् अवसे।
प्र अस्मै यच्छतम् अवृकम् पृथु
छर्दिः युयुतम् याः अरातयः।।1।।

6213. यत् अन्तारिक्षे यत् दिवि यत् पञ्च मानुषान् अनु।
नृम्णम् तत् धत्तम् अश्विना।।2।।
6214. ये वाम् दंसांसि अश्विना विप्रासः परिममृशुः।
एव इत् काण्वस्य बोधतम्।।3।।
6215. अयम् वाम् घर्मः अश्विना स्तोमेन परि सिच्यते।
अयम् सोमः मधुमान् वाजिनीवसू
येन वृत्रम् चिकेतथः।।4।।
6216. यत् अप्-सु यत् वनस्पतौ यत्
ओषधीषु पुरुदंससा कृतम्।
तेन मा अविष्टम् अश्विना।।5।।
6217. यत् नासत्या भुरण्यथः यत् वा देवा भिषज्यथः।
अयम् वाम् वत्सः मतिभिः न
विन्धते हविष्मन्तम् हि गच्छथः।।6।।
6218. आ नूनम् अश्विनोः ऋषिः स्तोमम् चिकेत वामया।
आ सोमम् मधुमत्-तमम् घर्मम् सिञ्चात् अथर्वणि।।7।।
6219. आ नूनम् रघु-वर्तनिम् रथम् तिष्ठाथः अश्विना।
आ वाम् स्तोमाः इमे मम नभः न चुच्यवीरत।।8।।
6220. यत् अद्य वाम् नासत्या उक्थैः आचुच्युवीमहि।
यत् वा वाणीभिः अश्विना एव इत् काण्वस्य बोधतम्।।9।।
6221. यत् वाम् कक्षीवान् उत यत् विअश्वः
ऋषिः यत् वाम् दीर्घतमाः जुहाव।
पृथी यत् वाम् वैन्यः सदनेषु एव।
इत् अतः अश्विना चेतयेथाम्।।10।।
6222. यातम् छर्दिःपौ उत नः परःपा
भूतम् जगत्-पौ उत नः तनूपा।
वर्तिः तोकाय तनयाय यातम्।।11।।
6223. यत् इन्द्रेण सरथम् याथः अश्विना
यत् वा वायुना भवथः सम्-ओकसा।
यत् आदित्येभिः ऋभुभिः सजोषसा
यत् वा विष्णोः विक्रमणेषु तिष्ठथः।।12।।
6224. यत् अद्य अश्विनौ अहम् हुवेय वाजसातये।
यत् पृत्-सु तुर्वणे सहः तत् श्रेष्ठम् अश्विनोः अवः।।13।।
6225. आ नूनम् यातम् अश्विना इमा हव्यानि वाम् हिता।
इमे सोपासः अधि तुर्यशे यदौ इमे कण्वेषु वाम् अथ।।14।।
6226. यत् नासत्या पराके अर्वाके अस्ति भेषजम्।
तेन नूनम् विमदाय प्रचेतसा
छर्दिः वत्साय यच्छतम्।।15।।
6227. अभुत्सि उ प्र देव्या साकम् वाचा अहम् अश्विनोः।
वि आवः देवि आ मतिम् वि रातिम् मर्त्येभ्यः।।16।।
6228. प्र बोधय उषः अश्विना प्र देवि सूनृते महि।
प्र यज्ञहोतः आनुषक् प्र मदाय श्रवः बृहत्।।17।।
6229. यत् उषः यासि भानुना सम् सूर्येण रोचसे।
आ ह अयम् अश्विनोः रथः वर्ति याति नृपाय्यम्।।18।।
6230. यत् आपीतासः अशवः गावः न ऊधभिः।
यत् वा वाणीः अनूषत प्र देवयन्तः अश्विना।।19।।
6231. प्र द्युम्नाय प्र शवसे प्र नृसह्याय शर्मणे।
प्र दक्षाय प्रचेतसा।।20।।
6232. यत् नूनम् धीभिः अश्विना पितुः योना निसीदथः।
यत् वा सुम्नेभिः उक्थ्या।।21।।

## सूक्त 10

6233. यत् स्थः दीर्घप्रसद्मनि यत् वा अदः रोचने दिवः।
यत् वा समुद्रे अधि आकृते
गृहे अतः आ यातम् अश्विना।।1।।
6234. यत् वा यज्ञम् मनवे सम्-मिमिक्षथुः
एव इत् काण्वस्य बोधतम्।
बृहस्पतिम् विश्वान् देवान् अहम् हुवे
इन्द्राविष्णू अश्विनौ आशुहेषसा।।2।।
6235. त्या नु अश्विना हुवे सुदंससा गृभे कृता।
ययोः अस्ति प्र नः सख्यम् देवेषु अधि आप्यम्।।3।।
6236. ययोः अधि प्र यज्ञाः असूरे सन्ति सूरयः।
ता यज्ञस्य अध्वरस्य प्र चेतसा
स्वधाभिः या पिबतः सोम्यम् सधु।।4।।
6237. यत् अद्य अश्विनौ अपाक्
यत् प्राक् स्थः वाजिनीवसू।
यत् द्रुह्यवि अनवि तुर्वशे यदौ
हुवे वाम् अथ मा आ गतम्।।5।।
6238. यत् अन्तरिक्षे पतथः पुरुभुजा
यत् वा इमे रोदसी अनु।
यत् वा स्वधाभिः अधितिष्ठथः
रथम् अतः आ यातम् अश्विना।।6।।

## सूक्त 11

6239. त्वम् अग्ने व्रतपाः असि
देवः आ मर्त्येषु आ।
त्वम् यज्ञेषु ईड्यः।।1।।
6240. त्वम् असि प्रशस्यः विदाथेषु सहन्त्य।
अग्ने रथीः अध्वराणाम्।।2।।
6241. सः त्वम् अस्मत् अप द्विषः युयोधि जातवेदः।
अदेवीः अग्ने अरातीः।।3।।
6242. अन्ति चित् सन्तम् अह यज्ञम् मर्तस्य रिपोः।
न उप वेषि जातवेदः।।4।।
6243. मर्ताः अमर्त्यस्य ते भूरि नाम मनामहे।
विप्रासः जातवेदसः।।5।।
6244. विप्रम् विप्रासः अवसे देवम् मर्तासः ऊतये।
अग्निम् गीःभिः हवामहे।।6।।

6245. आ ते वत्सः मनः यमत् परमात् चित् सधस्थात्।
अग्ने त्वाम्-कामया गिरा।।7।।
6246. पुरुत्रा हि सदृङ् असि विशः विश्वाः अनु प्रभुः।
समत्-सु त्वा हवामहे।।8।।
6247. समत-सु अग्निम् अवसे वाजयन्तः हवामहे।
वाजेषु चित्रराधसम्।।9।।
6248. प्रत्नः हि कम् ईड्यः अध्वरेषु
सनात् च होता नव्यः च सत्सि।
स्वाम् च अग्ने तन्वम् पिप्रयस्व
अस्मभ्यम् च सौभगम् आ यजस्व।।10।।

## सूक्त-12

6249. यः इन्द्र सोम-पातमः मदः शविष्ठ चेतति।
येन हंसि नि अत्रिणम् तम् ईमहे।।1।।
6250. येन दश-ग्वम् अध्रि-गुम् वेपयन्तम् स्वः-नरम्।
येन समुद्रम् आविथ तम् ईमहे।।2।।
6251. येन सिन्धुम् महीः अपः रथान्-इव प्रचोदयः।
पन्थाम् ऋतस्य यातवे तम् ईमहे।।3।।
6252. इमम् स्तोमम् अभिष्टये घृतम् न पूतम् अद्रिवः।
येन नु सद्यः ओजसा ववक्षिथ।।4।।
6253. इमम् जुषस्व गिर्वणः समुद्रः-इव पिन्वते।
इन्द्र विश्वाभिः ऊतिभिः ववक्षिथ।।5।।
6254. यः नः देवः परावतः सखित्वनाय ममहे।
दिवः न वृष्टिम् प्रथयन् ववक्षिथ।।6।।
6255. ववक्षुः अस्य केतवः उत वज्रः गभस्त्योः।
यत् सूर्यः न रोदसी अवर्धयत्।।7।।
6256. यदि प्र-वृद्ध सत्-पते सहस्रम् महिषान् अघः।
आत् इत् ते इन्द्रियम् महि प्र ववृधे।।8।।
6257. इन्द्रः सूर्यस्य रश्मिभिः नि अर्शसानम् ओषति।
अग्निः वना-इव ससहिः प्र ववृधे।।9।।
6258. इयम् ते ऋत्वियवती धीतिः एति नवीयसी।
सपर्यन्ती पुरु-प्रिया मिमीते इत्।।10।।
6259. गर्भः यज्ञस्य देव-युः क्रतुम् पुनीते आनुषक्।
स्तोमैः इन्द्रस्य ववृधे मिमीते इत्।।11।।
6260. सनिः मित्रस्य प्रपथे इन्द्रः सोमस्य पीतये।
प्राची वाशी-इव सुन्वते मिमीते इत्।।12।।
6261. यम् विप्राः उक्थ-वाहसः अभि-प्रमन्दुः आयवः।
घृतम् न पिप्ये आसनि ऋतस्य यत्।।13।।
6262. उत् स्वराजे अदितिः स्तोमम् इन्द्राय जीजनत्।
पुरु-प्रशस्तम् ऊतये ऋतस्य यत्।।14।।
6263. अभि वह्नयः ऊतये अनूषत प्र-शस्तये।
न देव विव्रता हरी ऋतस्य यत्।।15।।
6264. यत् सोमम् इन्द्र विष्णवि यत् वा घ त्रिते आस्ये।
यत् वा मरुत्-सु मन्दसे सम् इन्दुभिः।।16।।
6265. यत् वा शक्र परावति समुद्रे अधि मन्दसे।
अस्माकम् इत् सुते रण सम् इन्दुभिः।।17।।
6266. यत् वा असि सुन्वतः वृधः यजमानस्य सत्पते।
उक्थे वा यस्य रण्यसि सम् इन्दुभिः।।18।।
6267. देवम्-देवम् वः अवसे इन्द्रम्-इन्द्रम गृणीषणि।
अध यज्ञाय तुर्वणे वि आनशुः।।19।।
6268. यज्ञेभिः यज्ञ-वाहसम् सोमेभिः सोम-पातमम्।
होत्राभिः इन्द्रम् ववृधुः वि आनशुः।।20।।
6269. महीः अस्य प्र-नीतयः पूर्वीः उत प्र-शस्तयः।
विश्वा वसूनि दाशुषे वि आनशुः।।21।।
6270. इन्द्रम् वृत्राय हन्तवे देवासः दधिरे पुरः।
इन्द्रम् वाणीः अनूषत सम् ओजसे।।22।
6271. महान्तम् महिना वयम् स्तोमेभिः हवन्-श्रुतम्।
अर्कैः अभि प्र नोनुमः सम् ओजसे।।23।।
6272. न यम् विविक्तः रोदसी न अन्तरिक्षाणि वज्रिणम्।
अमात् इत् अस्य तित्विषे सम् ओजसः।।24।।
6273. यत् इन्द्र पृतनाज्ये देवाः त्वा दधिरे पुरः।
आत् इत् ते हर्यता हरी ववक्षतुः।।25।।
6274. यदा वृत्रम् नदी-वृतम् शवसा वज्रिन् अवधीः।
आत् इत् ते हर्यता हरी ववक्षतुः।।26।।
6275. यदा ते विष्णुः ओजसा त्रीणि पदा वि-चक्रमे।
आत् इत् ते हर्यता हरी ववक्षतुः।।27।।
6276. यदा ते हर्यता हरी ववृधाने दिवे-दिवे।
आत् इत् ते विश्वा भुवनानि येमिरे।।28।।
6277. यदा ते मारुतीः विशः तुभ्यम् इन्द्र नि-येमिरे।
आत् इत् ते विश्वा भुवनानि येमिरे।।29।।
6278. यदा सूर्यम् अमुम् दिवि शुक्रम् ज्योतिः अधारयः।
आत् इत् ते विश्वा भुवनानि येमिरे।।30।।
6279. इमाम् ते इन्द्र सु-स्तुतिम् विप्रः इयर्ति धीतिभिः।
जामिम् पदा-इव पिप्रतीम् प्र अध्वरे।।31।।
6280. यत् अस्य धामनि प्रिये सम्-ईचीनासः अस्वरन्।
नाभा यज्ञस्य दोहना प्र अध्वरे।।32।।
6281. सुवीर्यम् सु-अश्व्यम् सुगव्यम् इन्द्र दद्धि नः।
होता-इव पूर्व-चित्तये प्र अध्वरे।।33।।

## सूक्त-13

6282. इन्द्रः सुतेषु सोमेषु क्रतुम् पुनीते उक्थ्यम्।
विदे वृधस्य दक्षसः महान् हि सः।।1।।
6283. सः प्रथमे वि-ओमनि देवानाम् सदने वृधः।
सु-पारः सुश्रवः-तमः सम् अप्सु-जित्।।2।।
6284. तम् अह्वे वाज-सातये इन्द्रम् भराय शुष्मिणम्।
भव नः सुम्ने अन्तमः सखा वृधे।।3।।

6285. इयम् ते इन्द्र गिर्वणः रातिः क्षरति सुन्वतः।
मन्दानः अस्य बर्हिषः वि राजसि।।4।।
6286. नूनम् तत् इन्द्र दद्धि नः
यत् त्वा सुन्वन्तः ईमहे।
रयिम् नः चित्रम् आ भर स्वः-विदम्।।5।।
6287. स्तोता यत् ते विचर्षणिः अति-प्रशर्धयत् गिरः।
वयाः-इव अनु रोहते जुषन्त यत्।।6।।
6288. प्रत्नवत् जनय गिरः शृणुधि जरितुः हवम्।
मदे-मदे ववक्षिथ सु-कृत्वने।।7।।
6289. क्रीडन्ति अस्य सुनृताः आपः न प्र-वता यतीः।
अया धिया यः उच्यते पतिः दिवः।।8।।
6290. उतो पतिः यः उच्यते कृष्टीनाम् एकः इत् वशी।
नमः-वृधैः अवस्युभिः सुते रण।।9।।
6291. स्तुहि श्रुतम् विपः-चितम् हरी यस्य प्रसक्षिणा।
गन्तारा दाशुषः गृहम् नमस्विनः।।10।।
6292. तूतुजानः महे-मते अश्वेभिः प्रुषितप्सुभिः।
आ याहि यज्ञम् आशुभिः शम् इत् हि ते।।11।।
6293. इन्द्र शविष्ठ सत्-पते रयिम् गृणत्सु धारय।
श्रवः सूरिभ्यः अमृतम् वसु-त्वनम्।।12।।
6294. हवे त्वा सूरे उत्-इते हवे मध्यन्दिने दिवः।
जुषाणः इन्द्र सप्तिभिः नः आ गहि।।13।।
6295. आ तु गहि प्र तु द्रव मत्स्व सुतस्य गोमतः।
तंतुम् तनुष्व पूर्व्यम् यथा विदे।।14।।
6296. यत् शक्र असि परावति यत् अर्वावति वृत्रहन्।
यत् वा समुद्रे अन्धसः अविता इत् असि।।15।।
6297. इन्द्रम् वर्धन्तु नः गिरः इन्द्रम सुतासः इन्दवः।
इन्द्रे हविष्मतीः विशः अराणिषुः।।16।।
6298. तम् इत् विप्राः अवस्यवः प्रवत्वतीभिः ऊतिभिः।
इन्द्रम् क्षोणीः अवर्धयन् वयाः-इवः।।17।।
6299. त्रि-कद्रुकेषु चेतनम् देवासः यज्ञम् अत्नत।
तम् इत् वर्धन्तु नः गिरः सदा-वृधम्।।18।।
6300. स्तोता यत् ते अनुव्रतः उक्थानि ऋतुथा दधे।
शुचिः पावकः उच्यते सः अद्भुतः।।19।।
6301. तत् इत् रुद्रस्य चेतति यह्वम् प्रत्नेषु धामसु।
मनः यत्र वि तत् दधुः वि-चेतसः।।20।।
6302. यदि मे सख्यम् आवरः इमस्य पाहि अन्धसः।
येन विश्वाः अति द्विषः अतारिम।।21।।
6303. कदा ते इन्द्र गिर्वणः स्तोता भवाति शम्-तमः।
कदा नः गव्ये अश्व्ये वसौ दधः।।22।।
6304. उत ते सु-स्तुता हरी वृषणा वहतः रथम्।
अर्जुनस्य मदिन्तमम् यम् ईमहे।।23।।
6305. तम् ईमहे पुरु-स्तुतम् यह्वम् प्रत्नाभिः ऊतिभिः।
नि बर्हिषि प्रिये सदत् अध द्विता।।24।।
6306. वर्धस्व सु पुरु-स्तुत ऋषि-स्तुताभिः ऊतिभिः।
धुक्षस्व पिप्युषीम् इषम् अव च नः।।25।।
6307. इन्द्र त्वम् अविता इत् असि
इत्था स्तुवतः अद्रिवः।
ऋतात् इयर्मि ते धियम् मनः-युजम्।।26।।
6308. इह त्या सधमाद्या युजानः सोम-पीतये।
हरी इति इन्द्र प्रतद्वसू अभि स्वर।।27।।
6309. अभि स्वरन्तु ये तव रुद्रासः सक्षत श्रियम्।
उतो मरुत्वतीः विशः अभि प्रयः।।28।।
6310. इमाः अस्य प्रतूर्तयः पदम् जुषन्त यत् दिवि।
नाभा यज्ञस्य सम् दधुः यथा विदे।।29।।
6311. अयम् दीर्घाय चक्षसे प्राचि प्र-यति अध्वरे।
मिमीते यज्ञम् आनुषक् वि-चक्ष्य।।30।।
6312. वृषा अयम् इन्द्र ते रथः उतो ते वृषणा हरी।
वृषा त्वम् शतक्रतो वृषा हवः।।31।।
6313. वृषा ग्रावा वृषा मदः वृषा सोमः अयम् सुतः।
वृषा यज्ञः यम् इन्वसि वृषा हवः।।32।।
6314. वृषा त्वा वृषणम् हुवे वज्रिन् चित्राभिः।
ऊतिभिः ववन्थ हि प्रति-स्तुतिम् वृषा हवः।।33।।

## सूक्त-14

6315. यत् इन्द्र अहम् यथा त्वम् ईशीय वस्वः एकः इत्।
स्तोता मे गोसखा स्यात्।।1।।
6316. शिक्षेयम् अस्मै दित्सेयम् शचीपते मनीषिणे।
यत् अहम् गो-पतिः स्याम्।।2।।
6317. धेनुः ते इन्द्र सूनृता यजमानाय सुन्वते।
गाम् अश्वम् पिप्युषी दुहे।।3।।
6318. न ते वर्ता अस्ति राधसः इन्द्र देवः न मर्त्यः।
यत् दित्ससि स्तुतः मघम्।।4।।
6319. यज्ञः इन्द्रम् अवर्धयत् यत् भूमिम् वि अवर्तयत्।
चक्राणः ओपशम् दिवि।।5।।
6320. ववृधानस्य ते वयम् विश्वा धनानि जिग्युषः।
ऊतिम् इन्द्र आ वृणीमहे।।6।।
6321. वि अन्तरिक्षम् अतिरत् मदे सोमस्य रोचना।
इन्द्रः यत् अभिनत् वलम्।।7।।
6322. उत् गाः आजत् अङ्गिरःभ्यः
आविः कृण्वन् गुहा सतीः।
अर्वाञ्चम् नुनुदे वलम्।।8।।
6323. इन्द्रेण रोचना दिवः दृडनि दृंहितानि च।
स्थिराणि न परानुदे।।9।।
6324. अपाम् ऊर्मिः मदन्-इव स्तोमः इन्द्र अजिरयते।
वि ते मदाः अराजिषुः।।10।।
6325. त्वम् हि स्तोम-वर्धनः इन्द्र असि उक्थ-वर्धनः।

स्तोतृणाम् उत भद्रकृत्।।11।।
6326. इन्द्रम् इत् केशिनी हरी सोम-पेयाय वक्षतः।
उप यज्ञम् सु-राधसम्।।12।।
6327. अपाम् फेनेन नमुचेः शिरः इन्द्र उत् अवर्तयः।
विश्वाः यत् अजयः स्पृधः।।13।।
6328. मायाभिः उत्-सिसृप्सतः इन्द्र द्याम् आ-रुरुक्षतः।
अव दस्यून् अधूनुथाः।।14।।
6329. असुन्वाम् इन्द्र सम्-सदम् विषूचीम् वि अनाशयः।
सोमपाः उत्-तरः भवन्।।15।।

## सूक्त-15

6330. तम् उ अभि प्र गायत पुरु-हूतम् पुरु-स्तुतम्।
इनद्रम् गीः-भिः तविषम् आ विवासत।।1।।
6331. यस्य द्वि-बर्हसः बृहत् सहः दाधार रोदसी गिरीन्
अज्रान् अपः स्वः वृष-त्वना।।2।।
6332. सः राजसि पुरु-स्तुत एकः वृत्राणि जिघ्नसे।
इन्द्र जैत्रा श्रवस्या च यन्तवे।।3।।
6333. तम् ते मदम् गृणीमसि वृषणम् पृत्सु ससहिम्।
ऊँ लोक-कृत्नुम् अद्रिवः हरि-श्रियम्।।4।।
6334. येन ज्योतींषि आयवे मनवे च विवेदिथ।
मन्दानः अस्य बर्हिषः वि राजसि।।5।।
6335. तत् अद्य चित् ते उक्थिनः अनु स्तुवन्ति पूर्वथा।
वृष-पत्नीः अपः जय दिवे-दिवे।।6।।
6336. तव त्यत् इन्द्रियम् बृहत् तव शुष्मम् उत् क्रतुम्।
वज्रम् शिशाति धिषणा वरेण्यम्।।7।।
6337. तव द्यौः इन्द्र पौंस्यम् पृथिवी वर्धति श्रवः।
त्वाम् आपः पर्वतासः च हिन्विरे।।8।।
6338. त्वाम् विष्णुः बृहन् क्षयः मित्रः गृणाति वरुणः।
त्वाम् शर्धः मदति अनु मारुतम्।।9।।
6339. त्वम् वृषा जनानाम् मंहिष्ठः इन्द्र जज्ञिषे।
सत्रा विश्वा सु-अपत्यानि दधिषे।।10।।
6340. सत्रा त्वम् पुरु-स्तुत एकः वृत्राणि तोशसे।
न अन्यः इन्द्रात् करणम् भूयः इन्वति।।11।।
6341. यत् इन्द्र मन्मशः त्वा नाना हवन्ते ऊतये।
अस्माकेभिः नृभिः अत्र स्वः जय।।12।।
6342. अरम् क्षयाय नः महे विश्वा रूपाणि आ-विशन्।
इन्द्रम् जैत्राय हर्षय शची-पतिम्।।13।।

## सूक्त-16

6343. प्र सम्-राजम् चर्षणीनाम् इन्द्रम्
स्तोत नव्यम् गीः-भिः।
नरम् नृ-सहम् मंहिष्ठम्।।1।।
6344. यस्मिन् उक्थानि रण्यन्ति विश्वानि च श्रवस्या।
अपाम् अवः न समुद्रे।।2।।
6345. तम् सु-स्तुत्या आ विवासे
ज्येष्ठ-राजम् भरे कृत्नुम्।
महः वाजिनम् सनिभ्यः।।3।।
6346. यस्य अनूनाः गभीराः मदाः उरवः तरुत्राः।
हर्षुमन्तः शूरसातौ।।4।।
6347. तम् इत् धनेषु हितेषु अधिवाकाय हवन्ते।
येषाम् इन्द्रः ते जयन्ति।।5।।
6348. तम् इत् च्यौत्नेः आर्यन्ति तम् कृतेभिः चर्षणायः।
एषः.इन्द्रः वरिवः-कृत्।।6।।
6349. इन्द्रः ब्रह्मा इन्द्रः ऋषिः इन्द्रः पुरु पुरु-हूतः।
महान् महीभिः शचीभिः।।7।।
6350. सः स्तोम्यः सः हव्यः सत्यः सत्वा तुविकूर्मिः।
एकः चित् सन् अभि-भूतिः।।8।।
6351. तम् अर्केभिः तम् सामभिः तम् गायत्रैः चर्षणयः।
इन्द्रम् वर्धन्ति क्षितयः।।9।।
6352. प्र-नेतारम् वस्यः अच्छ कर्तारम् ज्योतिः समत्सु।
ससह्वांसम् युधा अमित्रा।।10।।
6353. सः नः पप्रिः पारयाति स्वस्ति नावा पुरु-हूतः।
इन्द्रः विश्वाः अति द्विषः।।11।।
6354. सः त्वम् नः इन्द्र वाजेभिः दशस्य च गातुय च।
अच्छ च नः सुम्नम् नेषि।।12।।

## सूक्त-17

6355. आ याहि सुसुम हि ते इन्द्र सोमम् पिब इमम्।
आ इदम् बर्हिः सदः मम।।1।।
6356. आ त्वा ब्रह्म-युजा हरी वहताम् इन्द्र केशिना।
उप ब्रह्माणि नः शृणु।।2।।
6357. ब्रह्माणः त्वा वयम् युजा सोम-पाम् इन्द्र सोमिनः।
सुत-वन्तः हवामहे।।3।।
6358. आ नः याहि सुत-वतः अस्माकम् सु-स्तुतीः उप।
पिब सु शिप्रिन् अन्धसः।।4।।
6359. आ ते सिंचामि कुक्ष्योः अनु गात्रा वि धावतु।
गृभाय जिह्वया मधु।।5।।
6360. स्वादुः ते अस्तु सम्-सुदे मधु-मान् तन्वे तव।
सोमः शम् अस्तु ते हृदे।।6।।
6361. अयम् ऊँ त्वा विचर्षणे जनीः-इव अभि सम्-वृतः।
प्र सोमः इन्द्र सर्पतु।।7।।
6362. तुवि-ग्रीवः वपा-उदरः सु-बाहुः अन्धसः मदे।
इन्द्रः वृत्राणि जिघ्नते।।8।।
6363. इन्द् प्र इहि पुरः त्वम् विश्वस्य ईशानः ओजसा।
वृत्राणि वृत्रहन् जहि।।9।।
6364. दीर्घः ते अस्तु अंकुशः येन वसु प्र-यच्छसि।
यजमानाय सुन्वते।।10।।

6365. अयम् ते इन्द्र सोमः निपूतः अधि बर्हिषि।
आ इहि ईम् अस्य द्रव पिब।।11।।
6366. शाचिगो शाचि-पूजन अयम् रणाय ते सुतः।
आखण्डल प्र हूयसे।।12।।
6367. यः ते शृङ्ग-वृषः नपात् प्रनपात् कुण्ड-पाय्यः।
नि अस्मिन् दध्रे आ मनः।।13।।
6368. वास्तोः पते ध्रुवा स्थूणा अंसत्रम् सोम्यानाम्।
द्रप्सः भेत्ता पुराम् शश्वतीनाम् इन्द्रः मुनीनाम् सखा।।14।।
6369. पृदाकु-सानुः यजतः गो-एषणः
एकः सन् अभि भूयसः।
भूर्णिम् अश्वम् नयत् तुजा पुरः
गृभा इन्द्रम् सोमस्य पीतये।।15।।

## सूक्त-18

6370. इदम् ह नूनम् एषाम् सुम्नम् भिक्षेत मर्त्यः।
आदित्यानाम् अपूर्व्यम् सवीमनि।।1।।
6371. अनर्वाणः हि एषाम् पन्थाः आदित्यानाम्।
अदब्धाः सन्ति पायवः सुगे-वृधः।।2।।
6372. तत् सु नः सविता भगः वरुणः मित्रः अर्यमा।
शर्म यच्छन्तु सप्रथः यत् ईमहे।।3।।
6373. देवेभिः देवि अदिते अरिष्टभर्मन् आ गहि।
स्मत् सूरिभिः पुरु-प्रिये सुशर्मभिः।।4।।
6374. ते हि पुत्रासः अदितेः विदुः द्वेषांसि योतवे।
अंहोः चित् उरु-चक्रयः अनेहसः।।5।।
6375. अदितिः नः दिवा पशुम् अदितिः नक्तम् अद्वयाः।
अदितिः पातु अंहसः सदा-वृधा।।6।।
6376. उत स्या नः दिवा मतिः
अदितिः ऊत्या आ गमत्।
शा शम्-ताति मयः करत् अप स्रिधः।।7।।
6377. उत त्या दैव्या भिषजा शम् नः करतः अश्विना।
युयुयाताम् इतः रपः अप स्रिधः।।8।।
6378. शम् अग्निः अग्निभिः करत् शम् नः तपतु सूर्यः।
शम् वातः वातु अरपाः अप स्रिधः।।9।।
6379. अप अमीवाम् अप स्रिधम् अप सेधत दुः-मतिम्।
आदित्यासः युयोतन नः अंहसः।।10।।
6380. युयोत शरुम् अस्मत्
आ आदित्यासः उत अमतिम्।
ऋधक् द्वेषः कृणुत विश्व-वेदसः।।11।।
6381. तत् सु नः शर्म यच्छत आदित्याः यत् मुमोचति।
एनस्वन्तम् चित् एनसः सु-दानवः।।12।।
6382. यः नः कः चित् रिरिक्षति रक्षः-त्वेन मर्त्यः।
स्वैः सः एवैः रिरिषीष्ट युः जनः।।13।।
6383. सम् इत् तम् अघम् अश्नवत्
दुःशंसम् मर्त्यम् रिपुम्।
यः अस्म-त्रा दुः-हनावान् उप द्वयुः।।14।।
6384. पाकत्रा स्थन देवाः हृत्-सु जानीथ मर्त्यम्।
उप द्वयुम् च अद्वयुम् च वसवः।।15।।
6385. आ शर्म पर्वतानाम् आ उत अपाम् वृणीमहे।
द्यावाक्षामा आरे अस्मत् रपः कृतम्।।16।।
6386. ते नः भद्रेण शर्मणा युष्माकम् नावा वसवः।
अति विश्वानि दुः-इता पिपर्तन।।17।।
6387. तुचे तनाय तत् सु नः द्राघीयः आयुः जीवसे।
आदित्यासः सु-महसः कृणोतन।।18।।
6388. यज्ञः हीड वः अन्तरः आदित्याः अस्ति मृडत।
युष्मे इत् वः अपि स्मसि स-जात्ये।।19।।
6389. बृहत् वरूथम् मरुताम् देवम् त्रातारम्।
अश्विना मित्रम् ईमहे वरुणम् स्वस्तये।।20।।
6390. अनेहः मित्र अर्यमन् नृ-वत् वरुण शंस्यम्।
त्रि-वरूथम् मरुतः यन्त नः छर्दिः।।21।।
6391. ये चित् हि मृत्यु-बन्धवः आदित्याः मनवः स्मसि।
प्र सु नः आयुः जीवसे तिरेतन।।22।।

## सूक्त-19

6392. तम् गूर्धय स्वः-नरम् देवासः
देवम् अरतिम् दधन्विरे।
देवत्रा हव्यम् आ ऊहिरे।।1।।
6393. विभूत-रातिम् विप्र चित्र-शोचिषम्
अग्निम् ईडिष्व यन्तुरम्।
अस्य मेधस्य सोम्यस्य सोभरे
प्र ईम् अध्वराय पूर्व्यम्।।2।।
6394. यजिष्ठम् त्वा ववृमहे देवम्
देवत्रा होतारम् अमर्त्यम्।
अस्य यज्ञस्य सु-क्रतुम्।।3।।
6365. ऊर्जः नपातम् सु-भगम् सुदीदितिम्
अग्निम् श्रेष्ठ-शोचिषम्।
सः नः मित्रस्य वरुणस्य सः अपाम्
आ सुम्नम् यक्षते दिवि।।4।।
6396. यः सम्-इधा यः आ-हुती यः वेदेन
दादश मर्तः अग्नये।
यः नमसा सु-अध्वरः।।5।।
6397. तस्य इत् अर्वन्तः रंहयन्ते आशवः
तस्य द्युम्नि-तमम् यशः।
न तम् अंहः देव-कृतम् कुतः चन
न मर्त्य-कृतम् नशत्।।6।।
6398. सु-अग्नयः वः अग्निभिः स्याम

सूनो सहसः ऊर्जाम् पते।
सु-वीरः त्वम् अस्मयुः।।7।।
6399. प्रशंसमानः अतिथिः न मित्रियः
अग्निः रथः न वेद्यः।
त्वे क्षेमासः अपि सन्ति साधवः त्वम् राजा रयीणाम्।।8।।
6400. सः अद्धा दाशु-अध्वरः अग्ने
मर्तः सुभग सः प्रशंस्यः।
सः धीभिः अस्तु सनिता।।9।।
6401. यस्य त्वम् ऊर्ध्वः अध्वराय
तिष्ठसि क्षयत्-वीरः सः साधते।
सः अर्वत्भिः सनिता सः विपन्युभिः
सः शूरैः सनिता कृतम्।।10।।
6402. यस्य अग्निः वपुः गृहे
स्तोमम् चनः दधीत विश्व-वार्यः।
हव्या वा वेविषत् विषः।।11।।
6403. विप्रस्य वा स्तुवतः सहसः यहो मक्षुतमस्य रातिषु।
अवः-देवम् उपरि-मर्त्यम् कृधि वसो विविदुषः वचः।।12।।
6404. यः अग्निम् हव्यदातिभिः नमोभिः
वा सु-दक्षम् आ-विवासति।
गिरा वा अजिर-शोचिषम्।।13।।
6405. सम्-इधा यः निशिती दाशत्
अदितिम् धामभिः अस्य मर्त्यः।
विश्वा इत् सः धीभिः सुभगः जनान
अति द्युम्नैः उद्नः-इव तारिषत्।।14।।
6406. तत् अग्ने द्युम्नम् आ भर यत्
ससहत् सदने कम् चित् अत्रिणम्।
मन्युम् जनस्य दुः-ध्यः।।15।।
6407. येन चष्टे वरुणः मित्रः अर्यमा
येन नासत्या भगः।
वयम् तत् ते शवसा गातुवित्तमाः
इन्द्र त्वा-ऊताः विधेमहि।।16।।
6408. ते घ इत् अग्ने सु-आध्यः ये
त्वा विप्र नि-दधिरे नृचक्षसम्।
विप्रासः देव सु-क्रतुम्।।17।।
6409. त इत् वेदिम् सुभग ते आ-हुतिम्
ते सोतुम् चक्रिरे दिवि।
ते इत् वाजेभिः जिग्युः महत् धनम्
ये त्वे कामम् नि-एरिरे।।18।।
6410. भद्रः नः अग्निः आहुतः
भद्रा रातिः सुभग भद्रः अध्वरः।
भद्राः उत प्रशस्तयः।।19।।
6411. भद्रम् मनः कृणुष्व वृत्र-तूर्ये येन समत्-सु ससहः।
अव स्थिरा तनुहि भूरि शर्धताम्
वनेम ते अभिष्टिभिः।।20।।
6412. ईड गिरा मनुःहितम् यम् देवाः
दूतम् अरतिम् नि एरिरे।
यजिष्ठम् हव्य-वाहनम्।।21।।
6413. तिग्म-जम्भाय तरुणाय राजते
प्रयः गायसि अग्नये।
यः पिंशते सूनृताभिः सु-वीर्यम् अग्निः घृतेभिः आहुतः।22।
6414. यदि घृतेभिः आ-हुतः वाशीम्
अग्निः भरते उत् च अव च।
असुरः-इव निः-निजम्।।23।।
6415. यः हव्यानि ऐरयत् मनुः-हितः
देवः आसा सु-गन्धिना।
विवासते वार्याणि सु-अध्वरः होता देवः अमर्त्यः।।24।।
6416. यत् अग्ने मर्त्यः त्वम् स्याम्
अहम् मित्र-महः अमर्त्यः।
सहसः सूनो आ-हुत।।25।।
6417. न त्वा रासीय अभि-शस्तये
वसो न पाप-त्वाय सन्त्य।
न मे स्तोमा अमति-वा न
दुःहितः स्यात् अग्ने न पापया।।26।।
6418. पितुः न पुत्रः सु-भृतः दुरोणे
आ देवान् एतु प्र नः हविः।।27।।
6419. तव अहम् अग्ने ऊतिभिः
नेदिष्ठाभिः सचेय जोषम् आ वसो।
सदा देवस्य मर्त्यः।।28।।
6420. तव क्रत्वा सनेयम् तव रातिभिः
अग्ने तव प्रशस्ति-भिः।
त्वाम् इत् आहुः प्र-मतिम् वसो
मम अग्ने हर्षस्व दातवे।।29।।
6421. प्र सः अग्ने तव ऊतिभिः
सु-वीराभिः तिरते वाजभर्मभिः।
यस्य त्वम् सख्यम् आ-वरः।।30।।
6422. तव द्रप्सः नीलवान् वाशः ऋत्वियः
इन्धानः सिष्णो आ ददे।
त्वम् महीनाम् उषसाम् असि
प्रियः क्षपः वस्तुषु राजसि।।31।।
6423. तम् आ अगन्म सोभरयः
सहस्र-मुष्कम् सु-अभिष्टिम् अवसे।
सम्-राजम् त्रासदस्यवम्।।32।।
6424. यस्य ते अग्ने अन्ये अग्नयः उप-क्षितः वयाः-इव।
विपः न द्युम्ना नि युवे जनानाम्
तव क्षत्राणि वर्धयन्।।33।।
6425. यम् आदित्यासः अद्रुहः पारम् नयथ मर्त्यम्।

मघोनाम् विश्वेषान् सु-दानवः।।34।।
6426. यूयम् राजानः कम् चित् चर्षणि-सहः
क्षयन्तम् मानुषान् अनु।
वयम् ते वः वरुण मित्र अर्यमन्
स्याम इत् ऋतस्य रथ्यः।।35।।
6427. अदात् मे पौरु-कुत्स्यः
पञ्चाशतम् त्रसदस्युः वधूनाम्।
मंहिष्ठः अर्यः सत्-पतिः।।36।।
6428. उत् मे प्रयियोः वयियोः सु-वास्त्वाः अधि तुग्वनि।
तिसृणाम् सप्ततीनाम् श्यावः प्र-नेता
भुवत् वसुः दियानाम् पतिः।।37।।

## सूक्त-20

6429. आ गन्त मा रिषण्यत प्र-स्थावानः
मा अप स्थात् स-मन्यवः।
स्थिरा चित् नमयिष्णवः।।1।।
6430. वीडुपविभिः मरुतः ऋभुक्षणः
आ रुद्रासः सुदीतिभिः।
इषा नः अद्य आ गत पुरु-स्पृहः
यज्ञम् आ सोभरी-यवः।।2।।
6431. विद्मा हि रुद्रियाणाम् शुष्मम्
उग्रम् मरुताम् शिमीवताम्।
विष्णोः एषस्य मीडहुषाम्।।3।।
6432. वि द्वीपानि पापतम् तिष्ठत्
दुच्छुना उभे युजन्त रोदसी।
प्र धन्वानि ऐरत शुभ्र-खादयः
यत् एजथ स्व-भानवः।।4।।
6433. अच्युता चित् वः अज्मन्
आ नानदति पर्वतासः वनस्पतिः।
भूमिः यामेषु रेजते।।5।।
6434. अमाय वः मरुतः यातवे
द्यौः जिहीते उत्-तरा बृहत्।
यत्र नरः देदिशते तनूषु आ त्वक्षांसि बाहु-ओजसः।।6।।
6435. स्वधाम् अनु श्रियम् नरः महि
त्वेषाः अम-वन्तः वृषप्सवः।
वहन्ते अह्रुत-प्सवः।।7।।
6436. गोभिः वाणः अज्यते सोभरीणाम्
रथे कोशे हिरण्यये।
गोबन्धवः सुजातासः इषे भुजे
महान्तः नः स्परसे नु।।8।।
6437. प्रति वः वृषत्- अञ्जयः
वृष्णे शर्धाय मारुताय भरध्वम्।
हव्या वृष-प्रयाव्ने।।9।।
6438. वृषणश्वेन मरुतः वृष-प्सुना रथेन वृष-नाभिना।
आ श्येनासः न पक्षिणः वृथा नरः
हव्या नः वीतये गत।।10।।
6439. समानम् अञ्जि एषाम् वि भ्राजन्ते
रुक्मासः अधि बाहुषु।
दविद्युतति ऋष्टयः।।11।।
6440. ते उग्रासः वृषणः उग्र-बाहवः
नकिः तनूषु येतिरे।
स्थिरा धन्वानि आयुधा रथे,
वः अनीकेषु अधि श्रियः।।12।।
6441. येषाम् अर्णः न सप्रथः नाम
त्वेषम् शश्वताम् एकम् इत् भुजे।
वयः न पित्र्यम् सहः।।13।।
6442. तान् वन्दस्व मरुतः तान्
उप स्तुहि तेषाम् हि धुनीनाम्।
अराणाम् न चरमः तत् एषाम्
दाना मह्ना तत् एषाम्।।14।।
6443. सुभगः सः वः ऊतिषु आस
पूर्वासु मरुतः वि उष्टिषु।
यः वा नूनम् उत असति।।15।।
6444. यस्य वा यूयम् प्रति वाजिनः
नरः आ हव्या वीतये गथ।
अभि सः द्युम्नैः उत वाजसातिभिः
सुम्ना वः धूतयः नशत्।।16।।
6445. यथा रुद्रस्य सूनवः दिवः वशन्ति असुरस्य वेधसः।
युवानः तथा इत् असत्।।17।।
6446. ये च अर्हन्ति मरुतः सुदानवः
स्मत् मीडहुषः चरन्ति ये।
अतः चित् आ नः उप वस्यसा
हृदा युवानः आ ववृध्वम्।।18।।
6447. यूनः ऊ सु नविष्ठया वृष्णः
पावकान् अभि सोभरे गिरा।
गाय गाः-इव चर्कृषत्।।19।।
6448. सहाः ये सन्ति मुष्टिहा-इव
हव्यः विश्वासु पृत्सु होतृषु।
वृष्णः चन्द्रान् न सुश्रवः-तमान्
गिरा वन्दस्व मरुतः अह।।20।।
6449. गावः चित् घ स-मन्यवः
सजात्येन मरुतः स-बन्धवः।
रिहते ककुभः मिथः।।21।।
6450. मर्तः चित् वः नृ-तवः रुक्म-वक्षसः
उप भ्रातृ-त्वम् आ अयति।
अधि नः गात मरुतः सदा हि

वः आ-पित्वम् अस्ति नि-ध्रुवि।।22।।
6451. मरुतः मारुतस्य नः आ
भेषजस्य वहत सुदानवः।
यूयम् सखायः सप्तयः।।23।।
6452. याभिः सिन्धुम् अवथ याभिः
तूर्वथ याभिः दशस्यथ क्रिविम्।
मयः नः भूत ऊतिभिः
मयः-भुवः शिवाभिः असच-द्विषः।।24।।
6453. यत् सिन्धौ यत् असिक्न्याम् यत्
समुद्रेषु मरुतः सु-बर्हिषः यत् पर्वतेषु भेषजम्।।25।।
6454. विश्वम् पश्यन्तः बिभृथ तनूषु
आ तेन नः अधि वोचत।
क्षमा रपः मरुतः आतुरस्य
नः इष्कर्त विह्रुतम् पुनः।।26।।

## सूक्त-21

6455. वयम् ऊ त्वाम् अपूर्व्य स्थूरम्
न कत् चित् भरतन् अवस्यवः।
वाजे चित्रम् हवामहे।।1।।
6456. उप त्वा कर्मन् ऊतये सः नः
युवा उग्रः चक्राम् यः धृषत्।
त्वाम् इत् हि अवितारम्
ववृमहे सखायः इन्द्र सानसिम्।।2।।
6457. आ याहि इमे इन्दवः
अश्व-पते गोपते उर्वरा-पते।
सोमम् सोमपते पिब।।3।।
6458. वयम् हि त्वा बन्धु-मन्तम्
अबन्धवः विप्रासः इन्द्र येमिम।
या ते धामानि वृषभ तेभिः
आ गहि विश्वेभिः सोम-पीतये।।4।।
6459. सीदन्तः ते वयः यथा गोश्रीते
मधौ मदिरे विवक्षणे।
विवक्षणे अभि त्वाम् इन्द्र नोनुमः।।5।।
6460. अच्छा च त्वा एना नमसा वदामसि
किम् मुहुः चित् वि दीधयः।
सन्ति कामासः हरिवः ददिः त्वम् स्मः
वयम् सन्ति नः धियः।।6।।
6461. नूत्नाः इत् इन्द्र ते वयम्
ऊती अभूम नहि नु ते अद्रिवः।
विद्म पुरा परीणसः।।7।।
6462. विद्म सखित्वम् उत शूर भोज्यम्
आ ते ता वज्रिन् ईमहे।
उतो समस्मिम् आ शिशीहि नः
वसो वाजे सुशिप्र गोमति।।8।।
6463. यः नः इदम्-इदम् पुरा प्र वस्यः
आ-निनाय तम् ऊँ वः स्तुषे।
सखायः इन्द्रम् ऊतये।।9।।
6464. हरि-अश्वम् सत्-पतिम् चर्षणि-सहम्
सः हि स्म यः अमन्दत।
आ तु नः सः वयति गव्यम् अश्व्यम्
स्तोतृभ्यः मघवा शतम्।।10।।
6465. त्वया ह स्वित् युजा वयम् प्रति
श्वसन्तम् वृषभ ब्रुवीमहि।
सम्-स्थे जनस्य गोमतः।।11।।
6466. जयेम कारे पुरुहूत कारिणः अभि तिष्ठेम दुःध्यः।
नृभिः वृत्रम् हन्याम शूशुयाम च
अवेः इन्द्र प्र नः धियः।।12।।
6467. अभ्रातृव्यः अना त्वम् अनापिः
इन्द्र जनुषा सनात् असि।
युधा इत् आपि-त्वम् इच्छसे।।13।।
6468. नकिः रेवन्तम् सख्याय विन्दसे
पीयन्ति ते सुराश्वः।
यदा कृणोषि नदनुम् सम् ऊहसि
आत् इत् पिता-इव हूयसे।।14।।
6469. मा ते अमाजुरः यथा मूरासः इन्द्र सख्ये त्वा-वतः।
नि सदाम सचा सुते।।15।।
6470. मा ते गो-दत्र निः अराम राधसः
इन्द्र मा ते गृहामहि।
दृढ चित् अर्यः प्र मृश
अभि आ भर न ते दामानः आ-दभे।।16।।
6471. इन्द्रः वा घ इत् इयत् मघम्
सरस्वती वा सु-भगा ददिः वसु।
त्वम् वा चित्र दाशुषे।।17।।
6472. चित्रः इत् राजा राजकाः इत्
अन्यके यके सरस्वतीम् अनु।
पर्जन्यः-इव ततनत् हि वृष्ट्या
सहस्रम् अयुता ददत्।।18।।

## सूक्त-22

6473. ओ त्यम् अह्वे आ रथम् अद्य दंसिष्ठम् ऊतये।
यम् अश्विना सु-हवा रुद्रवर्तनी सूर्यायै तस्थथुः।।1।।
6474. पूर्व-आपुषम् सु-हवम् पुरु-स्पृहम्
भुज्यम् वाजेषु पूर्व्यम्।
सचना-वन्तम् सुमतिभिः सोभरे वि-द्वेषसम्
अनेहसम्।।2।।
6475. इह त्या पुरु-भूतमा देवा नमः-भिः अश्विना।

अर्वाचीना सु अवसे करामहे गन्तारा दाशुषः गृहम्।।3।।
6476. युवोः रथस्य परि चक्रम् ईयते
ईर्मा अन्यत् वाम् इषण्यति।
अस्मान् अच्छ सु-मतिः वाम्
शुभः पती आ धेनुः-इव धावतु।।4।।
6477. रथः यः वाम् त्रि-वन्धुरः हिरण्य-अभीशुः अश्विना।
परि द्यावापृथिवी भूषति श्रुतः तेन नासत्या आ गतम्।।5।।
6478. दशस्यन्ता मनवे पूर्व्यम्
दिवि यवम् वृकेण कर्षथः।
ता वाम् अद्य सुमति-भिः शुभः पती
अश्विना प्र स्तुवीमहि।।6।।
6479. उप नः वाजिनीवसू यातम् ऋतस्य पथिभिः।
येभिः तृक्षिम् वृषणा त्रासदस्यवम्
महे क्षत्राय जिन्वथः।।7।।
6480. अयम् वाम् अद्रिभिः सुतः सोमः नरा वृषण्वसू।
आ यातम् सोम-पीतये पिबतम् दाशुषः गृहे।।8।।
6481. आ हि रुहतम् अश्विना,
रथे कोशे हिरण्यये वृषण्वसू।
युञ्जाथाम् पीवरीः इषः।।9।।
6482. याभिः पक्थम् अवथः याभिः अध्रिगुम्
याभिः बभ्रुम् विजोषसम्।
ताभिः नः मक्षु तूयम् अश्विना
आ गतम् भिषज्यतम् यत् आतुरम्।।10।।
6483. यत् अध्रिगावः अधिगू इदा चित्
अह्नः अश्विना हवामहे।
वयम् गीः-भिः विपन्यवः।।11।।
6484. ताभिः आ यातम् वृषणा उप
मे हवम् विश्व-प्सुम् विश्व-वार्यम्।
इषा मंहिष्ठा पुरु-भूतमा नरा याभिः
क्रिविम् ववृधुः ताभिः आ गतम्।।12।।
6485. तौ इदा चित् अहानाम् तौ
अश्विना वन्दमानः उप ब्रुवे।
तौ ऊ नमोभिः ईमहे।।13।।
6486. तौ इत् दोषातौ उषसि
शुभः पती ता यामन् रुद्रवर्तनी।
मा नः मर्ताय रिपवे वाजिनीवसू
परः रुद्रौ अति ख्यतम्।।14।।
6487. आ सुग्म्याय सुग्म्यम् प्रातः
रथेन अश्विना वा सक्षणी।
हुवे पिता-इव सोभरी।।15।।
6488. मनः-जवसा वृषणा मद-च्युता
मक्षुम्-गमाभिः ऊतिभिः।
आरात्तात् चित् भूतम् अस्मे
अवसे पूर्वीभिः पुरु-भोजसा।।16।।
6489. आ नः अश्ववत् अश्विना
वर्तिः यासिष्टम् मधु-पातमा।
नरा गोमत् दस्रा हिरण्यवत्।।17।।
6490. सु-प्रावर्गम् सु-वीर्यम् सुष्ठु
वार्यम् अनाधृष्टम् रक्षस्विना।
अस्मिन् आ वाम् आ-याने
वाजिनीवसू विश्वा वामानि धीमहि।।18।।

## सूक्त-23

6491. ईडिष्वा हि प्रतीव्यम् यजस्व जात-वेदसम्।
चरिष्णु-धूमम् अगृभीत-शोचिषम्।।1।।
6492. दामानम् विश्वचर्षणे अग्निम् विश्व-मनः गिरा।
उत स्तुषे वि-स्पर्धसः रथानाम्।।2।।
6493. येषाम् आ-बाधः ऋग्मियः इषः पृक्षः च नि-ग्रभे।
उप-विदा वह्निः विन्दते वसु।।3।।
6494. उत् अस्य शोचिः अस्थात् दीदियुषः वि अजरम्।
तपुः-जम्भस्य सु-द्युतः गण-श्रियः।।4।।
6495. उत् ऊ तिष्ठ सु-अध्वर स्तवानः देव्या कृपा।
अभिख्या भासा बृहता शुशुक्वनिः।।5।।
6496. अग्ने याहि सुशस्तिभिः हव्या जुह्वानः आनुषक्।
यथा दूतः बभूथ हव्य-वाहनः।।6।।
6497. अग्निम् वः पूर्व्यम् हुवे होतारम् चर्षणीनाम्।
तम् अया वाचा गृणे तम् ऊँ वः स्तूषे।।7।।
6498. यज्ञेभिः अद्भुत-क्रतुम् यम् कृपा
सूदयन्ते इत् मित्रम्।
न जने सु-धितम् ऋतवनि।।8।।
6499. ऋत-वानम् ऋत-यवः यज्ञस्य साधनम् गिरा।
उपो एनम् जुजुषुः नमसः पदे।।9।।
6500. अच्छ नः अङ्गिरः-तमम् यज्ञासः यन्तु सम्-यतः।
होता यः अस्ति विक्षु आ यशः-तमः।।10।।
6501. अग्ने तव त्ये अजर इन्धानासः बृहत् भाः।
अश्वाः-इव वृषणः तविषी-यवः।।11।।
6502. सः त्वम् नः ऊर्जाम् पते रयिम् रास्व सु-वीर्यम्।
प्र अव नः तोके तनये समत्-सु आ।।12।।
6503. यत् वै ऊ विश्पतिः शितः सु-प्रीतः मनुषः विशि।
विश्वा इत् अग्निः प्रति रक्षांसि सेधति।।13।।
6504. श्रुष्टी अग्ने नवस्य मे स्तोमस्य वीर विश्पते।
नि मायिनः तपुषा रक्षसः दह।।14।।
6505. न तस्य मायया चन रिपुः ईशीत मर्त्यः।
यः अग्नये ददाश हव्यदातिभिः।।15।।
6506. वि-अश्वः त्वा वसु-विदम् उक्षण्युः अप्रीणात् ऋषिः।

महः राये तम् ऊँ त्वा सम् इधीमहि।।16।।
6507. उशना काव्यः त्वा नि होतारम् असादयत्।
आ-यजिम् त्वा मनवे जात-वेदसम्।।17।।
6508. विश्वे हि त्वा स-जोषसः देवासः दूतम् अक्रत।
श्रुष्टी देव प्रथमः यज्ञियः भुवः।।18।।
6509. इमम् घ वीरः अमृतम् दूतम् कृण्वीत मर्त्यः।
पावकम् कृष्ण-वर्तनिम् विहायसम्।।19।।
6510. तम् हुवेम यत-स्रुचः सु-भासम् शुक्र-शोचिषम्।
विशाम् अग्निम् अजरम् प्रत्नम् ईड्यम्।।20।।
6511. यः अस्मै हव्यदातिभिः आ-हुतिम् मर्तः अविधत्।
भूरि पोषम् सः धत्ते वीर-वत् यशः।।21।।
6512. प्रथमम् जातवेदसम् अग्निम् यज्ञेषु पूर्व्यम्।
प्रति स्रुक् एति नमसा हविष्मती।।22।।
6513. आभिः विधेम अग्नये ज्येष्ठाभिः व्यश्ववत्।
मंहिष्ठाभिः मतिभिः शुक्र-शोचिषे।।23।।
6514. नूनम् अर्च वि-हायसे स्तोमेभिः स्थूरयूप-वत्।
ऋषे वैयश्व दम्याय अग्नये।।24।।
6515. अतिथिम् मानुषाणाम् सूनुम् वनस्पतीनाम्।
विप्राः अग्निम् अवसे प्रत्नम् ईडते।।25।।
6516. महः विश्वान् अभि सतः अभि हव्यानि मानुषा।
अग्ने नि सत्सि नमसा अधि बर्हिषि।।26।।
6517. वंस्वा नः वार्या पुरु वंस्व रायः पुरु-स्पृहः।
सुवीर्यस्य प्रजा-वतः यशस्वतः।।27।।
6518. त्वम् वरो सु-साम्ने अग्ने जनाय चोदय।
सदा वसो रातिम् यविष्ठ शश्वते।।28।।
6519. त्वम् हि सु-प्रतूः असि त्वम् नः गोमतीः इषः।
महः रायः सातिम् अग्ने अप वृधि।।29।।
6520. अग्ने त्वम् यशाः असि आ मित्रावरुणा वहा।
ऋतवाना सम्-राजा पूत-दक्षसा।।30।।

## सूक्त-24

6521. सखायः आ शिषामहि ब्रह्म इन्द्राय वज्रिणे।
स्तुषे ऊ षु वः नृतमाय धृष्णवे।।1।।
6522. शवसा हि असि श्रुतः वृत्र-हत्येन वृत्रहा।
मघैः मघोनः अति शूर दाशसि।।2।।
6523. सः नः स्तवानः आ भर रयिम् चित्रश्रवः-तमम्।
निरेके चित् यः हरिवः वसुः ददिः।।3।।
6524. आ निरेकम् उत प्रियम् इन्द्र दर्षि जनानाम्।
धृषता धृष्णो स्तवमानः आ भर।।4।।
6525. न ते सव्यम् न दक्षिणम् हस्तम् वरन्ते आ-सुरः।
न परि-बाधः हरिवः गो-इष्टिषु।।5।।
6526. आ त्वा गोभिः-इव व्रजम्
गीः-भिः ऋणोमि अद्रिवः।
आ स्म कामम् जरितुः आ मनः पृण।।6।।
6527. विश्वानि विश्वमनसः धिया नः वृत्रहन्-तम।
उग्र प्रनेतः अधि सु वसो गहि।।7।।
6528. वयम् ते अस्य वृत्रहन् विद्याम शूर नव्यसः।
वसोः स्पार्हस्य पुरहूत राधसः।।8।।
6529. इन्द्र यथा हि अस्ति ते अपरि-इतम् नृतो शवः।
अमृक्ता रातिः पुरुहूत दाशुषे।।9।।
6530. आ वृषस्व महा-मह महे नृतम राधसे।
दृढा चित् दृह्य मघवन् मघत्तये।।10।।
6531. नु अन्यत्र चित् अद्रिवः त्वत् नः जग्मुः आ-शसः।
मघवन् शग्धि तव तत् नः ऊतिभिः।।11।।
6532. नहि अङ्ग नृतो त्वत् अन्यम् विन्दामि राधसे।
राये द्युम्नाय शवसे च गिर्वणः।।12।।
6533. आ इन्दुम् इन्द्राय सिंचत पिबाति सोम्यम् मधु।
प्र राधसा चोदयाते महित्वना।।13।।
6534. उपो हरीणाम् पतिम् दक्षम् पृञ्चन्तम् अब्रवम्।
नूनम् श्रुधि स्तुवतः अश्व्यस्य।।14।।
6535. नहि अङ्ग पुरा चन जज्ञे वीरतरः त्वत्।
नकिः राया न एवथा न भन्दना।।15।।
6536. आ इत् ऊ मध्वः मदिन्-तरम्
सिञ्च वा अध्वर्यो अंधसः।
एव हि वीरः स्तवते सदा-वृधः।।16।।
6537. इन्द्र स्थातः हरीणाम् नकिः ते पूर्व्य-स्तुतिम्।
उत् आनंश शवसा न भन्दना।।17।।
6538. तम् वः वाजानाम् पतिम् अहूमहि श्रवस्यवः।
अप्रायुभिः यज्ञेभिः ववृधेन्यम्।।18।।
6539. एतो नु इन्द्रम् स्तवाम सखायः स्तोम्यम् नरम्।
कृष्टीः यः विश्वाः अभि अस्ति एकः इत्।।19।।
6540. अगो-रुधाय गो-इषे द्युक्षाय दस्म्यम् वचः।
घृतात् स्वदीयः मधुनः च वोचत।।20।।
6541. यस्य अमितानि वीर्या न राधः परि-एतवे।
ज्योतिः न विश्वम् अभि अस्ति दक्षिणा।।21।।
6542. स्तुहि इन्द्रम् व्यश्ववत् अनूर्मिम् वाजिनम् यमम्।
अर्यः गयम् मंहमानम् वि दाशुषे।।22।।
6543. एवा नूनम् उप स्तुहि वैयश्व दशमम् नवम्।
सु-विद्वांसम् चर्कृत्यम् चरणीनाम्।।23।।
6544. वेत्थ हि निः-ऋतीनाम् वज्रहस्त परि-वृजम्।
अहः-अहः शुन्ध्युः परिपदाम्-इव।।24।।
6545. तत् इन्द्र अवः आ भर येन दंसिष्ठ कृत्वने।
द्विता कुत्साय शिश्नयः नि चोदय।।25।।
6546. तम् ऊ त्वा नूनम् ईमहे नव्यम् दंसिष्ठ संन्यसे।
सः त्वम् नः विश्वाः अभिमातीः सक्षणिः।।26।।
6547. यः ऋक्षात् अंहसः मुचत्

यः वा आर्यात् सप्त सिन्धुषु।
वधः दासस्य तुवि-नृम्ण नीनमः।।27।।
6548. यथा वरो सुसाम्ने सनिभ्यः आ अवहः रयिम्।
विअश्वेभ्यः सुभगे वाजिनीवति।।28।।
6549. आ नार्यस्य दक्षिणा वि-अश्वान् एतु सोमिनः।
स्थूरम् च राधः शतवत् सहस्रवत्।।29।।
6550. यत् त्वा पृच्छात् ईजानः कुहया कुहया-कृते एषः।
अपश्रितः वलः गो-मतीम् अव तिष्ठति।।30।।

## सूक्त-25

6551. ता वाम् विश्वस्य गोपा देवा देवेषु यज्ञिया।
ऋतवाना यजसे पूत-दक्षसा।।1।।
6552. मित्रा तना न रथ्या वरुणः यः च सुक्रतुः।
सनात् सुजाता तनया धृतव्रता।।2।।
6553. ता माता विश्ववेदसा असुर्याय प्र-महसा।
मही जजान अदितिः ऋतवरी।।3।।
6554. महान्ता मित्रावरुणा सम्-राजा देवौ असुरा।
ऋतवानौ ऋतम् आ घोषतः बृहत्।।4।।
6555. नपाता शवसः महः सूनू इति दक्षस्य सुक्रतू।
सृप्रदानू इषः वास्तु अधि क्षितः।।5।।
6556. सम् या दानूनि येमथुः दिव्याः पार्थिवीः इषः।
नभस्वतीः आ वाम् चरन्तु वृष्टयः।।6।।
6557. अधि या बृहतः दिवः अभि यूथा-इव पश्यतः।
ऋतवाना सम्-राजा नमसे हिता।।7।।
6558. ऋतवाना नि सेदतुः साम्-राज्याय सुक्रतू।
धृतव्रता क्षत्रिया क्षत्रम् आशतुः।।8।।
6559. अक्ष्णः चित् गातुवित्-तरा अनुल्बणेन चक्षसा।
नि चित् मिषन्ता नि-चिरा नि चिक्यतुः।।9।।
6560. उत नः देवी अदितिः उरुष्यताम् नासत्या।
उरुष्यन्तु मरुतः वृद्धशवसः।।10।।
6561. ते नः नावम् उरुष्यत दिवा नक्तम् सु-दानवः।
अरिष्यन्तः नि पायुभिः सचेमहि।।11।।
6562. अघ्नते विष्णवे वयम् अरिष्यंतः सुदानवे।
श्रुधि स्व-यावन् सिन्धो पूर्वचित्तये।।12।।
6563. तत् वार्यम् वृणीमहे वरिष्ठम् गोपयत्यम्।
मित्रः यत् पान्ति वरुणः यत् अर्यमा।।13।।
6564. उत् नः सिन्धुः अपाम् तत् मरुतः तत् अश्विना।
इन्द्रः विष्णुः मीढ्वांसः सजोषसः।।14।।
6565. ते हि स्म वनुषः नरः अभिमातिम् कयस्य चित्।
तिग्मम् न क्षोदः प्रति-घ्नन्ति भूर्णयः।।15।।
6566. अयम् एकः इत्था पुरु उरु चष्टे वि विश्पतिः।
तस्य व्रतानि अनु वः चरामसि।।16।।
6567. अनु पूर्वाणि ओक्या साम्-राज्यस्य सश्चिम।
मित्रस्य व्रता वरुणस्य दीर्घ-श्रुत्।।17।।
6568. परि यः रश्मिना दिवः अन्तान् ममे पृथिव्याः।
उभे आ पप्रौ रोदसी महित्वा।।18।।
6569. उत् ऊ स्यः शरणे दिवः ज्योतिः अयंस्त सूर्यः।
अग्निः न शुक्रः सम्-इधानः आहुतः।।19।।
6570. वचः दीर्घ-प्रसद्मनि ईशे वाजस्य गो-मतः।
ईशे हि पित्वः अविषस्य दावने।।20।।
6571. तत् सूर्यम् रोदसी उभे,
दोषा वस्तोः उप ब्रुवे भोजेषु।
अस्मान् अभि उत् चर सदा।।21।।
6572. ऋज्रम् उक्षण्यायने रजतम् हरयाणे।
रथम् युक्तम् असनाम सु-सामनि।।22।।
6573. ता मे अश्व्यानाम् हरीणाम् नि-तोशना।
उतो नु कृत्व्यानाम् नृ-वाहसा।।23।।
6574. स्मदभीशू स्मत्-अभीशू कशवन्ता
विप्रा नविष्ठया मती।
महः वाजिनौ अर्वन्ता सचा असनम्।।24।।

## सूक्त-26

6575. युवोः ऊ सु रथम् हुवे सध-स्तुत्याय सूरिषु।
अतूर्तदक्षा वृषणा वृषण्वसू।।1।।
6576. युवम् वरो सु-साम्ने महे तने नासत्या।
अवः-भिः याथः वृषणा वृषण्वसू।।2।।
6577. ता वाम् अद्य हवामहे हव्येभिः वाजनीवसू।
पूर्वीः इषः इषयन्तौ अति क्षपः।।3।।
6578. आ वाम् वाहिष्ठः अश्विना रथः यातु श्रुतः नरा।
उप स्तोमान् तुरस्य दर्शथः श्रिये।।4।।
6579. जुहुराणा चित् अश्विना आ मन्येथाम् वृषण्वसू।
युवम् हि रुद्रा पर्षथः अति द्विषः।।5।।
6580. दस्रा हि विश्वम् आनुषक् मक्षुभिः परिदीयथः।
धियम्-जिन्वा मधु-वर्णा शुभः पती।।6।।
6581. उप नः यातम् अश्विना राया विश्वपुषा सह।
मघवाना सुवीरौ अनप-च्युता।।7।।
6582. आ मे अस्य प्रतीव्यम् इन्द्रनासत्या गतम्।
देवा देवेभिः अद्य सचनःतमा।।8।।
6583. वयम् हि वाम् हवामहे उक्षण्यन्तः व्यश्व-वत्।
सुमतिभिः उप विप्रौ इह आ गतम्।।9।।
6584. अश्विना सु ऋषे स्तुहि कुवित् ते श्रवतः हवम्।
नेदीयसः कूडयातः पणीन् उत।।10।।
6585. वैयश्वस्य श्रुतम् नरा उतो मे अस्य वेदथः।
सजोषसा वरुणः मित्रः अर्यमा।।11।।
6586. युवा-दत्तस्य धि,णया युवा-नीतस्य सूरिभिः।
अहः-अहः वृषणा मह्यम् शिक्षतम्।।12।।

6587. यः वाम् यज्ञेभिः आवृतः अधिवस्त्रा वधूः-इव।
सपर्यन्ता शुभे चक्राते अश्विना।।13।।
6588. यः वाम् उरुव्यचः-तमम् चिकेतति नृ-पाय्यम्।
वर्तिः अश्विना परि यातम् अस्मयू इत्यस्मयू।।14।।
6589. अस्मभ्यम् सु वृषण्वसू यातम् वर्तिः नृ-पाय्यम्।
विषुद्रुहा-इव यज्ञम् ऊहथुः गिरा।।15।।
6590. वाहिष्ठः वाम् हवानाम् स्तोमः दूतः हुवत् नरा।
युवाभ्याम् भूतु अश्विना।।16।।
6591. यत् अदः दिवः अर्णवे इषः व मदथः गृहे।
श्रुतम् इत् मे अमर्त्या।।17।।
6592. उत स्या श्वेतयावरी वाहिष्ठा वाम्।
नदीनाम् सिन्धुः हिरण्य-वर्तनिः।।18।।
6593. स्मत् एतया सु-कीर्त्या अश्विना श्वेतया धिया।
वहेथे शुभ्रयावाना।।19।।
6594. युक्ष्व हि त्वम् रथ-सहा युवस्व पोप्या वसो।
आत् नः वायो मधु पिब अस्माकम् सवना आ गहि।।20।।
6595. तव वायो ऋतः-पते त्वष्टुः जामातः अद्भुत।
अवांसि आ वृणीमहे।।21।।
6596. त्वष्टुः जामातरम् वयम् ईशानम् रायः ईमहे।
सुतवन्तः वायुम् द्युम्ना जनासः।।22।।
6597. वायो याहि शिव आ दिवः वहस्व सु सु-अश्व्यम्।
वहस्व महः पृथु-पक्षसा रथे।।23।।
6598. त्वाम् हि सुप्सरः-तमम् नृसदनेषु हूमहे।
ग्रावाणम् न अश्वपृष्ठम् मंहना।।24।।
6499. सः त्वम् नः देव मनसा वायो मन्दानः अग्रियः।
कृधि वाजान् अपः धियः।।25।।

## सूक्त-27

6600. अग्निः उक्थे पुरः-हितः ग्रावाणः बर्हिः अध्वरे।
ऋचा यामि मरुतः ब्रह्मणः पतिम्
देवान् अवः वरेण्यम्।।1।।
6601. आ पशुम् गासि पृथिवीम् वनस्पतीन्
उषसा नक्तम् ओषधीः।
विश्वे च नः वसवः विश्व-वेदसः
धीनाम् भूत प्र-अवितारः।।2।।
6602. प्र सु नः एतु अध्वरः अग्ना देवेषु पूर्व्यः।
आदित्येषु प्र वरुणे धृतव्रते मरुत्सु विश्वभानुषु।।3।।
6603. विश्वे हि स्म मनवे विश्व-वेदसः
भुवन् वृधे रिशादसः।
अरिष्टेभिः पायुभिः विश्ववेदसः
यन्त नः अवृकम् छर्दिः।।4।।
6604. आ नः अद्य समनसः गन्त विश्वे स-जोषसः।
ऋचा गिरा मरुतः देवि अदिते सदने पस्त्ये महि।।5।।
6605. अभि प्रिया मरुतः या वः
अश्व्या हव्या मित्र प्रयाथन।
आ बर्हिः इन्द्रः वरुणः तुराः नरः
आदित्यासः सदन्तु नः।।6।।
6606. वयम् वः वृक्त-बर्हिषः हित-प्रयसः आनुषक्।
सुत-सोमासः वरुण हवामहे मनुष्वत् इद्ध-अग्नयः।।7।।
6607. आ प्र यात मरुतः विष्णो
अश्विना पूषन् माकीनया धिया।
इन्द्रः आ यातु प्रथमः सनिष्युभिः
वृषा यः वृत्रहा गृणे।।8।।
6608. वि नः देवासः अद्रुहः अच्छिद्रम् शर्म यच्छत।
न यत् दूरात् वसवः नु चित्
अन्तितः वरूथम् आदधर्षति।।9।।
6609. अस्ति हि वः स-जात्यम् रिशादसः
देवासः अस्ति आप्यम्।
प्र नः पूर्वस्मै सुविताय वोचत
मक्षु सुम्नाय नव्यसे।।10।।
6610. इदा हि वः उप-स्तुतिम् इदा वामस्य भक्तये।
उप वः विश्ववेदसः नमस्युः आ असृक्षि अन्याम्-इव।।11।।
6611. उत् ऊ स्यः वः सविता सु-प्रनीतयः
अस्थात् ऊर्ध्वः वरेण्यः।
नि द्विपादः चतुः-पादः अर्थिनः अविश्रन्
पतयिष्णवः।।12।।
6612. देवम्-देवम् वः अवसे देवम्-देवम् अभिष्टये।
देवम्-देवम् हुवेम वाजसातये गृणन्तः देव्या धिया।।13।।
6613. देवासः हि स्म मनवे समन्यवः
विश्वे साकम् सरातयः।
ते नः अद्य ते अपरम् तुचे
तु नः भवन्तु वरिवः-विदः।।14।।
6614. प्र वः शंसामि अद्रुहः सम्-स्थे उप-स्तुतीनाम्।
न तम् धूर्तिः वरुण मित्र मर्त्यम्
यः वः धामभ्यः अविधत्।।15।।
6615. प्र सः क्षयम् तिरते वि महीः
इषः यः वः वराय दाशति।
प्र प्रजाभिः जायते धर्मणः
परि अरिष्टः सर्वः एधते।।16।।
6616. ऋते सः विन्दते युधः सुगेभिः याति अध्वनः।
अर्यमा मित्रः वरुणः सरातयः यम् त्रायन्ते सजोषसः।।17।।
6617. अज्रे चित् अस्मै कृणुथ नि-अञ्चनम्
दुःगे चित् आ सुसरणम्।
एषा चित् अस्मात् अशनिः परः
नु सा अस्रेधन्ती वि नश्यतु।।18।।
6618. यत् अद्य सूर्ये उत्-यति प्रिय-क्षत्राः ऋतम् दध।

यत् नि-मुचि प्र-बुधि विश्व-वेदसः
यत् वा मध्यन्दिने दिवः।।19।।
6619. यत् वा अभि-पित्वे असुरा ऋतम्
यते छर्दिः येम वि दाशुषे।
वयम् तत् वः वसवः विश्ववेदसः
उप स्थेयाम मध्ये आ।।20।।
6620. यत् अद्य सूरे उत्-इते यत् मध्यन्दिने आतुचि।
वामम् धस्थ मनवे विश्व-वेदसः जुह्वानाय प्र-चेतसे।।21।।
6621. वयम् तत् वः सम्-राजः आ वृणीमहे
पुत्रः न बहु-पाय्यम्।
अश्याम् तत् आदित्याः जुह्वतः
हविः येन वस्यः अनशामहै।।22।।

## सूक्त-28

6622. ये त्रिंशति त्रयः परः देवासः बर्हिः आ असदन्।
विदन् अह द्विता असनन्।।1।।
6623. वरुणः मित्रः अर्यमा स्मद्राति-साचः अग्नयः।
पत्नी-वन्तः वषट्-कृताः।।2।।
6624. ते नः गोपाः अपाच्याः ते उदक् ते इत्था न्यक्।
पुरस्तात् सर्वया विशा।।3।।
6625. यथा वशन्ति देवाः तथा इत् असत्
तत् एषाम् नकिः आ मिनत्।
अरावा चन मर्त्यः।।4।।
6626. सप्तानाम् सप्त ऋष्टयः सप्त द्युम्नानि एषाम्।
सप्तो अधि श्रियः धिरे।।5।।

## सूक्त-29

6627. बभ्रुः एकः विषुणः सूनरः
युवा अञ्जि अङ्के हिरण्ययम्।।1।।
6628. योनिम् एकः आ ससाद द्योतनः
अन्तः देवेषु मेधिरः।।2।।
6629. वाशीम् एकः बिभर्ति हस्ते आयसीम्
अन्तः देवेषु निध्रुविः।।3।।
6630. वज्रम् एकः बिभर्ति हस्ते
आ-हितम् तेन वृत्राणि जिघ्नते।।4।।
6631. तिग्मम् एकः बिभर्ति हस्ते
आयुधम् शुचिः उग्रः जलाषभेषजः।।5।।
6632. पथः एकः पीपाय तस्करः
यथा एषः वेद नि-धीनाम्।।6।।
6633. त्रीणि एकः उरुगायः वि चक्रमे
यत्र देवासः मदन्ति।।7।।
6634. विभिः द्वा चरतः एकया सह
प्र प्रवासा-इव वसतः।।8।।
6635. सदः द्वा चक्राते उपमा
दिवि सम्-राजा सर्पिरासुती।।9।।
6636. अर्चन्तः एके महि साम मन्वत
तेन सूर्यम् अरोचयन्।।10।।

## सूक्त-30

6637. नहि वः अस्ति अर्भकः देवासः न कुमारकः।
विश्वे सतः-महान्तः इत्।।1।।
6638. इति स्तुतासः असथ रिशादसः ये स्थ त्रयः च।
त्रिंशत् च मनोः देवाः यज्ञियासः।।2।।
6639. ते नः त्राध्वम् ते अवत ते ऊँ नः अधि वोचत।
मा नः पथः पित्र्यात् मानवात्
अधि दूरम् नैष्ट परावतः।।3।।
6640. ये देवासः इह स्थन विश्वे वैश्वानराः उत।
अस्मभ्यम् शर्म स-प्रथः गवे अश्वाय यच्छत्।।4।।

## सूक्त-31

6641. यः यजाति यजाते इत् सुनवत् च पचाति च।
ब्रह्मा इत् इन्द्रस्य चाकनत्।।1।।
6642. पुरोडशम् यः अस्मै सोमम् ररते आ-शिरम्।
पात् इत् तम् शक्रः अंहसः।।2।।
6643. तस्य द्युमान् असत् रथः देव-जूतः सः शूशुवत्।
विश्वा वन्वन् अमित्रिया।।3।।
6644. अस्य प्रजावती गृहे असश्चन्ती दिवे-दिवे।
इडा धेनुमती दुहे।।4।।
6645. या दम्पती स-मनसा सुनुतः आ च धावतः।
देवासः नित्यया आशिरा।।5।।
6646. प्रति प्राशव्यान् इतः सम्यञ्चा बर्हिः आशाते।
न ता वाजेषु वायतः।।6।।
6647. न देवानाम् अपि ह्नुतः सुमतिम् न जुघुक्षतः।
श्रवः बृहत् विवासतः।।7।।
6648. पुत्रिणा ता कुमारिणा विश्वम् आयुः वि अश्नुतः।
उभा हिरण्य-पेशसा।।8।।
6649. वीति-होत्रा कृतद्वसू दशस्यन्ता अमृताय कम्।
सम् ऊधः रोमशम् हतः देवेषु कृणुतः दुवः।।9।।
6650. आ शर्म पर्वतानाम् वृणीमहे नदीनाम्।
आ विष्णोः सचा-भुवः।।10।।
6651. आ एतु पूषा रयिः भगः स्वस्ति सर्व-धातमः।
उरुः अध्वा स्वस्तये।।11।।
6652. अरमतिः अनर्वणः विश्वः देवस्य मनसा।
आदित्यानाम् अनेहः इत्।।12।।
6653. यथा नः मित्रः अर्यमा वरुणः सन्ति गोपाः।
सुगाः ऋतस्य पन्थाः।।13।।
6654. अग्निम् वः पूर्व्यम् गिरा देवम् ईड वसूनाम्।
सपर्यन्तः पुरु-प्रियम् मित्रम् न क्षेतर-साधसम्।।14।।

6655. मक्षु देववतः रथः शूरः वा पृत्सु कासु चित्।
देवानाम् यः इत् मनः यजमानः इयक्षति
अभि इत् अयज्वनः भुवत्।।15।।
6656. न यजमान रिष्यसि न सुन्वान न देवयो।
देवानाम् यः इत् मनः यजमानः इयक्षति
अभि इत् अयज्वनः भुवत्।।16।।
6657. नकिः तम् कर्मणा नशत् न प्र योषत् न योषति।
देवानाम् यः इत् मनः यजमानः इयक्षति
अभि इत् अयज्वनः भुवत्।।17।।
6658. असत् अत्र सुवीर्यम् उत् त्यत् आशु-अश्व्यम्।
देवानाम् यः इत् मनः यजमानः इयक्षति
अभि इत् अयज्वनः भुवत्।।18।।

## सूक्त-32

6659. प्र कृतानि ऋजीषिणः कण्वाः इन्द्रस्य गाथया।
मदे सोमस्य वोचत।।1।।
6660. यः सृबिन्दम् अनर्शनिम् पिप्रुम् दासम् अहीशुवम्।
वधीत् उग्रः रिणन् अपः।।2।।
6661. नि अर्बुदस्य विष्टपम् वर्ष्माणम् बृहतः तिर।
कृषे तत् इन्द्र पौंस्यम्।।3।।
6662. प्रति श्रुताय वः धृषत् तूर्णाशम् न गिरेः अधि।
हुवे सु-शिप्रम् ऊतये।।4।।
6663. सः गोः अश्वस्य वि व्रजम् मन्दानः सोम्येभ्यः।
पुरम् न शूर दर्षसि।।5।।
6664. यदि मे रारणः सुते उक्थे वा दधसे चनः।
आरात् उप स्वधा आ गहि।।6।।
6665. वयम् घ ते अपि स्मसि स्तोतारः इन्द्र गिर्वणः।
त्वम् नः जिन्व सोमपाः।।7।।
6666. उत नः पितुम् आ भर स्म-रराणः अविक्षितम्।
मघ-वन् भूरि ते वसु।।8।।
6667. उत नः गोमतः कृधि हिरण्यवतः अश्विनः।
इडाभिः सम् रभेमहि।।9।।
6668. बृबत्-उक्थम् हवामहे सृप्र-करस्नम् ऊतये।
साधु कृण्वन्तम् अवसे।।10।।
6669. यः संस्थे चित् शतक्रतुः आत् ईम् कृणोति वृत्रहा।
जरितृभ्यः पुरु-वसुः।।11।।
6670. सः नः शक्रः चित् आ शकत्
दानवान् अन्तः आभरः।
इन्द्रः विश्वाभिः ऊतिभिः।।12।।
6671. यः रायः अवनिः महान् सुपारः सुन्वतः सखा।
तम् इन्द्रिम् अभि गायत।।13।।
6672. आ-यन्तारम् महि स्थिरम् पृतनासु श्रवः-जितम्।
भूरेः ईशानम् ओजसा।।14।।
6673. नकिः अस्य शचीनाम् नि-यन्ता सूनृतानाम्।
नकिः वक्ता न दात् इति।।15।।
6674. न नूनम् ब्रह्मणाम् ऋणम्
प्राशूनाम् अस्ति सुन्वताम्।
न सोमः अप्रता पपे।।16।।
6675. पन्ये इत् उप गायत पन्ये उक्थानि शंसत।
ब्रह्म कृणोत पन्ये इत्।।17।।
6676. पन्यः आ दर्दिरत् शता सहस्रा वाजी अवृतः।
इन्द्रः यः यज्वनः वृधः।।18।।
6677. वि सु चर स्वधाः अनु कृष्टीनाम् अनु आ-हुवः।
इन्द्र पिब सुतानाम्।।19।।
6678. पिब स्व-धैनवानाम् उत यः तुग्र्ये सचा।
उत अयम् इन्द्र यः तव।।20।।
6679. अति इहि मन्यु-साविनम् सुसु-वांसम् उप-अरणे।
इमम् रातम् सुतम् पिब।।21।।
6680. इहि तिस्रः परावतः इहि पञ्च जनान् अति।
धेनाः इन्द्र अव-चाकशत्।।22।।
6681. सूर्यः रश्मिम् यथा सृज आ त्वा यच्छन्तु मे गिरः।
निम्नम् आपः न सध्र्यक्।।23।।
6682. अध्वर्यो आ तु हि सिञ्च सोमम् वीराय शिप्रिणे।
भर सुतस्य पीतये।।24।।
6683. यः उद्नः फलिगम् भिनत्
न्यक् सिन्धून् अव-असृजत्।
यः गोषु पक्वम् धारयत्।।25।।
6684. अहन् वृत्रम् ऋचीषमः और्णवाभम् अहीशुवम्।
हिमेन अविध्यत् अर्बुदम्।।26।।
6685. प्र वः उग्राय निःतुरे अषाडय प्रसक्षिणे।
देवत्तम् ब्रह्म गायत।।27।।
6686. यः विश्वानि अभि व्रता सोमस्य मदे अन्धसः।
इन्द्रः देवेषु चेतति।।28।।
6687. इह त्या सध-माद्या हरी हिरण्य-केश्या।
वोडम् अभि प्रयः हितम्।।29।।
6688. अर्वांचम् त्वा पुरु-स्तुत प्रियमेध-स्तुता हरी।
सोम-पेयाय वक्षतः।।30।।

## सूक्त-33

6689. वयम् घ त्वा सुत-वन्तः आपः न वृक्त-बर्हिषः।
पवित्रस्य प्र-स्रवणेषु वृत्रहन् परि स्तोतारः आसते।।1।।
6690. स्वरन्ति त्वा सुते नरः वसो निरेके उक्थिनः।
कदा सुतम् तृषाणः ओकः आ गमः
इन्द्र स्वब्दी इव वंसगः।।2।।
6691. कण्वेभिः धृष्णो आ धृषत् वाजम् दर्षि सहस्रिणम्।
पिशङ्ग-रूपम् मघवन् विचर्षणे मक्षु गो-मन्तम् ईमहे।।3।।

6692. पाहि गाय अन्धसः मदे इन्द्राय मेध्य-अतिथे।
यः संमिश्लः हर्योः यः सुते सचा वज्री रथः हिरण्ययः।।4।।
6693. यः सु-सव्यः सु-दक्षिणः
इनः यः सु-क्रतुः गृणे।
यः आकरः सहस्रा यः शतमघः
इन्द्रः यः पूर्भित् आरितः।।5।।
6694. यः धृषितः यः अवृतः यः अस्ति श्मश्रुषु श्रितः।
विभूत-द्युम्नः च्यवनः पुरु-स्तुतः
क्रत्वा गौः इव शाकिनः।।6।।
6695. कः ईम् वेद सुते सचा पिबन्तम् कत् वयः दधे।
अयम् यः पुरः वि भिनत्ति ओजसा
मन्दानः शिप्री अन्धसः।।7।।
6696. दाना मृगः न वारणाः पुरुत्रा चरथम् दधे नकिः।
त्वा नि यमत् आ सुते गमः महान् चरसि ओजसा।।8।।
6697. यः उग्रः सन् अनिः-स्तृतः स्थिरः रणाय संस्कृतः।
यदि स्तोतुः मघवा शृणवत् हवम् न
इन्द्रः योषति आ गमत्।।9।।
6698. सत्यम् इत्था वृषा इत् असि वृष-जूतिः नः अवृतः।
वृषा हि उग्र शृण्विषे परा-वति वृषो अर्वा-वति श्रुतः।।10।।
6699. वृषणः ते अभीशवः वृषा कशा हिरण्ययी।
वृषा रथः मघवन् वृषणा हरी वृषा त्वम् शतक्रतो।।11।।
6700. वृषा सोता सुनोतु ते वृषन् ऋजीषिन् आ भर।
वृषा दधन्वे वृषणम् नदीषु
आ तुभ्यम् स्थातः हरीणाम्।।12।।
6701. आ इन्द्र याहि पीतये मधु शविष्ट सोम्यम्।
न अयम् अच्छ मघवा शृणवत् गिरः
ब्रह्म उक्था च सु-क्रतुः।।13।।
6702. वहन्तु त्वा रथेस्थाम् आ हरयः रथ-युजः।
तिरः चित् अर्यम् सवनानि वृत्रहन्
अन्येषाम् या शतक्रतो।।14।।
6703. अस्माकम् अद्य अन्तमम् स्तोमम् धिष्व महा-मह।
अस्माकम् ते सवना सन्तु शम्-तमा
मदाय द्युक्ष सोम-पाः।।15।।
6704. नहि सः तव नो मम शास्त्रे अन्यस्य रण्यति।
यः अस्मान् वीरः आ अनयत्।।16।।
6705. इन्द्रः चित् घ तत् अब्रवीत्
स्रियाः अशास्यम् मनः।
उतो अह क्रतुम् रघुम्।।17।।
6706. सप्ती चित् घ मद-च्युता मिथुना वहतः रथम्।
एव इत् धूः वृष्णः उत्-तरा।।18।।
6707. अधः पश्यस्व मा उपरि सम्-तराम् पादकौ हर।
मा ते कश-प्लकौ दृशन् स्त्री हि ब्रह्मा बभूविथ।।19।।

## सूक्त-34

6708. आ इन्द्र याहि हरिभिः उप कण्वस्य सु-स्तुतिम्।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।1।।
6709. आ त्वा ग्रावा वदन् इह सोमी घोषेण यच्छतु।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।2।।
6710. अत्र वि नेमिः एषाम्उराम् न धूनुते वृकः।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।3।।
6711. आ त्वा कण्वाः इह अवसे हवन्ते वाज-सातये।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।4।।
6712. दधामि ते सुतानाम् वृष्णे न पूर्व-पाय्यम्।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।5।।
6713. स्मत्-पुरन्धिः नः आ गहि विश्वतः-धीः नः ऊतये।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।6।।
6714. आ नः याहि महेमते सहस्र-ऊते शत-मघ।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।7।।
6715. आ त्वा होता मनुः-हितः देवत्रा वक्षत् ईड्यः।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।8।।
6716. आ त्वा मद-च्युता हरी श्येनम् पक्षा-इव वक्षतः।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।9।।
6717. आ याहि अर्यः आ परि स्वाहा सोमस्य पीतये।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।10।।
6718. आ नः याहि उप-श्रुति उक्थेषु रणय इह।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।11।।
6719. सरूपैः आ सु नः गहि सम्-भृतैः संभृत-अश्वः।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।12।।
6720. आ याहि पर्वतेभ्यः समुद्रस्य अधि विष्टिपः।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।13।।
6721. आ नः गव्यानि अश्व्या सहस्रा शूर दर्दहि।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।14।।
6722. आ नः सहस्रशः भर अयुतानि शतानि च।
दिवः अमुष्य शासतः दिवम् यय दिवावसो।।15।।
6723. आ यत् इन्द्रः च दद्वहे सहस्रम् वसु-रोचिषः।
ओजिष्ठम् अश्व्यम् पशुम्।।16।।
6724. ये ऋज्राः वात-रंहसः अरुषासः रघु-स्यदः।
भ्राजन्ते सूर्याःइव।।17।।
6725. पारावतस्य रातिषु द्रवत्-चक्रेषु आशुषु।
तिष्ठम् वनस्य मध्ये आ।।18।।

## सूक्त-35

6726. अग्निना इन्द्रेण वरुणेन विष्णुना
आदित्यैः रुद्रैः वसुभिः सचा-भुवा।
सजोषसौ उषसा सूर्येण च सोमम् पिबतम् अश्विना।।1।।
6727. विश्वाभिः धीभिः भुवनेन वाजिना

दिवा पृथिव्या अद्रिभिः सचा-भुवा।
सजोषसौ उषसा सूर्येण च सोमम् पिबतम् अश्विना।।2।।
6728. विश्वैः देवैः त्रिभिः एकादशैः इह
अत्भिः मरुत्भिः भृगुभिः सचाभुवा।
सजोषसौ उषसा सूर्येण च सोमम् पिबतम् अश्विना।।3।।
6729. जुषेथाम् यज्ञम् बोधतम् हवस्य मे
विश्वा इह देवौ सवना अव गच्छतम्।
सजोषसौ उषसा सूर्येण च आ
इषम् नः वोढम् अश्विना।।4।।
6730. स्तोमम् जुषेथाम् युवशा-इव कन्यनाम्
विश्वा इह देवौ सवना अव गच्छतम्।
सजोषसौ उषसा सूर्येण च आ
इषम् नः वोढम् अश्विना।।5।।
6731. गिरः जुषेथाम् अध्वरम् जुषेथाम्
विश्वा इह देवौ सवना अव गच्छतम्।
सजोषसौ उषसा सूर्येण च आ
इषम् नः वोढम् अश्विना।।6।।
6732. हारिद्रवा-इव पतथः वना इत्
उप सोमम् सुतम् महिषा-इव अव गच्छथः।
सजोषसौ उषसा सूर्येण च त्रिः वर्तिः यातम् अश्विना।।7।।
6733. हंसौ-इव पतथः अध्वगौ इव
सोमम् सुतम् महिषा-इव अव गच्छथः।
सजोषसौ उषसा सूर्येण च त्रिः वर्तिः यातम् अश्विना।।8।।
6734. श्येनौ-इव पतथः हव्य-दातये
सोमम् सुतम् महिषा-इव अव गच्छथः।
सजोषसौ उषसा सूर्येण च त्रिः वर्तिः यातम् अश्विना।।9।।
6735. पिबतम् च तृप्णुतम् च आ च गच्छतम्
प्र-जाम् च धत्तम् द्रविणम् च धत्तम्।
सजोषसौ उषसा सूर्येण च ऊर्जम् नः धत्तम अश्विना।।10।।
6736. जयतम् च प्र स्तुतम् च प्र च अवतम्
प्रजाम् च धत्तम् द्रविणम् च धत्तम्।
सजोषसौ उषसा सूर्येण च ऊर्जम् नः धत्तम् अश्विना।।11।।
6737. हतम् च शत्रून् यततम् च मित्रिणः
प्रजाम् च धत्तम् द्रविणम् च धत्तम्।
सजोषसौ उषसा सूर्येण च ऊर्जम् नः धत्तम् अश्विना।।12।।
6738. मित्रावरुणवन्तौ उत धर्मवन्ता
मरुत्वन्ता जरितुः गच्छथः हवम्।
सजोषसौ उषसा सूर्येण च आ
आदित्यैः यातम् अश्विना।13।।
6739. अङ्गिरस्वन्तौ उत विष्णुवन्ता
मरुत्वन्ता जरितुः गच्छथः हवम्।
सजोषसौ उषसा सूर्येण च आ
आदित्यैः यातम् अश्विना।।14।।
6740. ऋभु-मन्ता वृषणा वाजवन्ता
मरुत्वन्ता जरितुः गच्छथः हवम्।
सजोषसौ उषसा सूर्येण च आ
आदित्यैः यातम् अश्विना।।15।।
6741. ब्रह्म जिन्वतम् उत जिन्वतम् धियः
हतम् रक्षांसि सेधतम् अमीवाः।
सजोषसौ उषसा सूर्येण च सोमम् सुन्वतः अश्विना।।16।।
6742. क्षत्रम् जिन्वतम् उत जिन्वतम् नृन्
हतम् रक्षांसि सेधतम् अमीवाः।
सजोषसौ उषसा सूर्येण च सोमम् सुन्वतः अश्विना।।17।।
6743. धेनूः जिन्वतम् उत जिन्वतम् विशः
हतम् रक्षांसि सेधतम् अमीवाः।
सजोषसौ उषसा सूर्येण च सोमम् सुन्वतः अश्विना।।18।।
6744. अत्रेः इव शृणुतम् पूर्व्य-स्तुतिम्
श्याव-अश्वस्य सुन्वतः मद-च्युता।
सजोषसौ उषसा सूर्येण च अश्विना तिरः-अह्न्यम्।।19।।
6745. सर्गान्-इव सृजतम् सु-स्तुतीः उप
श्याव-अश्वस्य सुन्वतः मद-च्युता।
सजोषसौ उषसा सूर्येण च अश्विना तिरःअह्न्यम्।।20।।
6746. रश्मीन्-इव यच्छतम् अध्वरान् उप
श्याव-अश्वस्य सुन्वतः मद-च्युता।
सजोषसौ उषसा सूर्येण च अश्विना तिरः-अह्न्यम्।।21।।
6747. अर्वाक् रथम् नि यच्छतम् पिबतम् सोम्यम् मधु।
आ यातम् अश्विना आ गतम् अवस्युः
वाम् अहम् हुवे धत्तम रत्नानि दाशुषे।।22।।
6748. नमः-वाके प्रस्थिते अध्वरे नरा विवक्षणस्य पीतये।
आ यातम् अश्विना आ गतम् अवस्युः
वाम् अहम् हुवे धत्तम् रत्नानि दाशुषे।।23।।
6749. स्हावा-कृतस्य तृम्पतम् सुतस्य देवौ अन्धसः।
आ यातम् अश्विना आ गतम् अवस्युः
वाम् अहम् हुव धत्तम् रत्नानि दाशुषे।।24।।

## सूक्त-36

6750. अविता असि सुन्वतः वृक्त-बर्हिषः
पिब सोमम् मदाय कम् शतक्रतो।
यम् ते भागम् अधारयन् विश्वाः सेहानः पृतनाः
उरु ज्रयः सम् अप्सुजित् मरुत्वान् इन्द्र सत्-पते।।1।।
6751. प्र अव स्तोतारम् मघवन् अव त्वाम्
पिब सोमम् मदाय कम् शतक्रतो।

यम् ते भागम् अधारयन् विश्वाः सेहानः पृतनाः
उरु ज्रयः सम् अप्सुजित् मरुत्वान् इन्द्र सत्-पते।।2।।
6752. ऊर्जा देवान् अवसि ओजसा त्वाम्
पिब सोमम् मदाय कम् शतक्रतो।
यम् ते भागम् अधारयन् विश्वाः सेहानः पृतनाः
उरु ज्रयः सम् अप्सुजित् मरुत्वान् इन्द्र सत्-पते।।3।।
6753. जनिता दिवः जनिता पृथिव्याः
पिब सोमम् मदाय कम् शतक्रतो।
यम् ते भागम् अधारयन् विश्वाः सेहानः पृतनाः
उरु ज्रयः सम् अप्सुजित् मरुत्वान् इन्द्र सत्-पते।।4।।
6754. जनिता अश्वानाम् जनिता गवाम् असि
पिब सोमम् मदाय कम् शतक्रतो।
यम् ते भागम् अधारयन् विश्वाः सेहानः पृतनाः
उरु ज्रयः सम् अप्सुजित् मरुत्वान् इन्द्र सत्-पते।।5।।
6755. अत्रीणाम् स्तोमम् अद्रिवः महः कृधि
पिब सोमम् मदाय कम् शतक्रतो।
यम् ते भागम् अधारयन् विश्वाः सेहानः पृतनाः
उरु ज्रयः सम् अप्सुजित् मरुत्वान् इन्द्र सत्-पते।।6।।
6756. श्याव-अश्वस्य सुन्वतः तथा शृणु
यथा अशृणोः अतेरः कर्माणि कृण्वतः।
प्र त्रसदस्युम् आविथ त्वम् एकः इत्
नृ-सह्ये इन्द्र ब्रह्माणि वर्धयन्।।7।।

## सूक्त-37

6757. प्र इदम् ब्रह्म वृत्र-तूर्येषु आविथ
प्र सुन्वतः शची-पते इन्द्र विश्वाभिः ऊतिभिः।
माध्यन्दिनस्य सवनस्य वृत्र-हन्
अनेद्य पिब सोमस्य वज्रि-वः।।1।।
6758. सेहानः उग्र पृतनाः अभि द्रुहः
शचीपते इन्द्र विश्वाभिः ऊतिभिः।
माध्यन्दिनस्य सवनस्य वृत्रहन्
अनेद्य पिब सोमस्य वज्रिवः।।2।।
6759. एकराट् अस्य भुवनस्य राजसि
शची-पते इन्द्र विश्वाभिः ऊतिभिः।
माध्यन्दिनस्य सवनस्य वृत्रहन्
अनेद्य पिब सोमस्य वज्रिवः।।3।।
6760. स-स्थवाना यवयसि त्वम् एकः इत्
शचीपते इन्द्र विश्वाभिः ऊतिभिः।
माध्यन्दिनस्य सवनस्य वृत्रहन्
अनेद्य पिब सोमस्य वज्रिवः।।4।।
6761. क्षेमस्य च प्रयुजः च त्वम् ईशिषे
शचीपते इन्द्र विवाभिः ऊतिभिः।
माध्यन्दिनस्य सवनस्य वृत्रहन्
अनेद्य पिब सोमस्य वज्रिवः।।5।।
6762. क्षत्राय त्वम् अवसि न त्वम् आविथ
शचीपते इन्द्र विश्वाभिः ऊतिभिः।
माध्यन्दिनस्य सवनस्य वृत्रहन्
अनेद्य पिब सोमस्य वज्रिवः।।6।।
6763. श्याव-अश्वस्य रेभतः तथा शृणु
यथा अशृणोः अत्रेः कर्माणि कृण्वतः।
प्र त्रसदस्युम् आविथ त्वम् एकः इत्
नृ-सह्ये इन्द्र क्षत्राणि वर्धयन्।।7।।

## सूक्त-38

6764. यज्ञस्य हि स्थः ऋत्विजा सस्नी वाजेषु कर्मसु।
इन्द्राग्नी तस्य बोधतम्।।1।।
6765. तोशासा रथ-यावाना वृत्रहना अपराजिता।
इन्द्राग्नी तस्य बोधतम्।।2।।
6766. इदम् वाम् मदिरम्मधु अधुक्षन् अद्रिभिः नरः।
इन्द्राग्नी तस्य बोधतम्।।3।।
6767. जुषेथाम् यज्ञम् इष्टये सुतम् सोमम् सधस्तुती।
इन्द्राग्नी आ गतम् नरा।।4।।
6768. इमा जुषेथाम् सव्ना येभिः हव्यानि ऊहथुः।
इन्द्राग्नी आ गतम् नरा।।5।।
6769. इमाम् गायत्र-वर्तनिम् जुषेथाम् सु-स्तुतिम् मम।
इन्द्राग्नी आ गतम् नरा।।6।।
6770. प्रातः यावभिः आ गतम् देवेभिः जेन्यावसू।
इन्द्राग्नी सोम-पीतये।।7।।
6771. श्याव-अश्वस्य सुन्वः अत्रीणाम् शृणुताम् हवम्।
इन्द्राग्नी सोम-पीतये।।8।।
6772. एव वाम् अह्वे ऊतये यथा अहुवन्त मेधिराः।
इन्द्राग्नी सोम-पीतये।।9।।
6773. आ अहम् सरस्वती-वतोः इन्द्राग्र्योः अवः वृणे।
याभ्याम् गायत्रम् ऋच्यते।।10।।

## सूक्त-39

6774. अग्निम् अस्तोषि ऋग्मियम् अग्निम् ईड यजध्यै।
अग्निः देवान् अनक्तु नः उभे हि विदथे कविः
अन्तः चरति दूत्यम् नभन्ताम् अन्यके समे।।1।।
6775. नि अग्ने नव्यसा वचः तनूषु शंसम् एषाम्।
नि अरातीः रराव्णाम् विश्वाः अर्यः अरातीः
इतः युच्छन्तु आमुरः नभन्ताम् अन्यके समे।।2।।
6776. अग्ने मन्मानि तुभ्यम् कम्
घृतम् न जुह्वे आसनि।
सः देवेषु प्र चिकिद्धि त्वम् हि असि पूर्व्यः
शिवः दूतः विवस्वतः नभन्ताम् अन्यके समे।।3।।
6777. तत्-तत् अग्निः वयः दधे यथा-यथा कृपण्यति।

ऊर्जा-आहुतिः वसूनाम् शम् च योः च मयः दधे
विश्वस्यै देवहूत्यै नभन्ताम् अन्यके समे।।4।।
6778. सः चिकेत सहीयसा अग्निः चित्रेण कर्मणा।
सः होता शश्वतीनाम् दक्षिणाभिः अभिवृतः
इनोति च प्रतीव्यम् नभन्ताम् अन्यके समे।।5।।
6779. अग्निः जाता देवानाम्
अग्निः वेद मर्तानाम् अपीच्यम्।
अग्निः सः द्रविणोदाः अग्निः द्वारा वि ऊर्णुते
सु-आहुतः नवीयसा नभन्ताम् अन्यके समे।।6।।
6780. अग्निः देवेसु सम्वसुः स विक्षु यज्ञियासु आ।
स मुदा काव्या पुरु विश्वम् भूमेव पुष्यति।
देवो देवेषु यज्ञियो नमन्ताम् अन्यके समे।।7।।
6781. यः अग्निः सप्त-मानुषः श्रितः विश्वेषु सिन्धुषु।
तम् आ अगन्म त्रि-पस्त्यम् मन्धातुः दस्यु-हन्-तमम्।
अग्निम् यज्ञेषु पूर्व्यम् नभन्ताम् अन्यके समे।।8।।
6782. अग्निः त्रीणि त्रि-धातूनि आ क्षेति विदथा कविः।
सः त्रीन् एकादशान् इह यक्षत् च पिप्रयत् च नः
विप्रः दूतः परि-कृतः नभन्ताम् अन्यके समे।।9।।
6783. त्वम् नः अग्ने आयुषु त्वम् देवेषु,
पूर्व्य वस्वः एकः इरज्यसि।
त्वाम् आपः परिस्रुतः परि यन्ति
स्व-सेतवः नभन्ताम् अन्यके समे।।10।।

## सूक्त-40

6784. इन्द्राग्नी युवम् सु नः सहन्ता दासथः रयिम्।
येन दृढा समत्सु आ वीडु चित् सहिषीमहि।
अग्निः वना-इव वाते इत् नभन्ताम् अन्यके समे।।1।।
6785. नहि वाम् वव्रयामहे, अथ इन्द्रम् इत् यजामहे,
शविष्ठम् नृणाम् नरम्।
सः नः कदा चित् अर्वता गमत्, आ वाज-सातये गमत्,
आ मेध-सातये नभन्ताम् अन्यके समे।।2।।
6786. ता हि मध्यम् भराणाम् इन्द्राग्नी अधिक्षितः।
ता उ कवित्वना कवी, पृच्छ्यमाना सखीयते।
सम् धीतम् अश्नुतम् नरा, नभन्ताम् अन्यके समे।।3।।
6787. अभि अर्च नभाक-वत् इन्द्राग्नी यजसा गिरा।
ययोः विश्वम् इदम् जगत् इयम् द्यौः पृथिवी मही,
उपस्थे बिभृतः वसु नभन्ताम् अन्यके समे।।4।।
6788. प्र ब्रह्माणि नभाकवत् इन्द्राग्निभ्याम् इरज्यत।
या सप्तबुध्नम् अर्णवम् जिह्मबारम् अप-ऊर्णुतः इन्द्रः
ईशानः ओजसा नभन्ताम् अन्यके समे।।5।।
6789. अपि वृश्च पुराण-वत्, व्रततेः इव गुष्पितम्,
ओजः दासस्य दम्भय।
वयम् तत् अस्य सम्-भृतम्, वसु इन्द्रेण वि भजेमहि,
नभन्ताम् अन्यके समे।।6।।
6790. यत् इन्द्राग्नी जनाः इमे, विह्वयन्ते तना गिरा।
अस्माकेभिः नृभिः वयम्, ससह्याम् पृतन्यतः,
वनुयाम वनुष्यतः नभन्ताम् अन्यके समे।।7।।
6791. या नु श्वेतौ अवः दिवः उत्-चरातः उप द्युभिः।
इन्द्राग्न्योः अनु व्रतम् उहानाः यन्ति सिन्धवः
यान् सीम् बन्धात् अमुञ्चताम्
नभन्ताम् अन्यके समे।।8।।
6792. पूर्वीः ते इन्द्र उप-मातयः, पूर्वीः उत प्र-शस्तयः,
सूनो हिन्वस्य हरिवः।
वस्वः वीरस्य आ-पृचः याः नु साधन्त नः धियः
नभन्ताम् अन्यके समे।।9।।
6793. तम् शिशीत सुवृक्तिभिः
त्वेषम् सत्वानम् ऋग्मियम्।
उतो नु चित् यः ओजषा शुष्णस्य आण्डानि भेदति
जेषत् स्वः-वतीः अपः नभन्ताम् अन्यके समे।।10।।
6794. तम् शिशीत सु-अध्वरम्,
सत्यम् सत्वानम् ऋत्वियम्।
उतो नु चित् यः ओहते आण्डा शुष्णस्य भेदति
अजैः स्वः-वतीः अपः नभन्ताम् अन्यके समे।।11।।
6795. एव इन्द्राग्निभ्याम् पितृवत् नवीयः
मन्धातृवत् अङ्गिरस्वत् अवाचि।
त्रि-धातुना शर्मणा पातम् अस्मान्
वयम् स्याम् पतयः रयीणाम्।।12।।

## सूक्त-41

6796. अस्मै ऊ षु प्र-भूतये वरुणाय
मरुत्भ्यः अर्च विदुः-तरेभ्यः।
यः धीता मानुषाणाम् पश्वः गाः-इव रक्षति
नभन्ताम् अन्यके समे।।1।।
6797. तम् ऊ षु समना गिरा पितृणाम् च मन्मभिः।
नाभाकस्य प्रशस्तिभिः यः सिन्धूनाम् उप उत्-अये
सप्त-स्वसा सः मध्यमः नभन्ताम् अन्यके समे।।2।।
6798. सः क्षपः परि सस्वजे नि उस्रः मायया
दधे सः विश्वम् परि दर्शतः।
तस्य वेनीः अनु व्रतम् उषः तिस्रः अवर्धयन्
नभन्ताम् अन्यके समे।।3।।
6799. यः ककुभः निःधारयः पृथिव्याम् अधि दर्शतः।
सः माता पूर्व्यम् पदम् तत् वरुणस्य सप्तस्य
सः हि गोपाः-इव इर्यः नभन्ताम् अन्यके समे।।4।।
6800. यः धर्ता भुवनानाम् यः उस्राणाम्
अपीच्या वेद नामानि गुह्या।
सः कविः काव्या पुरु रूपम् द्यौः-इव पुष्यति

नभन्ताम् अन्यके समे।।5।।
6801. यस्मिन् विश्वानि काव्या चक्रे नाभिः-इव श्रिता।
त्रितम् जूती सपर्यत व्रजे गावः न सम्-युजे युजे
अश्वान् अयुक्षत नभन्ताम् अन्यके समे।।6।।
6802. यः आसु अत्कः आ-शये विश्वा जातानि एषाम्।
परि धामानि मर्मृशत् वरुणस्य पुरः गये
विश्वे देवाः अनु व्रतम् नभन्ताम् अन्यके सम।।7।।
6803. सः समुद्रः अपीच्यः तुरः द्याम्-इव रोहति
नि यत् आसु यजुः दधे।
सः मायाः अर्चिना पदा अस्तृणात् नाकम् आ अरुहत्
नभन्ताम् अन्यके समे।।8।।
6804. यस्य श्वेता वि-चक्षणा तिस्रः भूमीः अधि-क्षितः।
त्रिः उत्-तराणि पप्रतुः वरुणस्य ध्रुवम् सदः
सः सप्तानाम् इरज्यति नभन्ताम् अन्यके समे।।9।।
6805. यः श्वेतान् अधि-निर्निजः चक्रे कृष्णान् अनु व्रता।
सः धाम पूर्व्यम् ममे यः स्कम्भेन वि रोदसी
अजः न द्याम् अधारयत् नभन्ताम् अन्यके समे।।10।।

## सूक्त-42

6806. अस्तभ्नात् द्याम असुरः विश्व-वेदाः
अमिमीत वरिमाणम् पृथिव्याः।
आ असीदत् विश्वा भुवनानि सम्-राट्
विश्वा इत् तानि वरुणस्य व्रतानि।।1।।
6807. एव वन्दस्व वरुणम् बृहन्तम्
नमस्य धीरम् अमृतस्य गोपाम्।
सः नः शर्म त्रि-वरूथम् वि यंसत्
पातम् नः द्यावापृथिवी उपस्थे।।2।।
6808. इमाम् धियम् शिक्षमाणस्य देव
क्रतुम् दक्षण् वरुण सम् शिशाधि।
यया अति विश्वा दुः-इता तरेम
सु-तर्माणम् अधि नावम् रुहेम।।3।।
6809. आ वाम् ग्रावाणः अश्विना धीमिः विप्राः अचुच्यवुः।
नासत्या सोम-पीतये नभन्ताम् अन्यके समे।।4।।
6810. यथा वाम् अत्रिः अश्विना
गीः-भिः विप्रः अजोहवीत्।
नासत्या सोम-पीतये नभन्ताम् अन्यके समे।।5।।
6811. एव वाम् अह्वे ऊतये यथा अहुवन्त मेधिराः।
नासत्या सोम-पीतये नभन्ताम् अन्यके समे।।6।।

## सूक्त-43

6812. इमे विप्रस्य वेधसः अग्नेः अस्तृत-यज्वनः।
गिरः स्तोमासः ईरते।।1।।
6813. अस्मै ते प्रति-हर्यते जात-वेदः विचर्षणे।
अग्ने जनामि सु-स्तुतिम्।।2।।
6814. आरोकाः-इव घ इत् अह तिग्माः अग्ने तव त्विषः।
दत्-भिः वनानि बप्सति।।3।।
6815. हरयः धूम-केतवः वात-जूताः उप द्यवि।
यतन्ते वृथक् अग्नयः।।4।।
6816. एते त्ये वृथक् अग्नयः इद्धासः सम् अदृक्षत।
उषसाम्-इव केतवः।।5।।
6817. कृष्णा रजांसि पत्सुतः प्र-याने जात-वेदसः।
अग्निः यत् रोधति क्षमि।।6।।
6818. धासिम् कृण्वानः ओषधीः
बप्सत् अग्निः न वायति।
पुनः यन् तरुणीः अपि।।7।।
6819. जिह्वाभिः अह नंनमत् अरचिषा जञ्जणा-भवन्।
अग्निः वनेषु रोचते।।8।।
6820. अप्सु अग्ने सधिः तव सः ओषधीः अनु रुध्यसे।
गर्भे सन् जायसे पुनः।।9।।
6821. उत् अग्ने तव तत् घृतात् अर्चिः रोचते आहुतम्।
निंसानम् जुह्वः मुखे।।10।।
6922. उक्ष-अन्नाय वशा-अन्नाय सोम-पृष्ठाय वेधसे।
स्तोमैः विधेम अग्नये।।11।।
6823. उत त्वा नमसा वयम् होतः वरेण्य-क्रतो।
अग्ने समित्-भिः ईमहे।।12।।
6824. उत त्वा भृगु-वत् शुचे मनुष्वत् अग्ने आ-हुत।
अङ्गिरस्वत् हवामहे।।13।।
6825. त्वम् हि अग्ने अग्निना विप्रः विप्रेण सन् सता।
सखा सख्या सम्-इध्यसे।।14।।
6826. सः त्वम् विप्राय दाशुषे रयिम् देहि सहस्रिणम्।
अग्ने वीर-वतीम् इषम्।।15।।
6827. अग्ने भ्रातः सहः-कृत रोहित्-अश्व शुचिव्रत।
इमम् स्तोमम् जुषस्व मे।।16।।
6828. उत त्वा अग्ने मम स्तुतः वाश्राय प्रति-हर्यते।
गो-स्थम् गावः-इव आशत।।17।।
6829. तुभ्यम् ताः अङ्गिरः-तम विश्वाः सुक्षितयः पृथक्।
अग्ने कामाय येमिरे।।18।।
6830. अग्निम् धीभिः मनीषिणः मेधिरासः विपः-चितः।
अद्म-सद्याय हिन्विरे।।19।।
6831. तम् त्वाम् अज्मेषु वाजिनम्
तन्वानाः अग्ने अध्वरम्।
वह्निम् होतारम् ईडते।।20।।
6832. पुरुत्रा हि सदृङ् असि विशः विश्वाः अनु प्रभुः।
समत्-सु त्वा हवामहे।।21।।
6833. तम् ईडष्व यः आहुतः अग्निः विभ्राजते घृतैः।
इमम् नः शृणवत् हवम्।।22।।
6834. तम् त्वा वयम् हवामहे शृण्वन्तम् जात-वेसम्।

अग्ने घ्नन्तम् अप द्विषः।।23।।
6835. विशाम् राजानम् अद्भुतम्
अधि-अक्षम् धर्मणाम् इमम्।
अग्निम् ईड सः ॐ श्रवत्।।24।।
6836. अग्निम् विश्वायु-वेपसम्
मर्यम् न वाजिनम् हितम्।
सप्तिम् न वाजयामसि।।25।।
6837. घ्नन् मृधाणि अप द्विषः दहन् रक्षांसि विश्वहा।
अग्ने तिग्मेन दीदिहि।।26।।
6838. यम् त्वा जनासः इन्धते मनुष्वत् अङ्गिरःतम।
अग्ने सः बोधि मे वचः।।27।।
6839. यत् अग्ने दिविजाः असि अप्सुजाः वा सहः-कृत।
तम् त्वा गीः-भिः हवामहे।।28।।
6840. तुभ्यम् घ इत् ते जनाः इमे
विश्वाः सुक्षितयः पृथक्.
धासिम् हिन्वन्ति अत्तवे।।29।।
6841. ते घ इत् अग्ने सु-आध्यः अहा विश्वा नृचक्षसः।
तरन्तः स्याम दुः-गहा।।30।।
6842. अग्निम् मन्द्रम् पुरु-प्रियम् शीरम् पावक-शोचिषम्।
हृत्-भिः मन्द्रेभिः ईमहे।।31।।
6843. सः त्वम् अग्ने विभा-वसुः,
सृजन् सूर्यः न रश्मिभिः।
शर्धन् तमांसि जिघ्नसे।।32।।
6844. तत् ते सहस्वः ईमहे दात्रम् यत् न उप-दस्यति।
तत् अग्ने वार्यम् वसु।।33।।

## सूक्त-44

6845. सम्-इधा अग्निम् दुवस्यत
घृतैः बोधयत अतिथिम्।
आ अस्मिन् हव्या जुहोतन।।1।।
6846. अग्ने स्तोमम् जुषस्व मे वर्धस्व अनेन मन्मना।
प्रति स-उक्तानि हर्य नः।।2।।
6847. अग्निम् दूतम् पुरो दधे हव्यवाहम् उप ब्रुवे।
देवा आ सादयादिह।।3।।
6848. उत् ते बृहन्तः अर्चयः सम्-इधानस्य दीदिवः।
अग्ने शुक्रासः ईरते।।4।।
6849. उप त्वा जुह्वः मम घृताचीः यन्तु हर्यत।
अग्ने हव्या जुषस्व नः।।5।।
6850. मन्द्रम् होतारम् ऋत्विजम्
चित्र-भानुम् विभा-वसुम्।
अग्निम् ईड सः ॐ श्रवत्।।6।।
6851. प्रत्नम् होतारम् ईड्यम्
जुष्टम् अग्निम् कवि-क्रतुम्।
अध्वराणाम् अभि-श्रियम्।।7।।
6852. जुषाणः अङ्गिरःतम इमा हव्यानि आनुषक्।
अग्ने यज्ञम् नय ऋतुथा।।8।।
6853. सम्-इधानः ॐ सन्त्य शुक्र-शोचे इह आ वह।
चिकित्वान् दैव्यम् जनम्।।9।।
6854. विप्रम् होतारम् अद्रुहम् धूम-केतुम् विभा-वसुम्।
यज्ञानाम् केतुम् ईमहे।।10।।
6855. अग्ने पाहि नः त्वम् प्रति स्म देव रिषतः।
भिन्धि द्वेषः सहः-कृत।।11।।
6856. अग्निः प्रत्नेन मन्मना शुम्भानः तन्वम् स्वाम्।
कविः विप्रेण ववृधे।।12।।
6857. ऊर्जः नपातम् आ हुवे अग्निम् पावक-शोचिषम्।
अस्मिन् यज्ञे सु-अध्वरे।।13।।
6858. सः नः मित्र-महः त्वम् अग्ने शुक्रेण शोचिषा।
देवैः आ सत्सि बर्हिषि।।14।।
6859. यः अग्निम् तन्वः दमे देवम् मर्तः सपर्यति।
तस्मै इत् दीदयत् वसु।।15।।
6860. अग्निः मूर्धा दिवः ककुत् पतिः पृथिव्याः अयम्।
अपाम् तांसि जिन्वति।।16।।
6861. उत् अग्ने शुचयः तव शुक्राः भ्राजन्तः ईरते।
तव ज्योतींषि अर्चयः।।17।।
6862. ईशिषे वार्यस्य हि दात्रस्य अग्ने स्वः-पतिः।
स्तोता स्याम् तव शर्मणि।।18।।
6863. त्वाम् अग्ने मनीषिणः त्वाम् हिन्वन्ति चित्तिभिः।
त्वाम् वर्धन्तु नः गिरः।।19।।
6864. अदब्धस्य स्वधा-वतः दूतस्य रेभतः सदा।
अग्नेः सख्यम् वृणीमहे।।20।।
6865. अग्निः शुचिव्रत-तमः शुचिः विप्रः शुचिः कविः।
शुचिः रोचते आहुतः।।21।।
6866. उत त्वा धीतयः मम गिरः वर्धन्तु विश्वहा।
अग्ने सख्यस्य बोधि नः।।22।
6867. यत् अग्ने स्याम् अहम् त्वम्
त्वम् वा घ स्याः अहम्।
स्युः ते सत्याः इह आशिषः।।23।।
6868. वसुः वसु-पतिः हि कम् असि अग्ने विभावसुः।
स्याम् ते सुमतौ अपि।।24।।
6869. अग्ने धृतव्रताय ते समुद्राय-इव सिन्धवः।
गिरः वाश्रासः ईरते।।25।।
6870. युवानम् विश्वतिम् कविम् विश्व-अदम् पुरुवेपसम्।
अग्निम् शुम्भामि मन्मभिः।।26।।
6871. यज्ञानाम् रथ्ये वयम् तिग्म-जम्भाय वीडवे।
स्तोमैः इषेम अग्नये।।27।।
6872. अयम् अग्ने त्वे अपि जरिता भूतु सन्त्य।

तस्मै पावक मृडय।।28।।
6873. धीरः हि असि अद्म-सत् विप्रः न जागृविः सदा।
अग्ने दीदयसि द्यवि।।29।।
6874. पुरा अग्ने दुः-इतेभ्यः पुरा मृधेभ्यः कवेः।
प्र नः आयुः वसो तिर।।30।।

## सूक्त-45

6875. आ घ ये अग्निम् इन्धते स्तृणन्ति बर्हिः आनुषक्।
येषाम् इन्द्रः युवा सखा।।1।।
6876. बृहन् इत् इध्मः एषाम् भूरि शस्तम् पृथुः स्वरुः।
येषाम् इन्द्रः युवा सखा।।2।।
6877. अयुद्धः इत् युधा वृतम् शूरः आ अजति सत्वभिः।
येषाम् इन्द्रः युवा सखा।।3।।
6878. आ बुन्दम् वृत्रहा ददे जातः पृच्छत् वि मातरम्।
के उग्राः के ह शृण्विरे।।4।।
6879. प्रति त्वा शवसी वदत् गिरौ अप्सः न योधिषत्।
यः ते शत्रु-त्वम् आ-चके।।5।।
6880. उत त्वम् मघवन् शृणु यः ते वष्टि ववक्षि तत्।
यत् वीडयासि वीड तत्।।6।।
6881. यत् आजिम् याति आजि-कृत् इन्द्रः स्वश्वयुः उप।
रथि-तमः रथिनाम्।।7।।
6882. वि सु विश्वाः अभियुजः वज्रिन् विष्वक् यथा वृह।
भव नः सुश्रवः-तमः।।8।।
6883. अस्माकम् सु रथम् पुरः इन्द्रः कृणोतु सातये।
य यम् धूर्वन्ति धूर्तयः।।9।।
6884. वृज्याम् ते परि द्विषः अरम् ते शक्र दावने।
गमेम इत् इन्द्र गोमतः।।10।।
6885. शनैः चित् यन्तः अद्रिवः अश्व-वन्तः शत-ग्विनः।
विवक्षणाः अनेहसः।।11।।
6886. ऊर्ध्वा हि ते दिवे-दिवे सहस्रा सूनृता शता।
जरितृभ्यः विमंहते।।12।।
6887. विद्म हि त्वा धनम्-जयम्
इन्द्र दृढ चित् आरुजम्।
आदारिणम् यथा गयम्।।13।।
6888. ककुहम् चित् त्वा कवे मन्दन्तु धृष्णो इन्दवः।
आ त्वा पणिम् यत् ईमहे।।14।।
6889. यः ते रेवान् अदाशुरिः प्र-ममर्ष मघत्तये।
तस्य नः वेदः आ भर।।15।।
6880. इमे ऊँ त्वा वि चक्षते सखायः इन्द्र सोमिनः।
पुष्ट-वन्तः यथा पशुम्।।16।।
6891. उत त्वा अबधिरम् वयम्
श्रुत्-कर्णम् सन्तम् ऊतये।
दूरात् इह हवामहे।।17।।
6892. यत् शुश्रुयाः इमम् हवम् दुःमर्षम् चक्रिया उत।
भवेः अपिः नः अन्तमः।।18।।
6893. यत् चित् ह ते अपि व्यथिः जगन्वांसः अमन्महि।
गोदाः इत् इन्द्र बोधि नः।।19।।
6894. आ त्वा रम्भम् न जिव्रयः ररम्भ शवसः पते।
उश्मसि त्वा सधस्थे आ।।20।।
6895. स्तोत्रम् इन्द्राय गायत पुरु-नृम्णाय सत्वने।
नकिः यम् वृण्वते युधि।।21।।
6896. अभि त्वा वृषभ सुते सुतम् सृजामि पीतये।
तृम्प वि अश्नुहि मदम्।।22।।
6897. मा त्वा मूराः अविष्यवः
मा उप-हस्वानः आ दभन्।
माकीम् ब्रह्म-द्विषः वनः।।23।।
6898. इह त्वा गो-परीणसा महे मन्दन्तु राधसे।
सरः गौरः यथा पिब।।24।।
6899. या वृत्रहा परावति सना नवा च चुच्युवे।
ता संसत्-सु प्र वोचत।।25।।
6900. अपिबत् कद्रुवः सुतम् इन्द्रः सहस्र-बाह्वे।
अत्र अदेदिष्ट पौंस्यम्।।26।।
6901. सत्यम् तत् तुर्वशे यदौ विदानः अह्नवाय्यम्।
वि आनट् तुर्वणे शमि।।27।।
6902. तरणिम् वः जनानाम् त्रदम् वाजस्य गोमतः।
समानम् ऊं प्र शंसिषम्।।28।।
6903. ऋभुक्षणम् न वर्तवे उक्थेषु तुग्र्यवृधम्।
इन्द्रम् सोमे सचा सुते।।29।।
6904. यः कृन्तत् इत् वि योन्यम्
त्रि-शोकाय गिरिम् पृथुम्।
गोभ्यः गातुम् निः-एतवे।।30।।
6905. यत् दधिषे मनस्यसि मन्दानः प्र इत् इयक्षसि।
मा तत् कः इन्द्र मृडयः।।31।।
6906. दभ्रम् चित् हि त्वा-वतः कृतम् शृण्वे अधि क्षमि।
जिगातु इन्द्र ते मनः।।32।।
6907. तव इत् ऊँ ताः सु-कीर्तयः असन् उत प्र-शस्तयः।
यत् इन्द्र मृडयासि नः।।33।।
6908. मा नः एकस्मिन् आगसि मा द्वयोः उत त्रिषु।
वधीः मा शूर भूरिषु।।34।।
6909. बिभय हि त्वा-वतः उग्रात् अभि-प्रभङ्गिनः।
दस्मात् अहम् ऋति-सहः।।35।।
6910. मा सख्युः शूनम् आ विदे मा पुत्रस्य प्रभु-वसो।
आ-वृत्वत् भूतु ते मनः।।36।।
6911. कः नु मर्याः अमिथितः सखा सखायम् अब्रवीत्।
जहा कः अस्मत् ईषते।।37।।
6912. एवारे वृषभ सुते असिन्वन् भूरि आवयः।

श्वघ्नी-इव निवता चरन्।।38।।
6913. आ ते एता वचः-युजा हरी गृभ्णे सुमत्-रथा।
यत् ईम् ब्रह्मभ्यः इत् ददः।।39।।
6914. भिन्धि विश्वाः अप द्विषः परि बाधः जहि मृधः।
वसु स्पार्हम् तत् आ भर।।40।।
6915. यत् वीड इन्द्र यत् स्थिरे यत् पर्शाने परा-भृतम्
वसु स्पार्हम् तत् आ भर।।41।।
6916. यस्य ते विश्व-मानुषः भूरेः दत्तस्य वेदति।
वसु स्पार्हम् तत् आ भर।।42।।

## सूक्त-46

6917. त्वा-वतः पुरुवसो वयम् इन्द्र प्रनेतः।
स्मसि स्थातः हरीणाम्।।1।।
6918. त्वाम् हि सत्यम् अद्रिवः विद्म दातारम् इषाम्।
विद्म दातारम् रयीणाम्।।2।।
6919. आ यस्य ते महिमानम् शतम्-ऊते शतक्रतो।
गीः-भिः गृणन्ति कारवः।।3।।
6920. सु-नीथः घ सः मर्त्यः यम् मरुतः यम् अर्यमा।
मित्रः पान्ति अद्रुहः।।4।।
6921. दधानः गोमत्-अश्ववत्
सु-वीर्यम् आदित्य-जूतः एधते।
सदा राया पुरु-स्पृहा।।5।।
6922. तम् इन्द्रम् दानम् ईमहे शवसानम् अभीर्वम्।
ईशानम् रायः ईमहे।।6।।
6923. तस्मिन् हि सन्ति ऊतयः विश्वाः अभीरवः सचा।
तम् आ वहन्तु सप्तयः पुरु-वसुम् मदाय हरयः सुतम्।।7।।
6924. यः ते मदः वरेण्यः यः इन्द्र वृत्रहन्-तमः।
यः आददिः स्वः नृभिः यः पृतनासु दुस्तरः।।8।।
6925. यः दुस्तरः विश्ववार श्रवाय्यः वाजेषु अस्ति तरुता।
सः नः शविष्ठ सवना आ वसो
गहि गमेम गोमति व्रजे।।9।।
6926. गव्यो सु नः यता पुरा अश्वया उत रथया।
वरिवस्य महा-मह।।10।।
6927. नहि ते शूर राधसः अन्तम् विन्दामि सत्रा।
दशस्य नः मघवन् नु चित्
अद्रिवः धियः वाजेभिः आविथ।।11।।
6928. यः ऋष्वः श्रवयत्-सखा विश्वा
इत् सः वेद जनिम् पुरु-स्तुतः।
तम् विश्वे मानुषा युगा इन्द्रम्
हवन्ते तविषम् यत्-स्रुचः।।12।।
6929. सः नः वाजेषु अविता पुरुवसुः
पुरः-स्थाता मघवा वृत्रहा भुवत्।।13।।
6930. अभि वः वीरम् अन्धसः मदेषु
गाय गिरा महा वि-चेतसम्।
इन्द्रम् नाम श्रुत्यम् शाकिनम् वचः यथा।।14।।
6931. ददिः रेक्णः तन्वे ददिः वसु
ददिः वाजेषु पुरु-हूत वाजिनम्।
नूनम् अथ।।15।।
6932. विश्वेषाम् इरज्यन्तम् वसूनाम्
ससह्वांसम् चित् अस्य वर्पसः।
कृप-यतः नूनम् अतिअथ।।16।।
6933. महः सु वः अरम् इषे स्तवामहे
मीडषे अरम्-गमाय जग्मये।
यज्ञेभिः गीः-भिः विश्वमनुषाम् मरुताम्
इयक्षसि गाये त्वा नमसा गिरा।।17।।
6934. ये पातयन्ते अज्मभिः गिरीणाम् स्नुभिः एषाम्।
यज्ञम् महि-स्वनीनाम् सुम्नम्
तुवि-स्वनीनाम् प्र अध्वरे।।18।।
6935. प्रभङ्गम् दुः-मतीनाम् इन्द्र शविष्ठ आ भर।
रयिम् अस्मभ्यम् युज्यम् चोदयत्-मते
ज्येष्ठम् चोदयत्-मते।।19।।
6936. सनितः सु-सनितः उग्र चित्र चेतिष्ठ सूनृत।
प्र-सहा सम्-राट् सहुरिम्
सहन्तम् भुज्युम् वाजेषु पूर्व्यम्।।20।।
6937. आ सः एतु यः ईवत् आ अदेवः पूर्तम् आ-ददे।
यथा चित् वशः अश्व्यः पृथु-श्रवसि
कानीत अस्याः वि-उषि आददे।।21।।
6938. षष्टिम् सहस्रा अश्व्यस्य अयुता
असनम् उष्ट्रानाम् विंशतिम् शता।
दश श्यावीनाम् शता दश
त्रि-अरुषीणाम् दश गवाम् सहस्रा।।22।।
6939. दश श्यावाः ऋधत्-रयः वीत-वारासः आशवः।
मथ्राः नेमिम् नि ववृतुः।।23।।
6940. दानासः पृथु-श्रवसः कानीतस्य सु-राधसः।
रथम् हिरण्ययम् ददत् मंहिष्ठः
सूरिः अभूत् वर्षिष्ठम् अकृत श्रवः।।24।।
6941. आ नः वायो महे तने याहि मखाय पाजसे।
वयम् हि ते चकृम भूरि
दावने सद्यः चित् महि दावने।।25।।
6942. यः अश्वेभिः वहते वस्ते
उस्राः त्रिः सप्त सप्तीनाम्।
एभिः सोमेभिः सोमसुत्-भिः
सोमपाः दानाय शुक्रपूत-पाः।।26।।
6943. यः मे इमम् चित् उ त्मना
अमन्दत् चित्रम् दावने।
अरट्वे अक्षे नहुषे सु-कृत्वानि सुकृत्-तराय सु-क्रतुः।।27।।

6944. उचथ्ये वपुषि यः स्व-राट् उत वायो घृतस्नाः।
अश्व-इषितम् रजः-इषितम् शुना-इषितम्
प्र अज्म तत् इदम् नु तत्।।28।।
6945. अध प्रियम् इषिराय षष्टिम् सहस्रा असनम्।
अश्वानाम् इत् न वृष्णाम्।।29।।
6946. गावः न यूथम् उप यन्ति वध्रयः
उप मा आ यन्ति वध्रयः।।30।।
6947. अध यत् चारथे गणे शतम् उष्ट्रान् अचिक्रदत्।
अध श्वित्नेषु विंशतिम् शता।।31।।
6948. शतम् दासे बल्बूथे विप्रः तरुक्षे आ ददे।
ते ते वायो इमे जनाः मदन्ति
इन्द्र-गोपाः मदन्ति देव-गोपाः।।32।।
6949. अध स्या योषणा मही प्रतीची वशम् अश्व्यम्।
अधि-रुक्मा वि नीयते।।33।।

## सूक्त-47

6950. महि वः महताम् अवः वरुण मित्र दाशुषे।
यम् आदित्याः अभि द्रुहः रक्षथ न ईम् अघम्
नशत् अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।1।।
6951. विद देवाः अघानाम् आदित्यासः अप-आकृतिम्।
पक्षा वयः यथा उपरि वि अस्मे शर्म यच्छत
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।2।।
6952. वि अस्मे अधि शर्म तत् पक्षा वयः न यन्तन।
विश्वानि विश्व-वेदसः वरूथ्या मनामहे
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।3।।
6953. यस्मै अरासत क्षयम् जीवातुम् च प्रचेतसः।
मनोः विश्वस्य घ इत् इमे आदित्याः रायः ईशते
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।4।।
6954. परि नः वृणजन् अघा दुः-गानि रथ्यः यथा।
स्याम इत् इन्द्रस्य शर्मणि आदित्यानाम् उत
अवसि अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।।।5।।
6955. परि-ह्वृता इत् अना जनः युष्मा-दत्तस्य वायति।
देवाः अदभ्रम् आशवः यम् आदित्याः अहेतन
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।6।।
6956. न तम् तिग्मम् चन त्यजः
न द्रासत् अभि तम् गुरु।
यस्मै ऊँ शर्म सप्रथः आदित्यासः अराध्वम्
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।7।।
6957. युष्मे देवाः अपि स्मसि युध्यन्तः-इव वर्मसु।
यूयम् महः नः एनसः यूयम् अर्भात् उरुष्यत
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।8।।
6958. अदितिः नः उरुष्यतु अदितिः शर्म यच्छतु।
माता मित्रस्य रेवतः अर्यम्णः वरुणस्य च
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।9।।
6959. यत् देवाः शर्म शरणम् यत् भद्रम् यत् अनातुरम्।
त्रि-धातु यत् वरूथ्यम् तत् अस्मासु वि यन्तन
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।10।।
6960. आदित्याः अव हि ख्यत अधि कूलात्-इव स्पशः।
सुतीर्थम् अर्वतः यथा अनु नः नेषथ सुगम्
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।11।।
6961. न इह भद्रम् रक्ष-स्विने न अव-यै न उपयै उत।
गवे च भद्रम् धेनवे वीराय च श्रवस्यते
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।12।।
6962. यत् आविः यत् अपीच्यम् देवासः अस्ति दुः-कृतम्।
त्रिते तत् विश्वम् आप्त्ये आरे अस्मत् दधातन
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।13।।
6963. यत् च गोषु दुः-स्वप्न्यम्
यत् च अस्मे दुहितः दिवः।
त्रिताय तत् विभावरि आप्त्याय परा वह
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।14।।
6964. निष्कम् वा घ कृणवते स्रजम् वा दुहितः दिवः।
त्रिते दुः-स्वप्न्यम् सर्वम् आप्त्ये परि दद्मसि
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।15।।
6965. तत्-अन्नाय तत्-अपसे तम् भागम् उप-सेदुषे।
त्रिताय च द्विताय च उषः दुः-स्वप्न्यम् वह
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।16।।
6966. यथा कलाम् यथा शफम्
यथा ऋणम् सम्-नयामसि।
एव दुः-स्वप्न्यम् सर्वम् आप्त्ये सम् नयामसि
अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।17।।
6967. अजैष्म अद्य असनाम च अभूम् अनागसः वयम्।
उषः यस्मात् दुःस्वप्न्यात् अभैष्म अप तत्
उच्छतु अनेहसः वः ऊतयः सु-ऊतयः वः ऊतयः।।18।।

## सूक्त-48

6968. स्वादोः अभक्षि वयसः सु-मेधाः
सु-आध्यः वरिवोवित्-तरस्य।
विश्वे यम् देवाः उत मर्त्यासः
मधु ब्रुवन्तः अभि सम्-चरन्ति।।1।।
6969. अन्तः च प्र अगाः अदितिः भवासि
अव-याता हरसः दैव्यस्य।
इन्दो इन्द्रस्य सख्यम् जुषाणः
श्रौष्टी-इव धुरम् अनु राये ऋध्याः।।2।।
6970. अपाम सोमम् अमृताः अभूम
अगन्म ज्योतिः अविदाम देवान्।
किम् नूनम् अस्मान् कृणवत् अरातिः

किम् ऊँ धूर्तिः अमृत मर्त्यस्य।।3।।
6971. शम् नः भव हृदे आ पीतः इन्दो
पिता-इव सोम सूनवे सु-शेवः।
सखा-इव सख्ये उरुशंस धीरः
प्र नः आयुः जीवसे सोम तारीः।।4।।
6972. इमे मा पीताः यशसः उरुष्यवः
रथम् न गावः सम् अनाह पर्वसु।
ते मा रक्षन्तु विस्रसः चरित्रात्
उत मा स्रामात् यवयन्तु इन्दवः।।5।।
6973. अग्निम् न मा मथितम् सम्
दिदीपः प्र चक्षय कृणुहि वस्यसः नः।
अथ हि ते मदे आ सोम मन्ये
रेवान्-इव प्र चर पुष्टिम् अच्छ।।6।।
6974. इषिरेण ते मनसा सुतस्य
भक्षीमहि पित्र्यस्य-इव रायः।
सोम राजन् प्र नः आयूंषि
तारीः अहानि-इव सूर्यः वासराणि।।7।।
6975. सोम राजन् मृडय नः स्वस्ति
तव स्मसि व्रत्याः तस्य विद्धि।
अलर्ति दक्षः उत मन्युः इन्दो मा
नः अर्यः अनु-कामम् परा दाः।।8।।
6976. त्वम् हि नः तन्वः सोम गोपाः
गात्रे-गात्रे नि-ससत्थ नृ-चक्षाः।
यत् ते वयम् प्र-मिनाम् व्रतानि
सः नः मृड सु-सखा देव वस्यः।।9।।
6977. ऋदूदरेण सख्या सचेय यः
मा न रिष्येत् हरि-अश्व पीतः।
अयम् यः सोमः नि अधायि अस्मे
तस्मै इन्द्रम् प्र-तिरम् एमि आयुः।।10।।
6978. अप त्याः अस्थुः अनिराः
अमीवाः निः अत्रसन् तमिषीचीः अभैषुः।
आ सोमः अस्मान् अरुहत् विहायाः
अगन्म यत्र प्र-तिरन्ते आयुः।।11।।
6979. यः नः इन्दुः पितरः हृत्सु
पीतः अमर्त्यः मर्त्यान् आ-विवेश।
तस्मै सोमाय हविषा विधेम
मृडके अस्य सु-मतौ स्याम।।12।।
6980. त्वम् सोम पितृभिः सम्-विदानः
अनु द्यावापृथिवी आ ततन्थ।
तस्मै ते इन्दो हविषा विधेम
वयम् स्याम पतयः रयीणाम्।।13।।
6981. त्रातारः देवाः अधि वोचत नः
मा नः निद्रा ईशत मा उत जल्पिःय़
वयम् सोमस्य विश्वह प्रियासः
सुवीरासः विदथम् आ वदेम।।14।।
6982. त्वम् नः सोम विश्वतः वयः-धाः
त्वम् स्वः-वित् आ विश नृचक्षाः।
त्वम् नः इन्दो ऊतिभिः सजोषाः
पाहि पश्चातात् उत वा पुरस्तात्।।15।।

# अथ वालखिल्यम्

## सूक्त 49

6983. अभि प्र वः सुराधसम् इन्द्रम् अर्च यथा विदे।
यः जरितृभ्यः मघवा पुरुवसु सहस्त्रेण इव शिक्षति।।1।।
6984. शतानीक इव प्र जिगाति
धृष्णुया हन्ति वृत्राणि दाशुषे।
गिरेः इव प्र रसाः अस्य
पिन्विरे दत्राणि पुरुभोजसः।।2।।
6985. आ त्वा सुतासः इन्द्रवः मदाः ये इन्द्र गिर्वणः।
आपः न वज्रिन् अनु ओक्यम् सरः पृणन्ति शूर राधसे।3।।
6986. अनेहसम् प्रतरणम् विवक्षणम्
मध्वः स्वादिष्ठम् ईम् पिब।
आ यथा मन्दसानः किरासि नः
प्र क्षुद्रेव आत्मना धृष्।।4।।
6987. आ नः स्तोमम् उप द्रवत्
हियानः अश्वः न सोतृभिः।
यम् ते स्वधावन् स्वदयन्ति
धेनवः इन्द्र कण्वेषु रातयः।।5।।
6988. उग्रम् न वीरम् नमसा उप
सेदिम विभूतिम् अक्षिता वसुम्।
उद्रीव वज्रिन् अवतो न सिञ्चते,
क्षरन्ति इन्द्र धीतयः।।6।।
6989. यद्ध नूनम् यद् वा यज्ञे यद् वा पृथिव्याम् अधि।
अतो नो यज्ञम् आशुभिः महेमते
उग्र उग्रेभिः आ गहि।।7।।
6990. अजिरासो हरयो ये त आशवो वाता इव प्रसक्षिणः।
येभिः अपत्यम् मनुषः परीयसे येभिः
विश्वम् स्वः दृशे।।8।।
6991. एतावतः त ईमहे इन्द्र सुम्नस्य गोमतः।
यथा प्रावो मघवन् मेध्यातिथिम्
यथा नीपातिथिम् धने।।9।
6992. यथा कण्वे मघवन् त्रसदस्यवि यथा पक्थे दशव्रजे।
यथा गोशर्ये असनोः ऋजीश्वनि इन्द्र गोमत्
हिरण्यवत्।10।

## सूक्त - 50

6993. प्र सु श्रुतम् सु राधसम् अर्चा शक्रम् अभिष्टये।
यः सुन्वते स्तुवते काम्यम् वसु सहस्रेण इव मंहते।।1।।
6994. शतानीका हेतयो अस्य,
दुष्टरा इन्द्रस्य समिषो महीः।
गिरिः न भुज्मा मघवत्सु,
पिन्वते यदीम् सुता अमन्दिषुः।।2।।
6995. यदीम् सुतास इन्दवो अभि प्रियम् अमन्दिषुः।
आपो न धायि सवनम् म आ,
वसो दुघा इव उप दाशुषे।।3।।
6996. अनेहसम् वो हवमानम्,
ऊतये मध्वः क्षरन्ति धीतयः
आ त्वा वसो हवमानास,
इन्दव उप स्तोत्रेषु दधिरे।।4।।
6997. आ नः सोमे स्वध्वर,
इयानो अत्यो न तोषते।
यम् ते स्वदावन् स्वदन्ति,
गूर्तयः पौरे छन्दयसे हवम्।।5।।
6998. प्र वीरम् उग्रम् विविचिम्
धनस्पृतम् विभूतिम् राधसो महः।
उद्रीव वज्रिन् अवतो वसुत्वना सदा पीपेथ दाशुषे।।6।।
6999. यत् ह नूनम् परावति यत् वा पृथिव्याम् दिवि।
युजान इन्द्र हरिभिः महेमते ऋष्व ऋष्वेभिः आ गहि।।7।।
7000. रथिरासो हरयो ये ते अस्रिध
ओजो वातस्य पिप्रति।
येभिः नि दस्युम् मनुषो
निघोषयो येभिः स्वः परीयसे।।8।।
7001. एतावतः ते वसो विद्याम शूर नव्यसः।
यथा प्राव एतशम् कृतव्ये धने यथा वशम् दशव्रजे।।9।।
7002. यथा कण्वे मघवन् मेधे अध्वरे दीर्घनीथे दमूनसि।
यथा गोशर्ये असिषासो अद्रिवो मयि गोत्रम् हरिश्रियम्।10।।

## सूक्त - 51

7003. यथा मनौ साम्वरणौ सोमम् इन्द्र अपिबः सुतम्।
नीपातिथौ मघवन् मेध्यातिथौ पुष्टिगौ श्रुष्टिगौ सचा।।1।।
7004. पार्षद्वाणः प्रस्कण्वम् सम् असायत्
शयानम् जिव्रिम् उद्धितम्।
सहस्राणि असिषासद् गवाम्
ऋषिः त्वोतो दस्यवे वृकः।।2।।
7005. य उक्थेभिः न विन्धते चिकिद्यः ऋषिचोदनः।
इन्द्रम् तम् अच्छा वद नव्यस्या मती
अरिष्यन्तम् न भोजसे।।3।।
7006. यस्मा अर्कम् सप्तशीर्षाणम्
आनृचुः त्रिधातुम् उत्तमे पदे।
स तु इमा विश्वा भुवनानि
चिक्रद् अदादित् जनिष्ट पौंस्यम्।।4।।
7007. यो नो दाता वसूनाम् इन्द्रम् तम् हूमहे वयम्।
विद्मा हि अस्य सुमतिम्
नवीयसीम् गमेम गोमति व्रजे।5।।
7008. यस्मै त्वम् वसो दानाय
शिक्षसि स रायस्पोषम् अश्नुते।
तम् त्वा वयम् मघवन् इन्द्र
गिर्वणः सुतावन्तो हवामहे।।6।।
7009. कदा चन स्तरीरसि न इन्द्र सश्चसि दाशुषे।
उप उप इन्नु मघवन् भूय
इन्नु ते दानम् देवस्य पृच्यते।।7।।
7010. प्र यो ननक्षे अभि ओजसा
क्रिविम् वधैः शुष्णम् निघोषयन्।
यदेद् स्तम्भीत् प्रथयन् अमूम्
दिवम् आदित् जनिष्ट पार्थिवः।।8।।
7011. यस्य अयम् विश्व आर्यो दासः शेवधिपः अरिः।
तिरश्चिद् अर्ये रुशमे पवीरवि
तुभ्येत् सो अज्यते रयिः।।9।।
7012. तुरण्यवो मधुमन्तम् घृतश्चुतम्
विप्रासो अर्कम् आनृचुः।
अस्मे रयिः पप्रथे वृष्ण्यम्
शवो अस्मे सुवानास इन्दवः।।10।।

## सूक्त - 52

7013. यथा मनौ विवस्वति सोमम् शक्र अपिबः सुतम्।
यथा त्रिते छन्द इन्द्र जुजोषसि आयौ मादयसे सचा।।1।।
7014. पृषध्रे मेध्ये मातरिश्वनि इन्द्र सुवाने अमन्दथाः।
यथा सोमम् दशशिप्रे दशोण्ये स्यूमरश्मौ ऋजूनसि।।2।।
7015. य उक्था केवला दधे यः सोमम् धृषिता अपिबत्।
यस्मै विष्णुः त्रीणि पदा विचक्रम उप मित्रस्य धर्मभिः।3।
7016. यस्य त्वम् इन्द्र स्तोमेषु
चाकनो वाजे वाजिन् शतक्रतो।
तम् त्वा वयम् सुदुघाम् इव
गोदुहो जुहूमसि श्रवस्यवः।।4।।
7017. यो नो दाता स नः पिता महान् उग्र ईशानकृत्।
अयामन् उग्रो मघवा परूवसुः गोः अश्वस्य प्र दातु नः।।5।।
7018. यस्मै त्वम् वसोः दानाय
मंहसे स रायस्पोषम् इन्वति।
वसूयवो वसुपतिम् शतक्रतुम्
स्तोमैः इन्द्रम् हवामहे।।6।।

7019. कदा चन प्र युच्छसि उभे नि पासि जन्मनी।
तुरीय आदित्य हवनम् ते इन्द्रियम्
आ तस्थौ अमृतम् दिवि।।7।।
7020. यस्मै त्वम् मघवन् इन्द्र गिर्वणः शिक्षो दाशुषे।
अस्माकम् गिर उत सुष्टुतिम् वसो कण्ववत् शृणुधी हवम्।8
7021. अस्तावि मन्म पूर्व्यम् ब्रह्म इन्द्राय वोचत।
पूर्वीः ऋतस्य बृहतीः अनूषत स्तोतुः मेधा असृक्षत।।9।।
7022. सम् इन्द्रो रायो बृहतीः अधूनुत
सम् क्षोणी सम् उ सूर्यम्।
सम् शुक्रासः शुचयः सम् गवाशिरः
सोमा इन्द्रम् अमन्दिषु।।10।।

## सूक्त - 53

7023. उपमम् त्वा मघोनाम् ज्येष्ठम् च वृषभाणाम्।
पूर्भित्ततम् मघवन् इन्द्र गोविदम् ईशानम् राय ईमहे।।1।।
7024. य आयुम् कुत्सम् अतिथिग्वम्
अर्दयो वावृधानो दिवेदिवे।
तम् त्वा वयम् हर्यश्वम् शतक्रतुम् वाजयन्तो हवामहे।।2।।
7025. आ नो विश्वेषाम् रसम् मध्वः सिञ्चन्तु अद्रयः।
ये परवति सुन्विरे जनेषु आ ये अर्वावति इन्दवः।।3।।
7026. विश्वा द्वेषांसि जहि च अव च
आ कृधि विश्वे सन्वन् त्वा वसु।
शीष्टेषु चित्ते मदिरासो अंशवो यत्रा सोमस्य तृम्पसि।।4।।
7027. इन्द्र नेदीय एदिहि मितमेधाभिः ऊतिभिः।
आ शन्तम् शन्तमाभिः अभिष्टिभिः आ स्वापे स्वापिभिः।5।
7028. आजितुरम् सत्पतिम् विश्वचर्षणिम्
कृधि प्रजासु आ भगम्।
प्र सू तिरा शचीभिः ये त उक्थिनः
क्रतुम् पुनत आनुषक्।।6।।
7029. यः ते साधिष्ठो अवसे तेस्याम भरेषु ते।
वयम् होत्राभिः उत देवहूतिभिः ससवांसो मनामहे।।7।।
7030. अहम् हि ते हरिवो ब्रह्म
वाजयुः आजिम् यामि सदोतिभिः।
त्वाम् इत् एव तम् अमे सम्
अश्वयुः गव्युः अग्रे मथीनाम्।।8।।

## सूक्त - 54

7031. एतत् ते इन्द्र वीर्यम् गीर्भिः गृणन्ति कारवः।
ते स्तोभन्तः ऊर्जम् अवन् घृतश्चुतम्
पौरासो नक्षन् धीतिभिः।।1।।
7032. नक्षन्त इन्द्रम् अवसे सुकृत्यया
येषाम् सुतेसु मन्दसे।
यथा सम्वर्ते अमदो यथा कृशे एव अस्मे इन्द्र मत्स्व।।2।।
7033. आ नो विश्वे सजोषसो देवासो गन्तन उप नः।
वसवो रुद्रा अवसे न आ गमन् शृण्वन्तु मरुतो हवम्।।3।।
7034. पूषा विष्णुः हवनम् मे
सरस्वती अवन्तु सप्त सिन्धवः।
आपो वातः पर्वतासो वनस्पतिः शृणोतु पृथ्वी हवम्।।4।।
7035. यत् इन्द्र राधो अस्ति ते माघोनम् मगवत्तम।
तेन नो बोधि सधमाद्यो वृधे भगो दानाय वृत्रहन्।।5।।
7036. आजिपते नृपते त्वम् इत् हि
नो वाज आ वक्षि सुकृतो।
वीती होत्राभिः उत देववीतिभिः ससवांसो व शृण्विरे।।6।।
7037. सन्ति हि अर्ये आशिषः इन्द्र आयुः जनानाम्।
अस्मान् नक्षस्व मघवन् उप अवसे
धुक्षस्व पिप्युषीम् इषम्।।7।।
7038. वयम् ते इन्द्र स्तोममेभिः
विधेम त्वम्  अस्माकम् शतक्रतो।।
महि स्थरम् शशयम् राधो
अह्रयम् प्रस्कण्वाय न तोशय।।8।।

## सूक्त - 55

7039. भूरि इन्द्रस्य वीर्यम् वि अख्यम् अभि आ अयति।
राधः ते दस्यवे वृक्।।1।।
7040. शतम् श्वेतासः उक्षणो दिवि तारो न रोचन्ते।
मह्ना दिवम् न तस्तभुः।।2।।
7041. शतम् वेणून् शतम् शुनः शतम् चर्माणि म्लातानि।
शतम् मे बल्बजस्तुकाः अरुषीणाम् चतुःशतम्।।3।।
7042. सुदेवाः स्थ काण्वायना वयोवयो
विचरन्तः।अश्वासो न चङ्क्रमत।।4।।
7043. आदित् साप्तस्य चर्किरन् आ अनूनस्य महि श्रवः।
श्यावीः अति ध्वसन् पथः चक्षुषा चन सन्नसे।।5।।

## सूक्त - 56

7044. प्रति ते दस्यवे वृक राधो अदर्शि अह्रयम्।
द्यौः न प्रथितः शवः।।1।।
7045. दश मह्यम् पौतकृतः सहस्रः दस्यवे वृकः।
नित्यात् रायो अमंहत।।2।।
7046. शतम् मे गर्दभानाम् शतम् ऊर्णावतीनाम्।
शतम् दासान् अति स्रजः।।3।।
7047. तत्रो अपि प्राणीयत पूतक्रतायै व्यक्ता।
अश्वानाम् इत् न यूथ्याम्।।4।।
7048. अचेति अग्निः चिकितुः हव्यवाट् स सुमद्रथः।

अग्निः शुक्रेण शोचिषा बृहत् सूरो
अरोचत दिवि सूर्यो अरोचत।।5।।

## सूक्त - 57

7049. युवम् देवा क्रतुना पूर्व्येण
युक्ता रथेन तविषम् यजत्रा।
आगच्छतम् नासत्या शचीभिः
इदम् तृतीयम् सवनम् पिबाथः।।1।।
7050. युवाम् देवाः त्रयः एकादशासः
सत्याः सत्यस्य ददृशे पुरस्तात्।
अस्माकम् यज्ञम् सवनम् जुषाणः
पातम् सोमम् अश्विना दीद्यग्नी।।2।।
7051. पनाय्यम् तद् अश्विना कृतम् वाम्
वृषभो दिवो रजसः पृथिव्याः।
सहस्रम् शंसा उत ये गविष्टौ
सर्वान् इत् तान् उप यातः पिबध्यै।।3।।
7052. अयम् वाम् भागो निहितो यजत्रा
इमा गिरो नासत्या उप यातम्।
पिबतम् सोमम् मधुमन्तम् अस्मे
प्र दाश्वासम् अवत शचीभिः।। 4।।

## सूक्त - 58

7053. यम् ऋत्विजो बहुधा कल्पयन्तः
सचेतसो यज्ञम् इमम् वहन्ति।
यो अनूचानो ब्राह्मणो युक्तः आसीत्
का स्वित् तत्र यजमानस्य संवित्।।1।।
7054. एक एव अग्निः बहुधा समिद्धः
एकः सूर्यो विश्वम् अनु प्रभूतः।
एक एव उषाः सर्वम् इदम् वि भाति
एकम् वा इदम् वि वभूब सर्वम्।।2।।
7055. ज्योतिष्मन्तम् केतुमन्तम् त्रिचक्रम्
सुखम् रथम् सुषदम् भूरिवारम्।
चित्रामघा यस्य योगे अधियज्ञे
तम् वाम् हुवे अति रिक्तम् पिबध्यै।।3।।

## सूक्त - 59

7056. इमानि वाम् भागधेयानि सिस्रत
इन्द्रावरुणा प्र महे सुतेषु वाम्।
यज्ञेयज्ञे ह सवना भुरण्यथो
यत् सुन्वते यजमानाय शिक्षथः।।1।।
7057. निः षिध्वरीः ओषधीः आपः आस्ताम्
इन्द्रावरुणा महिमानम् आशत।
या सिस्रतू रजसः पारे अध्वनो
ययोः शत्रुः न किः आत् एव ओहते।।2।।
7058. सत्यम् तत् इन्द्रावरुणा कृशस्य
वाम् मध्व ऊर्मिम् दुहते सप्त वाणीः।
ताभिः दाश्वांसम् अवतम् शुभस्पती
यो वाम् अदब्धो अभि पाति चित्तिभिः।।3।।
7059. घृतप्रुषः सौम्यः जीरदानवः
सप्त स्वसारः सदने ऋतस्य।
या ह वाम् इन्द्रावरुणा घृतः चुतः
ताभिः धत्तम् यजमानाय शिक्षतम्।।4।।
7060. अवोचाम महते सौभगाय सत्यम्
त्वेषाभ्याम् महिमानम् इन्द्रियम्।
अस्मान् इन्द्रावरुणा घृतः चुतः
त्रिभिः साप्तेभिः अवतम् शुभस्पती।।5।।
7061. इन्द्रावरुणा यत् ऋषिभ्यो मनीषाम्
वाचो मतिम् श्रुतम् अदत्तम् अग्रे।
यानि स्थानानि असृजन्त धीरा
यज्ञम् तन्वानाः तपसा अभि अपश्यम्।।6।।
7062. इन्द्रावरुणा सौमनसम् अदृप्तम्
रायस्पोषम् यजमानेषु धत्तम्।
प्रजाम् पुष्टिम् भूतिम् अस्मासु धत्तम्
दीर्घायुत्वाय प्र तिरतम् न आयुः।।7।।

।।इति वालखिल्यम् समाप्तम्।।

## सूक्त - 60

7063. अग्ने आ याहि अग्निभिः होतारम् त्वा वृणीमहे।
आ त्वाम् अनक्तु प्र-यता हविष्मती
यजिष्ठम् बर्हिः आ-सदे।।1।।
7064. अच्छ हि त्वा सहसः सूनो
अङ्गिरः स्रुचः चरन्ति अध्वरे।
ऊर्जः नपातम् घृतकेशम् ईमहे अग्निम् यज्ञेषु पूर्व्यम्।।2।।
7065. अग्ने कविः वेधाः असि होता पावकः यक्ष्यः।
मन्द्रः यजिष्ठ अध्वरेषु ईड्यः विप्रेभिः शुक्र मन्मभिः।।3।।
7066. अद्रोघम् आ वह उशतः
यविष्ठ्य देवान अजस्र वीतये।
अभि प्रयांसि सुधिता आ वसो
गहि मन्दस्व धीतिभिः हितः।।4।।
7067. त्वम् इत् स-प्रथाः असि अग्ने त्रातः ऋतः कविः।
त्वाम् विप्रासः सम्-इधान
दीदिवः आ विवासन्ति वेधसः।।5।।
7068. शोच शोचिष्ठ दीदिहि विशे
मयः रास्व स्तोत्रे महान् असि।
देवानाम् शर्मन् मम सन्तु सूरयः शत्रु-सहः सु-अग्नयः।।6।।
7069. यथा चित् वृद्धम् अतसम्
अग्ने सम्-जूर्वसि क्षमि।
एव दह मित्र-महः यः अस्म-ध्रुक्

दुः-मन्मा क- च वेनति।।7।।
7070. मा नः मर्ताय रिपवे रक्षस्विने
मा अघ-शंसाय रीरधः।
अस्रेधत्-भिः तरणि-भिः यविष्ठ्य
शिवेभिः पाहि पायुभिः।।8।।
7071. पाहि नः अग्ने एकया पाहि उत द्वितीयया।
पाहि गीः-भिः तिसृभिः ऊर्जाम्
पते पाहि चतसृ-भिः वसो।9।।
7072. पाहि विश्वस्मात् रक्षसः
अराव्णः प्र स्म वाजेषु नः अव।
त्वाम् इत् हि नेदिष्ठम् देव-तातये
आपिम् नक्षामहे वृधे।।10।।
7073. आ नः अग्ने वयः-वृधम् रयिम् पावक शंस्यम्।
रास्व च नः उप-माते पुरु-स्पृहम्
सुनीती स्वयशः-तरम्।।11।।
7074. येन वंसाम पृतनासु शर्धतः तरन्तः अर्यः आ-दिशः।
सः त्वम् नः वर्ध प्रयसा शचीवसो
जिन्व धियः वसु-विदः।।12।।
7075. शिशानः वृषभः यथा अग्निः शृङ्गे दविध्वत्।
तिग्माः अस्य हनवः न प्रति-धृषे
सु-जम्भः सहसः यहुः।।13।।
7076. नहि ते अग्ने वृषभ प्रति-धृषे
जम्भासः यत् वि-तिष्ठसे।
सः त्वम् नः होतः सु-हुतम्
हविः कृधि वंस्व नः वार्या पुरु।।14।।
7077. शेषे वनेषु मात्रोः सम् त्वा मर्तासः इन्धते।
अतन्द्रः हव्या वहसि हविः-कृतः
आत् इत् देवेषु राजसि।।15।।
7078. सप्त होतारः तम् इत् ईडते
त्वा अग्ने सु-त्यजम् अह्नयम्।
भिनत्सि अद्रिम् तपसा वि शोचिषा
प्र अग्ने तिष्ठ जनान अति।।16।।
7079. अग्निम्-अग्निम् वः अध्रिगुम् हुवेम वृक्त-बर्हिषः।
अग्निम् हित-प्रयसः शश्वतीषु
आ होतारम् चर्षणीनाम्।।17।।
7080. केतेन शर्मन् सचते सु-सामनि
अग्ने तुभ्यम् चिकित्वना।
इषण्यया नः पुरु-रूपम् आ
भर वाजम् नेदिष्ठम् ऊतये।।18।।
7081. अग्ने जरितः विश्पतिः तेपानः देव रक्षसः।
अप्रोषि-वान् गृहपतिः महान्
असि दिवः पायुः दुरोणयुः।।19।।
7082. मा नः रक्षः आ वेशीत् आघृणिवसो
मा यातुः यातु-मावताम्।
परः-गव्यूति अनिराम् अप
क्षुधम् अग्ने सेध रक्षस्विनः।।20।।

## सूक्त-61

7083. उभयम् शृणवत् च नः इन्द्रः अर्वाक् इदम् वचः।
सत्राच्या मघवा सोम-पीतये धिया शविष्ठः आ गमत्।।1।।
7084. तम् हि स्व-राजम् वृषभम् तम्
ओजसे धिषणे इति निः-ततक्षतुः।
उत उप-मानाम् प्रथमः नि सीदसि
सोम-कामम् हि ते मनः।।2।।
7085. आ वृषस्व पुरुवसो सुतस्य इन्द्र अन्धसः।
विद्म हि त्वा हरिवः पृत्सु ससहिम्
अधृष्टम् चित् दधृष्वणिम्।।3।।
7086. अप्रामृसत्य मघवन् तथा
इत् असत् इन्द्र क्रत्वा यथा वशः।
सनेम वाजम् तव शिप्रिन्
अवसा मक्षु चित् यन्तः अद्रिवः।।4।।
7087. शग्धि ऊँ सु शचीपते इन्द्र विश्वाभिः ऊतिभिः।
भगम् न हि त्वा यशसम्
वसु-विदम् अनु शूर चरामसि।।5।।
7088. पौरः अश्वस्य पुरु-कृत् गवाम्
असि उत्सः देव हिरण्ययः।
नकिः हि दानम् परि-मर्धिषत्
त्वे यत्-यत् यामि यत् आ भर।।6।।
7089. त्वम् हि आ इहि चेरवे विदाः भगम् वसुत्तये।
उत् ववृषस्व मघवन् गो-इष्टये
उत् इन्द्र अश्वम्-इष्टये।।7।।
7090. त्वम् पुरु सहस्राणि शतानि च यूथा दानाय मंहसे।
आ पुरम्-दरम् चकृम् विप्र-वचसः
इन्द्रम् गायन्तः अवसे।।8।।
7091. अविप्रः वा यत् अविधत् विप्रः वा इन्द्र ते वचः।
सः प्र ममन्दत् त्वा-या शतक्रतो
प्राचामन्यो अहम्-सन्।।9।।
7092. उग्र-बाहुः म्रक्ष-कृत्वा
पुरम्-दरः यदि मे शृणवत् हवम्।
वसु-यवः वसु-पतिम् शत-क्रतुम्
स्तोमैः इन्द्रम् हवामहे।।10।।
7093. न पापासः मनामहे न अरायासः न जल्हवः।
यत् इत् नु इन्द्रम् वृषणम्
सचा सुते सखायम् कृणवामहै।।11।।
7094. उग्रम् युयुज्म पृतनासु
ससहिम् ऋण-कातिम् अदाभ्यम्।

वेद भृमम् चित् सनिता रथि-तमः
वाजिनम् यम् इत् ऊँ नशत्।।12।।
7095. यतः इन्द्र फयामहे ततः नः अभयम् कृधि।
मघ-वन् शग्धि तव तत् नः
ऊतिभिः वि द्विषः वि मृधः जहि।।13।।
7096. त्वम् हि राधःपते राधसः
महः क्षयस्य असि विधतः।
तम् त्वा वयम् मघ-वन्
इन्द्र गिर्वणः सुत-वन्तः हवामहे।।14।।
7097. इन्द्रः स्पट् उत वृत्रहा परः-पाः नः वरेण्यः।
सः नः रक्षिषत् चरमम् सः
मध्यमम् सः पश्चात् पातु नः पुरः।।15।।
7098. त्वम् नः पश्चात् अधरात् उततरात्
पुरः इन्द्र नि पाहि विश्वतः।
आरे अस्मत् कृणुहि दैव्यम् भयम् आरे हेतीः अदेवीः।।16।।
7099. अद्य-अद्य श्वः-श्वः इन्द्र त्रास्व परे च नः।
विश्वा च नः जरितृन् सत्-पते अहा
दिवा नक्तम् च रक्षिषः।।17।।
7100. प्र-भङ्गी शूरः मघवा तुविमघः
सम्-मिश्लः वीर्याय कम्।
उभा ते बाहू वृषणा शतक्रतो
नि या वज्रम् मिमिक्षतुः।।18।।

## सूक्त-62

7101. प्रो अस्मै उप-स्तुतिम् भरत यत् जुजोषति।
उक्थैः इन्द्रस्य मिनम् वयः वर्धन्ति
सोमिनः भद्राः इन्द्रस्य रातयः।।1।।
7102. अयुजः असमः नृ-भिः एकः कृष्टीः अयास्यः।
पूर्वीः अति प्र ववृधे विश्वा जातानि
ओजसा भद्राः इन्द्रस्य रातयः।।2।।
7103. अहितेन चित् अर्वता जीर-दानुः सिसासति।
प्र-वाच्यम् इन्द्र तत् तव वीर्याणा
करिष्यतः भद्राः इन्दरस्य रातयः।।3।।
7104. आ याहि कृणवाम ते इन्द्र ब्रह्माणि वर्धना।
येभिः शविष्ठ चाकनः भद्रम् इह
श्रवस्यते भद्राः इन्द्रस्य रातयः।।4।।
7105. धृषतः चित् धृषत् मनः कृणोषि इन्द्र यत् त्वम्।
तीव्रैः सोमैः सपर्यतः नमः-भिः
प्रति-भूषतः भद्राः इन्द्रस्य रातयः।।5।।
7106. अव चष्टे ऋचीषमः अवतान्-इव मानुषः।
जुष्ट्वी दक्षस्य सोमिनः सखायम् कृणुते
युजम् भद्राः इन्द्रस्य रातयः।।6।।
7107. विश्वे ते इन्द्र वीर्यम् देवाः अनु क्रतुम् ददुः।
भुवः विश्वस्य गोपतिः
पुरु-स्तुत भद्राः इन्द्रस्य रातयः।।7।।
7108. गृणे तत् इन्द्र ते शवः उप-मम् देव-तातये।
यत् हंसि वृत्रम् ओजसा
शची-पते भद्राः इन्द्रस्य रातयः।।8।।
7109. समना-इव वपुष्यतः कृणवत् मानुषा युगा।
विदे तत् इन्द्रः चेतनम् अध
श्रुतः भद्राः इन्द्रस्य रातयः।।9।।
7110. उत् जातम् इन्द्र ते शवः
उत् त्वाम् उत् तव क्रतुम्।
भूरिगो भूरि ववृधुः मघवन् तव
शर्मणि भद्राः इन्द्रस्य रातयः।।10।।
7111. अहम् च त्वम् च वृत्रहन्
सम् युज्याव सनि-भ्यः आ।
अराति-वा चित् अद्रि-वः अनु नौ
शूर मंसते भद्राः इन्द्रस्य रातयः।।11।।
7112. सत्यम् इत् वै ऊँ तत् वयम्
इन्द्रम् स्तवाम न अनृतम्।
महान् असुन्वतः वधः भूरि ज्योतींषि
सुन्वतः भद्राः इन्द्रस्य रातयः।।12।।

## सूक्त-63

7113. सः पूर्व्यः महानाम् वेनः क्रतु-भिः आनजे।
यस्य द्वारा मनुः पिता देवेषु धियः आनजे।।1।।
7114. दिवः मानम् न उत् सदन् सोम-पृष्ठासः अद्रयः।
उक्था ब्रह्म च शंस्या।।2।।
7115. सः विद्वान् अङ्गिरः-भ्यः इन्द्रः गाः अवृणोत् अप।
स्तुषे तत् अस्य पौंस्यम्।।3।।
7116. सः प्रत्नथा कविवृधः इन्द्रः वाकस्य वक्षणिः।
शिवः अर्कस्य होमनि अस्म-त्रा गन्तु अवसे।।4।।
7117. आत ऊँ नु ते अनु क्रतुम् स्वाहा वरसय यज्यवः।
श्वात्रम् अर्काः अनूषत् इन्द्र गोत्रस्य दवने।।5।।
7118. इन्द्रे विश्वानि वीर्या कृतानि कर्त्वानि च।
यम् अर्काः अध्वरम् विदुः।।6।।
7119. यत् पाञ्च-जन्यया विशा इन्द्रे घोषाः असृक्षत।
अस्तृणात् बर्हणा विपः अर्यः मानस्य सः क्षयः।।7।।
7120. इयम् ऊँ ते अनु-स्तुतिः चकृ, तानि पौंस्या।
प्र आवः चक्रस्य वर्तनिम्।।8।।
7121. अस्य वृष्णः वि-ओदने उरु क्रमिष्ट जीवसे।
यवम् न पश्वः आ ददे।।9।।
7122. तत् दधानाः अवस्यवः युष्माभिः दक्ष-पितरः।

स्याम मरुत्वतः वृधे।।10।।
7123. बट् ऋत्वियाय धाम्ने ऋक्वभिः शूर नोनुमः।
जेषाम इन्द्र त्वया युजा।।11।।
7124. अस्मे रुद्राः मेहना पर्वतासः
वृत्र-हत्ये भर-हूतौ सजोषाः यः शंसते।
स्तुवते धायि पज्रः इन्द्र-जेष्ठाः
अस्मान् अवन्तु देवाः।।12।।

## सूक्त-64

7125. उत् त्वा मन्दन्तु स्तोमाः कृणुष्व राधः अद्रिवः।
अव ब्रह्म द्विषः जहि।।1।।
7126. पदा पणीन् अराधसः नि बाधस्व महान् असि।
नहि त्वा कः चन प्रति।।2।।
7127. त्वम् ईशिषे सुतानाम् इन्द्र त्वम् असुतानाम्।
त्वम् राजा जनानाम्।।3।।
7128. आ इहि प्र कइहि क्षयः
दिवि आ-घोषन् चर्षणीनाम्।
आ उभे इति पृणासि रोदसी।।4।।
7129. त्यम् चित् पर्वतम् गिरिम् शत-वन्तम् सहस्रिणम्।
वि स्तोतृभ्यः रुरोजिथ।।5।।
7130. वयम् ऊँ त्वा दिवा सुते वयम् नक्तम् हवामहे।
अस्माकम् कामम् आ पृण।।6।।
7131. क्व स्यः वृषभः युवा तुविग्रीवः अनानतः।
ब्रह्मा कः तम् सपर्यति।।7।।
7132. कस्य स्वित् सवनम् वृषा जुजुष्वान् अव गच्छति।
इन्द्रम् कः ऊँ स्वित् आ चके।।8।।
7133. कम् ते दानाः असक्षत वृत्रहन् कम् सुवीर्या।
उक्थे कः ऊँ स्वित् अन्तमः।।9।।
7134. अयम् ते मानुषे जने सोमः पूरुषु सूयते।
तस्य आ इहि प्र द्रव पिब।।10।।
7135. अयम् ते शर्यणा-वति सु-सोमायाम् अधि प्रियः।
आर्जीकीये मदिन्-तमः।।11।।
7136. तम् अद्य राधसे महे चारुम् मदाय घृष्वये।
आ इहि ईम् इन्द्र द्रव पिब।।12।।

## सूक्त-65

7137. यत् इन्द्र प्राक् उदक् न्यक् वा हूयसे नृभिः।
आ याहि तूयम् आशुभिः।।1।।
7138. यत् वा प्र-स्रवणे दवः मादयासे स्वः-नरे।
यत् वा समुद्रे अन्धसः।।2।।
7139. आ त्वा गीः-भिः महाम् उरुम् हुवे गाम्-इव भोजसे।
इन्द्र सोमस्य पीतये।।3।।
7140. आ ते इन्द्र महिमानम् हरयः देव ते महः।
रथे वहन्तु बिभ्रतः।।4।।
7141. इन्द्र गृणीषे ऊं स्तुषे महान् उग्रः ईशान-कृत्।
आ इहि नः सुतम् पिब।।5।।
7142. सुत-वन्तः त्वा वयम् प्रयस्वन्तः हवामहे।
इदम् नः बर्हिः आसदे।।6।।
7143. यत् चित् हि शश्वताम् असि इन्द्र साधरणः त्वम्।
तम् त्वा वयम् हवामहे।।7।।
7144. इदम् ते सोम्यम् मधु अधुक्षन् अद्रिभिः नरः।
जुषाणः इन्द्र तत् पिब।।8।।
7145. विश्वान् अर्यः विपः-चितः अति ख्यः तूयम् आ हि।
अस्मे धेहि श्रवः बृहत्।।9।।
7146. दाता मे पृषतीनाम् राजा हिरण्य-वीनाम्।
मा देवाः मघवा रिषत्।।10।।
7147. सहस्रे पृषतीनाम् अधि चन्द्रम् बृहत् पृथु।
शुक्रम् हिरण्यम् आ ददे।।11।।
7148. नपातः दुः-गहस्य मे सहस्रेण सु-राधसः।
श्रवः देवेषु अक्रत।।12।।

## सूक्त-66

7149. तरः-भिः वः विदत्-वसुम् इन्द्रम् स-बाधः ऊतये।
बृहत् गायन्तः सुत-सोमे अध्वरे
हुवे भरम् न कारिणम्।।1।।
7150. न यम् दुध्राः वरन्ते न स्थिराः
मुरः मदे सु-शिप्रम् अन्धसः।
यः आ-दृत्य शशमानाय सुन्वते दाता जरित्रे उक्थ्यम्।।2।।
7151. यः शक्रः मृक्षः अश्व्यः यः वा कीजः हिरण्ययः।
सः ऊर्वस्य रेजयति अप-वृतिम् इन्द्रः गव्यस्य वृत्रहा।।3।।
7152. नि-खातम् चित् यः पुरु-सम्भृतम्
वसु उत् इत् वपति दाशुषे।
वज्री सु-शिप्रः हरि-अश्वः इत्
करत् इन्द्रः क्रत्वा यथा वशत्।।4।।
7153. यत् ववन्थ पुरुस्तुत पुरा चित् शूर नृणाम्।
वयम् तत् ते इन्द्र सम् भरामसि
यज्ञम् उक्थम् तुरम् वचः।।5।।
7154. सचा सोमेषु पुरुहूत वज्रिवः मदाय धुक्ष सोमपाः।
त्वम् इत् हि ब्रह्म कृते काम्यम्
वसु देष्ठः सुन्वते भुवः।।6।।
7155. वयम् एनम् इदा ह्यः अपीपेम इह वज्रिणम्।
तस्मै ऊँ अद्य समना सुतम् भर आ नूनम् भूषत श्रुते।।7।।
7156. वृकः चित् अस्य वारणः
उरा-मथिः आ वयुनेषु भूषति।
सः इमम् नः स्तोमम् जुजुषाणः

आ गहि इन्द्र प्र चित्रया धिया।।8।।
7157. कत् ऊँ नु अस्य अकृतम् इन्द्स्य अस्ति पौंस्यम्।
केनो नु कम् श्रोमतेन न शुश्रुवे जनुषः परि वृत्रहा।।9।।
7158. कत् उ महीः अधृष्टाः अस्य
तविषीः कत् ऊँ वृत्र-घ्नः अस्तृतम्।
इन्द्रः विश्वान् बेकनाटान् अहः-दृशः
उत क्रत्वा पणीन् अभि।।10।।
7159. वयम् घ ते अपूर्व्य इन्द्र ब्रह्माणि वृत्रहन्।
पुरु-तमासः पुरु-हूत वज्रि-वः भृतिम् न प्र भरामसि।।11।।
7160. पूर्वीः चित् हि त्वे तुवि-कूर्मन्
आ-शसः हवन्ते इन्द्र ऊतयः।
तिरः चित् अर्यः सवना आ वसो
गहि शविष्ठ श्रुधि मे हवम्।।12।।
7161. वयम् घ ते त्वे इत् ऊँ इन्द्र विप्राः अपि स्मसि।
नहि त्वत् अन्यः पुरु-हूत कः
चन मघवन् अस्ति मर्डिता।।13।।
7162. त्वम् नः अस्याः अमतेः
उत क्षुधः अभि-शस्तेः अव स्पृधि।
त्वम् नः ऊती तव चित्रया धिया
शिक्ष शचिष्ठ गातु-वित्।।14।।
7163. सोमः इत् वः सुतः अस्तु कलयः मा बिभीतन।
अप इत् एषः ध्वस्मा अयति
स्वयम् घ एषः अप अयति।।15।।

## सूक्त-67

7164. त्यान् नु क्षत्रियान् अवः आदित्यान् याचिषामहे।
सुमृडकान् अभिष्टये।।1।।
7165. मित्रः नः अति अंहतिम् वरुणः पर्षत् अर्यमा।
आदित्यासः यथा विदुः।।2।।
7166. तेषाम् हि चित्रम् उक्थ्यम् वरूथम् अस्ति दाशुषे।
आदित्यानाम् अरम्-कृते।।3।।
7167. महि वः महताम् अवः वरुण मित्र अर्यमन्।
अवांसि आ वृणीमहे।।4।।
7168. जीवान् नः अभि धेतन आदित्यासः पुरा हथात्।
कत् ह स्थ हवन-श्रुतः।।5।।
7169. यत् वः श्रान्ताय सुन्वते वरूथम् अस्ति यत् छर्दिः।
तेन नः अधि वोचत।।6।।
7170. अस्ति देवाः अंहोः उरु अस्ति रत्नम् अनागसः।
आदित्याः अद्भुत-एनसः।।7।।
7171. मा नः सेतुः सिसेत् अयम् महे वृणक्तु नः परि।
इन्द्रः इत् हि श्रुतः वशी।।8।।
7172. मा नः मृचा रिपूणाम् वृजिनानाम् अविष्यवः।
देवाः अभि प्र मृक्षत।।9।।
7173. उत त्वाम् अदिते महि अहम् देवि उप ब्रुवे।
सु-मृडकाम् अभिष्टये।।10।।
7174. पर्षि दीने गभीरे आ उग्र-पुत्रे जिघांसतः।
माकिः तोकस्य नः रिषत्।।11।।
7175. अनेहः नः उरु-व्रजे उरूचि वि प्र-सर्तवे।
कृधि तोकाय जीवसे।।12।।
7176. ये मूर्धानः क्षितीनाम् अदब्धासः स्व-यशसः।
व्रता रक्षन्ते अद्रुहः।।13।।
7177. ते नः आस्नः वृकाणाम् आदित्यासः मुमोचत।
स्तेनम् बद्धम्-इव अदिते।।14।।
7178. अपो सु नः इयम् शरुः आदित्याः अप दुःमतिः।
अस्मत् एतु अजघ्नुषी।।15।।
7179. शश्वत् हि वः सु-दानवः
आदित्यासः ऊतिभिः वयम्।
पुरा नूनम् बुभुज्महे।।16।।
7180. शश्वन्तम् हि प्र-चेतसः प्रति-यन्तम् चित् एनसः।
देवाः कृणुथ जीवसे।।17।।
7181. तत् सु नः नव्यम् सन्यसे
आदित्यासः यत् मुमोचति।
बन्धात् बद्धम्-इव अदिते।।18।।
7182. न अस्माकम् अस्ति तत्
तरः आदित्यासः अति-स्कृदे।
यूयम् अस्म-भ्यम् मृडत।।19।।
7183. मा नः हेतिः विवस्वतः आदित्याः कृत्रिमा शरुः।
पुरा नु जरसः वधीत्।।20।।
7184. वि सु द्वेषः वि अंहतिम्
आदित्यासः वि सम्-हितम्।
विष्वक् वि वृहत रपः।।21।।

## सूक्त-68

7185. आ त्वा रथम् यथा ऊतये सुम्नाय वर्तयामसि।
तुवि-कूर्मिम् ऋति-सहम् इन्द्र शविष्ठ सत्-पते।।1।।
7186. तुवि-शुष्म तुविक्रतो शचीवः विश्वया मते।
आ प्रपाथ महि-त्वना।।2।।
7187. यस्य ते महिना महः परि ज्यायन्तम् ईयतुः।
हस्ता वज्रम् हिरण्ययम्।।3।।
7188. विश्वानरस्य वः पतिम् अनानतस्य शवसः।
एवैः च चर्षणीनाम् ऊती हुवे रथानाम्।।4।।
7189. अभिष्टये सदा-वृधम् स्वः-मीडषु यम् नरः।
नाना हवन्ते ऊतये।।5।।
7190. परः-मात्रम् ऋचीषमम् इन्द्रम् उग्रम् सु-राधसम्।
ईशानम् चित् वसूनाम्।।6।।
7191. तम्-तम् इत् राधसे महे इन्द्रम् चोदामि पीतये।

यः पूर्व्याम् अनु-स्तुतिम् ईशे कृष्टीनाम् नृतुः।।7।।
7192. न यस्य ते शवसान सख्यम् आनंश मर्त्यः।
नकिः शवांसि ते नशत्।।8।।
7193. त्वा-ऊतासः त्वा युजा अप्सु सूर्ये महत् धनम्।
जयेम पृत्सु वज्रिवः।।9।।
7194. तम् त्वा यज्ञेभिः ईमहे तम् गीः-भिः गिर्वणः-तम।
इन्द्र यथा चित् आविथ वाजेषु पुरु-मा-य्यम्।।10।।
7195. यस्य ते स्वादु सख्यम् स्वाद्वी प्र-नीतिः अद्रिवः।
यज्ञः वितन्तसाय्यः।।11।।
7196. उरु नः तन्वे तने उरु क्षयाय नः कृधि।
उरु नः यन्धि जीवसे।।12।।
7197. उरुम् नृभ्यः उरुम् गवे उरुम् रथाय पन्थाम्।
देव-वीतिम् मनामहे।।13।।
7198. उप मा षट् द्वा-द्वा नरः सोमस्य हर्ष्या।
तिष्ठन्ति स्वादु-रातयः।।14।।
7199. ऋज्रौ इन्द्रोते आ ददे हरी ऋक्षस्य सूनवि।
आश्व-मेधस्य रोहिता।।15।।
7200. सु-रथान् आतिथि-ग्वे सु-अभीशून् आर्क्षे।
आश्व-मेधे सुपेशसः।।16।।
7201. षट् अश्वान् आतिथि-ग्वे इन्द्रोते वधू-मतः।
सचा पूत-क्रतौ सनम्।।17।।
7202. आ एषु चेतत् वृषण्-वती अन्तः ऋज्रेषु अरुषी।
सु-अभीशुः कशावती।।18।।
7203. न युष्मे इति वाज-बन्धवः निनित्सुः चन मर्त्यः।
अवद्यम् अधि दीधरत्।।19।।

## सूक्त-69

7204. प्र-प्र वः त्रि-स्तुभम् इषम् मन्दत्-वीराय इन्दवे।
धिया वः मेध-सातये पुरुम्-ध्या आ विवासति।।1।।
7205. नदम् वः ओदतीनाम् नदम् योयुवतीनाम्।
पतिम् वः अघ्न्यानाम् धेनूनाम् इषुध्यसि।।2।।
7206. ताः अस्य सूददोहसः सोमम् श्रीणन्ति प्रश्नयः।
जन्मन् देवानाम् विशः त्रिषु आ रोचने दिवः।।3।।
7207. अभि प्र गो-पतिम् गिरा इन्द्रम् अर्च यथा विदे।
सूनुम् सत्यस्य सत्-पतिम्।।4।।
7208. आ हरयः ससृज्रिरे अरुषीः अधि बर्हिषि।
यत्र अभि सम्-नवामहे।।5।।
7209. इन्द्राय गावः आ-शिरम् दुदुह्रे वज्रिणे मधु।
यत् सीम् उप-ह्वरे विदत्।।6।।
7210. उत् यत् ब्रध्नस्य विष्टपम् गृहम् इन्द्रः च गन्वहि।
मध्वः पीत्वा सचेवहि त्रिः सप्त सख्युः पदे।।7।।
7211. अर्चत प्र अर्चत प्रिय-मेधासः अर्चत।
अर्चन्तु पुत्रकाः उत पुरम् न धृष्णु अर्चत।।8।।
7212. अव स्वराति गर्गरः गोधा परि सनिस्वनत्।
पिङ्गा परि चनिस्कदत् इन्द्राय ब्रह्म उत्-यतम्।।9।।
7213. आ यत् पतन्ति एन्यः सु-दुघाः अनप-स्फुरः।
अप-स्फुरम् गृभायत सोमम् इन्द्राय पातवे।।10।।
7214. अपात् इन्द्रः अपात् अग्निः विश्वे देवाः अमत्सत।
वरुणः इत् इह क्षयत् तम् आपः
अभि अनूषत वत्सम् संशिश्वरीः-इव।।11।।
7215. सुदेवः असि वरुण यस्य ते सप्त सिन्धवः।
अनु-क्षरन्ति काकुदम् सूर्म्यम् सुषिराम्-इव।।12।।
7216. यः व्यतीन् अफाणयत् सु-युक्तान् उप दाशुषे।
तक्वः नेता तत् इत् वपुः उपमा यः अमुच्यत।।13।।
7217. अति इत् ऊँ शक्रः ओहते
इन्द्रः विश्वाः अति द्विषः।
भिनत् कनीनः ओदनम् पच्यमानम् परः गिरा।।14।।
7218. अर्भकः न कुमारकः आधि तिष्ठत् नवम् रथम्।
सः पक्षत् महिषम् मृगम् पित्रे मात्रे विभुक्रतुम्।।15।।
7219. आ तु सु-शिप्र दम्-पते रथम् तिष्ठ हिरण्ययम्।
अध द्युक्षम् सचेवहि सहस्र-पादम्
अरुषम् स्वस्ति-गाम् अनेहसम्।।16।।
7220. तम् घ ईम् इत्था नमस्विनः
उप स्व-राजम् आसते।
अर्थम् चित् अस्य सु-धितम्
यत् एतवे आ-वर्तयन्ति दावने।।17।।
7221. अनु प्रत्नस्य ओकसः प्रिय-मेधासः एषाम्।
पूर्वाम् अनु प्र-यतिम् वृक्त-बर्हिषः
एहित-प्रयसः आशत।।18।।

## सूक्त-70

7222. यः राजा चर्षणीनाम् याता रथेभिः अध्रिगुः।
विश्वासाम् तरुता पृतनानाम् ज्येष्ठः यः वृत्रहा गृणे।।1।।
7223. इन्द्रम् तम् शुम्भ पुरु-हन्मन्
अवसे यस्य द्विता वि-धर्तरि।
हस्ताय वज्रः प्रति धायि दर्शतः महः दिवे न सूर्यः।।2।।
7224. नकिः तम् कर्मणा नशत् यः चकार सदावृधम्।
इन्द्रम् न यज्ञैः विश्वगूर्तम् ऋभ्वसम्
अधृष्टम् धृष्णु-ओजसम्।।3।।
7225. अषाडम् उग्रम् पृतनासु
ससहिम् यस्मिन् महीः उरु-ज्रयः।
सम् धेनवः जायमाने अनोनवुः द्यावः क्षामः
अनोनवुः।।4।।
7226. यत् द्यावः इन्द्र ते शतम् शतम् भूमीः उत स्युः।
न त्वा वज्रिन् सहस्रम् सूर्याः
अनु न जातम् अष्ट रोदसी।।5।।

7227. आ पप्राथ महिना वृष्णया
वृषन् विश्वा शविष्ठ शवसा।
अस्मान् अव मघवन् गोमति
व्रजे वज्रिन् चित्राभिः ऊतिभिः।।6।।
7258. न सीम् अदवः आपत् इषम् दीर्घायो मर्त्यः।
एतग्वा चित् यः एतशा युयोजते हरी इन्द्रः युयोजते।।7।।
7229. तम् वः महः महाय्यम् इन्द्रम् दानाय सक्षणिम्।
यः गाधेषु यः आ-अरणेषु हव्यः वाजेषु अस्ति हव्यः।।8।।
7230. उत् ऊँ सु नः वसो महे मृशस्व शूर राधसे।
उत् ऊँ सु महयै मघवन् मघत्तये उत् इन्द्र श्रवसे महे।।9।।
7231. त्वम् नः इन्द्र ऋतयुः त्वा-निदः नि तृम्पसि।
मध्ये वसिष्व तुवि-नृम्ण ऊर्वोः
नि दासम् शिश्नथः हथैः।।10।।
7232. अन्य-व्रतम् अमानुषम् अयज्वानम् अदेव-युम्।
अव स्वः सखा दुधुवीत
पर्वतः सु-घ्नाय दस्युम् पर्वतः।।11।।
7233. त्वम् नः इन्द्र आसाम् हस्ते शविष्ठ दावने।
धानानाम् न सम् गृभाय
अस्मयु- द्विः सम् गृभाय अस्मयुः।।12।।
7234. सखायः क्रतुम् इच्छत कथा राधाम् शरस्य।
उप-स्तुतिम् भोजः सूरिः यः अह्नयः।।13।।
7235. भूरिभिः समह ऋषिभिः बर्हिष्मत्-भिः स्तविष्यसे।
यत् इत्थम् एकम्-एकम् इत् शर वत्सान् परा-ददः।।14।।
7236. कर्ण-गृह्य मघवा शौर-देव्यः
वत्सम् नः त्रिभ्यः आ अनयत्।
अजाम् सूरिः न धातवे।।15।।

## सूक्त-71

7237. त्वम् नः अग्ने महः-भिः पाहि विश्वस्याः अरातेः।
उत द्विषः मर्त्यस्य।।1।।
7238. नहि मन्युः पौरुषेयः ईशे हि वः प्रिय-जात।
त्वम् इत् असि क्षपावान्।।2।।
7239. सः नः विश्वेभिः देवेभिः ऊर्जः नपात् भद्र-शोचे।
रयिम् देहि विश्व-वारम्।।3।।
7240. न तम् अग्ने अरातयः मर्तम् युवन्त रायः।
यम् त्रायसे दाश्वांसम्।।4।।
7241. यम् त्वम् विप्र मेध-सातौ अग्ने हिनोषि धनाय।
सः तव ऊती गोषु गन्ता।।5।।
7242. त्वम् रयिम् पुरु-वीरम् अग्ने दाशुषे मर्ताय प्र नः नय वस्यः अच्छ।।6।।
7243. उरुष्य नः मा परा दाः अघ-यते जात-वेदः।
दुः-आध्ये मर्ताय।।7।।
7244. अग्ने माकिः ते देवस्य रातिम् अदेवः युयोत।
त्वम् ईशिषे वसूनाम्।।8।।
7245. सः नः वस्वः उप मासि ऊर्जः नपात् माहिनस्य।
सखे वसो जरितृभ्यः।।9।।
7246. अच्छ नः शीर-शोचिषम् गिरः यन्तु दर्शतम्।
अच्छ यज्ञासः नमसा पुरु-वसुम् पुरु-प्रशस्तम् ऊतये।।10।।
7247. अग्निम् सूनुम् सहसः
जात-वेदसम् दानाय वार्याणाम्।
द्विता यः भूत् अमृतः मर्त्येषु
आ होता मन्द्र-तमः विशि।।11।।
7248. अग्निम् वः देव-यज्यया अग्निम् प्र-यति अध्वरे।
अग्निम् धीषु प्रथमम् अग्निम्
अर्वति अग्निम् क्षैत्राय साधसे।।12।।
7249. अग्निः इषाम् सख्ये ददातु नः ईशे यः वार्याणाम्।
अग्निम् तोके तनये शश्वत्
ईमहे वसुम् सन्तम् तनूपाम्।।13।।
7250. अग्निम् ईडष्व अवसे गाथाभिः शीर-शोचिषम्।
अग्निम् राये पुरु-मीड श्रुतम्
नरः अग्निम् सु-दीतये छर्दिः।।14।।
7251. अग्निम् द्वेषः योतवै नः गृणीमसि
अग्निम् शम् योः च दातवे।
विश्वासु विक्षु अविता-इव
हव्यः भुवत् वस्तुः ऋषूणाम्।।15।।

## सूक्त-72

7252. हविः कृणुध्वम् आ गमत् अध्व्युः वनते पुनः।
विद्वान् अस्य प्र-शासनम्।।1।।
7253. नि-तिग्मम् अभि अंशुम् सीदत् होता मनौ अधि।
जुषाणः अस्य सख्यम्।।2।।
7254. अन्तः इच्छन्ति तम् जने रुद्रम् परः मनीषया।
गृभ्णन्ति जिह्वया ससम्।।3।।
7255. जामि अतीतपे धनुः वयः-धाः अरुहत् वनम्।
दृषदम् जिह्वया आ अवधीत्।।4।।
7256. चरन् वत्सः रुशन् इह नि-दातारम् न विन्दते।
वेति स्तोतवे अंब्यम्।।5।।
7257. उतो नु अस्य यत् महत् अश्व-वत् योजनम् बृहत्।
दामा रथस्य ददृशे।।6।।
7258. दुहन्ति सप्त एकाम् उप द्वा पञ्च सृजतः।
तीर्थे सिन्धोः अधि स्वरे।।7।
7259. आ दशभिः विवस्वतः इन्द्रः कोशम् अचुच्यवीत्।
खेदया त्रिवृता दिवः।।8।।
7260. परि त्रि-धातुः अध्वरम् जूर्णिः एति नवीयसी।
मध्वा होतारः अञ्जते।।9।।

7261. सिञ्चन्ति नमसा अवतम्
उच्चा-चक्रम् परिज्मानम्।
नीचीन-बारम् अक्षितम्।।10।।
7262. अभि-आरम् इत् अद्रयः नि-सिक्तम् पुष्करे मधु।
अवतस्य वि-सर्जने।।11।।
7263. गावः उप अवत अवतम् मही यज्ञस्य रप्सुदा।
उभा कर्णा हिरण्यया।।12।।
7264. आ सुते सिञ्चत श्रियम् रोदस्योः अभि-श्रियम्।
रसा दधीत वृषभम्।।13।।
7265. ते जानत स्वम् ओक्यम्
सम् वत्सासः न मातृभिः।
मिथः नसन्त जामिभिः।।14।।
7266. उप स्रक्वेषु बप्सतः कृण्वते धरुणम् दिवि।
इन्द्रे अग्ना नमः स्वः।।15।।
7267. अधुक्षत् पिप्युषीम् इषम् ऊर्जम् सप्त-पदीम् अरिः।
सूर्यस्य सप्त रश्मिभिः।।16।।
7268. सोमस्य मित्रावरुणा उत्-इता सूरे आ ददे।
तत् आतुरस्य भेषजम्।।17।।
7269. उतो नु अस्य यत् पदम् हर्यतस्य नि-धान्यम्।
परि द्याम् जिह्वया अतनत्।।18।।

## सूक्त-73

7270. उत् ईराथाम् ऋतयते युञ्जाथाम् अश्विना रथम्।
अन्ति सत् भूतु वाम् अवः।।1।।
7271. नि-मिषः चित् जवीयसा रथेन आ यातम् अश्विना।
अन्ति सत् भूतु वाम् अवः।।2।।
7272. उप स्तृणीतम् अत्रये हिमेन घर्मम् अश्विना।
अन्ति सत् भूतु वाम् अवः।।3।।
7273. कुह स्थः कुह जग्मथुः कुह श्येना-इव पेतथुः।
अन्ति सत् भूतु वाम् अवः।।4।।
7274. यत् अद्य कर्हि कर्हि चित् शुश्रुयातम् इमम् हवम्।
अन्ति सत् भूतु वाम् अवः।।5।।
7275. अश्विना याम-हूतमा नेदिष्ठम् यामि आप्यम्।
अन्ति सत् भूतु वाम् अवः।।6।।
7276. अवन्तम् अत्रये गृहम् कृणुतम् युवम् अश्विना।
अन्ति सत् भूतु वाम् अवः।।7।।
7277. वरेथे अग्निम् आतपः वदते वल्गु अत्रये।
अन्ति सत् भूतु वाम् अवः।।8।।
7278. प्र सप्तवध्रिः आशसा धाराम् अग्नेः अशायत।
अन्ति सत् भूतु वाम् अवः।।9।।
7279. इह आ गतम् वृषण्वसू शृणुतम् मे इमम् हवम्।
अन्ति सत् भूतु वाम् अवः।।10।।
7280. किम् इदम् वाम् पुराण-वत् जरतोः-इव शस्यते।
अन्ति सत् भूतु वाम् अवः।।11।।
7281. समानम् वाम् स-जात्यम् समानः बन्धुः अश्विना।
अन्ति सत् भूतु वाम् अवः।।12।।
7282. यः वाम् रजांसि अश्विना रथः वियाति रोदसी।
अन्ति सत् भूतु वाम् अवः।।13।।
7283. आ नः गव्येभिः अश्वयैः सहस्रैः उप गच्छतम्।
अन्ति सत् भूतु वाम् अवः।।14।।
7284. मा नः गव्येभिः अश्व्यैः सहस्रेभिः अति ख्यतम्।
अन्ति सत् भूतु वाम् अवः।।15।।
7285. अरुण-प्सुः उषाः अभूत् अकः ज्योतिः ऋतवरी।
अन्ति सत् भूतु वाम् अवः।।16।।
7286. अश्विना सु विचाकशत् वृक्षम् परशुमान्-इव।
अन्ति सत् भूतु वाम् अवः।।17।।
7287. पुरम् न धृष्णो आ रुज कृष्णया बाधितः विशा।
अन्ति सत् भूतु वाम् अवः।।18।।

## सूक्त-74

7288. विशः-विशः वः अतिथिम् वाज-यन्तः पुरु-प्रियम्।
अग्निम् वः दुर्यम् वचः स्तुषे शूषस्य मन्मभिः।।1।।
7289. यम् जनासः हविष्मन्तः मित्रम् न सर्पिः-आसुतिम्।
प्रशंसन्ति प्रशस्तिभिः।।2।।
7290. पन्यांसम् जातवेदसम् यः देव-ताति उत्-यता।
हव्यानि ऐरयत् दिवि।।3।।
7291. आ अगन्म वृत्रहन्-तमम्
ज्येष्ठम् अग्निम् आनवम्।
यस्य श्रुतर्वा बृहन् आर्क्षः अनीके एधते।।4।।
7292. अमृतम् जात-वेदसम् रः तमांसि दर्शतम्।
घृत-आहवनम् ईड्यम्।।5।।
7293. स-बाधः यम् जनाः इमे अग्निम् हव्येभिः ईडते।
जुह्वानासः यत-स्रुचः।6।।
7294. इयम् ते नव्यसी मतिः अग्ने अधायि अस्मत् आ।
मन्द्र सुजात सुक्रतो अमूर दस्म अतिथे।।7।।
7295. सा ते अग्ने शम्-तमा चनिष्ठा भवतु प्रिया।
तया वर्धस्व सु-स्तुतः।।8।।
7296. सा द्युम्नैः द्युम्निनी बृहत् उप-उप श्रवसि श्रवः।
दधीत वृत्र-तूर्ये।।9।।
7297. अश्वम् इत् गाम् रथ-प्राम्
त्वेषम् इन्द्रम् न सत्-पतिम्।
यस्य श्रवांसि तूर्वथ पन्यम्-पन्यम् च कृष्टयः।।10।।
7298. यम् त्वा गोपवनः गिरा चनिष्ठत् अग्ने अङ्गिरः।
सः पावक श्रुति हवम्।।11।।
7299. यम् त्वा जनासः ईडते स-बाधः वाजसातये।
सः बोधि वृत्र-तूर्ये।।12।।

7300. अहम् हुवानः आर्क्षे श्रुवर्णणि मदच्युति।
शर्धांसि-इव स्तुका-विनाम् मृक्षा शीर्षा चतुर्णाम्।।13।।
7301. माम् चत्वारः आशवः शविष्ठस्य द्रवित्नवः।
सुरथासः अभि प्रयः वक्षन् वयः न तुग्र्यम्।।14।
7302. सत्यम् इत् त्वा महेनदि परुष्णि अव देदिशम्।
न ईम् आपः अश्वदातरः शिविष्ठात् अस्ति मर्त्यः।।15।।

## सूक्त-75

7303. युक्ष्व हि देव-हूतमान् अश्वान् अग्ने रथीः-इव।
नि होता पूर्व्यः सदः।।1।।
7304. उत नः देव देवान् अच्छ वोचः विदुः-तरः।
श्रत् विश्वा वार्या कृधि।।2।।
7305. त्वम् ह यत् यविष्ठ्य सहसः सूनो आहुत।
ऋतवा यज्ञियः भुवः।।3।.
7306. अयम् अग्निः सहस्रिणः वाजस्य शतिनः पतिः।
मूर्धा कविः रयीणाम्।।4।।
7307. ते नेमिम् ऋभवो यथा नमस्व सहूतिभिः।
नेदीयो यज्ञम् अङ्गिरः।।5।।
7308. तस्मै नूनम् अभि-द्यवे वाचा वि-रूप नित्यया।
वृष्णे चोदस्व सु-स्तुतिम्।।6।।
7309. कम् ऊँ स्वित् अस्य सेनया अग्नेः अपाक्-चक्षसः।
पणिम् गोषु स्तरामहे।।7।।
7310. मा नः देवानाम् विशः प्रस्नातीः-इव उस्राः।
कृशम् न हासुः अघ्न्याः।।8।।
7311. मा नः समस्य दुः-ध्यः परि-द्वेषसः अंहतिः।
ऊर्मिः न नावम् आ वधीत्।।9।।
7312. नमः ते अग्ने ओजसे गृणन्ति देव कृष्टयः।
अमैः अमित्रम् अर्दय।।10।।
7313. कुवित् सु नः गो-इष्टये अग्ने सम्-वेषिषः रयिम्।
उरु-कृत् उरु नः कृधि।।11।।
7314. मा नः अस्मिन् महा-धने परा वर्क् भार-भृत् यथा।
सम्-वर्गम् सम् रयिम् जय।।12।।
7315. अन्यम् अस्मत् भियै इयम् अग्ने सिसक्तु दुच्छुना।
वर्ध नः अम-वत् शवः।।13।।
7316. यस्य अजुषत् नमस्विनः शमीम् अदुः-मखस्य वा।
तम् घ इत् अग्निः वृधा अवति।।14।।
7317. परस्याः अधि सम्-वतः अवरान् अभि आ तर।
यत्र अहम् अस्मि तान् अव।।15।।
7318. विद्म हि ते पुरा वयम् अग्ने पितुः यथा अवसः।
अध ते सुम्नम् ईमहे।।16।।

## सूक्त-76

7319. इमम् नु मायिनम् हुवे इन्द्रम् ईशानम् ओजसा।
मरुत्वन्तम् न वृञ्जसे।।1।।
7320. अयम् इन्द्रः मरुत्-सखा वि वृत्रस्य अभिनत् शिरः।
वज्रेण शत-पर्वणा।।2।।
7321. ववृधानः मरुत्-सखा इन्द्रः वि वृत्रम् ऐरयत्।
सृजन् समुद्रियाः अपः।।3।।
7322. अयम् ह येन वै इदम् स्वः मरुत्वता जितम्।
इन्द्रेण सोम-पीतये।।4।।
7323. मरुत्वन्तम् ऋजीषिणम् ओजस्वन्तम् वि-रप्सिनम्।
इन्द्रम् गीः-भिः हवामहे।।5।।
7324. इन्द्रम् प्रत्नेन मन्मना मरुत्वन्तम् हवामहे।
अस्य सोमस्य पीतये।।6।।
7325. मरुत्वान् इन्द्र मीढ्वः पिब सोमम् शतक्रतो।
अस्मिन् यज्ञे पुरस्तुत।।7।।
7326. तुभ्य इत् इन्द्र मरुत्वते सुताः सोमासः अद्रिवः।
हृदा हूयन्ते उक्थिनः।।8।।
7327. पिब इत् इन्द्र मरुत्-सखा
सुतम् सोमम् दिविष्टिषु।
वज्रम् शिशानः ओजसा।।9।।
7328. उत्-तिष्ठन् ओजसा सह पीत्वी शिप्रे इति अवेपयः।
सोमम् इन्द्र चमू सुतम्।।10।।
7329. अनु त्वा रोदसी उभे क्रक्षमाणम् अकृपेताम्।
इन्द्र यत् दस्यु-हा अभवः।।11।।
7330. वाचम् अष्टापदीम् अहम् नव-स्रक्तिम् ऋत-स्पृशम्।
इन्द्रात् परि तन्वम् ममे।।12।।

## सूक्त-77

7331. जज्ञानः नु शत-क्रतुः वि पृच्छत् इति मातरम्।
के उग्राः के ह शृण्विरे।।1।।
7332. आत् ईम् शवसी अब्रवीत् और्ण-वाभम् अहीशुवम्।
ते पुत्र सन्तु निः-तुरः।।2।।
7333. सम् इत् तान् वृत्रहा अखिदत् खे अरान्-इव खेदय।
प्र-वृद्धः दस्युहा अभवत्।।3।।
7334. एकया प्रति-धा अपिबत् साकम् सरांसि त्रिंशतम्।
इन्द्रः सोमस्य काणुका।।4।।
7335. अभि गन्धर्वम् अतृणत् अबुध्नेषु रजः-सु।
आ इन्द्रः ब्रह्मभ्यः इत् वृधे।।5।।
7336. निः अविध्यत् गिरिभ्यः
आ धारयत् पक्वम् ओदनम्।
इन्द्रः बुन्दम् सु-आततम्।।6।।
7337. शत-ब्रध्नः इषुः तव सहस्रपर्णः एकः इत्।
यम् इन्द्र चकृषे युजम्।।7।।
7338. तेन स्तोतृभ्यः आ भर नृभ्यः नारिभ्यः अत्तवे।
सद्यः जातः ऋभुस्थिर।।8।।

7339. एता च्यौत्नानि ते कृता वर्षिष्ठानि परीणसा।
हृदा वीड अधारयः।।9।।
7340. विश्वा इत् ता विष्णुः आ
अभरत् उरु-क्रमः त्वा-इषितः।
शतम् महिषान् क्षीरपाकम्
ओदनम् वरहम् इन्द्रः एमुषम्।।10।।
7341. तुवि-क्षम् ते सु-कृत्रम् सु-मयम्
धनुः साधुः बुन्दः हिरण्ययः।
उभा ते बाहू रण्या सु-संस्कृता ऋदुपे चित् ऋदुवृधा।।11।।

## सूक्त-78

7342. पुरोडशम् नः अन्धसः इन्द्र सहस्रम् आ भर।
शता च शूर गोनाम्।।1।।
7343. आ नः भर वि-अञ्जनम्
गाम् अश्वम् अभि-अञ्जनम्।।
सचा मना हिरण्यया।।2।।
7344. उत नः कर्ण-शोभना पुरूणि धृष्णो आ भर।
त्वम् हि शृण्विषे वसो।।3।।
7345. नकीम् वृधीकः इन्द्र ते न सु-साः न सुदाः उत।
न अन्यः त्वत् शूर वाघतः।।4।।
7346. नकीम् इन्द्रः नि-कर्तवे न शक्रः परि-शक्तवे।
विश्वम् शृणोति पश्यति।।5।।
7347. स मन्युम् मर्त्यानाम् अदब्धः नि चिकीषते।
पुरा निदः चिकीषते।।6।।
7348. क्रत्वः इत् पूर्णम् उदरम् तुरस्य अस्ति विधतः।
वृत्र-घ्नः सोम-पाव्नः।।7।।
7349. त्वे वसूनि सम्-गता विश्वा च सौम सौभगा।
सुदातु अपरि-हृता।।8।।
7350. त्वाम् इत् यवयुः मम कामः गव्युः हिरण्ययुः।
त्वाम् अश्वयुः आ ईषते।।9।।
7351. तव इत् इन्द्र अहम् आ-शसा
हस्ते दात्रम् चन् आ ददे।
दिनस्य वा मघवन् सम्-भृतस्य
वा पूर्धि यवस्य काशिना।।10।।

## सूक्त-79

7352. अयम् कृत्नुः अगृभीतः
विश्व-जित् उत्-भित् इत् सोमः।
ऋषिः विप्रः काव्येन।।1।।
7353. अभि ऊर्णोति यत् नग्नम्
भिषक्ति विश्वम् यत् तुरम्।
प्र ईम् अन्धः ख्यत् निः श्रोणः भूत्।।2।।
7354. त्वम् सोम तनूकृत्-भ्यः द्वेषः-भ्यः।
अन्य-कृतेभ्यः उरु यन्ता असि वरूथम्।।3।।
7355. त्वम् चित्ती तव दक्षैः
दिवः आ पृथिव्याः ऋजीषिन्।
यावीः अघस्य चित् द्वेषः।।4।।
7356. अर्थिनः यन्ति च इत् अर्थम्
गच्छान् इत् ददुषः रातिम्।
ववृज्युः तृष्यतः कामम्।।5।।
7357. विदत् यत् पूर्व्यम् नष्टम्
उत् ईम् ऋत-युम् ईरयत्।
प्र ईम् आयुः तारीत् अतीर्णम्।।6।।
7358. सु-शेवः नः मृडयाकुः अदृप्त-क्रतुः अवातः।
भव नः सोम शम् हृदे।।7।।
7359. मा नः सोम सम् वीविजः
मा वि बीभिषथाः राजन्।
मा नः हार्दि त्विषा वधीः।।8।।
7360. अव यत् स्वे सधस्थे देवानाम् दुः-मतीः ईक्षे।
राजन् अप द्विषः सेध मीढ्वः अप स्रिधः सेध।।9।।

## सूक्त-80

7361. नहि अन्यम् बड अकरम् मर्डितारम् शतक्रतो।
त्वम् नः इन्द्र मृडय।।1।।
7362. यः नः शश्वत् पुरा आविथ अमृध्रः वाजसातये।
सः त्वम् नः इन्द्र मृडय।।2।।
7363. किम् अङ्ग रध्र-चोदनः
सुन्वानस्य अविता इत् असि।
कुवित् सु इन्द्र नः शकः।।3।।
7364. इन्द्र प्र नः रथम् अव
पश्चात् चित् सन्तम् अद्रिवः।
पुरस्तात् एनम् मे कृधि।।4।।
7365. हन्तो नु किम् आससे प्रथमम् नः रथम् कृधि।
उप-मम् वाजयु श्रवः।।5।।
7366. अव नः वाज-युम् रथम्
सु-करम् ते किम् इत् परि।
अस्मान् सु जिग्युषः कृधि।।6।।
7367. इन्द्र दृह्यस्व पूः असि भद्रा ते एति निः-कृतम्।
इयम् धीः ऋत्विय-वती।।7।।
7368. मा सीम् अवद्ये आ भाक् उर्वी काष्ठा हितम् धनम्।
अप-आवृक्ताः अरत्नयः।।8।।
7369. तुरीयम् नाम यज्ञियम् यदा करः तत् उश्मसि।
आत् इत् पतिः नः ओहसे।।9।।
7370. अवीवृधत् वः अमृताः अमन्दीत्
एकद्यूः देवाः उत याः च देवीः।
तस्मै ऊँ राधः कृणुत प्रशस्तम्

प्रातः मक्षु धिया-वसुः जगम्यात्।।10।।

## सूक्त-81

7371. आ तु नः इन्द्र क्षु-मन्तम्
चित्रम् ग्राभम् सम् गृभाय।
महा-हस्ती दक्षिणेन।।1।।
7372. विद्म हि त्वा तुवि-कूर्मिम्
तुवि-देष्णम् तुवि-मघम्।
तुवि-मात्रम् अवः-भिः।।2।।
7373. नहि त्वा शूर देवाः न मर्तासः दित्सन्तम्।
भीमम् न गाम् वारयन्ते।।3।।
7374. आ इत ऊँ नु इन्द्रम् स्तवम्
ईशानम् वस्वः स्व-राजम्।
न राधसा मर्धिषत् नः।।4।।
7375. प्र स्तोषत् उप गासिषत् श्रवत् साम गीयमानम्।
अभि राधसा जुगुरत्।।5।।
7376. आ नः भर दक्षिणेन अभि सव्येन प्र मृशा।
इन्द्र मा नः वसोः निः भाक्।।6।।
7377. उप क्रमस्व आ भर धृषता धृष्णो जनानाम्।
अदाशू-तरस्य वेदः।।7।।
7378. इन्द्र यः ऊँ नु ते अस्ति वाजः विप्रेभिः सनित्वः।
अस्माभिः सु तम् सनुहि।।8।।
7379. सद्यः-जुवः ते वाजाः अस्मभ्यम् विश्व-चन्द्राः।
वशैः च मक्षु जरन्ते।।9।।

## सूक्त-82

7380. आ प्र द्रव परावतः अर्वा-वतः च वृत्रहन्।
मध्वः प्रति प्र-भर्मणि।।1।।
7381. तीव्राः सोमासः आ गहि सुतासः मादयिष्णवः।
पिब दधृक् यथा ओचिषे।।2।।
7382. इषा मन्दस्व आत् ऊँ ते अरम् वराय मन्यवे।
भुवत् ते इन्द्र शम् हृदे।।3।।
7383. आ तु अशत्रो आ गहि नि उक्थानि च हूयसे।
उप-मे रोचने दिवः।।4।।
7384. तुभ्य अयम् अद्रिभिः सुतः
गोभिः श्रीतः मदाय कम्।
प्र सोमः इन्द्र हूयते।।5।।
7385. इन्द्र श्रुधि सु मे हवम् अस्मे सुतस्य गोमतः।
वि पीतिम् तृप्तिम् अश्नुहि।।6।।
7386. यः इन्द्र चमसेषु आ सोमः चमूषु ते सुतः।
पिब इत् अस्य त्वम् ईशिषे।।7।।
7387. यः अप्सु चन्द्रमाः-इव सोमः चमूषु ददृशे।
पिब इत् अस्य त्वम् ईशिषे।।8।।
7388. यम् ते श्येनः पदा आ
अभरत् तिरः रजांसि अस्पृतम्।
पिब इत् अस्य त्वम् ईशिषे।।9।।

## सूक्त-83

7389. देवानाम् इत् अवः महत् तत् आ वृणीमहे वयम्।
वृष्णाम् अस्मभ्यम् ऊतये।।1।।
7390. ते नः सन्तु युजः सदा वरुणः मित्रः अर्यमा।
वृधासः च प्र-चेतसः।।2।।
7391. अति नः विष्पिता पुरु नौभिः अपः न पर्षथ।
यूयम् ऋतस्य रथ्यः।।3।।
7392. वामम् नः अस्तु अर्यमन् वामम् वरुण शंस्यम्।
वामम् हि आ-वृणीमहे।।4।।
7393. वामस्य हि प्र-चेतसः ईशानासः रिशादसः।
न ईम् आदित्याः अघस्य यत्।।5।।
7394. वयम् इत् वः सु-दानवः
क्षियन्तः यान्तः अध्वन् आ।
देवाः वृधाय हूमहे।।6।।
7395. अधि नः इन्द्र एषाम् विष्णो सजात्यानाम्।
इत मरुतः अश्विना।।7।।
7396. प्र भ्रातृ-त्वम् सु-दानवः अध द्विता समान्या।
मातुः गर्भे भरामहे।।8।।
7397. यूयम् हि स्थ सुदानवः इन्द्र-ज्येष्ठाः अभि-द्यवः।
अध चित् वः उत ब्रुवे।।9।।

## सूक्त-84

7398. प्रेष्ठम् वः अतिथिम् स्तुषे मित्रम्-इव प्रियम्।
अग्निम् रथम् न वेद्यम्।।1।।
7399. कविम्-इव प्र-चेतसम् यम् देवासः अध द्विता।
नि मर्त्येषु आ-दधुः।।2।।
7400. त्वम् यविष्ठ दाशुषः नृन् पाहि शृणुधि गिरः।
रक्ष तोकम् उत त्मना।।3।।
7401. कया ते अग्ने अङ्गिरः ऊर्जः नपात् उप-स्तुतिम्।
वराय देव मन्यवे।।4।।
7402. दाशेम कस्य मनसा यज्ञस्य सहसः यहो।
कत् ऊँ वोचे इदम् नमः।।5।।
7403. अध त्वम् हि नः करः
विश्वाः अस्मभ्यम् सुक्षितीः।
वाज-द्रविणसः गिरः।।6।।
7404. कस्य नूनम् परीणसः धियः जिन्वसि दम्-पते।
गो-साता यस्य ते गिरः।।7।।
7405. तम् मर्जयन्त सु-क्रतुम् पुरः-यावानम् आजिषु।
स्वेषु क्षयेषु वाजिनम्।।8।।
7406. क्षेति क्षेमेभिः साधुभिः नकिः यम् घ्नन्ति हन्ति।
यः अग्ने सुवीरः एधते।।9।।

## सूक्त-85
7407. आ मे हवम् नासत्या अश्विना गच्छतम् युवम्।
मध्वः सोमस्य पीतये।।1।।
7408. इमम् मे स्तोमम् अश्विना
इमम् मे शृणुतम् हवम्।
मध्वः सोमस्य पीतये।।2।।
7409. अयम् वाम् कृष्णः अश्विना हवते वाजनीवसू।
मध्वः सोमस्य पीतये।।3।।
7410. शृणुतम् जरितुः हवम् कृष्णस्य स्तुवतः नरा।
मध्वः सोमस्य पीतये।।4।।
7411. छर्दिः यन्तम् अदाभ्यम् विप्राय स्तुवते नरा।
मध्वः सोमस्य पीतये।।5।।
7412. गच्छतम् दाशुषः गृहम् इत्था स्तुवतः अश्विना।
मध्वः सोमस्य पीतये।।6।।
7413. युञ्जाथाम् रासभम् रथे वीड-अङ्गे वृषण्वसू।
मध्वः सोमस्य पीतये।।7।।
7414. त्रि-वन्धुरेण त्रिवृता रथेन आ यातम् अश्विना।
मध्वः सोमस्य पीतये।।8।।
7415. नु मे गिरः नासत्या अश्विना प्र अवतम् युवम्।
मध्वः सोमस्य पीतये।।9।।

## सूक्त-86
7416. उभा हि दस्रा भिषजा मयः-भुवा
उभा दक्षस्य वचसः बभूवथुः।
ता वाम् विश्वकः हवते तनूकृथे मा
नः वि यौष्टम् सख्या मुमोचतम्।।1।।
7417. कथा नूनम् वाम् वि-मनाः उप स्तवत्
युवम् धियम् ददथुः वस्यः-इष्टये।
ता वाम् विश्वकः हवते तनूकृथे मा
नः वि यौष्टम् सख्या मुमोचतम्।।2।।
7418. युवम् हि स्म पुरुभुजा इमम्
एधतुम् विष्णाप्वे ददथुः वस्यः-इष्टये।
ता वाम् विश्वकः हवते तनू-कृथे मा
नः वि यौष्टम् सख्या मुमोचतम्।।3।।
7419. उत त्यम् वीरम् धनसाम् ऋजीषिणम्
दूरे चित् सन्तम् अवसे हवामहे।
यस्य स्वादिष्ठा सु-मतिः पितुः यथा मा
नः वि यौष्टम् सख्या मुमोचतम्।।4।।
7420. ऋतेन देवः सविता शम्-आयते
ऋतस्य शृङ्गम् उर्विया वि पप्रथे।
ऋतम् ससाह महि चित् पृतन्यतः मा
नः वि यौष्टम् सख्या मुमोचतम्।।5।।

## सूक्त-87
7421. दयुम्नी वाम् स्तोमः अश्विना
क्रिविः न सेके आ गतम्।
मध्वः सुतस्य सः दिवि प्रियः
नरा पातम् गौरौ-इव इरिणे।।1।।
7422. पिबतम् घर्मम् मधु-मन्तम्
अश्विना आ बर्हिः सीदतम् नरा।
ता मन्दसाना मनुषः दुरोणे आ
नि पातम् वेदसा वयः।।2।।
7423. आ वाम् विश्वाभिः ऊतिभिः प्रिय-मेधाः अहूषत।
ता वर्तिः यातम् उप वृक्त-बर्हिषः
जुष्टम् यज्ञम् दिविष्टिषु।।3।।
7424. पिबतम् सोमम् मधु-मन्तम्
अश्विना आ बर्हिः सीदतम् सुमत्।
ता ववृधानौ उप सु-स्तुतिम्
दिवः गन्तम् गौरौ-इव इरिण्।।4।।
7425. आ नूनम् यातम् अश्विना अश्वेभिः प्रुषितप्सुभिः।
दस्रा हिरण्यवर्तनी शुभः पती पातम् सोमम् ऋतवृधा।।5।।
7426. वयम् हि वाम् हवामहे
विपन्यवः विप्रासः वाजसातये।
ता वल्गू दस्रा पुरु-दंससा
धिया अश्विना श्रुष्टी आ गतम्।।6।।

## सूक्त-88
7427. तम् वः दस्मम् ऋति-सहम्
वसोः मन्दानम् अन्धसः।
अभि वत्सम् न स्वसरेषु
धेनवः इन्द्रम् गीः-भिः नवामहे।।1।।
7428. दयुक्षम् सु-दानुम् तविषीभिः
आ-वृतम् गिरिम् न पुरु-भोजसम्।
क्षुमन्तम् वाजम् शतिनम् सहस्रिणम्
मक्षु गो-मन्तम् ईमहे।।2।।
7429. न त्वा बृहन्तः अद्रयः वरन्ते इन्द्र वीडवः।
यत् दित्ससि स्तुवते मा-वते वसु
नकिः तत् आ मिनाति ते।।3।।
7430. योद्धा असि क्रत्वा शवसा उत
दंसना विश्वा जाता अभि मज्मना।
आ त्वा अयम् अर्कः ऊतये
ववर्तति यम् गोतमाः अजीजनन्।।4।।
7431. प्र हि रिरिक्षे ओजसा दिवः अन्तेभ्यः परि।
न त्वा विव्याच रजः इन्द्र
पार्थिवम् अनु स्वधाम् ववक्षिथ।।5।।
7432. नकिः परिष्टिः मघ-वन्
मघस्य ते यत् दाशुषे दशस्यसि।

अस्माकम् बोधि उचथस्य
चोदिता मंहिष्ठः वाज-सातये।।6।।

## सूक्त-89

7433. बृहत् इन्द्राय गायत मरुतः वृत्रहम्-तमम्।
येन ज्योतिः अजनयन् ऋत-वृधः देवम् देवाय जागृवि।।1।।
7434. अप अधमत् अभि-शस्तीः अशस्ति-हा
अथ इन्द्रः द्युम्नी आ अभवत्।
देवाः ते इन्द्र सख्याय येमिरे बृहद्भानो मरुत्-गण।।2।।
7435. प्र वः इन्द्राय बृहते मरुतः ब्रह्म अर्चत,
वृत्रम् हनति वृत्रहा शतक्रतुः वज्रेण शतपर्वणा।।3।।
7436. अभि प्र भर धृषता धृषत्-मनः
श्रवः चित् ते असत् बृहत्।
अर्षन्तु आपः जवसा वि मातरः हनः वृत्रम् जय स्वः।।4।।
7437. यत् जायथाः अपूर्व्य मघवन् वृत्र-हत्याय।
तत् पृथिवीम् अप्रथयः तत् अस्तभ्नाः उत द्याम्।।5।।
7438. तत् ते यज्ञः अजायत तत् अर्कः उत हस्कृतिः।
तत् विश्वम् अभि-भः असि
यत् जातम् यत् च जन्त्वम्।।6।।
7439. आमासु पक्वम् ऐरयः आ सूर्यम् रोहयः दिवि।
घर्मम् न सामन् तपत सुवृक्तिभिः
जुष्टम् गिर्वणसे बृहत्।।7।।

## सूक्त-90

7440. आ नः विश्वासु हव्यः इन्द्रः समत्-सु भूषतु।
उप ब्रह्माणि सवनानि वृत्रहा परम-ज्याः ऋचीषमः।।1।।
7441. त्वम् दाता प्रथमः राधसाम्
असि असि सत्यः ईशान-कृत्।
तुवि-द्युम्नस्य युज्या आ वृणीमहे पुत्रस्य शवसः महः।।2।।
7442. ब्रह्म ते इन्द्र गिर्वणः क्रियन्ते अनतिद्भुता।
इमा जुषस्व हरि-अश्व योजना इन्द्र या ते अमन्महि।।3।।
7443. त्वम् हि सत्यः मघवन् अनानतः
वृत्रा भूरि नि-ऋञ्जसे।
सः त्वम् शविष्ठ वज्र-हस्त दाशुषे
अर्वाञ्चम् रयिम् आ कृधि।।4।।
7444. त्वम् इन्द्र यशाः असि ऋजीषी शवसः पते।
त्वम् वृत्राणि हंसि अप्रतीनि
एकः इत् अनुत्ता चर्षणि-धृता।।5।।
7445. तम् ऊँ त्वा नूनम् असुर
प्र-चेतसम् राधः भागम्-इव ईमहे।
मही-इव कृत्तिः शरणा ते इन्द्र
प्र ते सुम्ना नः अश्नवन्।।6।।

## सूक्त-91

7446. कन्या वाः अव-यती सोमम् अपि सुता अविदत्।
अस्तम् भरन्ती अब्रवीत् इन्द्राय
सुनवै त्वा शक्राय सुनवै त्वा।।1।।
7447. असौ यः एषि वीरकः गृहम्-गृहम् वि-चाकशत्।
इमम् जम्भ-सुतम् पिब धाना-वन्तम्
करम्भिणम् अपूप-वन्तम् उक्थिनम्।।2।।
7448. आ चन त्वा चिकित्सामः
अधि चन त्वा न इमसि।
शनैः-इव शनकैः-इव इन्द्राय इन्दो परि स्रव।।3।।
7449. कुवित् शकत् कुवित् करत्
कुवित् नः वस्यसः करत्।
कुवित् पति-द्विषः यतीः इन्द्रेण सम्-गमामहै।।4।।
7450. इमानि त्रीणि विष्टपा तानि इन्द्र वि रोहय।
शिरः ततस्य उर्वराम् आत् इदम् मे उप उदरे।।5।।
7451. असौ च या नः उर्वरा आत् इमाम् तन्वम् मम।
अथो ततस्य यत् शिरः सर्वा ता रोमशा कृधि।।6।।
7452. खे रथस्य खे अनसः खे युगस्य शतक्रतो।
अपलाम् इन्द्र त्रिः पूत्वी अकृणोः सूर्य-त्वचम्।।7।।

## सूक्त-92

7453. पान्तम् आ वः अन्धसः इन्द्रम् अभि प्र गायत।
विश्व-सहम् शत-क्रतुम् मंहिष्ठम् चर्षणीनाम्।।1।।
7454. पुरु-हूतम् पुरु-स्तुतम् गाथान्यम् सन-श्रुतम्।
इन्द्रः इति ब्रवीतन।।2।।
7455. इन्द्रः इत् नः महानाम् दाता वाजानाम् नृतुः।
महान् अभिज्ञु आ यमत्।।3।।
7456. अपात् ऊँ शिप्री अन्धसः सु-दक्षस्य प्र-होषिणः।
इन्दोः इन्द्रः यव-आशिरः।।4।।
7457. तम् ऊँ अभि प्र अर्चत इन्द्रम् सोमस्य पीतये।
तत् इत् हि अस्य वर्धनम्।।5।।
7458. अस्य पीत्वा मदानान् देवः देवस्य ओजसा।
विश्वा अभि भुवना भुवत्।।6।।
7459. त्यम् ऊँ वः सत्रा-सहम् विश्वासु गीर्षु आ-यतम्।
आ च्यवयसि ऊतये।।7।।
7460. युध्मम् सन्तम् अनर्वाणम्
सोम-पाम् अनप-च्युतम्।
नरम् अवार्य-क्रतुम्।।8।।
7461. शिक्ष नः इन्द्र रायः आ पुरु विद्वान् ऋचीषम।
अव नः पार्ये धने।।9।।
7462. अतः चित् इन्द्र नः उप आ याहि शत-वाजया।
इषा सहस्र-वाजया।।10।।
7463. अयाम धी-वतः धियः अर्वत्-भिः शक्र गोदरे।
जयेम पृत्सु वज्रिवः।।11।।

7464. वयम् ऊँ त्वा शतक्रतो गावः न यवसेषु आ।
उक्थेषु रणयामसि।।12।।
7465. विश्वा हि मर्त्य-त्वना अनु-कामा शतक्रतो।
अग्नम् वज्रिन् आ-शसः।।13।।
7466. त्वे सु पुत्र शवसः अवृत्रन् काम-कातयः।
न त्वाम् इन्द्र अति रिच्यते।।14।।
7467. सः नः वृषन् सनिष्ठया सम् घोरया द्रवित्न्वा।
धिया अविड्ढि पुरम्-ध्या।।15।।
7468. यः ते नूनम् शतक्रतो इन्द्र द्युम्नि-तमः मदः।
तेन नूनम् मदे मदेः।।16।।
7469. यः ते चित्र-श्रवः-तमः यः इन्द्र वृत्रहन्-तमः।
यः ओजः-दातमः मदः।।17।।
7470. विद्म हि यः ते अद्रिवः त्वा-दत्तः सत्य सोमपाः।
विश्वासु दस्म कृष्टिषु।।18।।
7471. इन्द्राय मद्वने सुतम् परि स्तोभन्तु नः गिरः।
अर्कम् अर्चन्तु कारवः।।19।।
7472. यस्मिन् विश्वाः अधि
श्रियः रणन्ति सप्त सम्-सदः।
इन्द्रम् सुते हवामहे।।20।।
7473. त्रि-कद्रुकेषु चेतनम् देवासः यज्ञम् अत्नत।
तम् इत् वर्धन्तु नः गिरः।।21।।
7474. आ त्वा विशन्तु इन्दवः समुद्रम्-इव सिन्धवः।
न त्वाम् इन्द्र अति रिच्यते।।22।।
7475. विव्यक्थ महिना वृषन् भक्षम् सोमस्य जागृवे।
यः इन्द्र जठरेषु ते।।23।।
7476. अरम् ते इन्द्र कुक्षये सोमः भवतु वृत्र-हन्।
अरम् धामभ्यः इन्दवः।।24।।
7477. अरम् अश्वाय गायति श्रुत-कक्षः अरम् गवे।
अरम् इन्द्रस्य धाम्ने।।25।।
7478. अरम् हि स्म सुतेषु नः सोमेषु इन्द्र भूषसि।
अरम् ते शक्र दावने।।26।।
7479. पराकात्तात् चित् अद्रिवः त्वाम् नक्षन्त नः गिरः।
अर्म गमाम् ते वयम्।।27।।
7480. एव हि असि वीरयुः एव शूरः उत स्थिरः।
एव ते राध्यम् मनः।।28।।
7481. एव रातिः तुवि-मघ विश्वेभिः धायि धातृभिः।
अध चित् इन्द्र मे सचा।।29।।
7482. मो सु ब्रह्मा-इव तन्द्रयुः भुवः वाजानाम् पते।
मत्स्व सुतस्य गोमतः।।30।।
7483. मा नः इन्द्र अभि आ-दिशः सूरः अक्तुषु आ यमन्।
त्वा युजा वनेम तत्।।31।।
7484. त्वया इत् इन्द्र युजा वयम् प्रति ब्रुवीमहि स्पृधः।
त्वम् अस्माकम् तव स्मसि।।32।।
7485. त्वाम् इत् हि त्वा-यवः अनु-नोनुवतः चरान्।
सखायः इन्द्र कारवः।।33।।

## सूक्त-93

7486. उत् घ इत् अभि श्रुत-मघम् वृषभम् नर्य-अपसम्।
अस्तारम् एषि सूर्य।।1।।
7487. नव यः नवतिम् पुरः बिभेद बाहु-ओजसा।
अहिम् च वृत्रहा अवधीत।।2।।
7488. सः नः इन्द्रः शिवः सखा अश्ववत् गोमत् यव-मत्।
उरुधारा-इव दोहते।।3।।
7489. यत् अद्य कत् च वृत्र-हन् उत्-अगाः अभि सूर्य।
सर्वम् तत् इन्द्र ते वशे।।4।।
7490. यत् वा प्र-वृद्ध सत्-पते न मरै मन्यसे।
उतो तत् सत्यम् इत् तव।।5।।
7491. ये सोमासः परा-वति ये अर्वा-वति सुन्विरे।
सर्वान् तान् इन्द्र गच्छसि।।6।।
7492. तम् इन्द्रम् वाजयामसि महे वृत्राय हन्तवे।
सः वृषा वृषभः भुवत्।।7।।
7493. इन्द्रः सः दामने कृतः ओजिष्ठः सः मदे हितः।
द्युम्नी श्लोकी सः सोम्यः।।8।।
7494. गिरा वज्रः न सम्-भृतः सबलः अनप-च्युतः।
ववक्षे ऋष्वः अस्तृतः।।9।।
7495. दुः-गे चित् नः सु-गम् कृधि गृणानः इन्द्र गिर्वणः
त्वम् च मघवन् वशः।।10।।
7496. यतस्य ते नु चित् आ-दिशम्
न मिनन्ति स्वराज्यम्।
न देवः न अध्रिगुः जनः।।11।।
7497. अध ते अप्रति-स्कुतम् देवी शुष्मम् सपर्यतः।
उभे सुशिप्र रोदसी।।12।।
7498. त्वम् एतत् अधारयः कृष्णासु रोहिणीषु च।
परुष्णीषु रुशत् पयः।।13।।
7499. वि यत् अहेः अध त्विषः विश्वे देवासः अक्रमुः।
विदत् मृगस्य तान् अमः।।14।।
7500. आत् ऊँ मे नि-वरः भुवत् वृत्रहा अदिष्ट पौंस्यम्।
अजात-शत्रुः अस्तृतः।।15।।
7501. श्रुतम् वः वृत्रहन्-तमम् प्र शर्धम् चर्षणीनाम्।
आ-शुषे राधसे महे।।16।।
7502. अया धिया च गव्य-या पुरु-नामन् पुरु-स्तुत।
यत् सोमे-सोमे आ अभवः।।17।।
7503. बोधित्-मनाः इत् अस्तु नः वृत्रहा भूरि-आसुतिः।
शृणोतु शक्रः आ-शिषम्।।18।।
7504. कया त्वम् नः ऊत्या अभि प्र मन्दसे वृषन्।

कया स्तोतृभ्यः आ भर।।19।।
7505. कस्य वृषा सुते सचा नियुत्वान् वृषभः रणत्।
वृत्रहा सोम-पीतये।।20।।
7506. अभि सु नः त्वम् रयिम् मन्दसानः सहस्रिणम्।
प्रयन्ता बोधि दाशुषे।।21।।
7507. पत्नी-वन्तः सुतः इमे उशन्तः यन्ति वीतये।
अपाम् जग्मिः नि-चुम्पुणः।।22।।
7508. इष्टाः होत्राः असृक्षत इन्द्रम् वृधासः अध्वरे।
अच्छ अव-भृथम् ओजसा।।23।।
7509. इह त्या सधमाद्या हरी हिरण्यकेश्या।
वोडम् अभि प्रयः हितम्।।24।।
7510. तुभ्यम् सोमाः सुताः इमे स्तीर्णम् बर्हिः विभावसो।
स्तोतृभ्यः इन्द्रम् आ वह।।25।।
7511. आ ते दक्षम् वि रोचना दधत् रत्ना वि दाशुषे।
स्तोतृभ्यः इन्द्रम् अर्चत।।26।।
7512. आ ते दधामि इन्द्रियम् उक्था विश्वा शतक्रतो।
स्तोतृभ्यः इन्द्र मृडय।27।।
7513. भद्रम्-भद्रम् नः आ भर इषम् ऊर्जम् शतक्रतो।
यत् इन्द्र मृडयासि नः।।28।।
7514. सः नः विश्वानि आ भर सुवितानि शतक्रतो।
यत् इन्द्र मडयासि नः।।29।।
7515. त्वाम् इत् वृत्रहन्-तम सुत-वन्तः हवामहे।
यत् इन्द्र मृडयासि नः।।30।।
7516. उप नः हरिभिः सुतम् याहि मदानाम् पते।
उप नः हरिभिः सुतम्।।31।।
7517. द्विता यः वृत्रहन्-तमः विदे इन्द्रः शत-क्रतुः।
उप नः हरिभिः सुतम्।।32।।
7518. त्वम् हि वृत्रहन् एषाम् पाता सोमानाम् असि।
उप नः हरिभिः सुतम्।।33।।
7519. इन्द्रः इषे ददातु नः ऋभुक्षणम् ऋभुम् रयिम।
वाजी ददातु वाजिनम्।।34।।

## सूक्त-94

7520. गौः धयति मरुताम् श्रवस्युः माता मघोनाम्।
युक्ता वह्निः रथानाम्।।1।।
7521. यस्याः देवाः उपस्थे व्रता विश्वे धारयन्ते।
सूर्यामासा दृशे कम्।।2।।
7522. तत् सु नः विश्वे अर्यः आ सदा गृणन्ति कारवः।
मरुतः सोम-पीतये।।3।।
7523. अस्ति सोमः अयम् सुतः
पिबन्ति अस्य मरुतः उत।
स्वराजः अश्विना।।4।।
7524. पिबन्ति मित्रः अर्यमा तना पूतस्य वरुणः।
त्रि-सधस्थस्य जावतः।।5।।
7525. उतो नु अस्य जोषम् आ इन्द्रः सुतस्य गोमतः।
प्रातः होता-इव मत्सति।।6।।
7526. कत् अत्विषन्त सूरयः तिरः आपः-इव स्रिधः।
अर्षन्ति पूत-दक्षसः।।7।।
7527. कत् वः अद्य महानाम् देवानाम् अवः वृणे त्मना
च दस्म-वर्चसाम्।।8।।
7528. आ ये विश्वा पार्थिवानि पप्रथन् रोचना दिवः।
मरुतः सोम-पीतये।।9।।
7529. त्यान् नु पूत-दक्षसः दिवः वः मरुतः हुवे।
अस्य सोमस्य पीतये।।10।।
7530. त्यान् नु ये वि रोदसी तस्तभुः मरुतः हुवे।
अस्य सोमस्य पीतये।।11।।
7531. त्यम् नु मारुतम् गणम् गिरिस्थाम् वृषणम् हुवे।
अस्य सोमस्य पीतये।।12।।

## सूक्त-95

7532. आ त्वा गिरः रथीः-इव अस्थुः सुतेषु गिर्वणः।
अभि त्वा सम् अनूषत इन्द्र वत्सम् न मातरः।।1।।
7533. आ त्वा शुक्राः अचुच्यवुः सुतासः इन्द्र गिर्वणः।
पिब तु अस्य अन्धसः इन्द्र विश्वासु ते हितम्।।2।।
7534. पिब सोमस्य मदाय कम्
इन्द्र श्येन-आभृतम् सुतम्।
त्वम् हि शश्वतीनाम् पतिः राजा विशाम् असि।।3।।
7535. श्रुधि हवम् तिरश्च्याः इन्द्र यः त्वा सर्पयति।
सुवीर्यस्य गोमतः रायः पूर्धि महान् असि।।4।।
7536. इन्द्र यः ते नवीयसीम् गिरम् मन्द्राम् अजीजनत्।
चिकित्वित्-मनसम् धियम् प्रत्नाम् ऋतस्य पिप्युषीम्।।5।।
7537. तम् ॐ स्तवाम यम् गिरः इन्द्रम् उक्थानि ववृधुः।
पुरूणि अस्य पौंस्या सिसासन्तः वनामहे।।6।।
7538. एतो नु इन्द्रम् स्तवाम शुद्धम् शुद्धेन साम्ना।
शुद्धैः उक्थैः ववृध्वांसम् शुद्धः आशीः-वान् ममत्तु।।7।।
7539. इन्द्र शुद्धः नः आ गहि
शुद्धः शुद्धाभिः ऊतिभिः।
शुद्धः रयिम् नि धारय शुद्धः ममद्धि सोम्यः।।8।।
7540. इन्द्र शुद्धः हि नः रयिम् शुद्धः रत्नानि दाशुषे।
शुद्धः वृत्राणि जिघ्नसे शुद्धः वाजम् सिसासति।।9।।

## सूक्त-96

7541. अस्मै उषसः आ अतिरन्त
यामम् इन्द्राय नक्तम् ऊर्म्याः सुवाचः।
अस्मै आपः मातरः सप्त तस्थुः
नृभ्यः तराय सिन्धवः सुपाराः।।1।।
7542. अति-विद्धा विथुरेण चित् अस्त्रा

त्रिः सप्त सानु सम्-हिता गिरीणाम्।
न तत् देवः न मर्त्यः तुतुर्यात्
यानि प्र-वृद्धः वृषभः चकार।।2।।
7543. इन्द्रस्य वज्रः आयसः नि-मिश्लः
इन्द्रस्य बाह्वोः भूयिष्ठम् ओजः।
शीर्षन् इन्द्रस्य क्रतवः निरेके
आसन् आ ईषन्त श्रुत्यै उपाके।।3।।
7544. मन्ये त्वा यज्ञियम् यज्ञियम् यज्ञियानाम्
मन्ये त्वा च्यवनम् अच्युतानाम्।
मन्ये त्वा सत्वनाम् इन्द्र केतुम्
मन्ये त्वा वृषभम् चर्षणीनाम्।।4।।
7545. आ यत् वज्रम् बाह्वोः इन्द्र
धत्से मद-च्युतम् अहये हन्तवै ऊँ।
प्र पर्वताः अनवन्त प्र गावः प्र
ब्रह्माणः अभिनक्षन्तः इन्द्रम्।।5।।
7546. तम् ऊँ स्तवाम् यः इमा जजान
विश्वा जातानि अवराणि अस्मत्।
इन्द्रेण मित्रम् दिधिषेम गीः-भिः
उपो नमः-भिः वृषभम् विशेम।।6।।
7547. वृत्रस्य त्वा श्वसथात् ईषमाणाः
विश्वे देवाः अजहुः ये सखायः।
मरुत्-भिः इन्द्र सख्यम् ते अस्तु
अथ इमाः विश्वाः पृतनाः जयासि।।7।।
7548. त्रिः-षष्टिः त्वा मरुतः ववृधानाः
उस्राः-इव राशयः यज्ञियासः।
उप त्वा आ इमः कृधि नः भाग-धेयम्
शुष्मम् ते एना हविषा विधेम।।8।।
7549. तिग्मम् आयुधम् मरुताम् अनीकम्
कः ते इन्द्र पत्रति वज्रम् दधर्ष।
अनायुधासः असुराः अदेवाः
चक्रेण तान् अप वप ऋजीषिन्।।9।।
7550. महे उग्राय तवसे सु-वृक्तिम्
प्र ईरय शिव-तमाय पश्वः।
गिर्वाहसे गिरः इन्द्राय पूर्वीः
धेहि तन्वे कुवित् अङ्ग वेदत्।।10।।
7551. उक्थ-वाहसे विभ्वे मनीषाम्
द्रुणा न पारम् ईरय नदीनाम्।
नि स्पृश धिया तन्वि श्रुतस्य
जुष्टतरस्य कुवित् अङ्ग वेदत्।।11।।
7552. तत् विविड्ढि यत् ते इन्द्रः जुजोषत्
स्तुहि सु-स्तुतिम् नमसा आ विवास।
उप भूष जरितः मा रुवण्यः श्रवय
वाचम् कुवित् अङ्ग वेदत्।।12।।
7553. अव द्रप्सः अंशु-मतीम् अतिष्ठत्
इयानः कृत्र,णः दशभिः सहस्रैः।
आवत् तम् इन्द्रः शच्या धमन्तम्
अप स्नेहितीः नृ-मनाः अधत्त।।13।।
7554. द्रप्सम् अपश्यम् विषुणए
चरन्तम् उप-ह्वरे नद्यः अंशु-मत्याः।
नभः न कृष्णम् अवस्थिवांसम् इष्यामि
वः वृषणः युध्यत आजौ।।14।।
7555. अध द्रप्सः अंशु-मत्याः
उपस्थे अधारयत् तन्वम् तित्विषाणः।
विशः अदेवीः अभि आ-चरन्तीः
बृहस्पतिना युजा इन्द्रः ससहे।।15।।
7556. त्वम् ह तयत् सप्तभ्यः जायमानः
अशत्रु-भ्यः अभवः शत्रुः इन्द्र।
गूड द्यावापृथिवी अनु अविन्दः
विभुमत्-भ्यः भुवनेभ्यः रणम् धाः।।16।।
7557. त्वम् ह त्यत् अप्रति-मानम् ओजः
वज्रेण वज्रिन् धृषितः जघन्थ।
त्वम् शुष्णस्य अव अतिरः वधत्रैः
त्वम् गाः इन्द्र शच्या इत् अविन्दः।।17।।
7558. त्वम् ह त्यत् वृषभ चर्षणीनाम्
घनः वृत्राणाम् तविषः बभूथ।
त्वम् सिन्धून् असृजः तस्तभानाम्
त्वम् अपः अजयः दासपत्नीः।।18।।
7559. सः सु-क्रतुः रणिता यः सुतेषु
अनुत्त-मन्युः यः अहा-इव रेवान्।
यः एकः इत् नरि अपांसि कर्ता सः
वृत्रहा प्रति इत् अन्यम् आहुः।।19।।
7560. सः वत्रहा इन्द्रः चर्षणि-धृत्
तम् सु-स्तुत्या हव्यम् हुवेम।
सः प्र-अविता मघवा नः अधिवक्ता
सः वाजस्य श्रवस्यस्य दाता।।20।।
7561. सः वृत्रहा इन्द्रः ऋभुक्षाः सद्यः जज्ञानः हव्यः बभूव।
कृण्वन् अपांसि नर्या पुरूणि
सोमः न पीतः हव्यः सखिभ्यः।।21।।

## सूक्त-97

7562. याः इन्द्र भुजः आ अभरः स्वः-वान् असुरेभ्यः।
स्तोतारम् इत् मघवन् अस्य
वर्धय ये च त्वे वृक्त-बर्हिषः।।1।।
7563. यम् इन्द्र दधिषे त्वम्
अश्वम् गाम् भागम् अव्ययम्।

यजमाने सुन्वति दक्षिणावति
तस्मिन् तम् धेहि मा पणौ।।2।।
7564. यः इन्द्र सस्ति अव्रतः अनु-स्वापम् अदेव-युः।
स्वैः सः एवैः मुमुरत् पोष्यम्
रयिम् सनुतः धेहि तम् ततः।।3।।
7565. यत् शक्र असि परावति यत् अर्वावति वृत्रहन्।
अतः त्वा गीः-भिः द्यु-गत् इन्द्र
केशिभिः सुत-वान् आ विवासति।।4।।
7566. यत् वा असि रोचने दिवः समुद्रस्य अधि विष्टपि।
यत् पार्थिवे सदने वृत्रहन्-तम यत् अन्तरिक्षे आ गहि।।5।।
7567. सः नः सोमेषु सोमपाः सुतेषु शवसः पते।
मादयस्व राधसा सूनृता-वता इन्द्र राया परीणसा।।6।।
7568. मा नः इन्द्र परा वृणक् भव नः सध-माद्यः।
त्वम् नः ऊती त्वम् इत् नः
आप्यम् मा नः इन्द्र परा वृणक्।।7।।
7569. अस्मे इन्द्र सचा सुते नि सद पीतये मधु।
कृधि जरित्रे मघवन् अवः महत्,
अस्मे इन्द्र सचा सुते।।8।।
7570. न त्वा देवासः आशत न मर्त्यासः अद्रिवः।
विश्वा जातानि शवसा अभि-भसः
असि न त्वा देवासः आशत।।9।।
7571. विश्वाः पृतनाः अभि-भूतरम् नरम्
सजूः ततक्षुः इन्द्रम् जजनुः च राजसे।
क्रत्वा वरिष्ठम् वरे आ-मुरिम् उत उग्रम्
ओजिष्ठम् तवसम् तरस्विनम्।।10।।
7572. सम् ईम् रेभासः अस्वरन् इन्द्रम् सोमस्य पीतये।
स्वः-पतिम् यत् ईम् वृधे धृत-व्रतः
हि ओजसा सम् ऊतिभिः।।11।।
7573. नेमिम् नमन्ति चक्षसा मेषम् विप्राः अभि-स्वरा।
सु-दीतयः वः अद्रुहः अपि
कर्णे तरस्विनः सम् ऋक्वभिः।।12।।
7574. तम् इन्द्रम् जोहवीमि मघ-वानम् उग्रम्
सत्रा दधानम् अप्रति-स्कुतम् शवांसि।
मंहिष्ठः गीः-भिः आ च यज्ञियः ववर्तत्
राये नः विश्वा सु-पथा कृणोतु वज्री।।13।।
7575. त्वम् पुरः इन्द्र चिकित् एनाः वि
ओजसा शविष्ठ शक्र नाशयध्यै।
त्वत् विश्वानि भुवनानि वज्रिन्
द्यावा रेजेते पृथिवी च भीषा।।14।।
7576. तत् मा ऋतम् इन्द्र शूर चित्र पातु
अपः न वज्रिन् दुः-इता अति पर्षि भूरि।
कदा नः इन्द्र रायः आ दशस्येः
विश्व-प्स्न्यस्य स्पृहयाय्यस्य राजन्।।15।।

## सक्त 98

7577. इन्द्राय साम गायत विप्राय बृहते बृहत्।
धर्मकृते विपःचिते पनस्यवे।।1।।
7578. त्वम् इन्द्र अभिभूः असि त्वम् सूर्यम् अरोचयः।
विश्वकर्मा विश्वदेवः महान् असि।।2।।
7579. विभ्राजन् ज्योतिषा स्वः अगच्छः रोचनम् दिवः।
देवाः ते इन्द्र सख्याय येमिरे।।3।।
7580. आ इन्द्र नः गधि प्रियः सत्राजित् अगोह्यः।
गिरिः न विश्वतः पृथुः दिवः।।4।।
7581. अभि हि सत्य सोमपाः उभे बभूथ रोदसी।
इन्द्र असि सुन्वतः वृधः पतिः दिवः।।5।।
7582. त्वम् हि शश्वतीनम् इन्द्र दर्ता पुराम् असि।
हन्ता दस्योः मनोः वृधः पतिः दिवः।।6।।
7583. अध हि इन्द्र गिवर्णः उप
त्वा कामान् महः ससृज्महे।
उदाइव यन्तः उदभिः।।7।।
7584. वाः न त्वा यव्याभिः वर्धन्ति शूर ब्रह्माणि।
ववृध्वासम् चित् अद्रिवः दिवे-दिवे।।8।।
7585. युञ्जन्ति हरी इषिरस्य गाथया।
उरौ रथे उरुयुगे इन्द्रवाहा वचःयुजा।।9।।
7586. त्वम् नः इन्द्र आ भर ओजः
नृम्णम् शतक्रतो विचर्षणे।
आ वीरम् पृतनासहम्।।10।।
7587. त्वम् हि नः पिता त्वम् माता शतक्रतो बभूविथ।
अध ते सुम्नम् ईमहे।।11।।
7588. त्वम् शुष्मिन् पुरुहूत,
वाजयन्तम् उप ब्रुवे शतक्रतो।
सः नः रास्व सुवीर्यम्।।12।।

## सूक्त 99

7589. त्वाम् इदा ह्यः नरः अपीप्यन् वज्रिन् भूर्णयः।
सः इन्द्र स्तोमवाहसाम् इह
श्रुधि उप स्वसरम् आ गहि।।1।।
7590. मत्स्व सुशिप्र हरिवः तत्
ईमहे त्वे आ भूषन्ति वेधसः।
तव श्रवासि उपमानि उक्थ्या सुतेषु इन्द्र गिर्वणः।।2।।
7591. श्रायन्तःइव सूर्यम् विश्वा इत् इन्द्रस्य भक्षत।
वसूनि जाते जनमाने ओजसा प्रति भागम् न दीधिम।।3।।
7592. अनर्शरातिम् वसुदाम् उप
स्तुहि भद्राः इन्द्रस्य रातयः।
सः अस्य कामम् विधतः न
रोषति मनः दानाय चोदयन्।।4।।
7593. त्वम् इन्द्र प्रतूर्तिषु अभि विश्वाः असि स्पृधः।

अशस्तिहा जनिता विश्वतूः असि
त्वम् तूर्य तरुष्यतः ।।5।।
7594. अनु ते शुष्मम् तुरयन्तम्
ईयतुः क्षोणि शिशुम् न मातरा।
विश्वाः ते स्पृधः श्नथयन्त
मन्यवे वृत्रम् यत् इन्द्र तूर्यसि।।6।।
7595. इतः उती वः अजरम् प्र हेतारम् अप्रहितम्।
आशुम् जेतारम् हेतारम् रथितमम् अतूर्तम् तुग्र्यवृधम्।।7।।
7596. इष्कर्तारम् अनिःकृतम्
सहःकृतम् शतमूतिम् शतक्रतुम्।
समानम् इन्द्रम् अवसे हवामहे वसवानम वसुजुवम्।।8।।

## सुक्त 100

7597. अयम् ते एमि तन्वा पुरस्तात्
विश्वे देवाः अभि मा यन्ति पश्चात्।
यदा मह्यम् दिधरः भागम् इन्द्र
आत् इत् मया कृणवः वीर्याणि।।1।।
7598. दधामि ते मधुनः भक्षम् अग्रे
हितः ते भागः सुतः अस्तु सोमः।
असः च त्वम् दक्षिणतः सखा मे
अध वृत्रणि जङ्घनाव भूरि।।2।।
7599. प्र सु स्तोमम् भरत वाजयन्तः
इन्द्राय सत्यम् यदि सत्यम् अस्ति।
न इन्द्रः अस्ति नेमः उ त्वः आह
कः ईम् ददर्श कम् अभि स्तवाम।।3।।
7600. अयम् अस्ति जरितरिति पश्य मा
इह विश्वा जातानि अभि अस्मि महा।
ऋतस्य मा प्रदिशः वर्धयन्ति
आदर्दिरः भुवना दर्दरीमि।।4।।
7601. आ यत् मा वेनाः अरुहन् ऋतस्य
एकम् आसीनम् हर्यतस्य पृष्ठे।
मनः चित् मे हृदे आ प्रति अवोचत्
अचिक्रदन् शिशुमन्तः सखायः।।5।।
7602. विश्वा इत् ता ते सवनेषु प्रवाच्या
या चकर्थ मघवन् इन्द्र सुन्वते।
पारावतम् यत् पुरुसभृतम् वसु
अपअवृणोः शरभाय ऋषिबन्धवे।।6।।
7603. प्र नूनम् धावत पृथक् न इह यः वः अवावरीत्।
नि सीम् वृत्रस्य मर्मणि वज्रम् इन्द्रः अपीपतत्।।7।।
7604. मनःजवाः अयमानः आयसीम् अतरम् पुरम्।
दिवम् सुपर्ण गत्वाय सोमम् वज्रिणे आ अभरत्।।8।।
7605. समुद्रे अन्तारिति शयते उदा वज्रः अभिवृतः।
भरन्ति अस्मै सम्-यतः पुरःप्रस्त्रवणाः बलिम्।।9।।
7606. यत् वाक् वदन्ती अविचेतनानि
राष्ट्री देवानाम् निससाद मन्द्रा।
चतस्त्रः ऊर्जम् दुदुहे पयांसि
क्व स्वित् अस्याः परमम् जगाम।।10।।
7607. देवीम् वाचम् अजनयन्त देवाः
ताम् विश्वरूपाः पशवः वदन्ति।
सा नः मन्द्रा इषम् ऊर्जम् दुहाना धेनुः
वाक् अस्मान् उप सुस्तुता आ एतु।।11।।
7608. सखे विष्णो वितरम् वि क्रमस्व
द्यौः देहि लोकम् वज्राय विस्कभे।
हनाव वृत्रम् रिणचाव सिन्धून्
इन्द्रस्य यन्तु प्रसवे विसृष्टाः।।12।।

## सूक्त 101

7609. ऋधक् इत्था सः मर्त्यः शशमे देवतातये।
यः नूनम् मित्रावरुणौ अभिष्टये आचक्रे हव्यदातये।।1।।
7610. वर्षिष्ठक्षत्रौ उरुचक्षसा नरा राजना दीर्घश्रुत्-तमा।
ता बाहुता न दसना रथर्यतः साकम् सूर्यस्य रश्मिभिः।।2।।
7611. प्र यः वाम् मित्रावरुणा अजिरः दूतः अद्रवत्।
अयःशीर्षा मदेरघुः।।3।।
7612. न यः सम्-पृच्छे न पुनः
हवीतवे न सम्-वादाय रमते।
तस्मात् नः अद्य सम्-ऋतेः उरुष्यतम्
बाहुभ्याम् नः उरुष्यतम्।।4।।
7613. प्र मित्राय प्र अर्यम्णे
सचथ्यम् ऋतवसो इत्यृतवसो।
वरूथ्यम् वरुणे छन्द्यम् वचः स्तोत्रम् राजसु गायत।।5।।
7614. ते हिन्विरे अरुणम् जेन्यम्
वसु एकम् पुत्रम् तिसृणाम्।
ते धामानि अमृताः मर्त्यानाम् अदब्धाः अभि चक्षते।।6।।
7615. आ मे वचासि उत्-यता द्युमत्-तमानि कर्त्वा।
उभा यातम् नासत्या सजोषसा प्रति हव्यानि वीतये।।7।।
7616. रातिम् यत् वाम् अरक्षसम्
हवामहे युवाभ्याम् वाजिनीवसू।
प्राचीम् होत्राम् प्रतिरन्तौ इतम्
नरा गृणाना जमत्-अग्निना।।8।।
7617. आ नः यज्ञम् दिविस्पृशम् वायो याहि सुमन्मभिः।
अन्तरिति पवित्रे उपरि श्रीणानः
अयम् शुक्रः अयामि ते।।9।।
7618. वेति अध्वर्युः पथिभिः रजिष्ठैः प्रति हव्यानि
वीतये।
अध नियुत्वः उभयस्य नः पिब
शुचिम् सोमम् गोआशिरम्।।10।।

7619. बट् महान् असि सूर्य बट् आदित्य महान् असि।
महः ते सतः महिमा पनस्यते अद्धा देव महान्
असि।।11।।
7620. बट् सूर्य श्रवसा महान् असि सत्रा देव महान् असि।
मह्ना देवानाम् असुर्यः पुरःहितः
विभु ज्योतिः अदाभ्यम्।।12।।
7621. इयम् या नीची अर्कणि रूपा रोहिण्या कृता।
चित्राइव प्रति अदर्शि आयती अन्तः दशसु बाहुषु।।13।।
7622. प्रजाः ह तिस्त्रः अतिआयम् ईयुः
नि अन्याः अर्कम् अभितः विविश्रे।
बृहत् ह तस्थौ भुवनेषु अन्तरिति
पवमानः हरितः आ विवेश।।14।।
7623. माता रुद्राणाम् दुहिता वसूनाम्
स्वसा आदित्यानाम् अमृतस्य नाभिः।
प्र नु वोचम् चिकितुषे जनाय
मा गाम् अनागाम् अदितिम् वधिष्ट।।15।।
7624. वचःविदम् वाचम् उत्-ईरयन्तीम्
विश्वाभिः धीभिः उपतिष्ठमानाम्।
देवीम् देवेभ्यः परि आईयुषीम् गाम्
आ मा अवृक्त मर्त्यः दभ्रचेताः।।16।।

## सूक्त 102

7625. त्वम् अग्ने बृहत् वयः दधासि देव दाशुषे।
कविः गृहपति युवा।।1।।
7626. सः नः ईडानया सह देवान् अग्ने दुवस्युवा।
चिकित् विभानो आ वह।।2।।
7627. त्वया ह स्वित् युजा वयम् चोदिष्ठेन यविष्ठय।
अभि स्मः वाजसातये।।3।।
7628. और्वभृगुवत् शुचिम् अप्नवानवत् आ हुवे।
अग्निम् समुद्रवाससम्।।4।।
7629. हुवे वातस्वनम् कविम् पर्जन्यक्रन्द्यम् सहः।
अग्निम् समुद्रवाससम्।।5।।
7630. आ सवम् सवितुः यथा भगस्यइव भुजिम् हुवे।
अग्निम् समुद्रवाससम्।।6।।
7631. अग्निम् वः वृधन्तम् अध्वराणाम् पुरुतमम्।
अच्छ नप्त्ने सहस्वते।।7।।
7632. अयम् यथा नः आभुवत् त्वष्टा रूपाइव तक्ष्या।
अस्य क्रत्वा यशस्वतः।।8।।
7633. अयम् विश्वाः अभि श्रियः अग्निः देवेषु पत्यते।
आ वाजैः उप नः गमत्।।9।।
7634. विश्वेषाम् इह स्तुहि होतृणाम् यशःतमम्।
अग्निम् यज्ञेषु पूर्व्यम्।।10।।
7635. शीरम् पावकशोचिषम् ज्येष्ठः यः दमेषु आ।
दीदाय दीर्घश्रुत्-तमः।।11।।
7636. तम् अर्वन्तम् न सानसिम् गृणीहि विप्र शुष्मिणम्।
मित्रम् न यातयत्-जनम्।।12।।
7637. उप त्वा जामयः गिरः देदिशतीः हविःकृतः।
वायोः अनीके अस्थिरन्।।13।।
7638. यस्य त्रिधातु अवृतम् बर्हिः तस्थौ असम्-दिनम्।
आपः चित् नि दध पदम्।।14।।
7639. पदम् देवस्य मीहडुषः अनाधृष्टाभिः उतिभिः।
भद्रा सूर्यःइव उपदृक्।।15।।
7640. अग्ने घीतिभिः तेपानः देव शोचिषा।
आ देवान् वक्षि यक्षि च।।16।।
7641. तम् त्वा अजनन्त मातरः कविम् देवासः अङ्गिरः।
हव्यवाहम् अमर्त्यम्।।17।।
7642. प्र चेतसम् त्वा कवे अग्ने दूतम् वरेण्यम्।
हव्यवाहम् नि सेदिरे।।18।।
7643. नहि मे अस्ति अघ्न्या न स्वधितिः वनन्-वति।
अथ एतादृक् भरामि ते।।19।।
7644. यत् अग्ने कानि चित् आ ते दारूणि दध्मसि।

ता जुषस्व यविष्ठय।।20।।
7645. यत् अत्ति उपजिह्विका यत् वम्त्रः अतिसर्पति।
सर्वम् तत् अस्तु ते घृतम्।।21।।
7646. अग्निम् इन्धानः मनसा धियम् सचेत मर्त्यः।
अग्निम् ईधे विवस्वभिः।।22।।

## सूक्त 103

7647. अदर्शि गातुवित्-तमः यस्मिन् व्रतानि आदधुः।
उपो सु जातम् आर्यस्य वर्धनम्
अग्निम् नक्षन्त नः गिरः।।1।।
7648. प्र दैवःदासः अग्निः देवान् अच्छ न मज्मना।
अनु मातरम् पृथिवीम् वि ववृते
तस्थौ नाकस्य सानवि।।2।।
7649. यस्मात् रेजन्त कृषटयः चर्कृत्यानि कृण्वतः।
सहस्त्रसाम् मेधसातौइव त्मना अग्निम् धीभिः
सपर्यत।।3।।
7650. प्र यम् राये निनीषसि मर्तः यः ते वसो दाशत्।
सः वीरम् धत्ते अग्ने उक्थशंसिनम्
त्मना सहस्त्रपोषिणम्।।4।।
7651. सः दृह्डे चित् अभि तृणत्ति वाजम्
अर्वता सः धत्ते अक्षिति श्रवः।
त्वे देवत्रा सदा पुरुवसो विश्वा वामानि धीमहि।।5।।
7652. यः विश्वा दयते वसु होता मन्द्रः जनानाम्।
मधोः न पात्रा प्रथमानि अस्मै
प्र स्तोमाः यन्ति अग्नये।।6।।
7653. अश्वम् न गीःभिः रथ्यम्
सुदानवः मर्मृज्यन्ते देवयवः।
उभे तोके तनये दस्म विश्पते पर्षि राधः मघोनाम्।।7।।
7654. प्र मंहिष्ठाय गायत ऋतव्ने बृहते शुक्रशोचिषे।
उपस्तुतासः अग्नये।।8।।
7655. आ वंसते मघवा वीरवत्
यशः सम्-इद्धः द्युम्नी आहुतः।
कुवित् नः अस्य सुमतिः नवीयसी
अच्छ वाजेभिः आगमत्।।9।।
7656. प्रेष्ठम् उ प्रियाणाम् स्तुहि आसाव अतिथिम्।
अग्निम् रथानाम् यमम्।।10।।
7657. उत्-इता यः निदिता वेदिता
वसु आ यज्ञियः ववर्तति।
दुस्तराः यस्य प्रवणे न ईर्मयः
धिया वाजम् सिसासतः।।11।।
7658. मा नः त्द्दणीताम् अतिथिः
वसुः अग्निः पुरुप्रशस्तः एषः।
यः सुहोता सुअध्वरः।।12।।
7659. मो ते रिषन् ये अच्छोक्तिभिः
वसो अग्ने केभिः चित् एवैः।
कीरिः चित् हि त्वाम् ईहे दूत्याय
रातहव्यः सुअध्वरः।।13।।
7660. आ अग्ने याहि मरुत्-सखा रुतेभिः सोमपीतये।
सोभर्याः उप सु-स्तुतिम् मादयस्व स्वर्णरे।।14।।

## ।। इति अष्टमम् मण्डलम् ।।

ॐ

# ।।अथ नवमम् मण्डलम्।।

7661. स्वादिष्ठया मदिष्ठया पवस्व सोम धारया।
इन्द्राय पातवे सुतः।।1।।
7662. रक्षः-हा विश्वचर्षणिः अभि योनिम् अयः-हतम्।
द्रुणा सधस्थम् आ असदत्।।2।।
7663. वरिवः-धातमः भव मंहिष्ठः वृत्रहन्-तमः।
पर्षि राधः मघोनाम्।.3।।
7664. अभि अर्ष महानाम् देवानाम् वीतिम् अन्धशा।
अभि वाजम् उत श्रवः।।4।।
7665. त्वाम् अच्छ चरामसि तत् इत् अर्थम् दिवे-दिवे।
इन्दो त्वे नः आ-शसः।।5।।
7666. पुनाति ते परिस्रुतम् सोमम् सूर्यस्य दुहिता।
वारेण शश्वता तना।।6।।
7667. तम् ईम् अण्वीः स-मर्ये आ गृभ्णन्ति योषणः।
दश स्वसारः पार्ये दिवि।।7।।
7668. तम् ईम् हिन्वन्ति अग्रुवः धमन्ति बाकुरम् दृतिम्।
त्रिधातु वारणम् मधु।।8।।
7669. अभि इमम् अघ्न्याः उत श्रीणन्ति धेनवः शिशुम्।
सोमम् इन्द्राय पातवे।।9।।
7670. अस्य इत् इन्द्रः मदेषु आ विश्वा वृत्राणि जिघ्नते।
शूरः मघा च मंहते।।10।।

## सूक्त-2

7671. पवस्व देव-वीः अति पवित्रम् सोम रंह्या।
इन्द्रम् इन्दो वृषा आ विश।।1।।
7672. आ वच्यस्व महि प्सरः वृषा इन्दो द्युम्नवत्-तमः।
आ योनिम् धर्णसिः सदः।।2।।
7673. अधुक्षत प्रियम् मधु धारा सुतस्य वेधसः।
अपः वसिष्ट सु-क्रतुः।।3।।
7674. महान्तम् त्वा महीः अनु आपः अर्षन्ति सिन्धवः।
यत् गोभिः वासयिष्यसे।।4।।
7675. समुद्रः अप्सु ममृजे विष्टम्भः धरुणः दिवः।
सोमः पवित्रे अस्मयुः।।5।।
7676. अचिक्रदत् वृषा हरिः महान् मित्रः न दर्शतः।
सम् सूर्येण रोचते।।6।।
7677. गिरः ते इन्दो ओजसा मर्मृज्यन्ते अपस्युवः।
याभिः मदाय शुंभसे।।6।।
7678. तम् त्वा मदाय घृष्वये ऊँ लोक-कृत्नुम् ईमहे।
तव प्र-शस्तयः महीः।।8।।
7679. अस्मभ्यम् इन्दो इन्द्र-युः मध्वः पवस्व धारया।
पर्जन्यः वृष्टिमान्-इव।।9।।
7680. गोसाः इन्दो नृसाः असि अश्वसाः वाजसाः उत।
आत्मा यज्ञस्य पूर्व्यः।।10।।

## सूक्त-3

7681. एषः देवः अमर्त्यः पर्णवीः-इव दीयति।
अभि द्रोणानि आ-सदम्।।1।।
7682. एषः देवः विपा कृतः अति ह्वरांसि धावति।
पवमानः अदाभ्यः।।2।।
7683. एषः देवः विपन्युभिः पवमानः ऋतयु-भिः।
हरिः वाजाय मृज्यते।।3।।
7684. एषः विश्वानि वार्या शूरः यन्-इव सत्व-भिः।
पवमानः सिसासति।।4।।
7685. एषः देवः रथर्यति पवमानः दशस्यति।
आविः कृणोति वग्वनुम्।।5।।
7686. एषः विप्रैः अभि-स्तुतः अपः देवः वि गाहते।
दधत् रत्नानि दाशुषे।।6।।
7687. एषः दिवम् वि धावति तिरः रजांसि धारया।
पवमानः कनिक्रदत्।।7।।
7688. एषः दिवम् वि आ असरत् तिरः रजांसि अस्पृतः।
पवमानः सु-अध्वरः।।8।।
7689. एषः प्रत्नेन जन्मना देवः देवेभ्यः सुतः।
हरिः पवित्रे अर्षति।।9।।
7690. एषः ऊँ स्यः पुरु-व्रतः जज्ञानः जनयन् इषः।
धारया पवते सुतः।।10।।

## सूक्त-4

7691. सन च सोम जेषि च पवमान महि श्रवः।
अथः नः वस्यसः कृधि।।1।।
7692. सन ज्योतिः सन स्वः विश्वा च सोम सौभगा।
अथ नः वस्यसः कृधि।।2।।
7693. सन दक्षम् उत क्रतुम् अप सोम मृधः जहि।
अथ नः वस्यसः कृधि।।3।।
7694. पवितारः पुनीतन सोमम् इन्द्राय पातवे।
अथ नः वस्यसः कृधि।।4।।
7695. त्वम् सूर्ये नः आ भज तव क्रत्वा तव ऊतिभिः।
अथ नः वस्यसः कृधि।।5।।
7696. तव क्रत्वा तव ऊतिभिः ज्योक् पश्येम सूर्यम्।
अथ नः वस्यसः कृधि।।6।।
7697. अभि अर्ष सु-आयुध सोम द्वि-बर्हसम् रयिम्।
अथ नः वस्यसः कृधि।।7।।
7698. अभि अर्ष अनप-च्युतः रयिम् समत्-सु ससहिः।
अथ नः वस्यसः कृधि।।8।।
7699. त्वाम् यज्ञैः अवीवृधन् पवमान विधर्मणि।
अथ नः वस्यसः कृधि।।9।।
7700. रयिम् नः चित्रम् अश्विनम्

इन्दो विश्व-आयुम् आ भर।
अथ नः वस्यसः कृधि।।10।।

## सूक्त-5

7701. सम्-इद्धः विश्वतः पतिः पवमानः वि राजति।
प्रीणान् वृषा कनिक्रदत्।।1।।
7702. तनू-नपात् पवमानः शृङ्गे शिशानः अर्षति।
अन्तरिक्षेण रारजत्।।2।।
7703. ईडन्यः पवमानः रयिः वि राजति द्युमान्।
मधोः धारभिः ओजसा।।3।।
7704. बर्हिः प्राचीनम् ओजसा पवमानः स्तृणन् हरिः।
देवेषु देवः ईयते।।4।।
7705. उत् आतैः जिहते बृहत् द्वारः देवीः हिरण्ययीः।
पवमानेन सु-स्तुताः।।5।।
7706. सुशिल्पे बृहती मही पवमानः वृषण्यति।
नक्तोषसा न दर्शते।।6।।
7707. उभ देवा नृचक्षसा होतारा दैव्या हुवे।
पवमान इन्द्रो वृषा।।7।।
7708. भारती पवमानस्य सरस्वती इड मही।
इमम् नः यज्ञम् आ गमन् तिस्रः देवीः सु-पेशसः।।8।।
7709. त्वष्टारम् अग्रजाम् गोपाम् पुरः-यायावनम् आ हुवे।
इन्दुः इन्द्रः वृषा हरिः पवमानः प्रजा-पतिः।।9।।
7710. वनस्पतिम् पवमान मध्वा सम् अङ्गि धारया।
सहस्र-वल्शम् हरितम् भ्राजमानम् हिरण्ययम्।।10।।
7711. विश्वे देवाः स्वाहा-कृतिम् पवमानस्य आ गत।
वायुः बृहस्पतिः सूर्यः अग्निः इन्द्रः सजोषसः।।11।।

## सूक्त-6

7712. मन्द्रया सोम धारया वृषा पवस्व देवयुः।
अव्यः वारेषु अस्मयुः।।1।।
7713. अभि त्यम् मद्यम् मदम् इन्दो इन्द्रः इति क्षर।
अभि वाजिनः अर्वतः।।2।।
7714. अभि त्यम् पूर्व्यम् मदम् सुवानः अर्ष पवित्रे आ।
अभि वाजम् उत श्रवः।।3।।
7715. अनु द्रप्सासः इन्दवः आपः न प्रवता असरन्।
पुनानाः इन्द्रम् आशत।।4।।
7716. यम् अत्यम्-इव वाजिनम्
मृजन्ति योषणः दश वने।
क्रीडन्तम् अति-अविम्।।5।।
7717. तम् गोभिः वृषणम् रसम् मदाय देव-वीतये।
सुतम् भराय सम् सृज।।6।।
7718. देवः देवाय धारया इन्द्राय पवते सुतः।
पयः यत् अस्य पीपयत्।।7।।
7719. आत्मा यज्ञस्य रंह्या सुस्वानः पवते सुतः।
प्रत्नम् नि पाति काव्यम्।।8।।
7720. एव पुनानः इन्द्रयुः मदम् मदिष्ठ वीतये।
गुहा चित् दधिषे गिरः।।9।।

## सूक्त-7

7721. असृग्रम् इन्द्वः पथा धर्मन् ऋतस्य सु-श्रियः।
विदानाः अस्य योजनम्।।1।।
7722. प्र धारा मध्वः अग्रियः महीः अपः वि गाहते।
हविः हविष्षु वन्द्यः।।2।।
7723. प्र युजः वाचः अग्रियः वृषा अव चक्रदत् वने।
सद्म अभि सत्यः अध्वरः।।3।।
7724. परि यत् काव्या कविः नृम्णा वसानः अर्षति।
स्वः वाजी सिसासति।।4।।
7725. पवमानः अभि स्पृधः विशः राजा-इव सीदति।
यत् ईम् ऋण्वन्ति वेधसः।।5।।
7726. अव्यः वारे परि प्रियः हरिः वनेषु सीदति।
रेभः वनुष्यते मती।।6।।
7727. सः वायुम् इन्द्रम् अश्विना साकम् मदेन गच्छति।
रण यः अस्य धर्मभिः।।7।।
7728. आ मित्रावरुणा भगम् मध्वः पवन्ते ऊर्मयः।
विदानाः अस्य शक्मभिः।।8।।
7729. अस्मभ्यम् रोदसी रयिम् मध्वः वाजस्य सातये।
श्रवः वसूनि सम् जितम्।।9।।

## सूक्त-8

7730. एते सोमाः अभि प्रियम् इन्द्रस्य कामम् अक्षरन्।
वर्धन्तः अस्य वीर्यम्।।1।।
7731. पुनानासः चमू-सदः गच्छन्तः वायुम् अश्विना।
ते नः धान्तु सुवीर्यम्।।2।।
7732. इन्द्रस्य सोम राधसे पुनानः हार्दि चोदय ऋतस्य।
योनिम् आ-सदम्।।3।।
7733. मृजन्ति त्वा दश क्षिपः हिन्वन्ति सप्त धीतयः।
अनु विप्राः अमादिषुः।।4।।
7734. देवेभ्यः त्वा मदाय कम् सृजानम् अति मेष्यः।
सम् गोभिः वासयामसि।।5।।
7735. पुनानः कलशेषु आ वस्त्राणि अरुषः हरिः।
परि गव्यानि अव्यत।।6।।
7736. मघोनः आ पवस्व नः जहि विश्वाः अप द्विषः।
इन्दो सखायम् आ विश।।7।।
7737. वृष्टिम् दिवः परि स्रव द्युम्नम् पृथिव्याः अधि।
सहः नः सोम पृत्सु धाः।।8।।
7738. नृ-चक्षसम् त्वा वयम् इन्द्र-पीतम् स्वः-विदम्।
भक्षीमहि प्र-जाम् इषम्।।9।।

## सूक्त-9

7739. परि प्रिया दिवः कविः वयांसि नप्त्योः हितः।
सुवानः याति कवि-क्रतुः।।1।।
7740. प्र-प्र क्षयाय पन्यसे जनाय जुष्टः अद्रुहे।
वीती अर्ष चनिष्ठया।।2।।
7741. सः सूनुः मातरा शुचिः जातः जाते अरोचयत्।
महान् मही ऋतवृधा।।3।।
7742. सः सप्त धीतिभिः हितः नद्यः अजिन्वत् अद्रुहः।
याः एकम् अक्षि ववृधुः।।4।।
7743. ताः अभि सन्तम् अस्तृतम् महे युवानम् आ दधुः।
इन्दुम् इन्द्र तव व्रते।।5।।
7744. अभि वह्निः अमर्त्यः सप्त पश्यति वावहिः।
क्रिविः देवीः अतर्पयत्।।6।।
7745. अव कल्पेषु नः पुमः तमांसि सोम योध्या।
तानि पुनान जङ्घनः।।7।।
7746. नु नव्यसे नवीयसे सु-उक्ताय साधय पथः।
प्रत्नवत् रोचय रुचः।।8।।
7747. पवमान महि श्रवः गाम् अश्वम् रासि वीर-वत्।
सन मेधाम् सन स्वः।।9।।

## सूक्त-10

7748. प्र स्वानासः रथाः-इव अर्वन्तः न श्रवस्यवः।
सोमासः राये अक्रमुः।।1।।
7749. हिन्वानासः रथाःइव दधन्विरे गभस्त्योः।
भरासः कारिणाम्-इव।।2।।
7750. राजानः न प्रशस्तिभिः सोमासः गोभिः अञ्जते।
यज्ञः न सप्त धातृभिः।।3।।
7751. परि सुवानासः इन्दवः मदाय बर्हणा गिरा।
सुताः अर्षन्ति धारया।।4।।
7752. आपानासः विवस्वतः जनन्तः उषसः भगम्।
सूराः अण्वम् वि तन्वते।।5।।
7753. अप द्वारा मतीनाम् प्रत्नाः ऋण्वन्ति कारवः।
वृष्णः हरसे आयवः।।6।।
7754. सम्-ईचीनासः आसते होतारः सप्त-जामयः।
पदम् एकस्य पिप्रतः।।7।।
7755. नाभा नाभिम् नः आ ददे चक्षुः चित् सूर्ये सचा।
कवेः अपत्यम् आ दुहे।।8।।
7756. अभि प्रिया दिवः पदम् अध्वर्यु-भिः गुहा हितम्।
सूरः पश्यति चक्षसा।।9।।

## सूक्त-11

7757. उप अस्मै गायत नरः पवमानाय इन्दवेऱ
अभि देवान् इयक्षते।।1।।
7758. अभि ते मधुना पयः अथर्वाणः अशिश्रयुः।
देवम् देवाय देवयु।।2।।
7759. सः नः पवस्व शम् गवे शम् जनाय शम् अर्वते।
शम् राजन् ओषधीभ्यः।।3।।
7760. बभ्रवे नु स्व-तवसे अरुणाय दिवि-स्पृशे।
सोमाय गाथम् अर्चत।।4।।
7761. हस्त-च्युतेभिः अद्रिभिः सुतम् सोमम् पुनीतन।
मधौ आ धावत मधु।।5।।
7762. नमसा इत् उप सीदत दध्ना इत् अभि श्रीणीतन।
इन्दुम् इन्द्रे दधातन।।6।।
7763. अमित्रहा विचर्षणिः पवस्व सोम शम् गवे।
देवेभ्यः अनुकाम-कृत।।7।।
7764. इन्द्राय सोम पातवे मदाय परि सिच्यसे।
मनः-चित् मनसः पतिः।।8।।
7765. पवमान सु-वीर्यम् रयिम् सोम रिरीहि नः।
इन्दो इन्देरण नः युजा।।9।।

## सूक्त-12

7766. सोमाः असृग्रम् इन्दवः सुताः ऋतस्य सदने।
इन्द्राय मधुमत्-तमाः।।1।।
7767. अभि विप्राः अनूषत गावः वत्सम् न मातरः।
इन्द्रम् सोमस्य पीतये।।2।।
7768. मद-च्युत् क्षेति सदने सिन्धोः ऊर्मा विपः-चित्।
सोमः गौरी अधि श्रितः।।3।।
7769. दिवः नाभा वि-चक्षणः अव्यः वारे महीयते।
सोमः यः सु-क्रतुः कविः।।4।।
7770. यः सोमः कलशेषु आ अन्तः पवित्रे आ-हितः।
तम् इन्दुः परि सस्वजे।।5।।
7771. प्र वाचम् इन्दुः इष्यति समुद्रस्य अधि विष्टपि।
जिन्वन् कोशन् मधु-श्चुतम्।।6।।
7771. नित्य-स्तोत्रः वनस्पतिः धीनाम् अन्तः सबः-दुघः।
हिन्वानः मानुषा युगा।।7।।
7773. अभि प्रिया दिवः पदा सोमः हिन्वानः अर्षति।
विप्रस्य धारया कविः।।8।।
7774. आ पवमान धारय रयिम् सहस्र-वर्चसम्।
अस्मे इन्दो सु-आभुवम्।।9।।

## सूक्त-13

7775. सोमः पुनानः अर्षति सहस्रधारः अति अविः।
वायोः इन्द्रस्य निः-कृतम्।।1।।
7776. पवमानम् अवस्यवः विप्रम् अभि प्र गायत।
सुस्वानम् देव-वीतये।।2।।
7777. पवन्ते वाज-सातये सोमाः सहस्र-पाजसः।
गृणानाः देव-वीतये।।3।।
7778. उत नः वाजसातये पवस्व बृहतीः इषः।

द्यु-मत् इन्दो सुवीर्यम्।।4।।
7779. ते नः सहस्रिणम् रयिम् पवन्ताम् आ सु-वीर्यम्।
सुवानाः देवासः इन्दवः।।5।।
7780. अत्याः हियानाः न हेतृभिः असृग्रम् वाज-सातये।
वि वारम् अव्यम् आशवः।।6।।
7781. वाश्राः अर्षन्ति इन्दवः अभि वत्सम् न धेनवः।
दधन्विरे गभस्त्योः।।7।।
7782. जुष्टः इन्द्राय मत्सरः पवमान कनिक्रदत्।
विश्वाः अप द्विषः जहि।।8।।
7783. अप-घ्नन्तः अराव्णः पवमानाः स्वः-दृशः।
योनौ ऋतस्य सीदत।।9।।

## सूक्त-14

7784. परि प्र असिस्यदत् कविः
सिन्धोः ऊर्मौ अधि श्रितः।
कारम् बिभ्रत् पुरु-स्पृहम्।।1।।
7785. गिरा यदि स-बन्धवः पञ्च व्राताः अपस्यवः।
परि-कृण्वन्ति धर्णसिम्।।2।।
7786. आत् अस्य शुष्मिणः रसे विश्वे देवाः अमत्सत।
यदि गोभिः वसायते।।3।।
7787. नि-रिणानः वि धावति जहत् शर्याणि तान्वा।
अत्र सम् जिघ्रते युजा।।4।।
7788. नप्तीभिः यः विवस्वतः शुभ्रः न ममृजे युवा।
गाः कृण्वानः न निः-निजम्।।5।।
7789. अति श्रिती तिरश्चता गव्या जिगाति अण्व्या।
वग्नुम् इयर्ति यम् विदे।।6।।
7790. अभि क्षिपः सम् अग्मत मर्जयन्तीः इषः पतिम्।
पृष्ठा गृभ्णत वाजिनः।।7।।
7791. परि दिव्यानि मर्मृशत् विश्वानि सोम पार्थिवा।
वसूनि याहि अस्मयुः।।8।।

## सूक्त-15

7792. एषः धिया याति अण्व्या शूरः रथेभिः आशुभिः।
गच्छन् इन्द्रस्य निः-कृतम्।।1।।
7793. एषः पुरु धिया-यते बृहते
देव-तातये यत्र अमृतासः आसते।।2।।
7794. एषः हितः वि नीयते अन्तः शुभ्रवता पथा।
यदि तुञ्जन्ति भूर्णयः।।3।।
7795. एषः शृङ्गाणि दोधुवत् शिशीते यूथ्यः वृषा।
नृम्णा दधानः ओजसा।।4।।
7796. एषः रुक्मिभिः ईयते वाजी शुभ्रेभिः अंशुभिः।
पतिः सिन्धूनाम् भवन्।।5।।
7797. एषः वसूनि पिब्दना परुषा ययि-वान् अति।
अव शादेषु गच्छति।।6।।
7798. एतम् मृजन्ति मर्ज्यम् उप द्रोणेषु आयवः।
प्र-चक्राणम् महीः इषः।।7।।
7799. एतम् ऊँ त्यम् दश क्षिपः मृजन्ति सप्त धीतयः।
सु-आयुधम् मदिन्-तमम्।।8।।

## सूक्त-16

7800. प्र ते सोतारः ओण्योः रसम् मदाय घृष्वये।
सर्गः न तक्ति एतशः।।1।।
7801. क्रत्वा दक्षस्य रथ्यम् अपः वसानम् अन्धसा।
गो-साम् अण्वेषु सश्चिम।।2।।
7802. अनप्तम् अप्सु दुस्तरम् सोमम् पवित्रे आ सृज।
पुनीहि इन्द्राय पातवे।।3।।
7803. प्र पुनानस्य चेतसा सोमः पवित्रे अर्षति।
क्रत्वा सधस्थम् आ असदत्।।4।।
7804. प्र त्वा नमः-भिः इन्दवः इन्द्र सोमाः असृक्षत।
महे भराय कारिणः।।5।।
7805. पुनानः रूपे अव्यये विश्वाः अर्षन् अभि श्रियः।
शूरः न गोषु तिष्ठति।।6।।
7806. दिवः न सानु पिप्युषी धारा सुतस्य वेधसः।
वृथा पवित्रे अर्षति।।7।।
7807. त्वम् सोम विपः-चितम् तना पुनानः आयुषु।
अव्यः वारम् वि धावसि।।8।।

## सूक्त-17

7808. प्र निम्नेन-इव सिन्धवः घ्नन्तः वृत्राणि भूर्णयः।
सोमाः असृग्रम् आशवः।।1।।
7809. अभि सुवानासः इन्दवः वृष्टयः पृथिवीम्-इव।
इन्द्रम् सोमासः अक्षरन्।।2।।
7810. अति-ऊर्मिः मत्सरः सोमः पवित्रे अर्षति।
विघ्नन् रक्षांसि देव-युः।।3।।
7811. आ कलशेषु धावति पवित्रे परि सिच्यते।
उक्थैः यज्ञेषु वर्धते।।4।।
7812. अति त्री सोम रोचना रोहन् न भ्राजसे दिवम्।
इष्णन् सूरयम् न चोदयः।।5।।
7813. अभि विप्राः अनूषत मूर्धन् यज्ञस्य कारवः।
दधानाः चक्षसि प्रियम्।।6।।
7814. तम् ऊँ त्वा वाजिनम् नरः धीभिः विप्राः अवस्यवः।
मृजन्ति देव-तातये।।7।।
7815. मधोः धाराम् अनु क्षर तीव्रः सध-स्थम् आ असदः।
चारुः ऋताय पीतये।।8।।

## सूक्त-18

7816. परि सुवानः गिरिस्थाः पवित्रे सोमः अक्षाः।
मदेषु सर्वधाः असि।।1।।
7817. त्वम् विप्रः त्वम् कविः मधु प्र जातम् अन्धसः।

मदेषु सर्वधाः असि।।2।।
7818. तव विश्वे सजोषसः देवासः पीतिम् आशत।
मदेषु सर्वधाः असि।।3।।
7819. आ यः विश्वानि वार्या वसूनि हस्तयोः दधे।
मदेषु सर्वधाः असि।।4।।
7820. यः इमे रोदसी मही सम् मातरा-इव दोहते।
मदेषु सर्वधाः असि।।5।।
7821. परि यः रोदसी उभे सद्यः वाजेभिः अर्षति।
मदेषु सर्वधाः असि।।6।।
7822. सः शुष्मी कलशेषु आ पुनानः अचिक्रदत्।
मदेषु सर्वधाः असि।।7।।

## सूक्त-19

7823. यत् सोम चित्रम् उक्थ्यम् दिव्यम् पार्थिवम् वसु।
तत् नः पुनानः आ भर।।1।।
7824. युवम् हि स्थः स्वः-पती इन्द्रः च सोम गोपती।
ईशाना पिप्यतम् धियः।।2।।
7825. वृषा पुनानः आयुषु स्तनयन् अधि बर्हिषि।
हरिः सन् योनिम् आ असदत्।।3।।
7826. अवावशन्त धीतयः वृषभस्य अधि रेतसि।
सूनोः वत्सस्य मातरः।।4।।
7827. कुवित् वृषण्यन्तीभ्यः पुनानः गर्भम् आ-दधत्।
याः शुक्रम् दुहते एयः।।5।।
7828. उप शिक्ष अप-तस्थुषः भियसम् आ धेहि शत्रुषु।
पवमान विदाः रयिम्।।6।।
7829. नि शत्रोः सोम वृष्ण्यम् नि शुष्मम् नि वयः तिर।
दूरे वा सतः अन्ति वा।।7।।

## सूक्त-20

7830. प्र कविः देव-वीतये अव्यः वारेभिः अर्षति।
सहवान् विश्वाः अभि स्पृधः।।1।
7831. सः हि स्म जरितृभ्यः आ
वाजम् गो-मन्तम् इन्वति।
पवमानः सहस्रिणम्।।2।।
7832. परि विश्वानि चेतसा मृशसे पवसे मती।
सः नः सोम श्रवः विदः।।3।।
7833. अभि अर्ष बृहत् यशः मघवत्-भ्यः ध्रुवम् रयिम्।
इषम् स्तोतृभ्यः आ भर।।4।।
7834. त्वम् राजाइव सुव्रतः गिरः सोम आ विवेशिथ।
पुनानः वह्ने अद्भुत।।5।।
7835. सः वह्निः अप्सु दुस्तरः मृज्यमानः गभस्त्योः।
सोमः चमूषु सीदति।।6।।
7836. क्रीड मखः न मंहयुः पवित्रम् सोम गच्छसि।
दधत् स्तोत्रे सु-वीर्यम्।।7।।

## सूक्त-21

7837. एते धावन्ति इन्दवः सोमाः इन्द्राय घृष्वयः।
मत्सरासः स्वः-विदः।।1।।
7838. प्र-वृण्वन्तः अभि-युजः सुस्वये वरिवः-विदः।
स्वयम् स्तोत्रे वयः-कृतः।।2।।
7839. वृथा क्रीडन्तः इन्दवः सध-स्थम् अभि एकम् इत्।
सिन्धोः ऊर्मा वि अक्षरन्।।3।।
7840. एते विश्वानि वार्या पवमानासः आशत।
हिताः न सप्तयः रथे।।4।।
7841. आ अस्मिन् पिशङ्गम्
इन्दवः दधात वेनम् आ-दिशे।
यः अस्मभ्यम् अरावा।।5।।
7842. ऋभुः न रथ्यम् नवम् दधात केतम् आदिशे।
शुक्राः पवध्वम् अर्णसा।।6।।
7843. एते ॐ त्ये अवीवशन् काष्ठाम् वाजिनः अक्रत्।
सतः प्र असाविषुः मतिम्।।7।।

## सूक्त-22

7844. एते सोमासः आशवः रथाःइव प्र वाजिनः।
सर्गाः सृष्टाः अहेषत।।1।।
7845. एते वाताः-इव उरवः पर्जन्यस्य-इव वृष्टयः।
अग्नेः-इव भ्रमाः वृथा।।2।।
7846. एते पूताः विपः-चितः सोमासः दधि-आशिरः।
विपा वि आनशुः धियः।।3।।
7847. एते मृष्टाः अमर्त्याः ससृ-वासः न शश्रमुः।
इयक्षन्तः पथः रजः।।4।।
7848. एते पृष्ठानि रोदसोः वि-प्रयन्तः वि आनशुः।
उत इदम् उत्-तमम् रजः।।5।।
7849. तन्तुम् तन्वानम् उत्-तमम् अनु प्र-वतः आशत।
उत इदम् उत्तमाय्यम्।।6।।
7850. त्वम् सोम पणिभ्यः आ वसु गव्यानि धारयः।
ततम् अचिक्रदः।।7।।

## सूक्त-23

7851. सोमाः असृग्रम् आशवः मधोः मदस्य धारया।
अभि विश्वानि काव्या।।1।।
7852. अनु प्रत्नासः आयवः पदम् नवीयः अक्रमुः।
रुचे जनन्त सूर्यम्।।2।।
7853. आ पवमान नः भर अर्यः अदाशुषः गयम्।
कृधि प्रजा-वतीः इषः।।3।।
7854. अभि सोमासः आयवः पवन्ते मद्यम् मदम्।
अभि कोशम् मधु-श्चुतम्।।4।।
7855. सोमः अर्षति धर्णसिः दधानः इन्द्रियम् रसम्।
सुवीरः अभिशस्तिपाः।।5।।

7856. इन्द्राय सोम पवसे देवेभ्यः सध-माद्यः।
इन्दो वाजम् सिसाससि।।6।।
7857. अस्य पीत्वा मदानाम् इन्द्रः वृत्राणि अप्रति।
जघान जघनत् च नु।।7।।

## सूक्त-24

7858. प्र सोमासः अधन्विषुः पवमानासः इन्दवः।
श्रीणानाः अप्सु मृञ्जत।।1।।
7859. अभि गावः अधन्विषुः आपः न प्रवता युतीः।
पुनानाः इन्द्रम् आशत।।2।।
7860. प्र पवमान धन्वसि सोम इन्द्राय पातवे।
नृभिः यतः वि नीयसे।।3।।
7861. त्वम् सोम नृ-मादनः पवस्व चर्षणि-सहे।
सस्निः यः अनु-माद्यः।।4।।
7862. इन्दो यत् अद्रिभिः सुतः पवित्रम् परिधावसि।
अरम् इन्द्रस्य धाम्ने।।5।।
7863. पवस्व वृत्रहन्-तम उक्थेभिः अनुमाद्यः।
शुचिः पावकः अद्भुतः।।6।।
7864. शुचिः पावकः उच्यते सोमः सुतस्य मध्वः।
देव-अवीः अघशंसहा।।7।।

## सूक्त-25

7865. पवस्व दक्ष-साधनः देवेभ्यः पीतये हरे।
मरुत्-भ्यः वायवे मदः।।1।।
7866. पवमान धिया हितः अभि योनिम् कनिक्रदत्।
धर्मणा वायुम् आ विश।।2।।
7867. सम् देवैः शोभते वृषा कविः योनौ अधि प्रियः।
वृत्र-हा देव-वीतमः।।3।।
7868. विश्वा रूपाणि आ-विशन् पुनानः याति हर्यतः।
यत्र अमृतासः आसते।।4।।
7869. अरुषः जनयन् गिरः सोमः पवते आयुषक्।
इन्द्रम् गच्छन् कवि-क्रतुः।।5।।
7870. आ पवस्व मदिन्-तम पवित्रम् धारया कवे।
अर्कस्य योनिम् आ-सदम्।।6।।

## सूक्त-26

7871. तम् अमृक्षन्त वाजिनम् उपस्थे अदितेः अधि।
विप्रासः अण्व्या धिया।।1।।
7872. तम् गावः अभि अनूषत सहस्र-धारम् अक्षितम्।
इन्दुम् धर्तारम् आ दिवः।।2।।
7873. तम् वेधाम् मेधया अह्यन् पवमानम् अधि द्यवि।
धर्णसिम् भूरि-धायसम्।।3।।
7874. तम् अह्यन् भुरिजोः
धिया सम्-वसानम् विवस्वतः।
पतिम् वाचः अदाभ्यम्।।4।।
7875. तम् सानौ अधि जामयः हरिम् हिन्वन्ति अद्रिभिः।
हर्यतम् भूरि-चक्षसम्।।5।।
7876. तम् त्वा हिन्वन्ति वेधसः पवमान गिरा-वृधम्।
इन्दो इन्द्राय मत्सरम्।।6।।

## सूक्त-27

7877. एषः कविः अभि-स्तुतः पवित्रे अधि तोशते।
पुनानः घ्नन् अप स्रिधः।।1।।
7878. एषः इन्द्राय वायवे स्वः-जित् परि सिच्यते।
पवित्रे दक्ष-साधनः।।2।।
7879. एषः नृभिः वि नीयते दिवः मूर्धा वृषा सुतः।
सोमः वनेषु विश्ववित्।।3।।
7880. एषः गव्युः अचिक्रदत् पवमानः हिरण्ययुः।
इन्दुः सत्रा-जित् अस्तृतः।।4।।
7881. एषः सूर्येण हासते पवमानः अधि द्यवि।
पवित्रे मत्सरः मदः।।5।।
7882. एषः शुष्मी असिष्यदत् अन्तरिक्षे वृषा हरिः।
पुनानः इन्दुः इन्द्रम आ।।6।।

## सूक्त-28

7883. एषः वाजी हितः नृभिः विश्ववित् मनसः पतिः।
अव्यः वारम् वि धावति।।1।।
7884. एषः पवित्रे अक्षरत् सोमः देवेभ्यः सुतः।
विश्वा धामानि आ-विशन्।।2।।
7885. एषः देवः शुभायते अधि योनौ अमर्त्यः।
वृत्रहा देववीतमः।।3।।
7886. एषः वृषा कनिक्रदत् दशभिः जामिभिः यतः।
अभि द्रोणानि धावति।।4।।
7887. एषः सूर्यम् अरोचयत् पवमानः वि-चर्षणिः।
विश्वा धामानि विश्व-वित्।।5।।
7888. एषः शुष्मी अदाभ्यः सोमः पुनानः अर्षति।
देव-अवीः अघशंसहा।।6।।

## सूक्त-29

7889. प्र अस्य धाराः अक्षरन् वृष्णः सुतस्य ओजसा।
देवान् अनु प्र-भूषतः।।1।।
7890. सप्तिम् मृजन्ति वेधसः गृणन्तः कारवः गिरा।
ज्योतिः जज्ञानम् उक्थ्यम्।।2।।
7891. सुसहा सोम तानि ते पुनानाय प्रभुवसो।
वर्ध समुद्रम् उक्थ्यम्।।3।।
7892. विश्वा वसूनि सम्-जयन् पवस्व सोम धारया।
इनु द्वेषांसि सध्र्यक्।।4।।
7893. रक्ष सु नः अररुषः स्वनात् समस्य कस्य चित्।
निदः यत्र मुमुच्महे।।5।।
7894. आ इन्दो पार्थिवम् रयिम् दिव्यम् पवस्व धारया।

द्युमन्तम् शुष्मम् आ भर।।6।।

## सूक्त-30

7895. प्र धाराः अस्य शुष्मिणः वृथा पवित्रे अक्षरन्।
पुनानः वाचम् इष्यति।।1।।
7896. इन्दुः हियानः सोतृभिः मृज्यमानः कनिक्रदत्।
इयर्ति वग्नुम् इन्द्रियम्।।2।।
7897. आ नः शुष्मम् नृ-सह्यम् वीर-वन्तम् पुरु-स्पृहम्।
पवस्व सोम धारया।।3।।
7898. प्र सोमः अर्ति धारया पवमानः असिस्यदत्।
अभि द्रोणानि आ-सदम्।।4।।
7899. अप्सु त्वा मधुमत्-तमम् हरिम् हिन्वन्ति अद्रिभिः।
इन्दो इन्द्राय पीतये।।5।।
7900. सुनोत मधुमत्-तमम् सोमम् इन्द्राय वज्रिणे।
चारुम् शर्धाय मत्सरम्।।6।।

## सूक्त-31

7901. प्र सोमासः सु-आध्यः पवमानासः अक्रमुः।
रयिम् कृण्वन्ति चेतनम्।।1।।
7902. दिवः पृथिव्याः अधि भव इन्दो द्युम्नवर्धनः।
भव वाजानाम् पतिः।।2।।
7903. तुभ्यम् वाताः अभि-प्रियः
तुभ्यम् अर्षन्ति सिन्धवः।
सोम वर्धन्ति ते महः।।3।।
7904. आ प्यायस्व सम् एतु ते विश्वतः सोम वृष्ण्यम्।
भव वाजस्य सम्-गथे।।4।।
7905. तुभ्यम् गावो घृतम् पयो बभ्रो दुदुहे अक्षितम्।
वर्षिष्ठे अधि सानवि।।5।।
7906. सु-आयुधस्य ते सतः भुवनस्य पते वयम्।
इन्दो सखित्वम् उश्मसि।।6।।

## सूक्त-32

7907. प्र सोमासः मद-च्युतः श्रवसे नः मघोनः।
सुताः विदथे अक्रमुः।।1।।
7908. आत् ईम् त्रितस्य योषणः
हरिम् हिन्वन्ति अद्रिभिः।
इदुम् इन्द्राय पीतये।।2।।
7909. आत् ईम् हंसः यथा गणम्
विश्वस्य अवीवशत् मतिम्।
अत्यः न गोभिः अज्यते।।3।।
7910. उभे सोम अव-चाकशत् मृगः न तक्तः अर्षसि।
सीदन् ऋतस्य योनिम् आ।।4।।
7911. अभि गावः अनूषत योषा जारम्-इव प्रियम्।
अगन् आजिम् यथा हितम्।।5।।
7912. अस्मे धेहि द्यु-मत् यशः
मघवत्-भ्यः च मह्यम् च।
सनिम् मेधाम् उत श्रवः।।6।।

## सूक्त-33

7913. प्र सोमासः विपः-चितः अपाम् न यन्ति ऊर्मयः।
वनानि महिषाः-इव।।1।।
7914. अभि द्रोणानि बभ्रवः शुक्राः ऋतस्य धारया।
वाजम् गोमन्तम् अक्षरन्।।2।।
7915. सुताः इन्द्राय वायवे वरुणाय मरुत्-भ्यः।
सोमाः अर्षन्ति विष्णवे।।3।।
7916. तिस्रः वाचः उत् ईरते गावः मिमन्ति धेनवः।
हरिः एति कनिक्रदत्।।4।।
7917. अभि ब्रह्मीः अनूषत् यह्वीः ऋतस्य मातरः।
मर्मृज्यन्ते दिवः शिशुम्।।5।।
7918. रायः समुद्रान् चतुरः अस्मभ्यम् सोम विश्वतः।
आ पवस्व सहस्रिणः।।6।।

## सूक्त-34

7919. प्र सुवानः धारया तना इन्दुः हिन्वानः अर्षति।
रुजत् दृड वि ओजसा।।1।।
7920. सुतः इन्द्राय वायवे वरुणाय मरुत्-भ्यः।
सोमः अर्षति विष्णवे।।2।।
7921. वृषाणम् वृषभिः यतम् सुन्वति सोमम् अद्रिभिः।
दुहन्ति शक्मना पयः।।3।।
7922. भुवत् त्रितस्य मर्ज्यः भुवत् इन्द्राय मत्सरः।
सम् रूपैः अज्यते हरिः।।4।।
7923. अभि ईम् ऋतस्य विष्टपम् दुहते पृश्निमातरः।
चारु प्रिय-तमम् हविः।।5।।
7924. सम् एनम् अह्रुताः इमाः गिरः अर्षन्ति। स-सुतः।
धेनूः वाश्रः अवीवशत्।।6।।

## सूक्त-35

7925. आ नः पवस्व धारया पवमान रयिम् पृथुम्।
यया ज्योतिः विदासि नः।।1।।
7926. इन्दो समुद्रम्-ईङ्खय पवस्व विश्वम्-एजय।
रायः धर्ता नः ओजसा।।2।।
7927. त्वया वीरेण वीर-वः अभि स्याम् पृतन्यतः।
क्षर नः अभि वार्यम्।।3।।
7928. प्र वाजम् इन्दुः इष्यति सिसासन् वाजसाः ऋषिः.
व्रता विदानः आयुधा।।4।।
7929. तम् गीः-भिः वाचम्-ईङ्खयम् पुनानम् वासयामसि।
सोमम् जनस्य गो-पतिम्।।5।।
7930. विश्वः यस्य व्रते जनः दाधार धर्मणः पतेः।
पुनानस्य प्रभु-वसोः।।6।।

## सूक्त-36

7931. असर्जि रथ्यः यथा पवित्रे चम्वोः सुतः।
कार्ष्मन् वाजी नि अक्रमीत्।।1।।
7932. सः वह्निः सोम जागृविः पवस्व देव-वीः अति।
अभि कोशम् मधु-श्चुतम्।।2।।
7933. सः नः ज्योतींषि पूर्व्य पवमान वि रोचय।
क्रत्वे दक्षाय नः हिनु।।3।।
7934. शुम्भमानः ऋतयु-भिः मृज्यमानः गभस्त्योः।
पवते वारे अव्यये।।4।।
7935. सः विश्वा दाशुषे वसु सोमः दिव्यानि पार्थिवा।
पवताम् आ अन्तरिक्ष्या।।5।।
7936. आ दिवः पृष्ठम् अश्वयुः गव्य-युः सोम रोहसि।
वीरयुः शवसः पते।।6।।

## सूक्त-37

7937. सः सुतः पीतये वृषा सोमः पवित्रे अर्षति।
वि-घ्नन् रक्षांसि देवयुः।।1।।
7938. सः पवित्रे वि-चक्षणः हरिः अर्षति धर्णसिः।
अभि योनिम् कनिक्रदत्।।2।।
7939. सः वाजी रोचना दिवः पवमानः वि धावति।
रक्षः-हा वारम् अव्ययम्।।3।।
7940. सः त्रितस्य अधि सानवि पवमानः अरोचयत्।
जामिभिः सूर्यम् सह।।4।।
7941. सः वृत्रहा वृषा सुतः वरिवः-वित् अदाभ्यः।
सोमः वाजम्-इव असरत्।।5।।
7942. सः देवः कविना इषितः अभि द्रोणानि धावति।
इन्दुः इन्द्राय मंहना।।6।।

## सूक्त-38

7943. एषः ऊँ स्यः वृषा रथः अव्यः वारेभिः अर्षति।
गच्छन् वाजम् सहस्रिणम्।।1।।
7944. एतम् त्रितस्य योषणः हरिम् हिन्वन्ति अद्रिभिः।
इन्दुम् इन्द्राय पीतये।।2।।
7945. एतम् त्यम् हरितः दश मर्मृज्यन्ते अपस्युवः।
याभिः मदाय शुंभते।।3।।
7946. एषः स्यः मानुषीषु आ श्येनः न विक्षु सीदति।
गच्छन् जारः न योषितम्।।4।।
7947. एषः स्यः मद्यः रसः अव चष्टे दिवः शिशुः।
यः इन्दुः वारम् आ अविशत्।।5।।
7948. एषः स्यः पीतये सुतः हरिः अर्षति धर्णसिः।
क्रन्दन् योनिम् अभि प्रियम्।।6।।

## सूक्त-39

7949. आशुः अर्ष बृहत्-मते परि प्रियेण धाम्ना।
यत्र देवाः इति ब्रवन्।।1।।
7950. परि-कृण्वन् अनिः-कृत्रम् जनाय यातयतन् इषः।
वृष्टिम् दिवः परि स्रव।।2।।
7951. सुतः एति पवित्रे आ त्विषिम् दधानः ओजसा।
विचक्षाणः वि-रोचयन्।।3।।
7952. अयम् सः यः दिवः परि रघुयामा पवित्रे आ।
सिन्धोः ऊर्मा वि अक्षरत्।।4।।
7953. आ-विवासन् परावतः अथो अर्वा-वतः सुतः।
इन्द्राय सिच्यते मधु।।5।।
7954. सम्-ईचीनाः अनूषत हरिम् हिन्वन्ति अद्रिभिः।
योनौ ऋतस्य सीदत।।6।।

## सूक्त-40

7955. पुनानः अक्रमीत् अभि विश्वाः मृधः वि-चर्षणिः।
शुभन्ति विप्रम् धीतिभिः।।1।।
7956. आ योनिम् अरुणः रुहत् गमत् इन्द्रम् वृषा सुतः।
ध्रुवे सदसि सीदति।।2।।
7957. नु नः रयिम् महाम् इन्दो
अस्मभ्यम् सोम विश्वतः।
आ पवस्व सहस्रिणम्।।3।।
7958. विश्वा सोम पवमान द्युम्नानि इन्दो आ भर।
विदाः सहस्रिणीः इषः।।4।।
7959. सः नः पुनानः आ भर रयिम् स्तोत्रे सु-वीर्यम्।
जरितुः वर्धय गिरः।।5।।
7960. पुनानः इन्दो आ भर सोम द्वि-बर्हसम् रयिम्।
वृषन् इन्दो नः उक्थ्यम्।।6।।

## सूक्त-41

7961. प्र ये गावः न भूर्णयः त्वेषाः अयासः अक्रमुः।
घ्नन्तः कृष्णाम् अप त्वचम्।।1।।
7962. सवितस्य मनामहे अति सेतुम् दुः-आव्यम्।
सह्वांसः दस्युम् अव्रतम्।।2।।
7963. शृण्वे वृष्टेःइव स्वनः पवमानस्य शुष्मिणः।
चरन्ति विद्युतः दिवि।।3।।
7964. आ पवस्व महीम् इषम् गोमत् इन्दो हिरण्यवत्।
अश्व-वत् वाज-वत् सुतः।।4।।
7965. सः पवस्व विचर्षणे आ मही रोदसी पृण।
उषाः सूर्यः न रश्मिभिः।।5।।
7966. परि नः शर्म-यन्त्या धारया सोम विश्वतः।
सर रसा-इव विष्टपम्।।6।।

## सूक्त-42

7967. जनयन् रोचना दिवः जनयन् अप्सु सूर्यम्।
वसानः गाः अपः हरिः।।1।।
7968. एषः प्रत्नेन मन्मना देवः देवेभ्यः परि।

धारया पवते सुतः।।2।
7969. ववृधानाय तूर्वये पवन्ते वाज-सातये।
सोमाः सहस्र-पाजसः।।3।।
7970. दुहानः प्रत्नम् इत् पयः पवित्रे परि सिच्यते।
क्रन्दन् देवान् अजीजनत्।।4।।
7971. अभि विश्वानि वार्या अभि देवान् ऋत-वृधः।
सोमः पुनानः अर्षति।।5।।
7972. गोमत् नः सोम वीर-वत् अश्ववत् वाज-वत् सुतः।
पवस्व बृहतीः इषः।।6।।

## सूक्त-43

7973. यः अत्यः-इव मृज्यते गोभिः मदाय हर्यतः।
तम् गीः-भिः वासयामसि।।1।।
7974. तम् नः विश्वाः अवस्युवः गिरः शुम्भन्ति पूर्वथा।
इन्दुम् इन्द्राय पीतये।।2।।
7975. पुनानः याति हर्यतः सोमः गीः-भिः परि-कृतः।
विप्रस्य मेध्य-अतिथेः।।3।।
7976. पवमान विदाः रयिम् अस्मभ्यम् सोम सु-श्रियम्।
इन्दो इति सहस्र-वर्चसम्।।4।।
7977. इन्दुः अत्यः न वाज-सृत् कनिक्रन्ति पवित्रे आ।
यत् अक्षाः अति देवयुः।।5।।
7978. पवस्व वाजसातये विप्रस्य गृणतः वृधे।
सोम रास्व सु-वीर्यम्।।6।।

## सूक्त-44

7979. प्र नः इन्दो महे तने ऊर्मिम् न बिभ्रत् अर्षसि।
अभि देवान् अयास्यः।।1।।
7980. मती जुष्टः धिया हितः सोमः हिन्वे परावति।
विप्रस्य धारया कविः।।2।।
7981. अयम् देवेषु जागृविः सुतः एति पवित्रे आ।
सोमः याति विचर्षणिः।।3।।
7982. सः नः पवस्व वाज-युः चक्राणः चारुम् अध्वरम्।
बर्हिष्मान् आ विवासति।।4।।
7983. सः नः भगाय वायवे विप्रवीरः सदावृधः।
सोमः देवेषु आ यमत्।।5।।
7984. सः नः अद्य वसुत्तये क्रतु-वित् गातुवित्-तमः।
वाजम् जेषि श्रवः बृहत्।।6।।

## सूक्त-45

7985. सः पवस्व मदाय कम् नृचक्षाः देव-वीतये।
इन्दो इन्द्राय पीतये।।1।।
7986. सः नः अर्ष अभि दूत्यम् त्वम् इन्द्राय तोशसे।
देवान् सखिभ्यः आ वरम्।।2।।
7987. उत् त्वाम् अरुणम् वयम्
गोभिः अञ्ज्मः मदाय कम्।
वि नः राये दुरः वृधि।।3।।
7988. अति ॐ पवित्रम् अक्रमीत् वाजी धुरम् न यामनि।
इन्दुः देवेषु पत्यते।।4।।
7989. सम् ईम सखायः अस्वरन्
वने क्रीडन्तम् अति-अविम्।
इन्दुम् नावाः अनूषत।।5।।
7990. तया पवस्व धारया यया पीतः विचक्षसे।
इन्दो स्तोत्रे सुवीर्यम्।।6।।

## सूक्त-46

7991. असृग्रन् देव-वीतये अत्यासः कृत्व्याः-इव।
क्षरन्तः पर्वत-वृधः।।1।।
7992. परिकृतासः इन्दवः योषाइव पित्र्यवती।
वायुम् सोमाः असृक्षत्।।2।।
7993. एते सोमासः इन्दवः प्रयस्वन्तः चमू सुताः।
इन्द्रम् वर्धन्ति कर्मभिः।।3।।
7994. आ धावत् सु-हस्त्यः शुक्रा गृभ्णीत मन्थिना।
गोभिः श्रीणीत मत्सरम्।।4।।
7995. सः पवस्व धनम्-जय प्र-यन्ता राधसः महः।
अस्मभ्यम् सोम गातु-वित्।।5।।
7996. एतम् मृजन्ति मर्ज्यम् पवमानम् दश क्षिपः।
इन्द्राय मत्सरम् मदम्।।6।।

## सूक्त-47

7997. अया सोमः सुकृत्यया महः चित् अभि अवर्धत।
मन्दानः उत् वृष-यते।।1।।
7998. कृतानि इत् अस्य कर्त्वा चेतन्ते दस्यु-तर्हणा।
ऋणा च धृष्णुः चयते।।2।।
7999. आत् सोमः इन्द्रियः रसः वज्रः सहस्र-साः भुवत्।
उक्थम् यत् अस्य जायते।।3।।
8000. स्वयम् कविः विधर्तरि, विप्राय रत्नम् इच्छति।
यदि मर्मृज्यते धियः।।4।।
8001. सिसासतुः रयीणाम् वाजेषु अर्वताम्-इव।
भरेषु जिग्युषाम् असि।।5।।

## सूक्त-48

8002. तम् त्वा नृम्णानि बिभ्रतम् सधस्थेषु महः दिवः।
चारुम् सुकृत्यया ईमहे।।1।।
8003. संवृक्त-धृष्णुम् उक्थ्यम् महा-महिव्रतम् मदम्।
शतम् पुरः रुरुक्षणिम्।।2।।
8004. अतः त्वा रयिम् अभि राजानम् सुक्रतो दिवः।
सुपर्णः अव्यथिः भरत्।।3।।
8005. विश्वस्मै इत् स्वः दृशे साधारणम् रजःतुरम्।
गोपाम् ऋतस्य विः भरत्।।4।।
8006. अध हिन्वानः इन्द्रियम् ज्यायः महि-त्वम् आनशे।

अभिष्टिकृत् विचर्षणिः।।5।।

## सूक्त-49

8007. पवस्व वृष्टिम् आ सु नः
अपाम् ऊर्मिम् दिवः परि।
अयक्ष्माः बृहतीः इषः।।1।।
8008. तया पवस्व धारया यया गावः इह आ-गमन्।
जन्यासः उप नः गृहम्।।2।।
8009. घृतम् पवस्व धारया यज्ञेषु देव-वीतमः।
अस्मभ्यम् वृष्टिम् आ पव।।3।।
8010. सः नः ऊर्जे वि अव्ययम् पवित्रम् धाव धारया।
देवासः शृणवन् हि कम्।।4।।
8011. पवमानः असिस्यदत् रक्षांसि अप-जङ्घनत्।
प्रत्नवत् रोचयन् रुचः।।5।।

## सूक्त-50

8012. उत् ते शुष्मासः ईरते सिन्धोः ऊर्मेः-इव स्वनः।
वाणस्य चोदय पविम्।।1।।
8013. प्र-सवे ते उत् ईरते तिस्रः वाचः मखस्युवः।
यत् अव्ये एषि सानवि।।2।।
8014. अव्यः वारे परि प्रियम् हरिम् हिन्वन्ति अद्रिभिः।
पवमानम् धुश्र्वुतम्।।3।।
8015. आ पवस्व मदिन्-तम पवित्रम् धारया कवे।
अर्कस्य योनिम् आ-सदम्।।4।।
8016. सः पवस्व मदिन्-तम गोभिः अञ्जानः अक्तुभिः।
इन्दो इन्द्राय पीतये।।5।।

## सूक्त-51

8017. अध्वर्यो अद्रिभिः सुतम् सोमम् पवित्रे आ सृज।
पुनीहि इन्द्राय पातवे।।1।।
8018. दिवः पीयूषम् उत्-तमम् सोमम् इन्द्राय वज्रिणे।
सुनोत मधुमत्-तमम्।।2।।
8019. तव त्ये इन्दो अन्धसः देवाः मधोः वि अश्नते।
पवमानस्य मरुतः।।3।।
8020. त्वम् हि सोम वर्धयन् सुतः मदाय भूर्णये।
वृषन् स्तोतारम् ऊतये।।4।।
8021. अभि अर्ष विचक्षण पवित्रम् धारया सुतः।
अभि वाजम् उत श्रवः।।5।।

## सूक्त-52

8022. परि द्युक्षः सनत्-रयिः भरत् वाजम् नः अन्धसा।
सुवानः अर्ष पवित्रे आ।।1।।
8023. तव प्रत्नेभिः अध्वभिः अव्यः वारे परि प्रियः।
सहस्रधारः यात् तना।।2।।
8024. चरुः न यः तम् ईङ्खय इन्दो न दानम् ईङ्खय।
वधैः वधस्नो ईङ्खय।।3।।
8025. नि शुष्मम् इन्दो एषाम् पुरु-हूत जनानाम्।
यः अस्मान् आ-दिदेशति।।4।।
8026. शतम् नः इन्दो ऊतिभिः सहस्रम् वा शुचीनाम्।
पवस्व मंहयत्-रयिः।।5।।

## सूक्त-53

8027. उत् ते शुष्मासः अस्थुः रक्षः भिन्दन्तः अद्रिवः।
नुदस्व याः परि-स्पृधः।।1।।
8028. अया निजघ्निः ओजसा रथा-सङ्गे धने हिते।
स्तवै अबिभ्युषा हृदा।।2।।
8029. अस्य व्रतानि न आधृषे पवमानस्य दुः-ध्या।
रुज यः त्वा पृतन्यति।।3।।
8030. तम् हिन्वन्ति मद-च्युतम् हरिम् नदीषु वाजिनम्।
इन्दुम् इन्द्राय मत्सरम्।।4।।

## सूक्त-54

8031. अस्य प्रत्नाम् अनु द्युतम् शुक्रम् दुदुहे अह्नयः।
पयः सहस्र-साम् ऋषिम्।।1।।
8032. अयम् सूर्यः-इव उप-दृक् अयम् सरांसि धावति।
सप्त प्र-वतः आ दिवम्।।2।।
8033. अयम् विश्वानि तिष्ठति पुनानः भुवना उपरि।
सोमः देवः न सूर्यः।।3।।
8034. परि नः देव-वीतये वाजान् अर्षसि गोमतः।
पुनानः इन्दो इन्द्रयुः।।4।।

## सूक्त-55

8035. यवम्-यवम् नः अन्धसा पुष्टम्-पुष्टम् परि स्रव।
सोम विश्वा च सौभगा।।1।।
8036. इन्दो यथा तव स्तवः यथा ते जातम् अन्धसः।
नि बर्हिषि प्रिये सदः।।2।।
8037. उत नः गो-वित् अश्व-वित् पवस्व सोम अन्धसा।
मक्षु-तमेभिः अह-भिः।।3।।
8038. यः जिनाति न जीयते हन्ति शत्रुम् अभि-इत्य।
सः पवस्व सहस्र-जित्।।4।।

## सूक्त-56

8039. परि सोमः ऋतम् बृहत् आशुः पवित्रे अर्षति।
विघ्नन् रक्षांसि देव-युः।।1।।
8040. यत् सोमः वाजम् अर्षति शतम् धाराः अपस्युवः।
इन्द्रस्य सख्यम् आ-विशन्।।2।।
8041. अभि त्वा योषणः दश जारम् न कन्या अनूषत।
मृज्यसे सोम सातये।।3।।
8042. त्वम् इन्द्राय विष्णवे स्वादुः इन्दो परि स्रव।
नृन् स्तोतृन् पाहि अंहसः।।4।।

## सूक्त-57

8043. प्र ते धाराः असश्चतः दिवः न यन्ति वृष्टयः।
अच्छ वाजम् सहस्रिणम्।।1।।
8044. अभि प्रियाणि काव्या विश्वा चक्षाणः अर्षति।
हरिः तुञ्जानः आयुधा।।2।।
8045. सः मर्मृजानः आयुभिः इभः राजा-इ सुव्रतः।
श्येनः न वंसु सीदति।।3।।
8046. सः नः विश्वा दिवः वसु उतो पृथिव्याः अधि।
पुनानः इन्दो आ भर।।4।।

## सूक्त-58

8047. तरत् सः मन्दी धावति धारा सुतस्य अन्धसः।
तरत् सः मन्दी धावति।।1।।
8048. उस्रा वेद वसूनाम् मर्तस्य देवी अवसः।
तरत् सः मन्दी धावति।।2।।
8049. ध्वस्रयोः पुरु-सन्त्योः आ सहस्राणि दद्महे।
तरत् सः मन्दी धावति।।3।।
8050. आ ययोः त्रिंशतम् तना सहस्राणि च दद्महे।
तरत् सः मन्दी धावति।।4।।

## सूक्त-59

8051. पवस्व गोजित् अश्वजित्
विश्वजित् सोम रण्य-जित्।
प्रजा-वत् रत्नम् आ भर।।1।।
8052. पवस्व अत्-भ्यः अदाभ्यः पवस्व ओषधीभ्यः।
पवस्व धिष्णाभ्यः।।2।।
8053. त्वम् सोम पवमानः विश्वानि दुः-इता तर।
कविः सीद नि बर्हिषि।।3।।
8054. पवमान स्वः विदः जायमानः अभवः महान्।
इन्दो विश्वान् अभि इत् असि।।4।।

## सूक्त-60

8055. प्र गायत्रेण गायत पवमानम् वि-चर्षणिम्।
इन्दुम्-सहस्र-चक्षसम्।।1।।
8056. तम् त्वा सहस्र-चक्षसम् अथो सहस्र-भर्णसम्।
अति वारम् अपाविषुः।।2।।
8057. अति वारान् पवमानः असिस्यदत्
कलशान् अभि धावति।
इन्द्रस्य हार्दि आ-विशन्।।3।।
8058. इन्द्रस्य सोम राधसे शम् पवस्व विचर्षणे।
प्रजावत् रेतः आ भर।।4।।

## सूक्त-61

8059. अया वीती परि स्रव यः ते इन्दो मदेषु आ।
अव-अहन् नवतीः नव।।1।।
8060. पुरः सद्यः इत्था-धिये दिवः-दासाय शम्बरम्।
अध त्यम् तुर्वशम् यदुम्।।2।।
8061. परि नः अश्वम् अश्व-वित् गोमत् इन्दो हिरण्यवत्।
क्षर सहस्रिणीः इषः।।3।.
8062. पवमानस्य ते वयम् पवित्रम् अभि-उन्दतः।
सखित्वम् आ वृणीमहे।।4।।
8063. ये ते पवित्रम् ऊर्मयः अभि-क्षरन्ति धारया।
तेभिः नः सोम मृडय।।5।।
8064. सः नः पुनानः आ भर रयिम् वीर-वतीम् इषम्।
ईशानः सोम विश्वतः।।6।।
8065. एतम् ऊँ त्यम् दश क्षिपः मृजन्ति सिन्धु-मातरम्।
सम् आदित्येभिः अख्यत।।7।।
8066. सम् इन्द्रेण उत वायुना सुतः एति पवित्रे आ।
सम् सूर्यस्य रश्मिभिः।।8।।
8067. सः नः भगाय वायवे पूष्णे पवस्व मधुमान्।
चारुः मित्रे वरुणे च।।9।।
8068. उच्चा ते जातम् अन्धसः दिवि सत् भूमिः आ ददे।
उग्रम् शर्म महि श्रवः।।10।।
8069. एना विश्वानि अर्यः आ द्युम्नानि मानुषाणाम्।
सिसासन्तः वनामहे।।11।।
8070. सः नः इन्द्राय यज्वे वरुणाय मरुत्-भ्यः।
वरिवः-वित् परि स्रव।।12।।
8071. उपो सु जातम् अप्-तुरम् गोभिः भंगम् परि-कृतम्।
इन्दुम् देवाः अयासिषुः।।13।।
8072. तम् इत् वर्धन्तु नः गिरः वत्सम् संशिश्वरीः-इव।
यः इन्द्रस्य हृदम्-सनिः।।14।।
8073. अर्ष नः सोम शम् गवे धुक्षस्व पिप्युषीम् इषम्।
वर्ध समुद्रम् उक्थ्यम्।।15।।
8074. पवमानः अजीजनत् दिवः चित्रम् न तन्यतुम्।।
ज्योतिः वैश्वानरम् बृहत्।।16।।
8075. पवमानस्य ते रसः मदः राजन् अदुच्छुनः।
वि वारम् अव्यम् अर्षति।।17।।
8076. पवमान रसः तव दक्षः वि राजति द्यु-मान्।
ज्योतिः विश्वम् स्वः दृशे।।18।।
8077. यः ते मदः वरेण्यः तेन पवस्व अन्धसा।
देव-अवीः अघशंस-हा।।19।।
8078. जघ्निः वृत्रम् अमित्रियम् सस्निः वाजम् दिवे-दिवे।
गोसाः ऊँ अश्वसाः असि।।20।।
8079. सम्-मिश्लः अरुषः भव सु-उपस्थाभिः न धेनु-भिः।
सीदन् श्येनः न योनिम् आ।।21।।
8080. सः पवस्व यः आविथ इन्द्रम् वृत्राय हन्तवे।
वव्रि-वांसम् महीः अपः।।22।।
8081. सु-वीरासः वयम् धना जयेम सोम मीढ्वः।

पुनानः वर्ध नः गिरः।।23।।
8082. त्वा-ऊतासः तव अवसा स्याम वन्वन्तः आ-मुरः।
सोम व्रतेषु जागृहि।।24।।
8083. अप-घ्नन् पवते मृधः अप सोमः अराव्णः।
गच्छन् इन्द्रस्य निः-कृतम्।।25।।
8084. महः नः रायः आ भर पवमान जहि मृधः।
रास्व इन्दो वीर-वत् यशः।।26।।
8085. न त्वा शतम् चन् ह्रुतः
राधः दित्सन्तम् आ मिनन्।
यत् पुनानः मखस्यसे।।27।।
8086. पवस्व इन्दो वृषा सुतः कृधि नः यशसः जने।
विश्वाः अप द्विषः जहि।।28।।
8087. अस्य ते सख्ये वयम् तव इन्दो द्युम्ने उत्-तमे।
ससह्याम् पृतन्यतः।।29।।
8088. या ते भीमानि आयुधा तिग्मानि सन्ति धूर्वणे।
रक्ष समस्य नः निदः।।30।।

## सूक्त-62

8089. एते असृग्रम् इन्दवः तिरः पवित्रम् आशवः।
विश्वानि अभि सौभगा।।1।।
8090. वि-घ्नन्तः दुः-इता पुरु सुगा तोकाय वाजिनः।
तना कृण्वन्तः अर्वते।।2।।
8091. कृण्वन्तः वरिवः गवे अभि अर्षन्ति सु-स्तुतिम्।
इडम् अस्मभ्यम् सम्-यतम्।।3।।
8092. असावि अंशुः मदाय अप्सु दक्षः गिरि-स्थाः।
श्येनः न योनिम् आ असदत्।।4।।
8093. शुभ्रम् अन्धः देव-वातम् अप्सु धूतः नृ-भिः सुतः।
स्वदन्ति गावः पयः-भिः।।5।।
8094. आत् ईम् अश्वम् न हेतारः अशूशुभन् अमृताय।
मध्वः रसम् सध-मादे।।6।।
8095. याः ते धाराः मधु-श्चुतः असृग्रम् इन्दो ऊतये।
ताभिः पवित्रम् आ असदः।।7।।
8096. सः अर्ष इन्द्राय पीतये तिरः रोमाणि अव्यया।
सीदन् योना वनेषु आ।।8।।
8097. त्वम् इन्दोर परि स्रव स्वादिष्ठः अङ्गिरः-भ्यः।
वरिवः-वित् घृतम् पयः।।9।।
8098. अयम् वि-चर्षणिः हितः पवमानः सः चेतति।
हन्वानः आप्यम् बृहत्।।10।।
8099. एषः वृषा वृष-व्रतः पवमानः अशस्ति-हा।
करत् वसूनि दाशुषे।।11।
8100. आ पवस्व सहस्रिणम् रयिम् गो-मन्तम् अश्विनम्।
पुरु-चन्द्रम् पुरु-स्पृहम्।।12।।
8101. एषः स्यः परि सिच्यते मर्मृज्यमानः आयुभिः।
उरुगायः कवि-क्रतुः।।13।।
8102. सहस्र-ऊतिः शत-मघः विमानः रजसः कविः।
इन्द्राय पवते मदः।।14।।
8103. गिरा जातः इह स्तुतः इन्दुः इन्द्राय धीयते।
विः योना वसतौ-इव।।15।।
8104. पवमानः सुतः नृभिः सोमः वाजम्-इव असरत्।
चमूषु शक्मना आ-सदम्।।16।।
8105. तम् त्रि-पृष्ठे त्रि-वन्धुरे रथे युञ्जन्ति यातवे।
ऋषीणाम् सप्त धीतिभिः।।17।।
8106. तम् सोतारः धन-स्पृतम् आशुम् वाजाय यातवे।
हरिम् हिनोत वाजिनम्।।18।।
8107. आ-विशन् कलशम् सुतः विश्वाः अर्षन् अभि श्रियः।
शूरः न गोषु तिष्ठति।।19।।
8108. आ ते इन्दो मदाय कम् पयः दुहन्ति आयवः।
देवाः देवेभ्यः मधु।।20।।
8109. आ नः सोमम् पवित्रे आ सृजत मधुमत्-तमम्।
देवेभ्यः देवश्रुत्-तमम्।।21।।
8110. एते सोमाः असृक्षत गृणानाः श्रवसे महे।
मदिन्-तमस्य धारया।।22।।
8111. अभि गव्यानि वीतये नृम्णा पुनानः अर्षसि।
सनत्-वाजः परि स्रव।।23।।
8112. उत नः गोमतीः इषः विश्वाः अर्ष परि-स्तुभः।
गृणानः जमत्-अग्निना।।24।।
8113. पवस्व वाचः अग्रियः सोम चित्राभिः ऊतिभिः।
अभि विश्वानि काव्या।।25।।
8114. त्वम् समुद्रियाः अपः अग्रियः वाचः ईरयन्।
पवस्व विश्वम्-एजय।।26।।
8115. तुभ्य इमा भुवना कवे महिम्ने सोम तस्थिरे।
तुभ्यम् अर्षन्ति सिन्धवः।।27।।
8116. प्र ते दिवः न वृष्टयः धाराः यन्ति असश्चतः।
अभि शुक्राम् उप-स्तिरम्।।28।।
8117. इन्द्राय इन्दुम् पुनीतन उग्रम् दक्षाय साधनम्।
ईशानम् वीति-राधसम्।।29।।
8118. पवमानः ऋतः कविः सोमः पवित्रम् आ असदत्।
दधत् स्तोत्रे सु-वीर्यम्।।30।।

## सूक्त-63

8119. आ पवस्व सहस्रिणम् रयिम् सोम सुवीर्यम्।
अस्मे श्रवांसि धारय।।1।।
8120. इषम् ऊर्जम् च पिन्वसे इन्द्राय मत्सरिन्-तमः।
चमूषु आ नि सीदति।।2।।
8121. सुतः इन्द्राय विष्णवे सोमः कलशे अक्षरत्।

मधुमान् अस्तु वायवे।।3।।
8122. एते असृग्रम् आशवः अति ह्वरांसि बभ्रवः।
सोमाः ऋतस्य धारया।।4।।
8123. इदम् वर्धन्तः अप्-तरः कृण्वन्तः विश्वम् आर्यम्।
अप-घ्नन्तः अराव्णः।।5।।
8124. सुताः अनु स्वम् आ रजः अभि अर्षन्ति बभ्रवः।
इन्द्रम् गच्छन्तः इन्दवः।।6।।
8125. अया पवस्व धारया यया सूर्यम् अरोचयः।
हिन्वानः मानुषीः अपः।।7।।
8126. अयुक्त सूरः एतशम् पवमानः मनौ अधि।
अन्तरिक्षेण यातवे।।8।।
8127. उत त्याः हरितः दश सूरः अयुक्त यातवे।
इन्दुः इन्द्रः इति ब्रुवन्।।9।।
8128. परि इतः वायवे सुतम् गिरः इन्द्राय मत्सरम्।
अव्यः वारेषु सिञ्चत।।10।।
8129. पवमान विदाः रयिम् अस्मभ्यम् सोम दुस्तरम्।
यः दुः-निशः वनुष्यता।।11।।
8130. अभि अर्ष सहस्रिणम् रयिम् गोमन्तत् अश्विनम्।
अभि वाजम् उत श्रवः।।12।।
8131. सोमः देवः न सूर्यः अद्रिभिः पवते सुतः।
दधानः कलशे रसम्।।13।।
8132. एते धामानि आर्या शुक्राः ऋतस्य धारया।
वाजम् गोमन्तम् अक्षरन्।।14।।
8133. सुताः इन्द्राय वज्रिणे सोमासः दधि-आशिरः।
पवित्रम् अति अक्षरन्।।15।।
8134. प्र सोम मधुमत्-तमः राये अर्ष पवित्रे आ।
मदः यः देव-वीतमः।।16।।
8135. तम् ईम् मृजन्ति आयवः हरिम् नदीषु वाजिनम्।
इन्दुम् इन्द्राय मत्सरम्।।17।।
8136. आ पवस्व हिरण्यवत् अश्ववत् सोम वीरवत्।
वाजम् गो-मन्तम् आ भर।।18।।
8137. परि वाजे न वाजयुम् अव्यः वारेषु सिञ्चत।
इन्द्राय मधुमत्-तमम्।।19।।
8138. कविम् मृजन्ति मर्ज्यम् धीभिः विप्राः अवस्यवः।
वृषा कनिक्रत् अर्षति।।20।।
8139. वृषणम् धीभिः अप्-तुरम् सोमम् ऋतस्य धारया।
मती विप्राः सम् अस्वरन्।।21।।
8140. पवस्व देव आयुषक् इन्द्रम् गच्छतु ते मदः।
वायुम् आ रोह धर्मणा।।22।।
8141. पवमान नि तोशसे रयिम् सोम श्रवाय्यम्।
प्रियः समुद्रम् आ विश।।23।।
8142. अप-घ्नन् पवसे मृधः, क्रतुवित् सोम मत्सरः।
नुदस्व अदेव-युम् जनम्।।24।।
8143. पवमानाः असृक्षत, सोमाः शुक्रासः इन्दवः।
अभि विश्वानि काव्या।।25।।
8144. पवमानासः आशवः, शुभ्राः असृयम् इन्दवः।
घ्नन्तः विश्वाः अप द्विषः।।26।।
8145. पवमानाः दिवः परि अन्तरिक्षात् असृक्षत।
पृथिव्याः अधि सानवि।।27।।
8146. पुनानः सोम धारया, इन्दो विश्वाः अप स्रिधः।
जहि रक्षांसि सुक्रतो।।28।।
8147. अप-घ्नन् सोम रक्षसः अभि अर्ष कनिक्रदत्।
द्युमन्तम् शुष्मम् उत्-तमम्।।29।।
8148. अस्मे वसूनि धारय सोम दिव्यानि पार्थिवा।
इन्दो विश्वानि वार्या।।30।।

## सूक्त-64

8149. वृषा सोम द्यु-मान् असि वृषा देव वृषव्रतः।
वृषा धर्णामि दधिषे।।1।।
8150. वृष्णः ते वृष्ण्यम् शवः वृषा वनम् वृषा मदः।
सत्यम् वृषन् वृषा इत् असि।।2।।
8151. अश्वः न चक्रदः वृषा सम् गाः इन्दो सम् अर्वतः।
वि नः राये दुरः वृधि।।3।।
8152. असृक्षत प्र वाजिनः, गव्या सोमासः अश्वया।
शुक्रासः वीरया आशवः।।4।।
8153. शुम्भमानाः ऋतयुभिः मृज्यमानाः गभस्त्योः।
पवन्ते वारे अव्यये।।5।।
8154. ते विश्वा दाशुषे वसु सोमाः दिव्यानि पार्थिवा।
पवन्ताम् आ अन्तरिक्ष्या।।6।।
8155. पवमानस्य विश्ववित् प्र ते सर्गाः असृक्षत।
सूर्यस्य-इव न रश्मयः।।7।।
8156. केतुम् कृण्वन् दिवः परि विश्वा रूपा अभि अर्षसि।
समुद्रः सोम पिन्वसे।।8।।
8157. हिन्वानः वाचम् इष्यसि पवमान विधर्मणि।
अक्रान् देवः न सूर्यः।।9।।
8158. इन्दुः पविष्ट चेतनः प्रियः कवीनाम् मती।
सृजत् अश्वम् रथीः-इव।।10।।
8159. ऊर्मिः यः ते पवित्रे आ देव-अवीः परिअक्षरत्।
सीदन् ऋतस्य योनिम् आ।।11।।
8160. सः नः अर्ष पवित्रे आ मदः यः देव-वीतमः।
इन्दो इन्द्राय पीतये।।12।।
8161. इषे पवस्व धारया मृज्यमानः मनीषि-भिः।
इन्दो रुचा अभि गाः इहि।।13।।
8162. पुनानः वरिवः कृधि ऊर्जम् जनाय गिर्वणः।
हरे सृजानः आ-शिरम्।।14।।
8163. पुनानः देव-वीतये इन्द्रस्य याहि नृः-कृतम्।

द्युतानः वाजिभिः यतः।।15।।
8164. प्र हिन्वानासः इन्दवः अच्छ समुद्रम् आशवः।
धिया जूताः असृक्षत्।।16।।
8165. मर्मृजानासः आयवः वृथा समुद्रम् इन्दवः।
अग्मन् ऋतस्य योनिम् आ।।17।।
8166. परि नः याहि अस्मयुः विश्वा वसूनि ओजसा।
पाहि नः शर्म वीरवत्।।18।।
8167. मिमाति वह्निः एतशः पदम् युजानः ऋक्वभिः।
प्र यत् समुद्रे आहितः।।19।।
8168. आ यत् योनिम् हिरण्ययम् आशुः ऋतस्य सीदति।
जहाति अप्रचेतसः।।20।।
8169. अभि वेनाः अनूषत इयक्षन्ति प्रचेतसः।
मज्जन्ति अवि-चेतसः।।21।।
8170. इन्द्राय इन्दो मरुत्वते पवस्व मधुमत्-तमः।
ऋतस्य योनिम् आ-सदम्।।22।
8171. तम् त्वा विप्राः वचः-विदः परि कृण्वन्ति वेधसः।
सम् त्वा मृजन्ति आयवः।।23।।
8172. रसम् ते मित्रः अर्यमा पिबन्ति वरुणः कवे।
पवमानस्य मरुतः।।24।।
8173. त्वम् सोम विपः-चितम् पुनानः वाचम् इष्यसि।
इन्दो सहस्र-भर्णसम्।।25।।
8174. उतो सहस्र-भर्णसम् वाचम् सोम मखस्युवम्।
पुनानः इन्दो आ भर।।26।।
8175. पुनानः इन्दो एषाम् पुरु-हूत जनानाम्।
प्रियः समुद्रम् आ विश।।27।।
8176. दविद्युतत्या रुचा परि-स्तोभन्त्या कृपा।
सोमाः शुक्राः गो-आशिरः।।28।।
8177. हिन्वानः हेतृभिः यतः आ वाजम् वाजी अक्रमीत्।
सीदन्तः वनुषः यथा।।29।।
8178. ऋधक् सोम स्वस्तये सम्-जग्मानः दिवः कविः।
पवस्व सूर्यः दृशे।।30।।

## सूक्त-65

8179. हिन्वन्ति सूरम् उस्रयः स्वसारः जामयः पतिम्।
महाम् इन्दुम् महीयुवः।।1।।
8180. पवमान रुचा-रुचा देवः देवेभ्यः परि।
विश्वा वसूनि आ विश।।2।।
8181. आ पवमान सु-स्तुतिम् वृष्टिम् देवेभ्यः दुवः।
इषे पवस्व सम्-यतम्।।3।।
8182. वृषा हि असि भानुना द्यु-मन्तम् त्वा हवामहे।
पवमान सु-आध्यः।।4।।
8183. आ पवस्व सु-वीर्यम् मन्दमानः सु-आयुध।
इहो सु इन्दो आ गहि।।5।।
8184. यत् अत्-भिः परि-सिच्यसे मृज्यमानः गभस्त्योः।
द्रुणा सध-स्थम् अश्नुषे।।6।।
8185. प्र सोमाय व्यश्व-वत् पवमानाय गायत।
महे सहस्र-चक्षसे।।7।।
8186. यस्य वर्णम् मधु-श्चुतम् हरिम् हिन्वति अद्रिभिः।
इन्दुम् इन्द्राय पीतये।।8।।
8187. तस्य ते वाजिनः वयम् विश्वा धनानि जिग्युषः।
सखित्वम् आ वृणीमहे।।9।।
8188. वृषा पवस्व धारया मरुत्वते च मत्सरः।
विश्वा दधानः ओजसा।।10।।
8189. तम् त्वा धर्तारम् ओण्योः पवमान स्वः-दृशम्।
हिन्वे वाजेषु वाजिनम्।।11।।
8190. अया चित्तः विपा अनया हरिः पवस्व धारया।
युजम् वाजेषु चोदय।।12।।
8191. आ नः इन्दो महीम् इषम् पवस्व विश्व-दर्शतः।
अस्मभ्यम् सोम गातु-वित्।।13।।
8192. आ कलशाः अनूष इन्दो धारिभिः ओजसा आ।
इन्द्रस्य पीतये विश।।14।।
8193. यस्य ते मद्यम् रसम् तीव्रम् दुहन्ति अद्रिभिः।
सः पवस्व अभिमातिहा।।15।।
8194. राजा मेधाभिः ईयते पवमानः मनौ अधि।
अन्तरिक्षेण यातवे।।16।।
8195. आ नः इन्दो शत-ग्विनम्
गवाम् पोषम् सु-अश्व्यम्।
बह भगत्तिम् ऊतये।।17।।
8196. आ नः सोम सहः जुवः रूपम् न वर्चसे।
भर सुस्वानः देववीतये।।18।।
8197. अर्ष सोम द्युमत्-तमः अभि द्रोणानि रोरुवत्।
सीदन् श्येनः न योनिम् आ।।19।।
8198. अप्साः इन्द्राय वायवे वरुणाय मरुत्-भ्यः।
सोमः अर्षति विष्णवे।।20।।
8199. इषम् तोकाय नः दधत् अस्मभ्यम् सोम विश्वतः।
आ पवस्व सहस्रिणम्।।21।।
8200. ये सोमासः परावति ये अर्वावति सुन्विरे।
ये वा अदः शर्यणावति।।22।।
8201. ये आर्जीकेषु कृत्वसु, ये मध्ये पत्स्यानाम्।
ये वा जनेषु पञ्चसु।।23।।
8202. ते नः वृष्टिम् दिवः परि पवन्ताम् आ सुवीर्यम्।
सुवानाः देवासः इन्दवः।।24।।
8203. पवते हर्यतः हरिः गृणानः जमत्-अग्निना।
हिन्वानः गोः अधि त्वचि।।25।।
8204. प्र शुक्रासः वयः-जुवः हिन्वानासः न सप्तयः।
श्रीणानाः अप्सु मृञ्जत।।26।।

8205. तम् त्वा सुतेषु आ-भुवः हिन्विरे देव-तातये।
सः पवस्व अनया रुचा।।27।।
8206. आ ते दक्षम् मयः-भुवम्, बह्निम् अद्य वृणीमहे।
पान्तम् आ पुरु-स्पृहम्।।28।।
8207. आ मन्द्रम् आ वरेण्यम् आ विप्रम् आ मनीषिणम्।
पान्तम् आ पुरु-स्पृहम्।।29।।
8208. आ रयिम् आ सुच-चेतुनम् आ सुक्रतो तनूषु आ।
पान्तम् आ पुरु-स्पृहम्।।30।।

## सूक्त-66

8209. पवस्व विश्व-चर्षणे अभि विश्वानि काव्या।
सखा सखिभ्यः ईड्यः।।1।।
8210. ताभ्याम् विश्वस्य राजसि ये पवमान धामनी।
प्रतीची सोम तस्थतुः।।2।।
8211. परि धामानि यानि ते त्वम् सोम असि विश्वतः।
पवमान ऋतुभिः कवे।।3।।
8212. पवस्व जनयन् इषः अभि विश्वानि वार्या।
सखा सखिभ्यः ऊतये।।4।।
8213. तव शुक्रासः अर्चयः दिवः ष्टष्ठे वि तन्वते।
पवित्रम् सोम धामभिः।।5।।
8214. तव इमे सप्त सिन्धवः प्रशिषम् सोम सिस्रते।
तुभ्यम् धावन्ति धेनवः।।6।।
8215. प्र सोम याहि धारया सुतः इन्द्राय मत्सरः।
दधानः अक्षिति श्रवः।।7।।
8216. सम् ऊम् त्वा धीभिः
अस्वरन् हिन्वतीः सप्त जामयः।
विप्रम् आजा विवस्वतः।।8।।
8217. मृजन्ति त्वा सम् अग्रुवः अव्ये जीरौ अधि स्वनि।
रेभः यत् अज्यसे वने।।9।।
8218. पवमानस्य ते कवे वाजिन् सर्गाः असृक्षत।
अर्वन्तः न श्रवस्यवः।।10।।
8219. अच्छ कोशम् मधु-श्चुतम् असृग्रम् वारे।
अव्यये अवावशन्त धीतयः।।11।।
8220. अच्छ समुद्रम् इन्दवः अस्तम् गावः न धेनवः।
अग्मन् ऋतस्य योनिम् आ।।12।।
8221. प्र नः इन्दो महे रणे आपः अर्षन्ति सिन्धवः।
यत् गोभिः वासयिष्यसे।।13।।
8222. अस्य ते सख्ये वयम् इयक्षन्तः त्वा-ऊतयः।
इन्दो सखित्वम् उश्मसि।।14।।
8223. आ पवस्व गो-इष्टये महे सोम नृ-चक्षसे।
आ इन्द्रस्य जठरे विश।।15।।
8224. महान् असि सोम ज्येष्ठः
उग्राणाम् इन्दो ओजिष्ठः।
युध्वा सन् शश्वत् जिगेथ।।16।।
8225. यः उग्रेभ्यः चित् ओजीयमान्
शूरेभ्यः चित् शूर-तरः।
भूरि-दाभ्यः चित् मंहीयान्।।17।।
8226. त्वम् सोम सूरः आ इषः तोकस्य साता तनूनाम्।
वृणीमहे सख्याय वृणीमहे युज्याय।।18।।
8227. अग्ने आयूंषि पवसे आ सुव ऊर्जम् इषम् च नः।
आरे बाधस्व दुच्छुनाम्।।19।।
8228. अग्निः ऋषिः पवमानः पाञ्चजन्यः पुरः-हितः।
तम् ईमहे महा-गयम्।।20।।
8229. अग्ने पवस्व सु-अपाः अस्मे वर्चः सुवीर्यम्।
दधत् रयिम् मयि पोषम्।।21।।
8230. पवमानः अति स्रिधः अभि, अर्षति सु-स्तुतिम्।
सूरः न विश्व-दर्शतः।।22।।
8231. सः मर्जृमानः आयुभिः प्रयस्वान् प्रयसे हितः।
इन्दुः अत्यः विचक्षणः।।23।।
8232. पवमानः ऋतम् बृहत् शुक्रम् ज्योतिः अजीजनत्।
कृष्णा तमांसि जंघनत्।।24।।
8233. पवमानस्य जंघ्नतः हरेः चन्द्राः असृक्षत।
जीराः अजिर-शोचिषः।।25।।
8234. पवमानः रथि-तमः शुभ्रेभिः शुभ्रशः-तमः।
हरि-चन्द्रः मरुत्-गणः।।26।।
8235. पवमानः वि अश्नवत् रश्मि-भिः वाज-सातमः।
दधत् स्तोत्रे सु-वीर्यम्।।27।।
8236. प्र सुवानः इन्दुः अक्षाः पवित्रम् अति अव्ययम्।
पुनानः इन्दुः इन्द्रम् आ।।28।।
8237. एषः सोमः अधि त्वचि गवाम् क्रीडति अद्रिभिः।
इन्द्रम् मदाय जोहुवत्।।29।।
8238. यस्य ते द्युम्न-वत् पयः पवमान आ-भृतम्।
दिवः तेन नः मृड जीवसे।।30।।

## सूक्त-67

8239. त्वम् सोम असि धारयुः मन्द्रः ओजिष्ठः अध्वरे।
पवस्व मंहयत्-रयिः।।1।।
8240. त्वम् सुतः नृ-मादनः, दधन्वान् मत्सरिन्-तमः।
इन्द्राय सूरिः अन्धसा।।2।।
8241. त्वम् सुस्वानः अद्रिभिः अभि अर्ष कनिक्रदत्।
द्युमन्तम् शुष्मम् उत्-तमम्।।3।।
8242. इन्दुः हिन्वानः अर्षति तिरः वाराणि अव्यया।
हरिः वाजम् अचिक्रदत्।।4।।
8243. इन्दो वि अव्यम् अर्षसि वि श्रवांसि वि सौभगा।
वि वाजान् सोम गोमतः।।5।।
8244. आ नः इन्दो शत-ग्विनम्

रयिम् गो-मन्तम् अश्विनम्।
भर सोम सहस्रिणम्।।6।।
8245. पवमानासः इन्द्वः तिरः पवित्रम् आशवः।
इन्द्रम् यामेभिः आशत।।7।।
8246. ककुहः सोम्यः रसः इन्दुः इन्द्राय पूर्व्यः।
आयुः पवते आयवे।।8।।
8247. हिन्वन्ति सूरम् उस्रयः पवमानम् मधु-श्चुतम्।
अभि गिरा सम् अस्वरन्।।9।।
8248. अविता नः अज-अश्वः पूषा यामनि-यामनि।
आ भक्षत् कन्यासु नः।।10।।
8249. अयम् सोमः कपर्दिने, घृतम् न पवते मधु।
आ भक्षत् कन्यासु नः।।11।।
8250. अयम् ते आघृणे सुतः घृतम् न पवते शुचि।
आ भक्षत् कन्यासु नः।।12।।
8251. वाचः जन्तुः कवीनाम् पवस्व सोम धारया।
देवेषु रत्नधाः असि।।13।।
8252. आ कलशेषु धावति श्येनः वर्म वि गाहते।
अभि द्रोणा कनिक्रदत्।।14।।
8253. परि प्र सोम ते रसः असर्जि कलशे सुतः।
श्येनः न तक्तः अर्षति।।15।।
8254. पवस्व सोम मन्दयन् इन्द्राय मधुमत्-तमः।।16।।
8255. असृग्रन् देव-वीतये वाज-यन्तः रथाः-इव।।17।।
8256. ते सुतासः मदिन्-तमाः
शुक्राः वायुम् असृक्षत।।18।।
8257. ग्राव्णा तुन्नः अभि-स्तुतः पवित्रम् सोम गच्छसि।
दधत् स्तोत्रे सु-वीर्यम्।।19।।
8258. एषः तुन्नः अभि-स्तुतः पवित्रम् अति गाहते।
रक्षः-हा वारम् अव्ययम्।।20।।
8259. यत् अन्ति यत् च दूरके भयम् विन्दति माम् इह।
पवमान वि तत् जहि।।21।।
8260. पवमानः सः अद्य नः पवित्रेण वि-चर्षणिः।
यः पोता सः पुनातु नः।।22।।
8261. यत् ते पवित्रम् अर्चिषि अग्ने वि-तमम् अन्तः आ।
ब्रह्म तेन पुनीहि नः।।23।।
8262. यत् ते पवित्रम् अर्चिवत् अग्ने तेन पुनीहि नः।
ब्रह्म-सवैः पुनीहि नः।।24।।
8263. उभाभ्याम् देव सवितः पवित्रेण सवेन च।
माम् पुनीहि विश्वतः।।25।।
8264. त्रिभिः त्वम् देव सवितः वर्षिष्ठैः सोम धामभिः।
अग्ने दक्षैः पुनीहि नः।।26।।
8265. पुनन्तु माम् देव-जनाः पुनन्तु वसवः धिया।
विश्वे देवाः पुनीत मा जात-वेदः पुनीहि मा।।27।।
8266. प्र प्यायस्व प्र स्यन्दस्व सोम विश्वेभिः अंशुभिः।
देवेभ्यः उत्-तमम् हविः।।28।।
8267. उप प्रियम् पनि-प्नतम् युवानम् आहुतिवृधम्।
अगन्म बिभ्रतः नमः।।29।।
8268. अलाय्यस्य परशुः ननाश तम् आ पवस्व
देव सोम आखुम् चित् एव देव सोम।।30।।
8269. यः पावमानीः अधि-एति
ऋषिभिः सम्-भृतम् रसम्।
सर्वम् सः पूतम् अश्नाति स्वदितम् मातरिश्वना।।31।।
8270. पावमानीः यः अधिएति ऋषिभिः सम्-भृतम् रसम्।
तस्मै सरस्वती दुहे क्षीरम् सर्पिः मधु उदकम्।।32।।

## सूक्त-68

8271. प्र देवम् अच्छ मधुमन्तः इन्दवः
असिस्यन्त गावः आ न धेनवः।
बर्हि-सदः वचना-वन्तः ऊधभिः
परिस्रुतम् उस्रियाः निः-निजम् धिरे।।1।।
8272. सः रोरुवत् अभि पूर्वाः अचिक्रदत्
उप-आरुहः श्रथयन् स्वादते हरिः।
तिरः पवित्रम् परियन् उरु ज्रयः नि
शर्याणि दधते देवः आ वरम्।।2।।
8273. वि यः ममे यम्या संयती मदः
साकम्-वृधा पयसा पिन्वत् अक्षिता।
मही अपारे रजसी वि-वेविदत्
अभिव्रजन् अक्षितम् पाजः आ ददे।।3।।
8274. सः मातरा वि-चरन् वाजयन्
अपः प्र मेधिरः स्वधया पिन्वते पदम्।
अंशुः यवेन पिपिशे यतः नृभिः सम्
जामिभिः नसते रक्षते शिरः।।4।।
8275. सम् दक्षेण मनसा जायते कविः
ऋतस्य गर्भः निहितः यमा परः।
यूना ह सन्ता प्रथमम् वि जज्ञतुः
गुहा हितम् जनिम् नेमम् उत्-यतम्।।5।।
8276. मन्द्रस्य रूपम् विविदुः मनीषिणः
श्येनः यत् अन्धः अभरत् परावतः।
तम् मर्जयन्त सु-वृधम् नदीषु आ
उशन्तम् अंशुम् परि-यन्तम् ऋग्मियम्।।6।।
8277. त्वाम् मृजन्ति दश योषणः सुतम्
सोम ऋषिभिः मतिभिः धीतिभिः हितम्।
अव्यः वारेभिः उत देवहूतिभिः नृभिः
यतः वाजम् आ दर्षि सातये।।7।।
8278. परि-प्रयन्तम् वय्यम् सु-संसदम्
सोमम् मनीषाः अभि अनूषत् स्तुभः।
यः धारया मधु-मान् ऊर्मिणा दिवः

इयर्ति वाचम् रयिषाट् अमर्त्यः।।8।।
8279. अयम् दिवः इयर्ति विश्वम्
आ रजः सोमः पुनानः कलशेषु सीदति।
अत्-भिः गोभिः मृज्यते अद्रिभिः सुतः
पुनानः इन्दुः वरिवः विदत् प्रियम्।।9।।
8280. एव नः सोम परि-सिच्यमानः
वयः दधत् चित्र-तमम् पवस्व अद्वेषे
द्यावापृथिवी हुवेम देवाः धत्त रयिम् अस्मे सु-वीरम्।।10।।

## सूक्त-69

8281. इषुः न धन्वन् प्रति धीयते मतिः
वत्सः न मातुः उप सर्जि ऊधनि।
उरुधारा-इव दुहे अग्रे आ-यती
अस्य व्रतेषु अपि सोमः इष्यते।।1।।
8282. उपो मतिः पृच्यते सिच्यते मधु
मन्द्र-अजनी चोदते अन्तः आसनि।
पवमानः सम्-तनिः प्रघ्नताम्-इव
मधुमान् द्रप्सः परि वारम् अर्षति।।2।।
8283. अव्ये वधू-युः पवते परि त्वचि
शथ्नीते नप्तीः अदितेः ऋतम् यते।
हरिः अक्रान् यजतः सम्-यतः मदः
नृम्णा शिशानः महिषः न शोभते।।3।।
8284. उक्षा मिमाति प्रति यन्ति धेनवः
देवस्य देवीः उप यन्ति निःकृतम्।
अति अक्रमीत् अर्जुनम् वारम् अव्ययम्
अत्कम् न निक्तम् परि सोमः अव्यत।।4।।
8285. अमृक्तेन रुशता वाससा हरिः
अमर्त्यः निः-निजानः परि व्यत।
दिवः पृष्ठम् बर्हणा निः-नजे कृत
उप-स्तरणम् चम्वोः नभस्यम्।।5।।
8286. सूर्यस्य-इव रश्मयः द्रवयित्नवः
मत्सरासः प्र-सुपः साकम् ईरते।
तन्तुम् ततम् परि सर्गासः आशवः न
इन्द्रात् ऋते पवते धाम किम् चन्।।6।।
8287. सिन्धोः-इव प्रवणे निम्ने आशवः
वृषच्युताः मदासः गातुम् आशत।
शम् नः नि-विशे द्विपदे चतुः-पदे
अस्मे वाजाः सोम तिष्ठन्तु कृष्णयः।।7।।
8288. आ नः पवस्व वसुमत् हिरण्य-वत्
अश्व-वत् गो-मत् यव-मत् सु-वीर्यम्।
यूयम् हि सोम पितरः मम स्थन
दिवः मूर्धानः प्र-स्थिताः वयः-कृतः।।8।।
8289. एते सोमाः पवमानासः इन्द्रम्
रथाः-इव प्र ययुः सातिम् अच्छ।
सुताः पवित्रम् अति यन्ति अव्यम्
हित्वी वव्रिम् हरितः वृष्टिम् अच्छ।।9।।
8290. इन्दो इन्द्राय बृहते पवस्व
सु-मृडकः अनवद्यः रिशादाः।
भर चन्द्राणि गृणते वसूनि
देवैः द्यावापृथिवी प्र अवतम् नः।।10।।

## सूक्त-70

8291. त्रिः अस्मै सप्त धेनवः दुदुह्रने
सत्याम् आ-शिरम् पूर्व्ये वि-ओमनि।
चत्वारि अन्या भुवनानि निः-निजे
चारूणइ चक्रे यत् ऋतैः अवर्धत्।।1।।
8292. सः भिक्षमाणः अमृतस्य चारुणः
उभे द्यावा काव्येन वि शश्रथे।
तेजिष्ठाः अपः मंहना परि व्यत
यदि देवस्य श्रवसा सदः विदुः।।2।।
9293. ते अस्य सन्तु केतवः अमृत्यवः
अदाभ्यासः जनुषी उभे अनु।
येभिः नृम्णा च देव्या च पुनते आत्
इत् राजानम् मननाः अगृम्णत।।3।।
8294. सः मृज्यमानः दशभिः सुकर्म-भिः
प्र मध्यमासु मातृषु प्र-मे सचा।
व्रतानि पानः अमृतस्य चारुणः
उभे नृचक्षाः अनु पश्यते विशौ।।4।।
8295. सः मर्जृमानः इन्द्रियाय धायसे
आ उभे अन्तः रोदसी हर्षते हितः।
वृषा शुष्मेण बाधते वि दुः-मतीः
आ-देदिशानः शर्यहा-इव शुरुधः।।5।।
8296. सः मातरा न ददृशानः
उस्रियः नानदत् एति मरुताम्-इव स्वनः।
जानन् ऋतम् प्रथमम् यत् स्वः-नरम्
प्र-शस्तये कम् अवृणीत सु-क्रतुः।।6।।
8297. रुवति भीमः वृषभः तविष्यया
शृङ्गे शिशानः हरिणी विचक्षणः।
आ योनिम् सोमः सुकृतम् नि सीदति
गव्ययी त्वक् भवति निः-निक् अव्ययी।।7।।
8298. शुचिः पुनानः तन्वम् अरेपसम्
अव्ये हरिः नि अधाविष्ट सानवि।
जुष्टः मित्राय वरुणाय वायवे
त्रिधातु मधु क्रियते सुकर्म-भिः।।8।।
8299. पवस्व सोम देव-वीतये वृषा

इन्द्रस्य हार्दि सोम-धानम् आ विश।
पुरा नः बाधात् दुः-इता अति पारय
क्षेत्र-वित् हि दिशः आह वि-पृच्छते।।9।।
8300. हितः न सप्तिः अभि वाजम्
अर्ष इन्द्रस्य इन्दो जठरम् आ पवस्व।
नावा न सिन्धुम् अति पर्षि विद्वान्
शूरः न युध्यन् अव नः निदः स्पः।।10।।

## सूक्त-71

8301. आ दक्षिणा सृज्यते शुष्मी आ-सदम्
वेति द्रुहः रक्षसः पाति जागृविः।
हरिः ओपशम् कृणुते नभः पयः
उप-स्तिरे चम्वोः ब्रह्म निः-निजे।।1।।
8302. प्र कृष्टिहा-इव शूषः एति रोरुवत्
असुर्यम् वर्णम् नि रिरीते अस्य तम्।
जहाति वव्रिम् पितुः एति निः-कृतम्
उप-प्रुतम् कृणुते निः-निजम् तना।।2।।
8303. अद्रिभिः सुतः पवते गभस्त्योः
वृष-यते नभसा वेपते मती।
सः मोदते नसते साधते गिरा
नेनिक्ते अप्सु यजते परीमणि।।3।
8304. परि द्युक्षम् सहसः पर्वत-वृधम्
मध्वः सिंचन्ति हर्म्यस्य सक्षणिम्।
आ यस्मिन् गावः सुहुत-अदः ऊधनि
मूर्धन् श्रीणन्ति अग्रियम् वरीम-भिः।।4।।
8305. सम् ईम् रथम् न भुरिजोः अहेषत
दश स्वसारः अदितेः उपस्थे आ।
जिगात् उप ज्रयति गोः अपीच्यम्
पदम् यत् अस्य मतुथाः अजीजनन्।।5।।
8306. श्येनः न योनिम् सदनम् धिया
कृतम् हिरण्ययम् आ-सदम् देवः आ ईषति।
आ ईम् रिणन्ति बर्हिषि प्रियम् गिरा अश्वः
न देवान् अपि एति यज्ञियः।।6।।
8307. परा विअक्तः अरुषः दिवः कविः
वृषा त्रि-पृष्ठः अनविष्ट गाः अभि।
सहस्र-नीतिः यतिः परा-यतिः रेभः
न पूर्वीः उषसः वि राजति।।7।।
8308. त्वेषम् रूपम् कृणुते वर्णः अस्य
सः यत्र अशयत् सम्-ऋता सेधति स्रिधः।
अप्साः याति स्वधया दैव्यम् जनम् सम्
सु-स्तुती नसते सम् गो-अग्रया।।8।।
8309. उक्षा-इव यूथा परि-यन् अरावीत्
अधि त्विषीः अधित सूर्यस्य।
दिव्यः सु-पर्णः अव चक्षत क्षाम्
सोमः परि क्रतुना पश्यते जाः।।9।।

## सूक्त-72

8310. हरिम् मृजन्ति अरुषः न युज्यते
सम् धेनुभिः कलशे सोमः अज्यते।
उत् वाचम् ईरयति हिन्वते मती
परु-स्तुतस्य कति चित् परि-प्रियः।।1।।
8311. साकम् वदन्ति बहवः मनीषिणः
इन्द्रस्य सोमम् जठरे यत् आ-दुहुः।
यदि मृजन्ति सु-भगस्तयः नरः
स-नीडभिः दश-भिः काम्यम् मधु।।2।।
8312. अरममाणः अति एति गाः अभि
सूर्यस्य प्रियम् दुहितुः तिरः रवम्।
अनु अस्मै जोषम् अभरत् विनम्-गृसः
सम् द्वयीभिः स्वसृभिः क्षेति जामिभिः।।3।।
8313. नृ-धूतः अद्रि-सुतः बर्हिषि प्रियः
पतिः गवाम् प्र-दिवः इन्दुः ऋत्वियः।
पुरन्धि-वान् मनुषः यज्ञ-साधनः
शुचिः धिया पवते सोमः इन्द्र ते।।4।।
8314. नृबाहु-भ्याम् चोदितः धारया सुतः
अनु-स्वधम् पवते सोमः इन्द्र ते।
आ अप्राः क्रतून् सम् अजैः अध्वरे मतीः
वेः न द्रु-सत् चम्वोः आ असदत् हरिः।।5।।
8315. अंशुम् दुहन्ति स्तनयन्तम् अक्षितम्
कविम् कवयः अपसः मनीषिणः।
सम् ईम् गावः मतयः यन्ति सम्-यतः
ऋतस्य योना सदने पुनः-भुवः।।6।।
8316. नाभा पृथिव्याः धरुणः महः दिवः
अपाम् ऊर्मौ सिन्धुषु अन्तः उक्षितः।
इन्द्रस्य वज्रः वृषभः विभु-वसुः
सोमः ह्रदे पवते चारु मत्सरः।।7।।
8317. सः तु पवस्व परि पार्थिवम् रजः
स्तोत्रे शिक्षन् आ-धून्वते च सुक्रतो।
मा नः निः भाक् वसुनः सदन-स्पृशः
रयिम् पिशङ्गम् बहुलम् वसीमहि।।8।।
8318. आ तु नः इन्दो शत-दातु अश्व्यम्
सहस्र-दातु पशु-मत् हिरण्य-वत्।
उप मास्व बृहतीः रेवतीः इषः
अधि स्तोत्रस्य पवमान नः गहि।।9।।

## सूक्त-73

8319. स्रक्वे द्रप्सस्य धमतः सम् अस्वरन्
ऋतस्य योना सम् अरन्त नाभयः।

त्रीन् सः मूर्ध्नः असुरः चक्रे आरभे
सत्यस्य नावः सु-कृतम् अपीपरन्।।1।।
8320. सम्यक् सम्यञ्चः महिषाः अहेषत
सिन्धोः उर्मौ अधि वेनाः अवीविपन्।
मधोः धारभिः जनयन्तः अर्कम् इत्
प्रियाम् इन्द्रस्य तन्वम् अवीवृधन्।।2।।
8321. पवित्र-वन्तः परि वाचम् आसते
पिता एषाम् प्रत्नः अभि रक्षति व्रतम्।
महः समुद्रम् वरुणः तिरः दधे धीराः
इत् शेकुः धरुणेषु आरभम्।।3।।
8322. सहस्र-धार अव ते सम् अस्वरन्
दिवः नाके मधु-जिह्वाः असश्चतः।
अस्य स्पशः न नि मिषन्ति भूर्णयः
पदे-पदे पाशिनः सन्ति सेतवः।।4।।
8323. पितुः मातुः अधि आ ये सम्-अस्वरन्
ऋचा शोचन्तः सम्-दहन्तः अव्रतान्।
इन्द्र-द्विष्टाम् अप धमन्ति मायया
त्वचम् असिक्नीम् भूमनः दिवः परि।।5।।
8324. प्रत्नात् मानात् अधि आ ये सम्-अस्वरन्
श्लोक-यन्त्रासः रभस्य मन्तवः।
अप अनक्षासः बधिराः अहासत
ऋतस्य पन्थाम् न तरन्ति दुः-कृतः।।6।।
8325. सहस्र-धारे वि-तते पवित्रे आ
वाचम् पुनन्ति कवयः मनीषिणः।
रुद्रासः एषाम् इषिरासः अद्रुहः
स्पशः सु-अञ्चः सुदृशः नृ-चक्षसः।।7।।
8326. ऋतस्य गोपाः न दभाय सु-क्रतुः
त्री सः पवित्रा हृदि अन्तः आ दधे।
विद्वान् सः विश्वा भुवना अभि पश्यति
अव अजुष्टान् विध्यति कर्ते अव्रतान्।।8।।
8327. ऋतस्य तन्तुः विततः पवित्रे आ
जिह्वायाः अग्रे वरुणस्य मायया।
धीराः चित् तत् सम्-इनक्षन्तः
आशत अत्र कर्तम् अव पदाति अप्रभुः।।9।।

## सूक्त-74

8328. शिशुः न जातः अव चक्रदत्
वने स्वः यत् वाजी अरुषः सिसासति।
दिवः रेतसा सचते पयः-वृधा
तम् ईमहे सु-मती शर्म स-प्रथः।।1।।
8329. दिवः यः स्कम्भः धरुणः सु-आततः
आ-पूर्णः अंशुः परि-एति विश्वतः।
सः इमे मही रोदसी यक्षत् आ-वृता
समीचीने दाधार सम् इषः कविः।।2।।
8330. महि प्सरः सु-कृतम् सोम्यम्
मधु उर्वी गव्यूतिः अदितेः ऋतम् यते।
ईशे यः वृष्टेः इतः उस्रियः वृषा अपाम्
नेता यः इतः-ऊतिः ऋग्मियः।।3।।
8331. आत्मन्-वत् नभः दुह्यते घृतम्
पयः ऋतस्य नाभिः अमृतम् वि जायते।
सम्-ईचीना सु-दानवः प्रीणन्ति तम्
नरः हितम् अव मेहन्ति परेवः।।4।।
8332. अरावीत् अंशुः सचमानः ऊर्मिणा
देव-अव्यम् मनुष् पिन्वति त्वचम्।
दधाति गर्भम् अदितेः उपस्थे आ
येन तोकम् च तनयम् च धामहे।।5।।
8333. सहस्र-धारे अव ताः असश्चतः
तृतीये सन्तु रजसि प्रजा-वतीः।
चतस्रः नाभः निहिताः अवः दिवः
हविः भरन्ति अमृतम् घृत-श्चुतः।।6।।
8334. श्वेतम् रूपम् कृणुते यत् सिसाति
सोमः मीढ्वान् असुरः वेद भूमनः।
धिया शमी सचते सः ईम् अभि प्र-वत्
दिवः कवन्धम् अव दर्षत् उद्रिणम्।।7।।
8335. अध श्वेतम् कलशम् गोभिः अक्तम्
कार्ष्मन् आ वाजी अक्रमीत् सस-वान्।
आ हिन्विरे मनसा देव-यन्तः
कक्षीवते शत-हिमाय गोनाम्।।8।।
8336. अत्-भिः सोम पपृचानस्य ते
रसः अव्यः वारम् वि पवमान धावति।
सः मृज्यमानः कविः-भिः मदिन्-तम
स्वदस्व इन्द्राय पवमान पीतये।।9।।

## सूक्त-75

8337. अभि प्रियाणि पवते चनः-हितः
नामानि यह्वः अधि येषु वर्धते।
आ सूर्यस्य बृहतः बृहन् अधि
रथम् विष्वंचम् अरुहत् विचक्षणः।।1।।
8338. ऋतस्य जिह्वा पवते मधु प्रियम्
वक्ता पतिः धियः अस्याः अदाभ्यः।
दधाति पुत्रः पित्रोः अपीच्यम् नाम
तृतीयम् अधि रोचने दिवः।।2।।
8339. अव द्युतानः कलशान् अचिक्रदत्
नृभिः येमानः कोशे आ हिरण्यये।
अभि ईम् ऋतस्य दोहनाः अनूषत्
अधि त्रि-पृष्ठः उषसः वि राजति।।3।।

8340. अद्रि-भिः सुतः मति-भिः
चनः-हितः प्र-रोचयन् रोदसी मातरा शुचिः।
रोमाणि अव्या समया वि धावति मधोः
धारा पिन्वमाना दिवे-दिवे।।4।।
8341. परि सोम प्र धन्व स्वस्तये
नृभिः पुनानः अभि वासय आ-शिरम्।
ये ते मदाः आ-हनसः वि-हायसः
तेभिः इन्द्रम् चोदय दातवे मघम्।।5।।

## सूक्त-76

8342. धर्ता दिवः पवते कृत्व्यः
रसः दक्षः देवानाम् अनु-माद्यः नृभिः।
हरिः सृजानः अत्यः न सत्वभिः
वृथा पाजांसि कृणुते नदीषु आ।।1।।
8343. शूरः न धत्ते आयुधा गभस्त्योः
स्वः सिसासन् रथिरः गो-इष्टिषु।
इन्द्रस्य शुष्मम् ईरयन् अपस्युभिः
इन्दुः हिन्वानः अज्यते मनीषिभिः।।2।।
8344. इन्द्रस्य सोम पवमानः
ऊर्मिणा तविष्यमाणः जठरेषु आ विश।
प्र नः पिन्व विद्युत् अभ्रा-इव रोदसी
धिया न वाजान् उप मासि शश्वतः।।3।।
8345. विश्वस्य राजा पवते स्वः-दृशः
ऋतस्य धीतिम् ऋषिषाट् अवीवशत्।
यः सूर्यस्य असिरेण मृज्यते पिता
मतीनाम् असमष्ट-काव्यः।।4।।
8346. वृषा-इव यूथा परि कोशम् अर्षसि
अपाम् उप-स्थे वृषभः कनिक्रदत्।
सः इन्द्राय पवसे मत्सरिन्-तमः यथा
जेषाम् सम्-इथे त्वा-ऊतयः।।5।।

## सूक्त-77

8347. एषः प्र कोशे मधु-मान् अचिक्रदत्
इन्द्रस्य वज्रः वपुषः वपुः-तरः।
अभि ईम् ऋतस्य सु-दुघाः घृत-श्चुतः
वाश्राः अर्षन्ति पयसा-इव धेनवः।।1।।
8348. सः पूर्व्यः पवते यम् दिवः परि
श्येनः मथायत् इषितः तिरः रजः।
सः मध्वः आ युवते वेविजानः इत्
कृशानोः अस्तुः मनसा अह बिभ्युषा।।2।।
8349. ते नः पूर्वासः उपरासः इन्दवः
महे वाजाय धन्वन्तु गो-मते।
ईक्षेण्यासः अह्यः न चारवः
ब्रह्म-ब्रह्म ये जुजुषुः हविः-हविः।।3।।
8350. अयम् नः विद्वान् वनवत् वनुष्यतः
इन्दुः सत्राचा मनसा पुरु-स्तुतः।
इनस्य यः सदने गर्भम् आ-दधे
गवाम् उरुब्जम् अभि अर्षति व्रजम्।।4।।
8351. चक्रिः दिवः पवते कृत्व्यः रसः
महान् अदब्धः वरुणः हरुक् यते।
असावि मित्रः वृजनेषु यज्ञियः
अत्यः न यूथे वृषयुः कनिक्रदत्।।5।।

## सूक्त-78

8352. प्र राजा वाचम् जनयन् असिस्यदत्
अपः वसानः अभि गाः इयक्षति।
गृभ्णाति रिप्रम् अविः अस्य तान्वा
शुद्धः देवानाम् उप याति निः-कृतम्।।1।।
8353. इन्द्राय सोम परि सिच्यसे नृ-भिः
नृ-चक्षाः ऊर्मिः कविः अज्यसे वने।
पूर्वीः हि ते स्रुतयः सन्ति यातवे
सहस्रम् अश्वाः हरयः चमू-सदः।।2।।
8354. समुद्रियाः अप्सरसः मनीषिणम्
आसीनाः अन्तः अभि सोमम् अक्षरन्।
ताः ईम् हिन्वन्ति हर्म्यस्य सक्षणिम्
याचन्ते सुम्नम् पवमानम् अक्षितम्।।3।।
8355. गो-जित् नः सोमः रथ-जित् हिरण्य-जित्
स्वः-जित् अप्-जित् पवते सहस्र-जित्।
यम् देवासः चक्रिरे पीतये मदम्
स्वादिष्ठम् द्रप्सम् अरुणम् मयः-भुवम्।।4।।
8356. एतानि सोम पवमानः अस्म-युः
सत्यानि कृण्वन् द्रविणानि अर्षसि।
जहि शत्रुम् अन्तिके दूरके च यः
उर्वीम् गव्यूतिम् अभयम् च नः कृधि।।5।।

## सूक्त-79

8357. अचोदसः नः धन्वन्तु इन्दवः
प्र सुवानासः बृहत्-दिवेषु हरयः।
वि च नशन् नः इषः अरातयः
अर्यः नशन्त सनिषन्त नः धियः।।1।।
8358. प्र नः धन्वन्तु इन्दवः मद-च्युतः
धना व येभिः अर्वतः जुनीमसि।
तिरः मर्तस्य कस्य चित् परि-ह्वृतिम्
वयम् धनानि विश्वधा भरेमहि।।2।।
8359. उत् स्वस्याः अरात्याः अरिः हि स-
उत अन्यस्याः अरात्याः वृकः हि सः।
धन्वन् न तृष्णा सम् अरीत तान् अभि
सोम जहि पवमान दुः-आध्यः।।3।।

8360. दिवि ते नाभा परमः यः आ-ददे
पृथिव्याः ते रुरुहुः सानवि क्षिपः।
अद्रयः त्वा बप्सति गोः अधि त्वचि
अप्सु त्वा हस्तैः दुदुहुः मनीषिणः।।4।।
8361. एव ते इन्दो सु-भ्वम् सु-पेशसम्
रसम् तुञ्जन्ति प्रथमाः अभि-श्रियः।
निदम्-निदम् पवमान नि तारिषः
आविः ते शुष्मः भवतु प्रियः मदः।।5।।

## सूक्त-80

8362. सोमस्य धारा पवते नृ-चक्षसः
ऋतेन देवान् हवते दिवः परि।
बृहस्पतेः रवथेन वि दिद्युते
समुद्रासः न सवनानि विव्यचुः।।1।।
8363. यम् त्वा वाजिन् अघ्न्याः अभि अभूषत
अयः-हतम् योनिम् आ रोहसि द्यु-मान्।
मघोनाम् आयुः प्र-तिरम् महि श्रवः
इन्द्राय सोम पवसे वृषा मदः।।2।।
8364. आ इन्द्रस्य कुक्षा पवते मदिन्-तमः
ऊर्जम् वसानः श्रवसे सु-मङ्गलः।
प्रत्यङ् सः विश्वा भुवना अभि प्रपथे
क्रीडन् हरिः अत्यः स्यन्दते वृषा।।3।।
8365. तम् त्वा देवेभ्यः मधुमत्-तमम्
नरः सहस्र-धारम् दुहते दश क्षिपः।
नृ-भिः सोम प्रच्युतः ग्रावभिः सुतः
विश्वान् देवान् आ पवस्व सहस्र-जित्।।4।।
8366. तम् त्वा हस्तिनः मधु-मन्तम्
अद्रिभिः दुहन्ति अप्सु वृषभम् दश क्षिपः।
इन्द्रम् सोम मादयन् दैव्यम् जनम्
सिन्धोः-इव ऊर्मिः पवमानः अर्षसि।।5।।

## सूक्त-81

8367. प्र सोमस्य पवमानस्य ऊर्मयः
इन्द्रस्य यन्ति जठरम् सु-पेशसः।
दध्ना यत् ईम् उत्-नीताः यशसा गवाम्
दानाय शूरम् उत्-अमन्दिषुः सुताः।।1।।
8368. अच्छ हि सोमः कलशान् असिस्यदत्
अत्यः न वोड रघु-वर्तनिः वृषा।
अथा देवानाम् उभयस्य जन्मनः विद्वान्
अश्नोति अमुतः इतः च यत्।।2।।
8369. आ नः सोम पवमानः किर
वसु इन्दो भव मघवा राधसः महः।
शिक्ष वयः-धाः वसवे सु चेतुना मा
नः गयम् आरे अस्मत् परा सिचः।।3।।
8370. आ नः पूषा पवमानः सु-रातयः
मित्रः गच्छन्तु वरुणः स-जोषसः।
बृहस्पतिः मरुतः वायुः अश्विना
त्वष्टा सविता सु-यमा सरस्वती।।4।।
8371. उभे द्यावापृथिवी विश्वमिन्वे
अर्यमा देवः अदितिः विधाता।
भगः नृशंसः उरु अन्तरिक्षम्
विश्वे देवाः पवमानम् जुषन्त।।5।।

## सूक्त-82

8372. असावि सोमः अरुषः वृषा हरिः
राजा-इव दस्मः अभि गाः अचिक्रदत्।
पुनानः वारम् परि एति अव्ययम् श्येनः
न योनिम् घृत-वन्तम् आ-सदम्।।1।।
8373. कविः वेधस्या परि एषि माहिनम्
अत्यः न मृष्टः अभि वाजम् अर्षसि।
अप-सेधन् दुःइता सोम मृडय घृतम्
वसानः परि यासि निः-निजम्।।2।।
8374. पर्जन्यः पिता महिषस्य पर्णिनः
नाभा पृथिव्याः गिरिषु क्षयम् दधे।
स्वसारः आपः अभि गाः उत असरन्
सम् ग्रावभिः नसते वीते अध्वरे।।3।।
8375. जाया-इव पत्यौ अधि शेव
मंहसे पज्राायाः गर्भ शृणुहि ब्रवीमि ते।
अन्तः वाणीषु प्र चर सु जीवसे
अनिन्द्यः वृजने सोम जागृहि।।4।।
8376. यथा पूर्वेभ्यः शत-साः अमृध्रः
सहस्रसाः परि-अयाः वाजम् इन्दो।
एव पवस्व सुविताय नव्यसे
तव व्रतम् अनु आपः सचन्ते।।5।।

## सूक्त-83

8377. पवित्रम् ते विततम् ब्रह्मणः
पते प्रभुः गात्राणि परि एषि विश्वतः।
अतप्त-तनूः न तत् आमः अश्नुते
शृतासः इत् वहन्तः तत् सम् आशत।।1।।
8378. तपोः पवित्रम् विततम् दिवः पदे
शोचन्तः अस्य तन्तवः वि अस्थिरन्।
अवन्ति अस्य पवितारम् आशवः दिवः
पृष्ठम् अधि तिष्ठन्ति चेतसा।।2।।
8379. अरूरुचत् उषसः पृश्निः अग्रियः
उक्षा बिभर्ति भुवनानि वाजयुः।
माया-विनः ममिरे अस्य मायया
नृ-चक्षसः पितरः गर्भम् आ दधुः।।3।।

8380. गन्धर्वः इत्था पदम् अस्य रक्षति
पाति देवानाम् जनिमानि अद्भुतः।
गृभ्णाति रिपुम् निधया निधा-पतिः
सुकृत्-तमाः मधुनः भक्षम् आशत।।4।।
8381. हविः हविष्मः महि सद्म दैव्यम्
नभः वसानः परि यासि अध्वरम्।
राजा पवित्र-रथः वाजम् आ अरुहः
सहस्र-भृष्टिः जयसि श्रवः बृहत्।।5।।

## सूक्त-84

8382. पवस्व देव-मादनः वि-चर्षणिः
अप्साः इन्द्राय वरुणाय वायवे।
कृधि नः अद्य वरिवः स्वस्ति-मत्
उरुक्षिती गृणीहि दैव्यम् जनम्।।1।।
8383. आ यः तस्थौ भुवनानि अमर्त्यः
विश्वानि सोमः परि तानि अर्षति।
कृण्वन् सम्-चृतम् वि-चृतम् अभिष्टये
इन्दुः सिसक्ति उषसम् न सूर्यः।।2।।
8384. आ यः गोभिः सृज्यते ओषधीषु
आ देवानाम् सुम्ने इषयन् उप-वसुः।
आ वि-द्युता पवते धारया सुतः
इन्द्रम् सोमः मादयन् दैव्यम् जनम्।।3।।
8385. एषः स्यः सोमः पवते सहस्र-जित्
हिन्वानः वाचम् इषिराम् उषः-बुधम्।
इन्दुः समुद्रम् उत् इयर्ति वायु-भिः
आ इन्द्रस्य हार्दि कलशेषु सीदति।।4।।
8386. अभि त्यम् गावः पयसा पयः-वृधम्
सोमम् श्रीणन्ति मति-भिः स्वः-विदम्।
धनम्-जयः पवते कृत्व्यः रसः विप्रः
कविः काव्येन स्वः-चनाः।।5।।

## सूक्त-85

8387. इन्द्राय सोम सु-सुतः परि स्रव
अप अमीवा भवतु रक्षसा सह।
मा ते रसस्य मत्सत द्वयाविनः
द्रविणस्वन्तः इह सन्तु इन्दवः।।1।।
8388. अस्मान् स-मर्ये पवमान चोदय
दक्षः देवानाम् असि हि प्रियः मदः।
जहि शत्रून् अभि आ भन्दना-यतः
पिब इन्द्र सोमम् अव नः मृधः जहि।।2।।
8389. अदब्धः इन्दो पवसे मदिन्-तमः
आत्मा इन्द्रस्य भवसि धासिः।
उत्-तमः अभि स्वरन्ति बहवः मनीषिणः
राजानम् अस्य भुवनस्य निंसते।।3।।
8390. सहस्र-नीथः शत-धारः अद्भुतः
इन्द्राय इन्दुः पवते काम्यम् मधु।
जयत् क्षेत्रम् अभि अर्ष जयन् अपः उरुम्
नः गातुम् कृणु सोम मीढ्वः।।4।।
8391. कनिक्रदत् कलशे गोभिः अज्यसे
वि अव्ययम् समया वारम् अर्षसि।
मर्मृज्यमानः अत्यः न सानसिः इन्द्रस्य
सोम जठरे सम् अक्षरः।।5।।
8392. स्वादुः पवस्व दिव्याय जन्मने
स्वादुः इन्द्राय सुहवीतु-नाम्ने।
स्वादुः मित्राय वरुणाय वायवे
बृहस्पतये मधुमान् अदाभ्यः।।6।।
8393. अत्यम् मृजन्ति कलशे दश क्षिपः
प्र विप्राणाम् मतयः वाचः ईरते।
पवमानाः अभि अर्षन्ति सु-स्तुतिम् आ
इन्द्रम् विशन्ति मदिरासः इन्दवः।।7।।
8394. पवमानः अभि अर्ष सु-वीर्यम्
उर्वीम् गव्यूतिम् महि शर्म स-प्रथः।
माकिः नः अस्य परि-सूतिः ईशत
इन्दो जयेम त्वया धनम्-धनम्।।8।।
8395. अधि द्याम् अस्थात् वृषभः वि-चक्षणः
अरूरुचत् वि दिवः रोचना कविः।
राजा पवित्रम् अति एति रोरुवत्
दिवः पीयूषम् दुहते नृचक्षसः।।9।।
8396. दिवः नाके मधु-जिह्वाः असश्चतः
वेनाः दुहन्ति उक्षणम् गिरि-स्थाम्।
अप्सु द्रप्सम् ववृधानम् समुद्रे आ सिन्धोः
ऊर्मा मधु-मन्तम् पवित्रे आ।।10।।
8397. नाके सुपर्णम् उपपप्ति-वांसम्
गिरः वेनानाम् अकृपन्त पूर्वीः।
शिशुम् रिहन्ति मतयः पनिप्नतम्
हिरण्ययम् शकुनम् क्षामणि स्थाम्।।11।।
8398. ऊर्ध्वः गन्धर्वः अधि नाके अस्थात्
विश्वा रूपा प्रति-चक्षाणः अस्य।
भानुः शुक्रेण शोचिषा वि अद्यौत् प्र
अरूरुचत् रोदसी मातरा शुचिः।।12।।

## सूक्त-86

8399. प्र ते आशवः पवमान धी-जवः
मदाः अर्षन्ति रघुजाः-इव त्मना।
दिव्याः सुपर्णाः मधु-मन्तः इन्दवः
मदिन्-तमासः परि कोशम् आसते।।1।।
8400. प्र ते मदासः मदिरासः आशवः

असृक्षत रथ्यासः यथा पृथक्।
धेनुः न वत्सम् पयसा अभि वज्रिणम्
इन्द्रम् इन्दवः मधु-मन्तः ऊर्मयः।।2।।
8401. अत्यः न हियानः अभि वाजम् अर्ष
स्वः-वित् कोशम् दिवः अद्रि-मातरम्।
वृषा पवित्रे अधि सानौ अव्यये
सोमः पुनानः इन्द्रिय धायसे।।3।।
8402. प्र ते आश्विनीः पवमान धी-जुवः
दिव्याः असृग्रन् पयसा धरीमणि।
प्र अन्तः ऋषयः स्थाविरीः असृक्षत्
ये त्वा मृजन्ति ऋषि-सान वेधसः।।4।।
8403. विश्वा धामानि विश्व-चक्षः
ऋभ्वसः प्रभोः ते सतः परि यन्ति केतवः।
वि-आनशिः पवसे सोम धर्मभिः पतिः
विश्वस्य भुवनस्य राजसि।।5।।
8404. उभयतः पवमानस्य रश्मयः
ध्रुवस्य सतः परि यन्ति केतवः।
यदि पवित्रे अधि मृज्यते हरिः सत्ता
नि योजना कलशेषु सीदति।।6।।
8405. यज्ञस्य केतुः पवते सु-अध्वरः
सोमः देवानाम् उप याति निःकृतम्।
सहस्र-धारः परि कोशम् अर्षति
वृषा पवित्रम् अति एति रोरुवत्।।7।।
8406. राजा समुद्रम् नद्यः वि गाहते
अपाम् ऊर्मिम् सचते सिन्धुषु श्रितः।
अधि अस्थात् सानु पवमानः अव्ययम्
नाभा पृथिव्याः धरुणः महः दिवः।।8।।
8407. दिवः न सानु स्तनयन् अचिक्रदत्
द्यौः च यस्य पृथिवी च धर्मभिः।
इन्द्रस्य सख्यम् पवते वि-वेविदत्
सोमः पुनानः कलशेषु सीदति।।9।।
8408. ज्योतिः यज्ञस्य पवते मधु
प्रियम् पिता देवानाम् जनिता विभु-वसुः।
दधाति रत्नम् स्वधयोः अपीच्यम्
मदिन्-तमः मत्सरः इन्द्रियः रसः।।10।।
8409. अभिक्रन्दन् कलशम् वाजी अर्षति
पतिः दिवः शतधारः विचक्षणः।
हरि मित्रस्य सदनेषु सीदति
मर्मृजानः अविभिः सिन्धुभिः वृषा।।11।।
8410. अग्रे सिन्धूनाम् पवमानः अर्षति
अग्रे वाचः अग्रियः गोषु गच्छति।
अग्रे वाजस्य भजते महा-धनम्
सु-आयुधः सोतृभिः पूयते वृषा।।12।।
8411. अयम् मत-वान् शकुनः यथा
हितः अव्ये ससार पवमानः ऊर्मिणा।
तव क्रत्वा रोदसी अन्तरा कवे शुचिः
धिया पवते सोमः इन्द्र ते।।13।।
8412. द्रापिम् वसानः यजतः दिवि-स्पृशम्
अन्तरिक्ष-प्राः भुवनेषु अर्पितः।
स्वः जज्ञानः नभसा अभि अक्रमीत्
प्रत्नम् अस्य पितरम् आ विवासति।।14।।
8413. सः अस्य विशे महि शर्म यच्छति
यः अस्य धाम प्रथमम् वि-आनशे।
पदम् यत् अस्य परमे वि-अमनि अतः
विश्वाः अभि सम् याति सम्-यतः।।15।।
8414. प्रो अयासीत् इन्दुः इन्द्रस्य निः-कृतम्
सखा सख्युः न प्र मिनाति सम्-गिरम्।
मर्यः-इव युवतिभिः सम् अर्षति
सोमः कलशे शत-याम्ना पथा।।16।।
8415. प्र वः धियः मन्द्र-युवः विपन्युवः
पनस्युवः सम्-वसनेषु अक्रमुः।
सोमम् मनीषाः अभि अनूषत स्तुभः
अभि धेनवः पयसा ईम् अशिश्रयुः।।17।।
8416. आ नः सोम सम्-यतम् पिप्युषीम्
इषम् इन्दो पवस्व पवमानः अस्रिधम्।
या नः दोहते त्रिः अहन् असश्चुषी
क्षुमत् वाज-वत् मधु-मत् सुवीर्यम्।।18।।
8417. वृषा मतीनाम् पवते वि-चक्षणः
सोमः अह्नः प्र-तरीता उषसः दिवः।
क्राणा सिन्धूनाम् कलशान् अवीवशत्
इन्द्रस्य हार्दि आ-विशन् मनीषिभिः।।19।।
8418. मनीषि-भिः पवते पूर्व्यः कविः
नृ-भिः यतः परि कोशान् अचिक्रदत्।
त्रितस्य नाम जनयन् मधु क्षरत्
इन्द्रस्य वायोः सख्याय कर्तवे।।20।।
8419. अयम् पुनानः उषसः वि रोचयत्
अयम् सिन्धुभ्यः अभवत् ऊँ लोक-कृत्।
अयम् त्रिः सप्त दुदुहानः आ-शिरम्
सोमः हृदे पवते चारु मत्सरः।।21।।
8420. पवस्व सोम दिव्येषु धाम-सु
सृजानः इन्दो कलशे पवित्रे आ।
सीदन् इन्द्रस्य जठरे कनिक्रदत्
नृभिः यतः सूर्यम् आ अरोहयः दिवि।।22।।
8421. अद्रिभिः सुतः पवसे पवित्रे आ
इन्दो इन्द्रस्य जठरेषु आ-विशन्।
त्वम् नृचक्षाः अभवः वि-चक्षण सोम

गोत्रम् अङ्गिरः-भ्यः अवृणोः अप।।23।।
8422. त्वाम् सोम पवमानम् सु-आध्यः
अनु विप्रासः अमदन् अवस्यवः।
त्वाम् सुपर्णः आ अभरत् दिवः परि इन्दो
विश्वाभिः मति-भिः परि-कृतम्।।24।।
8423. अव्ये पुनानम् परि वारे ऊर्मिणा
हरिम् नवन्ते अभि सप्त धेनवः।
अपाम् उपस्थे अधि आयवः कविम्
ऋतस्य योना महिषाः अहेषत।।25।।
8424. इन्दुः पुनानः अति गाहते मृधः
विश्वानि कृण्वन् सुपथानि यज्यवे।
गाः कृण्वानः निः-निजम् हर्यतः कविः
अत्यः न क्रीडन् परि वारम् अर्षति।।26।।
8425. असश्चतः शतधाराः अभि-श्रियः
हरिम् नवन्ते अव ताः उदन्युवः।
क्षिपः मृजन्ति परि गोभिः आ-वृतम्
तृतीये पृष्ठे अधि रोचने दिवः।।27।।
8426. तव इमाः प्र-जाः दिव्यस्य
रेतसः त्वम् विश्वस्य भुवनस्य राजसि।
अथ इदम् विश्वम् पवमान ते वशे त्वम्
इन्दो प्रथमः धाम-धाः असि।।28।।
8427. त्वम् समुद्रः असि विश्ववित् कवे
तव इमाः पञ्च प्र-दिशः वि-धर्मणि।
त्वम् द्याम् च पृथिवीम् च अति जभ्रिषे
तव ज्योतींषि पवमान सूर्यः।।29।।
8428. त्वम् पवित्रे रजसः वि-धर्मणि
देवेभ्यः सोम पवमान पूयसे।
त्वाम् उशिजः प्रथमाः अगृभ्णत तुभ्य
इमा विश्वा भुवनानि येमिरे।।30।।
8429. प्र रेभः एति अति वारम् अव्ययम्
वृषा वनेषु अव चक्रदत् हरिः।
सम् धीतयः वावशानाः अनूषत।
शिशुम् रिहन्ति मतयः पनिप्नतम्।।
8430. सः सूर्यस्य रश्मिभिः परि व्यत
तन्तुम् तन्वानः त्रि-वृतम् यथा विदे।
नयन् ऋतस्य प्र-शिषः नवीयसीः पतिः
जनीनाम् उप याति नृः-कृतम्।।32।।
8431. राजा सिन्धूनाम् पवते पतिः दिवः
ऋतस्य याति पथिभिः कनिक्रदत्।
सहस्रधारः परि सिच्यते हरिः पुनानः
वाचम् जनयन् उप-वसुः।।33।।
8432. पवमान महि अर्णः वि धावसि
सूरः न चित्रः अव्ययानि पव्यया।
गभस्ति-पूतः नृभिः अद्रिभिः सुतः
महे वाजाय धन्याय धन्वसि।।34।।
8433. इषम् ऊर्जम् पवमान अभि अर्षसि
श्येनः न वंसु कलशेषु सीदसि।
इन्द्राय मद्वा मद्यः मदः सुतः दिवः
विष्टम्भः उपमः विचक्षणः।।35।।
8434. सप्त स्वसारः अभि मातरः शिशुम्
नवम् जज्ञानम् जेन्यम् विपः-चितम्।
अपाम् गन्धर्वम् दिव्यम् नृचक्षसम्
सोमम् विश्वस्य भुवनस्य राजसे।।36।।
8435. ईशानः इमा भुवनानि वि
ईयसे युजानः इन्दो हरितः सु-पर्ण्यः।
ताः ते क्षरन्तु मधु-मत् घृतम् पयः
तव व्रते सोम तिष्ठन्तु कृष्टयः।।37।।
8436. त्वम् नृ-चक्षाः असि सोम विश्वतः
पवमान वृषभ ता वि धावसि।
सः नः पवस्व वसु-मत् हिरण्य-वत्
वयम् स्याम् भुवनेषु जीवसे।।38।।
8437. गो-वित् पवस्व वसु-वित् हिरण्य-वित्
रेतः-धाः इन्दो भुवनेषु अर्पितः।
त्वम् सु-वीरः असि सोम विश्व-वित्
तम् त्वा विप्राः उप गिरा इमे आसते।।39।।
8438. उत् मध्वः ऊर्मिः वननाः अतिस्थिपत्
अपः वसानः महिषः वि गाहते।
राजा पवित्र-रथः वाजम् आ अरुहत्
सहस्र-भृष्टिः जयति श्रवः बृहत्।।40।।
8439. सः भन्दनाः उत् इयर्ति प्रजा-वतीः
विश्व-आयुः विश्वाः सुभराः अहः-दिवि।
ब्रह्म प्रजा-वत् रयिम् अश्व-पस्त्यम्
पीतः इन्दो इन्द्रम् अस्मभ्यम् याचतात्।।41।।
8440. सः अग्रे अह्नाम् हरिः हर्यतः
मदः प्र चेतसा चेतयते अनु द्युभिः।
द्वा जना यातयन् अन्तः ईयते
नराशंसम् च दैव्यम् च धर्तरि।।42।।
8441. अञ्जते वि अञ्जते सम् अञ्जते
क्रतुम् रिहन्ति मधुना अभि अञ्जते।
सिन्धोः उत्-श्वासे पतयन्तम् उक्षणम्
हिरण्य-पावाः पशुम् आसु गृभ्णते।।43।।
8442. विपः-चिते पवमानाय गायत
मही न धारा अति अन्धः अर्षति।
अहिः न जूर्णाम् अति सर्पति त्वचम्
अत्यः न क्रीडन् असरत् वृषा हरिः।।44।।
8443. अग्रेगः राजा अप्यः तविष्यते

वि-मानः अह्नाम् भुवनेषु अर्पितः।
हरिः घृत-स्नुः सु-दृशीकः अर्णवः
ज्योतिः-रथः पवते राये ओक्यः।।45।।
8444. असर्जि स्कम्भः दिवः उत्-यतः
मदः परि त्रि-धातुः भुवनानि अर्षति।
अंशुम् रिहन्ति मतयः पनिमतम् गिरा
यदि निः-निजम् ऋग्मिणः ययुः।।46।।
8445. प्र ते धाराः अति अण्वानि मेष्यः
पुनानस्य सम्-यतः यन्ति रंहयः।
यत् गोभिः इन्दो चम्वोः सम्-अज्यसे
आ सुवानः सोम कलशेषु सीदसि।।47।।
8446. पवस्व सोम क्रतु-वित् नः उक्थ्यः
अव्यः वारे परि धाव मधु प्रियम्।
जहि विश्वान् रक्षसः इन्दो अत्रिणः
बृहत् वदेम विदथे सुवीराः।।48।।

## सूक्त-87

8447. प्र तु द्रव परि कोशम् नि सीद
नृ-भिः पुनानः अभि वाजम् अर्ष।
अश्वम् न त्वा वाजिनम् मर्जयन्तः
अच्छ बर्हिः रशनाभिः नयन्ति।।1।।
8448. सु-आयुधः पवते देवः इन्दुः
अशस्ति-हा वृजनम् रक्षमाणः।
पिता देवानाम् जनिता सु-दक्षाः
विष्टम्भः दिवः धरुणः पृथिव्याः।।2।।
8449. ऋषिः विप्रः पुरः एता जनानाम्
ऋभुः धीरः उशना काव्येन।
सः चित् विवेद नि-हितम् यत् आसाम्
अपीच्यम् गुह्यम् नाम गोनाम्।।3।।
8450. एषः स्यः ते मधु-मान् इन्द्र
सोमः वृषा वृष्णे परि पवित्रे अक्षाः।
सहस्र-साः शतसाः भूरि-दावा शश्वत्-
तमम् बर्हिः आ वाजी अस्थात्।।4।।
8451. एते सोमाः अभि गव्या सहस्रा
महे वाजाय अमृताय श्रवांसि।
पवित्रेभिः पवमानाः असृग्रन्
श्रवस्यवः न पृतनाजः अत्याः।।5।।
8452. परि हि स्म पुरु-हूतः जनानाम्
विश्वा असरत् भोजना पूयमानः।
अथ आ भर श्येन-भृत प्रियांसि
रयिम् तुञ्जानः अभि वाजम् अर्ष।।6।।
8453. एषः सुवानः परि सोमः पवित्रे
सर्गः न सृष्टः अदधावत् अर्वा।
तिग्मे शिशानः महिषः न शृङ्गे गाः
गव्यन् अभि शूरः न सत्वा।।7।।
8454. एषा आ ययौ परमात् अन्तः
अद्रेः कूचित् सतीः ऊर्वे गाः विवेद।
दिवः न विद्युत् स्तनयन्ती अभ्रैः
सोमस्य ते पवते इन्द्र धारा।।8।।
8455. उत स्म राशिम् परि यासि
गोनाम् इन्द्रेण सोम स-रथम् पुनानः।
पूर्वीः इषः बृहतीः जीरदानो शिक्ष
शची-वः तव ताः उप-स्तुत्।।9।।

## सूक्त-88

8456. अयम् सोमः इन्द्र तुभ्यम् सुन्वे
तुभ्यम् पवते त्वम् अस्य पाहि।
त्वम् ह यम् चकृषे त्वम् ववृषे
इन्दुम् मदाय युज्याय सोमम्।।1।।
8457. सः ईम् रथः न भुरिषाट्
अयोजि महः पुरूणि सातये वसूनि।
आत् ईम् विश्वा नहुष्याणि जाता
स्वःसाता वने ऊर्ध्वा नवन्त।।2।।
8458. वायुः न यः नियुत्वान् इष्टयामा
नासत्या इव हवे आ शम्-भविष्ठः।
विश्ववारः द्रविणोदाः-इव त्मन्
पूषा-इव धी-जवनः असि सोम।।3।।
8459. इन्द्रः न यः महा कर्माणि चक्रिः
हन्ता वृत्राणाम् असि सोम पूः-भित्।
पैद्वः न हि त्वम् अहि-नाम्नाम् हन्ता
विश्वस्य असिसोम दस्योः।।4।।
8460. अग्निः न यः वने आ सृज्यमानः
वृथा पाजांसि कृणुते नदीषु।
जनः न युध्वा महतः उपब्दिः
इयर्ति सोमः पवमानः ऊर्मिम्।।5।।
8461. एतो सोमाः अति वाराणि अव्या
दिव्याः न कोशासः अभ्र-वर्षाः।
वृथा समुद्रम् सिन्धवः न नीचीः
सुतासः अभि कलशान् असृग्रन्।।6।।
8462. शुष्मी शर्धः न मारुतम्
पवस्व अनभि-शस्ता दिव्या यथा विट्।
आपः न मक्षु सु-मतिः भव नः
सहस्र-अप्साः पृतनाषाट् न यज्ञः।।7।।
8463. राज्ञः नु ते वरुणस्य व्रतानि
बृहत् गभीरम् तव सोम धाम।
शुचिः त्वम् असि प्रियः न मित्रः

दक्षाय्यः अर्यमा-इव असि सोम।।8।।

## सूक्त-89

8464. प्रो स्यः वह्निः पथ्याभिः
अस्यान् दिवः न वृष्टिः पवमानः अक्षाः।
सहस्र-धारः असदत् नि अस्मे
मातुः उपस्थे वने आ च सोमः।।1।।
8465. राजा सिन्धूनाम् अवसिष्ट वासः
ऋतस्य नावम् आ अरुहत् रजिष्ठाम्।
अप्सु द्रप्सः ववृधे श्येन-जूतः दुहे
ईम् पिता दुहे ईम् पितुः जाम्।।2।।
8466. सिंहम् नसन्त मध्वः अयासम्
हरिम् अरुषम् दिवः अस्य पतिम्।
शूरः युत्-सु प्रथमः पृच्छते गाः
अस्य चक्षसा परि पाति उक्षा।।3।।
8467. मधु-पृष्ठम् घोरम् अयासम्
अश्वम् रथे युञ्जन्ति उरु-चक्रे ऋष्वम्।
स्वसारः ईम् जामयः मर्जयन्ति
स-नाभयः वाजिनम् ऊर्जयन्ति।।4।।
8468. चतस्रः ईम् घृत-दुहः सचन्ते
समाने अन्तः धरुणे नि-सत्ताः।
ताः ईम् अर्षन्ति नमसा पुनानाः
ताः ईम् विश्वतः परि सन्ति पूर्वीः।।5।।
8469. विष्टम्भः दिवः धरुणः पृथिव्याः
विश्वा उत क्षितयः हस्ते अस्य।
असत् ते उत्सः गृणते नियुत्वान्
मध्वः अंशुः पवते इन्द्रियाय।।6।।
8470. वन्वन् अवातः अभि देव-वीतिम्
इन्द्राय सोम वृत्रहा पवस्व।
शग्धि महः पुरु-चन्द्रस्य रायः
सु-वीर्यस्य पतयः स्याम।।7।।

## सूक्त-90

8471. प्र हिन्वानः जनिता रोदस्योः
रथः न वाजम् सनिष्यन् अयासीत्।
इन्द्रम् गच्छन् आयुधा सम्-शिशानः
विश्वा वसु हस्तयोः आ-दधानः।।1।।
8472. अभि त्रि-पृष्ठम् वृषणम् वयः-
धाम् आङ्गूषाणाम् अवावशन्त वाणीः।
वना वसानः वरुणः न सिन्धून्
वि रत्नधाः दयते वार्याणि।।2।।
8473. शूर-ग्रामः सर्व-वीरः सहा-वान्
जेता पवस्व सनिता धनानि।
तिग्म-आयुधः क्षिप्र-धन्वा समत्-सु
अषाड सहवान् पृतनासु शत्रून्।।3।।
8474. उरु-गव्यूतिः अभयानि कृण्वन्
समीचीने आ पवस्व पुरन्धी।
अपः सिसासन् उषसः स्वः गाः सम्
चिक्रदः महः अस्मभ्यम् वाजान्।।4।।
8475. मत्सि सोम वरुणम् मत्सि
मित्रम् मत्सि इन्द्रम् इन्दो पवमान विष्णुम्।
मत्सि शर्धः मारुतम् मत्सि देवान्
मत्सि महाम् इन्द्रम् इन्दो मदाय।।5।।
8476. एव राजा-इव क्रतुमान् अमेन
विश्वा घनिघ्नत् दुः-इता पवस्व।
इन्दो सु-उक्ताय वचसे वयः धाः
यूयम् पात स्वस्तिभिः सदा नः।।6।।

## सूक्त-91

8477. असर्जि वक्वा रथ्ये यथा
आजौ धिया मनोता प्रथमः मनीषी।
दश स्वसारः अधि सानौ अव्ये
अजन्ति वह्निम् सदनानि अच्छ।।1।।
8478. वीती जनस्य दिव्यस्य कव्यैः
अधि सुवानः नहुष्येभिः इन्दुः।
प्र य नृभिः अमृतः मर्त्येभिः
मर्मृजानः अविभिः गोभिः अत्-भिः।।2।।
8479. वृषा वृष्णे रोरुवत् अंशुः अस्मै
पवमानः रुशत् ईर्ते पयः गोः।
सहस्रम् ऋक्वा पथिभिः वचःवित्
अध्वस्म-भिः सूरः अण्वम् वि याति।।3।।
8480. रुज दृड चित् रक्षसः सदांसि
पुनानः इन्दो ऊर्णुहि वि वाजान्।
वृश्च उपरिष्टात् तुजता वधेन ये
अन्ति दूरात् उप-नायम् एषाम्।।4।।
8481. सः प्रत्नवत् नव्यसे विश्ववार
सु-उक्ताय पथः कृणुहि प्राचः।
ये दुःसहासः वनुषा बृहन्तः तान्
ते अश्याम् पुरुकृत् पुरुक्षो।।5।।
8482. एव पुनानः अपः स्वः गाः
अस्मभ्यम् तोका तनयानि भूरि।
शम् नः क्षेत्रम् उरु ज्योतींषि सोम
ज्योक् नः सूर्यम् दृशये रिरीहि।।6।।

## सूक्त-92

8483. परि सुवानः हरिः अंशुः पवित्रे
रथः न सर्जि सनये हियानः।

आपत् श्लोकम् इन्द्रियम् पूयमानः
प्रति देवान् अजुषत प्रयः-भिः।।1।।
8484. अच्छ नृ-चक्षाः असरत् पवित्रे
नाम दधानः कविः अस्य योनौ।
सीदन् होता-इव सदने चमूषु उप
ईम् अग्मन् ऋषयः सप्त विप्राः।।2।।
8485. प्र सुमेधाः गातु-वित् विश्व-देवः
सोमः पुनानः सदः एति नित्यम्।
भुवत् विश्वेषु काव्येषु रन्ता
अनु जनान् यतते पञ्च धीरः।।3।।
8486. तव त्ये सोम पवमान निण्ये
विश्वे देवाः त्रयः एकादशासः।
दश स्वधाभिः अधि सानौ अव्ये
मृजन्ति त्वा नद्यः सप्त यह्वीः।।4।।
8487. तत् नु सत्यम् पवमानस्य
अस्तु यत्र विश्वे कारवः सम्-नसन्त।
ज्योतिः अत् अह्ने अकृणोत् ऊँ लोकम्
प्र आवत् मनुम् दस्यवे कः अभीकम्।।5।।
8488. परि सद्म-इव पशु-मन्ति होता
राजा न सत्यः सम्-इतीः इयानः।
सोमः पुनानः कलाशन् अयासीत्
सीदत् मृगः न महिषः वनेषु।।6।।

## सूक्त-93

8489. साकम्-उक्षः मर्जयन्त स्वसारः
दश धीरस्य धीतयः धनुत्रीः।
हरिः परि अद्रवत् जाः सूर्यस्य
द्रोणम् ननक्षे अत्यः न वाजी।।1।।
8490. सम् मातृभिः न शिशुः वावशानः
वृषा दधन्वे पुरुवारः अत्-भिः।
मर्यः न योषाम् अभि निः-कृतम्
यत् सम् गच्छते कलशे उस्रियाभिः।।2।।
8491. उत् प्र पिप्ये ऊधः अध्न्यायाः
इन्दुः धाराभिः सचते सुमेधाः।
मूर्धानम् गावः पयसा चमूषु
अभि श्रीणन्ति वसुभिः न निक्तैः।।3।।
8492. सः नः देवेभिः पवमान रद
इन्दो रयिम् अश्विनम् वावशानः।
रथिरायताम् उशती पुरम्-धिः
अस्मद्र्यक् आ दावने वसूनाम्।।4।।
8493. नु नः रयिम् उप मास्व नृ-वन्तम्
पुनानः वाताप्यम् विश्वचन्द्रम्।
प्र वन्दितुः इन्दो तारि आयुः
प्रातः मक्षु धिया-वसुः जगम्यात्।।5।।

## सूक्त-94

8494. अधि यत् अस्मिन् वाजिनी-इव
शुभः स्पर्धन्ते धियः सूर्ये न विशः।
अपः वृणानः पवते कवि-यन्
व्रजम् न पशु-वर्धनाय नम्न।।1।।
8495. द्विता वि-ऊर्ण्वन् अमृतस्य
धाम स्वः-विदे भुवनानि प्रथन्त।
धियः पिन्वानाः स्वसरे न गावः
ऋत-यन्तीः अभि वावश्रे इन्दुम्।।2।।
8496. परि यत् कविः काव्या भरते
शूरः न रथः भुवनानि विश्वा।
देवेषु यशः मर्ताय भूषन् दक्षाय रायः पुरु-भूषु नव्यः।।3।।
8497. श्रिये जातः श्रिये आ निः
इयाय श्रियम् वयः जरितृ-भ्यः दधाति।
श्रियम् वसानाः अमृत-त्वम् आयन्
भवन्ति सत्या सम्-इथा मित-द्रौ।।4।।
8498. इषम् ऊर्जम् अभि अर्ष अश्वम्
गाम् उरु ज्योतिः कृणुहि मत्सि देवान्।
विश्वानि हि सु-सहा तानि तुभ्यम्
पवमान बाधसे सोम शत्रून्।।5।।

## सूक्त-95

8499. कनिक्रन्ति हरिः आ सृज्यमानः
सीदन् वनस्य जठरे पुनानः।
नृ-भिः यतः कृणुते निःनिजम् गाः
अतः मतीः जनयत् स्वधाभिः।।1।।
8500. हरिः सृजानः पथ्याम् ऋतस्य
इयर्ति वाचम् अरिता-इव नावम्।
देवः देवानाम् गुह्यानि नाम
आविः कृणोति बर्हिषि प्र-वाचे।।2।।
8501. अपाम्-इव इत् ऊर्मयः तर्तुराणाः
प्र मनीषाः ईरते सोमम् अच्छ।
नमस्यन्तीः उप च यन्ति सम् च
आ च विशन्ति उशतीः उशन्तम्।।3।।
8502. तम् मर्मृजानम् महिषम् न सानौ
अंशुम् दुहन्ति उक्षणम् गिरि-स्थाम्।
तम् वावशानम् मतयः सचन्ते
त्रितः बिभर्ति वरुणम् समुद्रे।।4।।
8503. इष्यन् वाचम् उप-वक्ता-इव होतुः
पुनानः इन्दो वि स्य मनीषाम्।
इन्द्रः च यत् क्षयथः सौभगाय

सुवीर्यस्य पतयः स्याम।।5।।

## सूक्त-96

8504. प्र सेनानीः शूरः अग्रे रथानाम्
गव्यन् एति हर्षते अस्य सेना।
भद्रान् कृण्वन् इन्द्र-हवान् सखिभ्यः
आ सोमः वस्त्रा रभसानि दत्ते।।1।।
8505. सम् अस्य हरिम् हरयः मृजन्ति
अश्व-हयैः अनिशितम् नमः-भिः।
आ तिष्ठति रथम् इन्द्रस्य सखा
विद्वान् एन सुमतिम् याति अच्छ।।2।।
8506. सः नः देव देव-ताते पवस्व
महे सोम प्सरसे इन्द्र-पानः।
कृण्वन् अपः वर्षयन् द्याम् उत् इमाम्
उरोः आ नः वरिवस्य पुनानः।।3।।
8507. अजीतये अहतये पवस्व स्वस्तये सर्व-तातये बृहते।
तत् उशन्ति विश्वे इमे सखायः
तत् अहम् वश्मि पवमान सोम।।4।।
8508. सोमः पवते जनिता मतीनाम्
जनिता दिवः जनिता पृथिव्याः।
जनिता अग्नेः जनिता सूर्यस्य
जनिता इन्द्रस्य जनिता उत विष्णोः।।5।।
8509. ब्रह्मा देवानाम् पद-वीः कवीनाम्
ऋषिः विप्राणाम् महिषः मृगाणाम्।
श्येनः गृध्राणाम् स्वधितिः वनानाम्
सोमः पवित्रम् अति एति रेभन्।।6।।
8500. प्र अवीविपत् वाचः ऊर्मिम् न सिन्धुः
गिरः सोमः पवमानः मनीषाः।
अन्तः पश्यन् सृजना इमा अवराणि
आ तिष्ठन्ति वृषभः गोषु जानन्।।7।।
8511. सः मत्सरः पृत्-सु वन्वनन्
अवातः सहस्ररेताः अभि वाजम् अर्ष।
इन्द्राय इन्दो पवमानः मनीषी अंशोः
ऊर्मिम् ईरय गाः इषण्यन्।।8।।
8512. परि प्रियः कलशे देववातः
इन्द्राय सोमः रण्यः मदाय।
सहस्रधारः शतवाजः इन्दुः
वाजी न सप्तिः समना जिगाति।।9।।
8513. सः पूर्व्यः वसु-वित् जायमानः
मृजानः उप्-सु दुदुहानः अद्रौ।
अभिशस्तिपाः भुवनस्य राजा
विदत् गातुम् ब्रह्मणे पूयमानः।।10।।
8514. त्वया हि नः पितरः सोम
पूर्वे कर्माणि चक्रुः पवमान धीराः।
वन्वन् अवातः परि-धीन् अप ऊर्णु
वीरेभिः अश्वैः मघवा भव नः।।11।।
8515. यथा अपवथाः मनवे वयः-धाः
अमित्रहा वरिवः-वित् हविष्मान्।
एव पवस्व द्रविणम् दधानः इन्द्रे
सम् तिष्ठ जनय आयुधानि।।12।।
8516. पवस्व सोम मधु-मान् ऋतवा
अपः वसानः अधि सानौ अव्ये।
अव द्रोणिन घृतवन्ति सीद
मदिन्-तमः मत्सरः इन्द्रपानः।।13।।
8517. वृष्टिम् दिवः शत-धारः पवस्व
सहस्र-साः वाजयुः देववीतौ।
सम् सिन्धुभिः कलशे वावशानः
सम् उस्रियाभिः प्र-तिरन् नः आयुः।।14।।
8518. एषः स्यः सोमः मतिभिः पुनानः
अत्यः न वाजी तरति इत् अरातीः।
पयः न दुग्धम् अदितेः इषिरम् उरु-इव
गातुः सु-यमः न वोड।।15।।
8519. सु-आयुधः सोतृभिः पूयमानः
अभि अर्ष गुह्यम् चारु नाम।
अभि वाजम् सप्तिः-इव श्रवस्या
अभि वायुम् अभि गाः देव सोम।।16।।
8520. शिशुम् जज्ञानम् हर्यतम् मृजन्ति
शुंभन्ति वह्निम् मरुतः गणेन।
कविः गीः-भिः काव्येन कविः सन्
सोमः पवित्रम् अति एति रेभन्।।17।।
8521. ऋषि-मनाः यः ऋषि-कृत् स्वः-साः
सहस्र-नीथः पद-वीः कवीनाम्।
तृतीयम् धाम महिषः सिसासन्
सोमः वि-राजम् अनु राजति स्तुप्।।18।।
8522. चमू-सत् श्येनः शकुनः वि-भृत्वा
गो-विन्दुः द्रप्सः आयुधानि बिभ्रत्।
अपाम् ऊर्मिम् सचमानः समुद्रम्
तुरीयम् धाम महिषः विवक्ति।।19।।
8523. मर्यः न शुभ्रः तन्वम् मृजानः
अत्यः न सृत्वा सनये धनानाम्।
वृषा-इव यूथा परि कोशम् अर्षन्
कनिक्रदत् चम्वोः आ विवेश।।20।।
8524. पवस्व इन्दो पवमानः महः-भिः
कनिक्रदत् परि वाराणि अर्ष।
क्रीडन् चम्वोः आ विश पूयमानः

इन्द्रम् ते रसः मदिरः ममत्तु।।21।।
8525. प्र अस्य धाराः बृहतीः असृग्रन्
अक्तः गोभिः कलशान् आ विवेश।
साम कृण्वन् सामन्यः विपः-चित्
क्रन्दन एति अभि सख्युः न जामिम्।।22।।
8526. अप-घ्नन् एषि पवमान शत्रून्
प्रियाम् न जारः अभि-गीतः इन्दुः।
सीदन् वनेषु शकुनः न पत्वा
सोमः पुनानः कलशेषु सत्ता।।23।।
8527. आ ते रुचः पवमानस्य सोम
योषा-इव यन्ति सु-दुघाः सु-धाराः।
हरिः आ-नीतः पुरुवारः अप्सु
अचिक्रदत् कलशे देव-यूनाम्।।24।।

## सूक्त-97

8528. अस्य प्रेषा हेमना पूयमानः
देवः देवेभिः सम् अपृक्त रसम्।
सुतः पवित्रम् परि एति रेभन्
मिता-इव सद्म पशु-मन्ति होता।।1।।
8529. भद्रा वस्त्रा समन्या वसानः
महान् कविः नि-वचनानि शंसन्।
आ वच्यस्व चम्वोः पूयमानः
विचक्षणः जागृविः देव-वीतौ।।2।।
8530. सम् ऊँ प्रियः मृज्यते सानौ
अव्ये यशः-तरः यशसाम् क्षैतः अस्मे।
अभि स्वर धन्व पूयमानः यूयम्
पात स्वस्ति-भिः सदा नः।।3।।
8531. प्र गायत अभि अर्चाम देवान्
सोमम् हिनोत महते धनाय।
स्वादुः पवाते अति वारम् अव्यम्
आ सीदाति कलशम् देवयुः नः।।4।।
8532. इन्दुः देवानाम् उप सख्यम्
आ-हन् सहस्र-धारः पवते मदाय।
नृभिः स्तवानः अनु धाम पूर्वम्
अगन् इन्द्रम् महते सौभगाय।।5।।
8533. स्तोत्रे राये हरिः अर्ष पुनानः
इन्द्रम् मदः गच्छतु ते भराय।
देवैः याहि स-रथम् राधः अच्छ
यूयम् पात स्वस्ति-भिः सदा नः।।6।।
8534. प्र काव्यम् उशना-इव ब्रुवाणः
देवः देवानाम् जनिम विवक्ति।
महि-व्रतः शुचि-बन्धुः पावकः
पदा वराहः अभि एति रेभन्।।7।।
8535. प्र हंसासः तृपलम् मन्युम्
अच्छ अमात् अस्तम् वृष-गणाः अयासुः।
आङ्गूष्यम् पवमानम् सखायः दुः-मर्षम्
साकम् प्र वदन्ति वाणम्।।8।।
8536. सः रंहते उरु-गायस्य जूतिम्
वृथा क्रीडन्तम् मिमते न गावः।
परीणसम् कृणुते तिग्म-शृङ्गः
दिवा हरिः ददृशे नक्तम् ऋज्रः।।9।।
8537. इन्दुः वाजी पवते गो-न्योघाः
इन्द्रे सोमः सहः इन्वन् मदाय।
हन्ति रक्षः बाधते परि आरातीः
वरिवः कृण्वन् वृजनस्य राजा।।10।।
8538. अध धारया मध्वा पृचानः
तिरः रोम पवते अद्रि-दुग्दः।
इन्दुः इन्द्रस्य सख्यम् जुषाणः
देवः देवस्य मत्सरः मदाय।।11।।
8539. अभि प्रियाणि पवते पुनानः
देवः देवान् स्वेन रसेन पृञ्चन्।
इन्दुः धर्माणि ऋतुथा वसानः दश
क्षिपः अव्यत सानौ अव्ये।।12।।
8540. वृषा शोणः अभि-कनिक्रदत्
गाः नदयन् एति पृथिवीम् उत द्याम्।
इन्द्रस्य-इव वग्नुः आ शृण्वे आजौ
प्र-चेतयन् अर्षति वाचम् आ इमाम्।।13।।
8541. रसाय्यः पयसा पिन्वमानः ईरयन्
एषि मधु-मन्तम् अंशुम्।
पवमानः सम्-तनिम् एषि कृण्वन्
इन्द्राय सोम परि-सिच्यमानः।।14।।
8542. एव पवस्व मदिरः मदाय
उद-ग्राभस्य नमयन् वधस्नैः।
परि वर्णम् भरमाणः रुशन्तम्
गव्युः नः अर्ष परि सोम सिक्तः।।15।।
8543. जुष्ट्वी नः इन्दो सुपथा
सुगानि उरौ पवस्व वरिवांसि कृण्वन्।
घना-इव विष्वक् दुः-इतानि विघ्नन्
अधि स्नुना धन्व सानौ अव्ये।।16।।
8544. वृष्टिम् नः अर्ष दिव्याम् जिगत्नुम्
इड-वतीम् शम्-गयीम् जीर-दानुम्।
स्तुका-इव वीता धन्व वि-चिन्वन्
बन्धून् इमान् अवरान् इन्दो वायून्।।17।।
8545. ग्रन्थिम् न वि स्य ग्रथितम् पुनानः
ऋजुम् च गातुम् वृजिनम् च सोम।
अत्यः न क्रदः हरिः आ सृजानः

मर्यः देव धन्व पस्त्यवान्।।18।।
8546. जुष्टः मदाय देव-ताते इन्दो
परि स्नुना धन्व सानौ अव्ये।
सहस्र-धारः सुरभिः अदब्धः परि
स्रव वाज-सातौ नृ-सह्ये।।19।।
8547. अरश्मानः ये अरथाः अयुक्ताः
अत्यासः न ससृजानासः आजौ।
एते शुक्रासः धन्वन्ति सोमाः
देवासः तान् उप यात पिबध्यै।।20।।
8548. एव नः इन्दो अभि देव-वीतिम्
परि स्रव नभः अर्णः चमूषु।
सोमः अस्मभ्यम् काम्यम् बृहन्तम्
रयिम् ददातु वीर-वन्तम् उग्रम्।।21।।
8549. तक्षत् यदि मनसः वेनतः वाक्
ज्येष्ठस्य वा धर्मणि क्षोः अनीके।
आत् ईम् आयन् वरम् आ वावशानाः
जुष्टम् पतिम् कलशे गावः इन्दुम्।।22।।
8550. प्र दानु-दः दिव्यः दानु-पिन्वः
ऋतम् ऋताय पवते सु-मेधाः।
धर्माः भुवत् वृजन्यस्य राजा प्र
रश्मि-भिः दशभिः भारि भूम।।23।।
8551. पवित्रेभिः पवमानः नृचक्षाः
राजा देवानाम् उत मर्त्यानाम्।
द्विता भुवत् रयि-पतिः रयीणाम्
ऋतम् भरत् सु-भृतम् चारु इन्दुः।।24।।
8552. अर्वान्-इव श्रवसे सातिम् अच्छ
इन्द्रस्य वायोः अभि वीतिम् अर्ष।
सः नः सहस्रा बृहतीः इषः दाः
भर्व सोम द्रविणः-वित् पुनानः।।25।।
8553. देव-अव्यः नः परि-सिच्यमानाः
क्षयम् सु-वीरम् धन्वन्तु सोमाः।
आ-यज्यवः सु-मतिम् विश्व-वाराः
होतारः न दिवि-यजः मन्द्रतमाः।।26।।
8554. एव देव देव-ताते पवस्व
महे सोम प्सरसे देव-पानः।
महः चित् हि स्मसि हिताः समर्ये
कृधि सुस्थाने रोदसी पुनानः।।27।।
8555. अश्वः न क्रदः वृषभिः युजानः
सिंहः न भीमः मनसः जवीयान्।
अर्वाचीनैः पथिभिः ये रजिष्ठाः आ
पवस्व सौमनसम् नः इन्दो।।28।।
8556. शतम् धाराः देव-जाताः
असृग्रन् सहस्रम् एनाः कवयः मृजन्ति।
इन्दो सनित्रम् दिवः आ पवस्व
पुरः-एता असि महतः धनस्य।।29।।
8557. दिवः न सर्गाः असृग्रम् अह्नाम्
राजा न मित्रम् प्र मिनाति धीरः।
पितुः न पुत्रः क्रतुभिः यतानः आ
पवस्व विशे अस्यै अजीतिम्।।30।।
8558. प्र ते धाराः मधु-मतीः असृग्रन्
वारान् यत् पूतः अति-एषि अव्यान्।
पवमान पवसे धाम गोनाम्
जज्ञानः सूर्यम् अपिन्वः अर्कैः।।31।।
8559. कनिक्रदत् अनु पन्थाम् ऋतस्य
शुक्रः वि भासि अमृतस्य धाम।
सः इन्द्राय पवसे मत्सरवान्
हिन्वानः वाचम् मतिभिः कवीनाम्।।32।।
8560. दिव्यः सुपर्णः अव चक्षि सोम
पिन्वन् धाराः कर्मणा देव-वीतौ।
आ इन्दो इति विश कलशम् सोम-धानम्
क्रन्दन् इहि सूर्यस्य उप रश्मि।।33।।
8561. तिस्रः वाचः ईरयति प्र वह्निः
ऋतस्य धीतिम् ब्रह्मणः मनीषाम्।
गावः यन्ति गो-पतिम् पृच्छमानाः
सोमम् यन्ति मतयः वावशानाः।।34।।
8562. सोमम् गावः धेनवः वावशानाः
सोमम् विप्राः मतिभिः पृच्छमानाः।
सोमः सुतः पूयते अज्यमानः सोमे
अर्काः त्रि-स्तुभः सम् नवन्ते।।35।।
8563. एव नः सोम परि-सिच्यमानः
आ पवस्व पूयमानः स्वस्ति।
इन्द्रम् आ विश बृहता रवेण
वर्धय वाचम् जनय पुरम्-धिम्।।36।।
8564. आ जागृविः विप्रः ऋता मतीनाम्
सोमः पुनानः असदत् चमूषु।
सपन्ति यम् मिथुनासः निकामाः
अध्वर्यवः रथिरासः सु-हस्ताः।।37।।
8565. सः पुनानः उप सूरे न धाता
आ उभे अप्राः रोदसी वि सः आवः।
प्रिया चित् यस्य प्रियसासः ऊती
सः तु धनम् कारिणे न प्र यंसत्।।38।।
8566. सः वर्धिता वर्धनः पूयमानः सोमः
मीढ्वान् अभि नः ज्योतिषा आवीत्।
येन नः पूर्वे पितरः पद-ज्ञाः स्वः-विदः
अभि गाः अद्रिम् उष्णन्।।39।।
8567. अक्रान् समुद्रः प्रथमे वि-धर्मन्

जनयन् प्र-जाः भुवनस्य राजा।
वृषा पवित्रे अधिसानौ अव्ये बृहत्
सोमः ववृधे सुवानः इन्दुः।।40।।
8568. महत् तत् सोमः महिषः चकार
अपाम् यत् गर्भः अवृणीत देवान्।
अदधात् इन्द्रे पवमानः ओजः
अजनयत् सूर्ये ज्योतिः इन्दुः।।41।।
8569. मत्सि वायुम् इष्टये राधसे
च मत्सि मित्रावरुणा पूयमानः।
मत्सि शर्धः मारुतम् मत्सि देवान्
मत्सि द्यावापृथिवी देव सोम।।42।।
8570. ऋजुः पवस्व वृजिनस्य
हन्ता अप अमीवाम् बाधमानः मृधः।
नच अभि-श्रीणान् पयः पयसा अभि गोनाम्
इन्द्रस्य त्वम् तव वयम् सखायः।।43।।
8571. मध्वः सूदम् पवस्व वस्वः उत्सम्
वीरम् च नः आ पवस्व भगम् च।
स्वदस्व इन्द्राय पवमानः इन्दो
रयिम् च नः आ पवस्व समुद्रात्।।44।।
8572. सोमः सुतः धारया अत्यः न हित्वा
सिन्धुः न निम्नम् अभि वाजी अक्षाः।
या योनिम् वन्यम् असदत् पुनानः
सम् इन्दुः गोभिः असरत् सम् अत्-भिः।।45।।
8573. एषः स्यः ते पवते इन्द्र सोमः
चमूषु धीरः उशते तवस्वान्।
स्वः-चक्षाः रथिरः सत्य-शुष्मः कामः
न यः देव-यताम् असर्जि।।46।।
8574. एषः प्रत्नेन वयसा पुनानः
तिरः वर्पांसि दुहितुः दधानः।
वसानः शर्म त्रि-वरूथम् अप्सु
होता-इव याति समनेषु रेभन्।।47।।
8575. नु नः त्वम् रथिरः देव सोम
परि स्रव चम्वोः पूयमानः।
अप्सु स्वादिष्ठः मधु-मान् ऋतवा
देवः न यः सविता सत्यमन्मा।।48।।
8576. अभि वायुम् वीती अर्ष गृणानः
अभि मित्रावरुणा पूयमानः।
अभि नरम् धी-जवनम् रथे-स्थाम्
अभि इन्द्रम् वृषणम् वज्र-बाहुम्।।49।।
8577. अभि वस्रा सु-वसनानि अर्ष
अभि धेनूः सु-दुघाः पूयमानः।
अभि चन्द्रा भर्तवे नः हिरण्या
अभि अश्वान् रथिनः देव सोम।।50।।
8578. अभि नः अर्ष दिव्या वसूनि
अभि विश्वा पार्थिवा पूयमानः।
अभि येन द्रविणम् अश्नवाम
अभि आर्षेयम् जमदग्निवत् नः।।51।।
8579. अया पवा पवस्व एना वसूनि
मांश्चत्वे इन्दो सरसि प्र धन्व।
ब्रध्नः चित् अत्र वातः न जूतः
पुरु-मेधः चित् तकवे नरम् दात्।।52।।
8580. उत नः एना पवया पवस्व
अधि श्रुते श्रवाय्यस्य तीर्थे।
षष्टिम् सहस्रा नैगुतः वसूनि
वृक्षम् न पक्वम् धूनवत् रणाय।।53।।
8581. महि इमे अस्य वृषनाम शूषे
मांश्चत्वे वा पृशने वा वधत्रे।
इति अस्वापयत् नि-गुतः स्नेहयत् च अप
अमित्रान् अप अचितः अच इतः।।54।।
8582. सम् त्री पवित्रा वि-तनानि एषि
अनु एकम् धावसि पूयमानः।
असि भगः असि दात्रस्य दाता
असि मघवा मघवत्-भ्यः इन्दो।।55।।
8583. एषः विश्ववित् पवते मनीषी
सोमः विश्वस्य भुवनस्य राजा।
द्रप्सान् ईरयन् विदथेषु इन्दुः वि
वारम् अव्यम् समया अति याति।।56।।
8584. इन्दुम् रिहन्ति महिषाः अदब्धाः
पदे रेभन्ति कवयः न गृध्राः।
हिन्वन्ति धीराः दश-भिः क्षिपाभिः
सम् अञ्जते रूपम् अपाम् रसेन।।57।।
8585. त्वया वयम् पवमानेन सोम
भरे कृतम् वि चिनुयाम शश्वत्।
तत् नः मित्रः वरुणः ममहन्ताम्
अदितिः सिन्धुः पृथिवी उत द्यौः।।58।।

## सूक्त-98

8586. अभि नः वाज-सातमम् रयिम् अर्ष पुरु-स्पृहम्।
इन्दो सहस्र-भर्णसम् तुवि-द्युम्नम् विभ्व-सहम्।।1।।
8587. परि स्यः सुवानः अव्ययम् रथे न वर्म अव्यत।
इन्दुः अभि द्रुणा हितः हियानः धाराभिः अक्षाः।।2।।
8588. परि स्यः सुवानः अक्षाः इन्दुः अव्ये मदच्युतः।
धारा यः ऊर्ध्वः अध्वरे भ्राजा न एति गव्ययुः।।3।।
8589. सः हि त्वम् देव शश्वते वसु मर्ताय दाशुषे।
इन्दो सहस्रिणम् रयिम् शत-आत्मानम् विवाससि।।4।।
8590. वयम् ते अस्य वृत्र-हन् वसो वस्वः पुरु-स्पृहः।

नि नेदिश्ठतमाः इषः स्याम सुम्नस्य अधिगो।।5।।
8591. दि्वः यम् पञ्च स्व-यशसम् स्वश्वारः अद्रि-संहतम्।
प्रियम् इन्द्रस्य काम्यम् प्र-स्नापयन्ति ऊर्मिणम्।।6।।
8592. परि त्यम् हर्यतम् हरिम् बभ्रुम् पुनन्ति वारेण।
यः देवान् विश्वान् इत् परि मदेन सह गच्छति।।7।।
8593. अस्य वः हि अवसा पान्तः दक्ष-साधनम्।
यः सूरिषु श्रवः बृहत् दधे स्वः न हर्यतः।।8।।
8594. सः वाम् यज्ञेषु मानवी इन्दुः जनिष्ट रोदसी।
देवः देवी गिरि-स्थाः अस्रधन् तम् तुवि-स्वनि।।9।।
8595. इन्द्राय सोम पातवे वृत्रघ्ने परि सिच्यसे।
नरे च दक्षिणा-वते देवाय सदन-सदे।।10।।
8596. ते पत्नासः वि-उष्टिषु सोमाः पवित्रे अक्षरन्।
अप-प्रोथन्तः सनुतः हुरः-चितः प्रातः तान् अप्रचेतसः।।11।।
8597. तम् सखायः पुरुःरुचम् यूयम् वयम् च सूरयः।
अश्याम वाज-गन्ध्यम् सनेम वाज-पस्त्यम्।।12।।

## सूक्त-99

8598. आ हर्यताय धृष्णवे धनुः तन्वन्ति पौंस्यम्।
शुक्राम् वयन्ति असुराय
निः-निजम् विपाम् अग्रे महीयुवः।।1।।
8599. अध क्षपा परिकृतः वाजान् अभि प्र गाहते।
यदि विवस्वतः धियः हरिम् हिन्वन्ति यातवे।।2।।
8600. तम् अस्य मर्जामसि मदः यः इन्द्र-पातमः।
यम् गावः आसभिः दधुः पुरा नूनम् च सूरयः।।3।।
8601. तम् गाथया पुराण्या पुनानम् अभि अनूषत।
उतो कृपन्त धीतयः देवानाम् नाम बिभ्रतीः।।4।।
8602. तम् उक्षमाणम् अव्यये वारे पुनन्ति धर्णसिम्।
दूतम् न पूर्व-चित्तये आ शासते मनीषिणः।।5।।
8603. सः पुनानः मदिन्-तमः सोमः चमूषु सीदति।
पशौ न रेतः आ-दधत् पतिः वचस्यते धियः।।6।।
8604. सः मृज्यते सुकर्म-भिः देवः देवेभ्यः सुतः।
विदे यत् आसु सम्-ददिः महीः अपः वि गाहते।।7।।
8605. सुतः इन्दो पवित्रे आ नृ-भिः यतः वि नीयसे।
इन्द्राय मत्सरिन्-तमः चमूषु आ नि सीदति।।8।।

## सूक्त-100

8606. अभि नवन्ते अद्रुहः प्रियम् इन्द्रस्य काम्यम्।
वत्सम् न पूर्वे आयुनि जातम् रिहन्ति मातरः।।1।।
8607. पुनानः इन्दो आ भर सोम दि्व-बर्हसम् रयिम्।
त्वम् वसूनि पुष्यसि विश्वानि दाशुषः गृहे।।2।।
8608. त्वम् धियम् मनः-युजम् सृज वृष्टिम् न तन्यतुः।
त्वम् वसूनि पार्थिवा दिव्या च सोम पुष्यसि।।3।।
8609. परि ते जिग्युषः यथा धारा सुतस्य धावति।
रंहमाणा वि अव्ययम् वारम् वाजी-इव सानसिः।।4।।
8610. क्रत्वे दक्षाय नः कवे पवस्व सोम धारया।
इन्द्राय पातवे सुतः मित्राय वरुणाय च।।5।।
8611. पवस्व वाज-सातमः पवित्रे धारया सुतः।
इन्द्राय सोम विष्णवे देवेभ्यः मधुमत्-तमः।।6।।
8612. त्वाम् रिहन्ति मातरः हरिम् पवित्रे अद्रुहः।
वत्सम् जातम् न धेनवः पवमान विधर्मणि।।7।।
8613. पवमान महि श्रवः चित्रेभिः यासि रश्मिभिः।
शर्धन् तमांसि जिघ्नसे विश्वानि दाशुषः गृहे।।8।।
8614. त्वम् द्याम् च महि-व्रत पृथिवीम् च अति जभ्रिषे।
प्रति द्रापिम् अमुञ्चथाः पवमान महित्वा।।9।।

## सूक्त-101

8615. पुरःजिती वः अन्धसः सुताय माद-यित्नवे।
अप श्वानम् श्नथिष्टन सखायः दीर्घ-जिह्व्यम्।।1।।
8616. यः धारया पावकया परि-प्रस्यन्दते सुतः।
इन्दुः अश्वः न कृत्व्यः।।2।।
8617. तम् दुरोषम् अभि नरः सोमम् विश्वाच्या धिया।
यज्ञम् हिन्वन्ति अद्रिभिः।।3।।
8618. सुतासः मधुमत्-तमाः सोमाः इन्द्राय मन्दिनः।
पवित्र-वन्तः अक्षरन् देवान् गच्छन्तु वः मदाः।।4।।
8619. इन्दुः इन्द्राय पवते इति देवासः अब्रुवन्।
वाचः पतिः मखस्यते विश्वस्य ईशानः ओजसा।।5।।
8620. सहस्र-धारः पवते समुद्रः वाचम्-ईङ्खयः।
सोमः पतिः रयीणाम् सखा इन्द्रस्य दिवे-दिवे।।6।।
8621. अयम् पूषा रयिः भगः सोमः पुनानः अर्षति।
पतिः विश्वस्य भूमनः वि अख्यत् रोदसी उभे।।7।।
8622. सम् ऊँ प्रियाः अनूषत गावः मदाय घृष्वयः।
सोमासः कृण्वते पथः पवमानासः इन्दवः।।8।।
8623. यः ओजिष्ठः तम् आ भर पवमान श्रवाय्यम्।
यः पञ्च चर्षणीः अभि रयिम् येन वनामहै।।9।।
8624. सोमाः पवन्ते इन्दवः अस्मभ्यम् गातुवित्-तमाः।
मित्राः सुवानाः अरेपसः सु-आध्यः स्वः-विदः।।10।।
8625. सुस्वानासः वि अद्रिभिः चितानाः गोः अधि त्वचि।
इषम् अस्मभ्यम् अभितः सम् अस्वरन् वसु-विदः।।11।।
8626. एते पूताः विपः-चितः सोमासः दधि-आशिरः।
सूर्यासः न दर्शतासः जिगत्नवः ध्रुवाः धृते।।12।।
8627. प्र सुन्वानस्य अन्धसः मर्तः न वृत तत् वचः।
अप श्वानम् अराधसम् हत मखम् न भृगवः।।13।।
8628. आ जामिः अत्के अव्यत भुजे न पुत्रः ओण्योः।
सरत् जारः न योषणाम् वरः न योनिम् आ-सदम्।।14।।
8629. सः वीरः दक्ष-साधनः वि यः तस्तम्भ रोदसी।

हरिः पवित्रे अव्यत वेधाः न योनिम् आ-सदम्।।15।।
8630. अव्यः वारेभिः पवते सोमः गव्ये अधि त्वचि।
कनिक्रदत् वृषा हरिः इन्द्रस्य अभि एति निःकृतम्।।16।।

## सूक्त-102

8631. क्राणा शिशुः महीनाम् हिन्वन् ऋतस्य दीधितिम्।
विश्वा परि प्रिया भुवत् अध द्विता।।1।।
8632. उप त्रितस्य पाष्योः अभक्त यत् गुहा पदम्।
यज्ञस्य सप्त धामभिः अध प्रियम्।।2।।
8633. त्रीणि त्रितस्य धारया पृष्ठेषु आ ईरय रयिम्।
मिमीते अस्य योजना वि सु-क्रतुः।।3।।
8634. जज्ञानम् सप्त मातरः वेधाम् अशासत श्रिये।
अयम् ध्रुवः रयीणाम् चिकेत यत्।।4।।
8635. अस्य व्रते स-जोषसः विश्वे देवासः अद्रुहः।
स्पार्हाः भवन्ति रन्तयः जुषन्त यत्।।5।।
8636. यम् ई गर्भम् ऋतवृधः दृशे चारुम् अजीजनन्।
कविम् मंहिष्ठम् अध्वरे पुरु-स्पृहम्।।6।।
8637. समीचीने अभि त्मना यह्वी इति ऋतस्य मातरा।
तन्वानाः यज्ञम् आनुषक् यत् अञ्जते।।7।।
8638. क्रत्वा शुक्रेभिः अक्षभिः ऋणोः अप व्रजम् दिवः।
हिन्वन् ऋतस्य दीधितिम् प्र अध्वरे।।8।।

## सूक्त-103

8639. प्र पुनानाय वेधसे सोमायः उत्-यतम् भृतिम्।
न भर मतिभिः जुजोषते।।1।।
8640. परि वाराणि अव्यया गोभिः अञ्जानः अर्षति।
त्री सधस्था पुनानः कृणुते हरिः।।2।।
8641. परि कोशम् मधु-श्चुतम् अव्यये वारे अर्षति अभि
वाणीः ऋषीणाम् सप्त नूषत।।3।।
8642. परि नेता मतीनाम् विश्वदेवः अदाभ्यः।
सोमः पुनानः चम्वो विशत् हरिः।।4।।
8643. परि दैवीः अनु स्वधाः इन्द्रेण याहि सरथम्।
पुनानः वाघत् वाघद्भिः अमर्त्यः।।5।।
8644. परि सप्तिः न वाज-युः देवः देवेभ्यः सुतः।
वि-आनशिः पवमानः वि धावति।।6।।

## सूक्त-104

8645. सखायः आ नि सीदत पुनानाय प्र गायत।
शिशुम् न यज्ञैः परि भूषत श्रिये।।1।।
8646. सम् ई वत्सम् न मातृभिः सृजत गय-साधनम्।
देव-अव्यम् मदम् अभि द्वि-शवसम्।।2।।
8647. पुनात दक्ष-साधनम् यथा शर्धाय वीतये।
यथा मित्राय वरुणाय शम्-तमः।।3।।
8648. अस्मभ्यम् त्वा वसु-विदम् अभि वाणीः अनूषत।
गोभिः ते वर्णम् अभि वासयामसि।।4।।
8649. सः नः मदानाम् पते इन्दो देवप्सराः असि।
सखा-इव सख्ये गातुवित्-तमः भव।।5।।
8650. सनेमि कृधि अस्मत् आ
रक्षसम् कम् चित् अत्रिणम्।
अप अदेवम् द्वयुम् अंहः युयोधि नः।।6।।

## सूक्त-105

8651. तम् वः सखायः मदाय पुनानम् अभि गायत।
शिशुम् न यज्ञैः स्वदयन्त गूर्तिभिः।।1।।
8652. सम् वत्सः-इव मातृभिः इन्दुः हिन्वानः अज्यते।
देव-अवीः मदः मति-भिः परि-कृतः।।2।।
8653. अयम् दक्षाय साधनः अयम् शर्धाय वीतये।
अयम् देवेभ्यः मधुमत्-तमः सुतः।।3।।
8654. गोमत् नः इन्दो अश्ववत् सुतः सुदक्ष धन्व।
शुचिम् ते वर्णम् अधि गोषु दीधरम्।।4।।
8655. सः नः हरीणाम् पते इन्दो देवप्सरः-तमः।
सखा-इव सख्ये नर्यः रुचे भव।।5।।
8656. सनेमि त्वम् अस्मत् आ
अदेवम् कम् चित् अत्रिणम्।
सह्वान् इन्दो परि बाधः अप द्वयुम्।।6।।

## सूक्त-106

8657. इन्द्रम् अच्छ सुताः इमे वृषणम् यन्तु हरयः।
श्रुष्टी जातासः इन्दवः स्वः-विदः।।1।।
8658. अयम् भराय सानसिः इन्द्राय पवते सुतः।
सोमः जैत्रस्य चेतति यथा विदे।।2।।
8659. अस्य इत् इन्द्रः मदेषु
आ ग्राभम् गृभ्णीत सानसिम्।
वज्रम् च वृषणम् भरत् सम् अप्सु-जित्।।3।।
8660. प्र धन्व सोम जागृविः इन्द्राय इन्दो परि स्रव।
द्यु-मन्तम् शुष्मम् आ भर स्वः-विदम्।।4।।
8661. इन्द्राय वृषणम् मदम् पवस्व विश्वदर्शतः।
सहस्त्रयामा पथिकृत् विचक्षणः।।5।।
8662. अस्मभ्यम् गातुवित-तमः देवेभ्यः मधुमत्-तमः।
सहस्रम् याहि पथिभिः कनिक्रदत्।।6।।
8663. पवस्व देव-वीतये इन्दो धाराभिः ओजसा।
आ कलशम् मधुमान् सोम नः सदः।।7।।
8664. तव द्रप्साः उद-प्रुतः इन्द्रम् मदाय ववृधुः।
त्वाम् देवासः अमृताय कम् पपुः।।8।।
8665. आ नः सुतासः इन्दवः पुनानाः धावत रयिम्।
वृष्टिद्यावः रीति-आपः स्वः-विदः।।9।।
8666. सोमः पुनानः ऊर्मिणा अव्यः वारम् वि धावति।
अग्रे वाचः पवमानः कनिक्रदत्।।10।।

8667. धीभिः हिन्वन्ति वाजिनम्
वने क्रीडन्तम् अति-अविम्।
अभि त्रि-पृष्ठम् मतयः सम् अस्वरन्।।11।।
8668. असर्जि कलशान् अभि मीड सप्तिः न वाज-युः।
पुनानः वाचम् जनयन् असिस्यदत्।।12।।
8669. पवते हर्यतः हरिः अति ह्वरांसि रंह्या।
अभि-अर्षन् स्तोतृ-भ्यः वीर-वत् यशः।।13।।
8670. अया पवस्व देवयुः मधोः धाराः असृक्षत।
रेभन् पवित्रम् परि एषि विश्वतः।।14।।

## सूक्त-107

8671. परि इतः सिञ्चत सुतम्
सोमः यः उत्-तमम् हविः।
दधन्वान् यः नर्यः अप्सु अन्तः
आ सुसाव सोमम् अद्रिभिः।।1।।
8672. नूनम् पुनानः अविभिः परि
स्रव अदब्धः सुरभिम् तरः।
सुते चित् त्वा अप्सु मदामः
अन्धसा श्रीणन्तः गोभिः उत्-तरम्।।2।।
8673. परि सुवानः चक्षसे देव-मादनः
क्रतुः इन्दुः विचक्षणः।।3।।
8674. पुनानः सोम धारया अपः वसानः अर्षसि।
आ रत्नधाः योनिम् ऋतस्य
सीदति उत्सः देव हिरण्ययः।।4।।
8675. दुहानः ऊधः दिव्यम् मधु प्रियम्
प्रत्नम् सध-स्थम् आ असदत्।
आ-पृच्छयम् धरुणम् वाजी
अर्षति नृभिः धूतः विचक्षणः।।5।।
8676. पुनानः सोम जागृविः अव्यः वारे परि प्रियः।
त्वम् विप्रः अभवः अङ्गिरः-तमः
मध्वा यज्ञम् मिमिक्ष नः।।6।।
8677. सोमः मीढ्वान् पवते गातुवित्-
तमः ऋषिः विप्रः वि-चक्षणः।
त्वम् कविः अभवः देव-वीतमः
आ सूर्यम् रोहयः दिवि।।7।।
8678. सोमःऊँ सुवानः सोतृभिः अधि स्नुभिः अवीनाम्।
अश्वया-इव हरिता याति धारया मन्द्रया याति धारया।।8।।
8679. अनूपे गो-मान् गोभिः
अक्षाः सोमः दुग्धाभिः अक्षाः।
समुद्रम् न सम्-वरणानि अग्मन् मन्दी मदाय तोशते।।9।।
8680. आ सोम सुवानः अद्रिभिःतिरः वाराणि अव्यया।
जनाः न पुरि चम्वोः विशत् हरिः सदः वनेषु दधिषे।।10।।
8681. सः ममृजे तिरः अण्वानि
मेष्यः मीड सप्तिः न वाजयुः।
अनु-माद्यः पवमानः मनीषिभिः
सोमः विप्रेभिः ऋक्वभिः।।11।।
8682. प्र सोम देव-वीतये सिन्धुः न पिप्ये अर्णसा।
अंशोः पयसा मदिरः न जागृविः
अच्छ कोशम् मधु-श्चुतम्।।12।।
8683. आ हर्यतः अर्जुने अत्के
अव्यत प्रियः सूनुः न मर्ज्यः।
तम् ईम् हिन्वन्ति अपसः यथा
रथम् नदीषु आ गभस्त्योः।।13।।
8684. अभि सोमासः आयवः पवन्ते मद्यम् मदम्।
समुद्रस्य अधि बिष्टपि मनीषिणः
मत्सरासः स्वः-विदः।।14।।
8685. तरत् समुद्रम् पवमानः
ऊर्मिणा राजा देवः ऋतम् बृहत्।
अर्षन् मित्रस्य वरुणस्य धर्मणा
प्र हिन्वानः ऋतम् बृहत्।।15।।
8686. नृभि येमानः हर्यतः
विचक्षणः राजा देवः समुद्रियः।।16।।
8687. इन्द्राय पवते मदः सोमः मरुत्वते सुतः।
सहस्रधारः अति अव्यम् अर्षति
तम् ई मृजन्ति आयवः।।17।।
8688. पुनानः चमू जनयन्
मतिम् कविः सोमः देवेषु रण्यति।
अपः वसानः परि गोभिः
उत्-तरः सीदन् वनेषु अवयत।।18।।
8689. तव अहम् सोम ररण सख्ये इन्दो दिवे-दिवे।
पुरूणि बभ्रो नि चरन्ति माम् अव
परि-धीन् अति तान् इहि।।19।।
8690. उत अहम् नक्तम् उत सोम
ते दिवा सख्याय बभ्रो ऊधनि।
घृणा तपन्तम् अति सूर्यम् परः शकुनाः-इव पप्तिम।।20।।
8691. मृज्यमानः सु-हस्त्य समुद्रे वाचम् इन्वसि।
रयिम् पिशङ्गम् बहुलम् पुरु-
स्पृहम् पवमान अभि अर्षसि।।21।।
8692. मृजानः वारे पवमानः
अव्यये वृषा अव चक्रदः वने।
देवानाम् सोम पवमान निः-कृतम्
गोभिः अञ्जानः अर्षसि।।22।।
8693. पवस्व वाज-सातये अभि विश्वानि काव्या।
त्वम् समुद्रम् प्रथमः वि धारयः
देवेभ्यः सोम मत्सरः।।23।।
8694. सः तु पवस्व परि पार्थिवम्

रजः दिव्या च सोम धर्मभिः।
त्वाम् विप्रासः मतिभिः विचक्षण
शुभ्रम् हिन्वन्ति धीतिभिः।।24।।
8695. पवमानाः असृक्षत पवित्रम् अति धारया।
मरुत्वन्तः मत्सराः इन्द्रियाः हयाः
मेधाम् अभि प्रयांसि च।।25।।
8696. अपः वसानः परि कोशम्
अर्षति इन्दुः हियानः सोतृ-भिः।
जनयन् ज्योतिः मन्दनाः अवीवशत्
गाः कृण्वानः न निःनिजम्।।26।।

## सूक्त-108

8697. पवस्व मधुमत्-तमः इन्द्राय
सोम क्रतुवित्-तमः मदः।
महि द्युक्षतमः मदः।।1।।
8698. यस्य ते पीत्वा वृषभः
वृषयते अस्य पीता स्वः-विदः।
सः सु-प्रकेतः अभि अक्रमीत्
इषः अच्छ वाजम् न एतश।।2।।
8699. त्वम् हि अङ्गः दैव्या
पवमान जनिमानि द्युमत्-तमः।
अमृत-त्वाय घोषयः।।3।।
8700. येन नवग्वः दध्यङ्
अप-ऊर्णुते येन विप्रासः आपिरे।
देवानाम् सुम्ने अमृतस्य चारुणः,
येन श्रवांसि आनशुः।।4।।
8701. एषः स्यः धारया सुतः अव्यः
वारेभिः पवते मदिन्-तमः।
क्रीडन् ऊर्मिः अपाम्-इव।।5।।
8702. यः उस्रियाः अप्याः अन्तः
अश्मनः निः गाः अकृन्तत् ओजसा।
अभि व्रजम् तत्निषे गव्यम्
अश्व्यम् वर्मी-इव धृष्णो आ रुज।।6।।
8703. आ सोत परि सिञ्चत
अश्वम् न स्तोमम् अप्-तुरम्।
रजः-तुरम् वन-क्रक्षम् उद-प्रुतम्।।7।।
8704. सहस्र-धारम् वृषभम् पयः-वृधम्
प्रियम् देवाय जन्मने।
ऋतेन यः ऋत-जातः वि-ववृधे
राजा देवः ऋतम् बृहत्।।8।।
8705. अभि द्युम्नम् बृहत् यशः
इषः पते दिदीहि देव देवयुः।
वि कोशम् मध्यम् युव।।9।।
8706. आ वच्यस्व सुदक्ष चम्वोः
सुतो विशाम् वह्निः न विश्पतिः।
वृष्टि दिवः पवस्व रीतिम्
अपाम् जिन्वा गविष्टये धियः।।10।।
8707. एतम् उ त्यम् मद-च्युतम् सहस्र-धारम् वृषभम्।
दिवः दुहुः विश्वा वसूनि बिभ्रतम्।।11।।
8708. वृषा वि जज्ञे जनयन्
अमर्त्यः प्र-तपन् ज्योतिषा तमः।
सः सु-स्तुतः कविभिः निः-निजम्
दधे त्रि-धातु अस्य दंससा।।12।।
8709. सः सुन्वे यः वसूनाम्
यः रायाम् आ-नेता यः इडनाम्।
सोमः यः सु-क्षितीनाम्।।13।।
8710. यस्य नः इन्द्रः पिबात् यस्य
मरुतः यस्य वा अर्यमणा भगः।
आ येन मित्रावरुणा करामहे आ इन्द्रम् अवसे महे।।14।।
8711. इन्द्राय सोम पातवे नृभिः
यतः सु-आयुधः मदिन्-तमः।
पवस्व मधुमत्-तमः।।15।।
8712. इन्द्रस्य हार्दि सोम-धानम्
आ विश समुद्रम्-इव सिन्धवः।
जुष्टः मित्राय वरुणाय वायवे
दिवः विष्टम्भः उत्-तमः।।16।।

## सूक्त-109

8713. परि प्र धन्व इन्द्राय सोम
स्वादुः मित्राय पूष्णे भगाय।।1।।
8714. इन्द्रः ते सोम सुतस्य
पेयाः क्रत्वे दक्षाय विश्वे च देवाः।।2।।
8715. एव अमृताय महे क्षयाय
सः शुक्रः अर्ष दिव्यः पीयूषः।।3।।
8716. पवस्व सोम महान् समुद्रः
पिता देवानाम् विश्वा अभि धाम।।4।।
8717. शुक्रः पवस्व देवेभ्यः सोम
दिवे पृथिव्यै शम् च प्रजायै।।5।।
8718. दिवः धर्ता असि शुक्रः पीयूषः
सत्ये वि-धर्मन् वाजी पवस्व।।6।।
8719. पवस्व सोम द्युम्नी सु-धारः
महाम् अवीनाम् अनु पूर्व्यः।।7।।
8720. नृभिः येमानः जज्ञानः पूतः
क्षरत् विश्वानि मन्द्रः स्वः-वित्।।8।।
8721. इन्दुः पुनानः प्र-जाम् उराणः
करत् विश्वानि द्रविणानि नः।।9।।

8722. पवस्व सोम क्रत्वे दक्षाय
अश्वः न निक्तः वाजी धनाय।।10।।
8723. तम् ते सोतारः रसम् मदाय
पुनन्ति सोमम् महे द्युम्नाय।।11।।
8724. शिशुम् जज्ञानम् हरिम् मृजन्ति
पवित्रे सोमम् देवेभ्यः इन्दुम्।।12।।
8725. इन्दुः पविष्ट चारुः मदाय
अपाम् उपस्थे कविः भगाय।।13।।
8726. बिभर्ति चारु इन्द्रस्य नाम
येन विश्वानि वृत्रा जघान।।14।।
8727. पिबन्ति अस्य विश्वे देवासः
गोभिः श्रीतस्य नृभिः सुतस्य।।15।।
8728. प्र सुवानः अक्षाः सहस्रधारः
तिरः पवित्रम् विवारम् अव्यम्।।16।।
8729. सः वाजी अक्षाः सहस्ररेताः
अत्-भिः मृजानः गोभिः श्रीणानः।।17।।
8730. प्र सोम याहि इन्द्स्य कुक्षा
नृभिः येमानः अद्रिभिः सुतः।।18।।
8731. असर्जि वाजी तिरः पवित्रम्
इन्द्राय सोमः सहस्रधारः।।19।।
8732. अञ्जन्ति एनम् मध्व रसेन
इन्द्राय वृष्णे इन्दुम् मदाय।।20।।
8733. देवेभ्यः त्वा वृथा पाजसे
अपः वसानम् हरिम् मृजन्ति।।21।।
8734. इन्दुः इन्द्राय तोशते नि
तोशते श्रीणन् उग्रः रिणन् अपः।।22।।

## सूक्त-110

8735. परि ॐ सु प्र धन्व वाज-सातये परि वृत्राणि।
सक्षणिः द्विषः तरध्यै ऋणयाः नः ईयसे।।1।।
8736. अनु हि त्वा सुतम् सोम
मदामसि महे समर्य-राज्ये।
वाजान् अभि पवमान प्र गाहसे।।2।।
8737. अजीजनः हि पवमान सूर्यम् वि-धारे शक्मना पयः।
गो-जीरया रंहमाणः पुरम्-ध्या।।3।।
8738. अजीजनः असृत मर्त्येषु आ
ऋतस्य धर्मन् अमृतस्य चारुणः।
सदा असरः वाजम् अच्छ अनिस्यदत्।।4।।
8739. अभि-अभि हि श्रवसा ततर्दिथ उत्सम्
न कम् चित् जन-पानम् अक्षितम्।
शर्याभिः न भरमाणः गभस्त्योः।।5।।
8740. आत् ईम् के चित् पश्यमानासः
आप्यम् वसु-रुचः दिव्याः अभि अनूषत्।
वारम् न देवः सविता वि ऊर्णुते।।6।।
8741. त्वे सोम प्रथमाः वृक्त-बर्हिषः
महे वाजाय श्रवसे धियम् दधुः।
सः त्वम् नः वीर वीर्याय चोदय।।7।।
8742. दिवः पीयूषम् पूर्व्यम् यत् उक्थ्यम्
महः गाहात् दिवः आ निः अधुक्षत।
इन्द्रम् अभि जायमानम् सम् अस्वरन्।।8।।
8743. अध यत् इमे पवमान रोदसी इमा
च विश्वा भुवना अभि मज्मना।
यूथे न निः-स्थाः वृषभः वि तिष्ठसे।।9।।



8744. सोमः पुनानः अव्यये वारे
शिशुः न क्रीडन् पवमानः अक्षाः।
सहस्र-धारः शतवाजः इन्दुः।।10।।
8745. एषः पुनानः मधुमान् ऋतवा
इन्द्राय इन्दुः पवते स्वादुः ऊर्मिः।
वाज-सनिः वरिवः-वित् वयः-धाः।।11।।
8746. सः पवस्व सहमानः पृतन्यून्
सेधन् रक्षांसि अप दुःगहानि।
सु-आयुधः ससह्वान् सोम शत्रून्।।12।।

## सूक्त-111

8747. अया रुचा हरिण्या पुनानः विश्वा द्वेषांसि
तरति स्वयुग्वभिः सूरः न स्वयुग्वभिः।
धारा सुतस्य रोचते पुनानः अरुषः हरिः विश्वा यत्
रूपा परियाति ऋक्वभिः सप्त-आस्येभिः ऋक्वभिः।।1।।
8748. त्वम् त्यत् पणीनाम् विदः वसु सम् मातृभिः
मर्जयसि स्वे आ दमे ऋतस्य धीतिभिः दमे।
परावतः न साम तत् यत्र रणन्ति धीतयः त्रिधातुभिः
अरुषीभिः वयः दधे रोचमानः वयः दधे।।2।।
8749. पूर्वाम् अनु प्र-दिशम् याति चेकितत्
सम् रश्मिभिः यतते दर्शतः रथः।
दैव्यः दर्शतः रथः अग्मन् उक्थानि
पौंस्या इन्द्रम् जैत्राय हर्षयन् वज्रः च यत् भवथः
अनप-च्युता समत्-सु अनप-च्युता।।3।।

## सूक्त-112

8750. नानानम् वै उ नः धियः वि व्रतानि जनानाम्।
तक्षा रिष्टम् रुतम् भिषक् ब्रह्मा सुन्वन्तम्
इच्छति इन्द्राय इन्दो परि स्रव।।1।।
8751. जरतीभिः ओषधीभिः पर्णेभिः शकुनानाम्।
कार्मारः अश्मभिः द्यु-भि हिरण्यवन्तम्
इच्छति इन्द्राय इन्दो पर स्रव।।2।।
8752. कारुः अहम् ततः भिषक् उपल-प्रक्षिणी नना।
नाना-धियः वसु-यवः अनु गाः-इव
तस्थम् इन्द्राय इन्दो परि स्रव।।3।।
8753. अश्वः वोड सुखम् रथम् हसनाम् उप-मंत्रिणः।
शेपः रोमण्-वन्तौ भेदौ वाः इत् मण्डूकः
इच्छति इन्द्राय इन्दो परि स्रव।।4।।

## सूक्त-113

8754. शर्यणा-वति सोमम् इन्द्रः पिबतु वृत्रहा।
बलम् दधानः आत्मनि करिष्यन् वीर्यम्
महत् इन्द्राय इन्दो परि स्रव।।1।।
8755. आ पवस्व दिशाम् पते आर्जीकात् सोम मीढ्वः।
ऋत-वाकेन सत्येन श्रद्धया तपसा
सुतः इन्द्राय इन्दो परि स्रव।।2।।
8756. पर्जन्य-वृद्धम् महिषम् तम्
सूर्यस्य दुहिता आ अभरत्।
तम् गन्धर्वाः प्रति अगृभ्णन् तम् सोमे
रसम् आ अदधुः इन्द्राय इन्दो परि स्रव।।3।।
8757. ऋतम् वदन् ऋतद्युम्न सत्यम् वदन् सत्यकर्मन्।
श्रद्धाम् वतन् सोम राजन् धात्रा सोम
परिष्कृत इन्द्राय इन्दो परि स्रव।।4।।
8758. सत्यम्-उग्रस्य बृहतः सम् स्रवन्ति सम्-स्रवाः।
सम् यन्ति रसिनः रसाः पुनानः ब्रह्मणा
हरे इन्द्राय इन्दो परि स्रव।।5।।
8759. यत्र ब्रह्मा पवमान छन्दस्याम् वाचम् वदन्।
ग्राव्णा सोमे महीयते सोमेन आनन्दम्
जनयन् इन्द्राय इन्दो परि स्रव।।6।।
8760. यत्र ज्योतिः अजस्रम् यस्मिन् लोके स्वः हितम्।
तस्मिन् माम् धेहि पवमान अमृते
लोके अक्षिते इन्द्राय इन्दो परि स्रव।।7।।
8761. यत्र राजा वैवस्वतः यत्र अवरोधनम् दिवः।
यत्र अमूः यह्वतीः आपः तत्र माम्
अमृतम् कृधि इन्द्राय इन्दो परि स्रव।।8।।
8762. यत्र अनुकामम् चरणम् त्रि-नाके त्रि-दिवे दिवः।
लोकाः यत्र ज्योतिष्मन्तः तत्र माम्
अमृतम् कृधि इन्द्राय इन्दो परि स्रव।।9।।
8763. यत्र कामाः नि-कामाः च यत्र बध्नस्य विष्टपम्।
स्वधा च यत्र तृप्तिः च तत्र माम्
अमृतम् कृधि इन्द्राय इन्दो परि स्रव।।10।।
8764. यत्र आनन्दाः च मोदाः च मुदः प्रमुदः आसते।
कामस्य यत्र आप्ताः कामाः तत्र माम्
अमृतम् कृधि इन्द्राय इन्दो परि स्रव।।11।।

## सूक्त-114

8765. यः इन्द्रोः पवमानस्य अनु धामानि अक्रमीत्।
तम् आहुः सु-प्रजाः इति यः ते सोम अविधत्
मनः इन्द्राय मन्दो इति परि स्रव।।1।।
8766. ऋषे मंत्र-कृताम् स्तोमैः कश्यप उत्-वर्धयन् गिरः।
सोमम् नमस्य राजानम् यः यज्ञे वीरुधाम्
पतिः इन्द्राय इन्दो परि स्रव।।2।।
8767. सप्त दिशः नाना-सूर्याः सप्त होतारः ऋत्विजः।
देवाः आदित्याः ये सप्त तेभिः सोम
अभि रक्ष नः इन्द्राय इन्दो परि स्रव।।3।।
8768. यत् ते राजन् शृतम् हविः तेन सोम अभिरक्ष नः।
अराति-वा मा नः तारीत् मो च नः किम्
चन आममत् इन्द्राय इन्दो परि स्रव।।4।।

## ।। इति नवमम् मण्डलम् ।।

## ॐ

# ।।अथ दशम् मण्डलम्।।

## सूक्त-1

8769. अग्रे बृहन् उषसाम ऊर्ध्वः अस्थात्
निः-जगन्वान् तमसः ज्योतिषा आ अगात्।
अग्निः भानुना रुशता सु-अङ्गः
आ जातः विश्वा सद्नानि अप्राः।।1।।
8770. सः जातः गर्भः असि रोदस्योः
अग्ने चारुः वि-भृतः ओषधीषु।
चित्रः शिशुः परि तमांसि अक्तून्
प्र मातृभ्यः अधि कनिक्रदत् गाः।।2।।
8771. विष्णुः इत्था परमम् अस्य विदान्
जातः बृहन् अभि पाति तृतीयम्।
आसा यत् अस्य पयः अक्रत स्वम्
सचेतसः अभि अर्चन्ति अत्र।।3।।
8772. अतः ऊँ त्वा पितुभृतः जनित्रीः
अन्न-वृधम् प्रति चरन्ति अन्नैः।
ताः ईम् प्रति एषि पुनः अन्य-रूपाः
असि त्वम् विक्षु मानुषीषु होता।।4।।
8773. होतारम् चित्र-रथम् अध्वरस्य
यज्ञस्य-यज्ञस्य केतुम् रुशन्तम्।
प्रति-अर्धिम् देवस्य-देवस्य मह्ना
श्रिया तु अग्निम् अतिथिम् जनानाम्।।5।।
8774. सः तु वस्त्राणि अध पेशनानि
वसानः अग्निः नाभा पृथिव्याः।
अरुषः जातः पदे इडयाः पुरः-हितः
राजन् यक्षि इह देवान्।।6।।
8775. आ हि द्यावापृथिवी अग्ने उभे
सदा पुत्रः न मातरा ततन्थ।
प्र याहि अच्छ उशतः यविष्ठ अथ
आ वह सहस्य इह देवान्।।7।।

## सूक्त-2

8776. पिप्रीहि देवान् उशतः यविष्ठ
विद्वान् ऋतून् ऋषुपते यज इह।
ये दैव्याः ऋत्विजः तेभिः अग्ने त्वम्
होतृणाम् असि आ-यजिष्ठः।।1।।
8777. वेषि होत्रम् उप पोत्रम् जनानाम्
मन्धाता असि द्रविणः-दाः ऋतवा।
स्वाहा वयम् कृणवाम हवींषि देवः
देवान् यजतु अग्निः अर्हन्।।2।।
8778. आ देवानाम् अपि पन्थाम् अगन्म यत्
शक्नवाम तत् अनु प्र-वोडम्।
अग्निः विद्वान् सः यजात् सः इत् ऊँ
होता सः अध्वरान् सः ऋतून् कल्पयाति।।3।।
8779. यत् वः वयम् प्र-मिनाम व्रतानि
विदुषाम् देवाः अविदुः-तरासः।
अग्निः तत् विश्वम् आ पृणाति विद्वान्
येभिः देवान् ऋतुभिः कल्पयाति।।4।।
8780. यत् पाकत्रा मनसा दीन-दक्षाः
न यज्ञस्य मन्वते मर्त्यासः।
अग्निः तत् होता क्रतु-वित् विजानन्
यजिष्ठः देवान् ऋतुशः यजाति।।5।।
8781. विश्वेषाम् हि अध्वराणाम् अनीकम्
चित्रम् केतुम् जनिता त्वा जजान।
सः आ यजस्व नृवतीः अनु क्षाः
स्पार्हाः इषः क्षुमतीः विश्वजन्याः।।6।।
8782. यम् त्वा द्यावापृथिवी यम् त्वा आपः
त्वष्टा यम् त्वा सुजनिमा जजान।
पन्थाम् अनु प्र-विद्वान् पितृ-यानम्
द्युमत् अग्ने सम्-इधानः वि भाहि।।7।।

## सूक्त-3

8783. इनः राजन् अरतिः सम्-इद्धः
रौद्रः दक्षाय सुसुमान् अदर्शि।
चिकित् वि भाति भासा बृहता
असिक्रीम् एति रुशतीम् अप-अजन्।।1।।
8784. कृष्णाम् यत् एनीम् अभि वर्पसा
भूत् जनयन् योषाम् बृहतः पितुः जाम्।
ऊर्ध्वम् भानुम् सूर्यस्य स्तभायन्
दिवः वसुभिः अरतिः विभाति।।2।।
8785. भद्रः भद्रया सचमानः आ अगात्
स्वसारम् जारः अभि एति पश्चात्।
सु-प्रकेतैः द्युभिः अग्निः वि-तिष्ठन्
रुशत्-भिः वर्णैः अभि रामम् अस्थात्।।3।।
8786. अस्य यामासः बृहतः न वग्नून्
इन्धानाः अग्नेः सख्युः शिवस्य।
ईड्यस्य वृष्णः बृहतः सु-आसः
भामासः यामन् अक्तवः चिकित्रे।।4।।
8787. स्वना न यस्य भामासः

पवन्ते रोचमानस्य बृहतः सुदिवः।
ज्येष्ठेभिः यः तेजिष्ठैः क्रीडमत्-भिः
वर्षिष्ठेभिः भानुभिः नक्षति द्याम्।।5।।
8788. अस्य शुष्मासः ददृशान-पवेः
जेहमानस्य स्वनयन् नियुत्-भिः।
प्रत्नेभिः यः रुशत्-भिः देवतमः वि
रेभत्-भिः अरतिः भाति विभ्वा।।6।।
8789. सः आ वक्षि महि नः आ च
सत्सि दिवः-पृथिव्योः अरतिः युवत्योः।
अग्निः सुतुकः सुतुकेभिः अश्वैः
रभस्वत्-भिः रभस्वान् आ इह गम्याः।।7।।

## सूक्त-4

8790. प्र ते यक्षि प्र ते इयर्मि मन्म
भुवः यथा वन्द्यः नः हवेषु।
धन्वन्-इव प्रपा असि त्वम्
अग्ने इयक्षवे पूरवे प्रत्न राजन्।।1।।
8791. यम् त्वा जनासः अभि सम्-चरन्ति
गावः उष्मण-इव व्रजम् यविष्ठ।
दूतः देवानाम् असि मर्त्यानाम्
अन्तः महान् चरसि रोचनेन।।2।।
8792. शिशुम् न त्वा जेन्यम् वर्धयन्ती
माता बिभर्ति सचनस्यमाना।
धनोः अधि प्र-वता यासि हर्यन्
जिगीषसे पशुः-इव अव-सृष्टः।।3।।
8793. मूराः अमूर न वयम् चिकित्वः
महित्वम् अग्ने त्वम् अङ्ग वित्से।
शये वव्रिः चरति जिह्वया अदन्
रेरिह्यते युवतिम् विश्पतिः सन्।।4।।
8794. कूचित् जायते सनयासु नव्यः
वने तस्थौ पलितः धूमकेतुः।
अस्नाता आपः वृषभः न प्र वेति
सचेतसः यम् प्रनयन्त मर्ताः।।5।।
8795. तनूत्यजा-इव तस्करा वनर्गू
रशनाभिः दशभिः अभि अधीताम्।
इयम् ते अग्ने नव्यसी मनीषा युक्ष्व
रथम् न शुचयत्-भिः अङ्गैः।।6।।
8796. ब्रह्म च ते जातवेदः नमः च
इयम् च गीः सदम् इत् वर्धनी भूत्।
रक्ष नः अग्ने तनयानि तोका रक्ष
उत नः तन्वः अप्र-युच्छन्।।7।।

## सूक्त-5

8797. एकः समुद्रः धरुणः रयीणाम्
अस्मत् हृदः भूरि-जन्मा वि चष्टे।
सिसक्ति ऊधः निण्योः उपस्थे उत्सस्य
मध्ये नि-हितम् पदम् वेः।।1।।
8798. समानम् नीडम् वृषणम् वसानाः
सम् जग्मिरे महिषाः अर्वतीभिः।
ऋतस्य पदम् कवयः नि पान्ति
गुहा नामानि दधिरे पराणि।।2।।
8799. ऋतयिनी मायिनी सम् दधाते
मित्वा शिशुम् जज्ञतुः वर्धयन्ती।
विश्वस्य नाभिम् चरतः ध्रुवस्य कवेः
चित् तन्तुम् मनसा वियन्तः।।3।।
8800. ऋतस्य हि वर्तनयः सुजातम्
इषः वाजाय प्र-दिवः सचन्ते।
अधीवासम् रोदसी ववसाने
घृतैः अन्नैः ववृधाते मधूनाम्।।4।।
8801. सप्त स्वसृः अरुषीः वावशानाः
विद्वान् मध्वः उत् जभार दृशे कम्।
अन्तः येमे अन्तरिक्षे पुराजाः
इच्छन् वव्रिम् अविदत् पूषणस्य।।5।।
8802. सप्त मर्यादाः कवयः ततक्षुः तासाम्
एकाम् इत् अभि अंहुरः गात्।
आयोः ह स्कम्भः उपमस्य नीड
पथाम् विसर्गे धरुणेषु तस्थौ।।6।।
8803. असत् च सत् च परमे वि-ओमन्
दक्षस्य जन्मन् अदितेः उपस्थे।
अग्निः ह नः प्रथमजाः ऋतस्य
पूर्वे आयुनि वृषभः च धेनुः।।7।।

## सूक्त-6

8804. अयम् सः यस्य शर्मन् अवः-भिः
अग्नेः एधते जरिता अभिष्टौ।
ज्येष्ठेभिः यः भानुभिः ऋषूणाम्
परि-एति परि-वीतः विभावा।।1।।
8805. यः भानुभिः विभावा विभाति
अग्निः देवेभिः ऋतवा अजस्रः।
आ यः विवाय सख्या सखिभ्यः
अपरि-हृतः अत्यः न सप्तिः।।2।।
8806. ईशे यः विश्वस्याः देववीतेः
ईशे विश्वआयुः उषसः विउष्टौ।
आ यस्मिन् मना हवींषि अग्नौ
अरिष्ट-रथः स्कभ्नाति शूषैः।।3।।
8807. शूषेभिः वृधः जुषाणः अर्कैः
देवान् अच्छ रघु-पत्वा जिगाति।

मन्द्रः होता सः जुह्वा यजिष्ठः
सम्-मिश्लः अग्निः आ जिघर्ति देवान्।।4।।
8808. तम् उस्राम् इन्द्रम् न रेजमानम्
अग्निम् गीः-भिः नमः-भः आ कृणुध्वम्।
आ यम् विप्रासः मति-भिः गृणन्ति
जात-वेदसम् जुह्वम् सहानाम्।।5।।
8809. सम् यस्मिन् विश्वा वसूनि
जग्मुः वाजे न अश्वाः सप्ति-वन्तः एवैः।
अस्मे ऊतीः इन्द्रवात-तमाः
अर्वाचीनाः अग्ने आ कृणुष्व।।6।।
8810. अध हि अग्ने मह्ना निसद्य
सद्यः जजानः हव्यः बभूथ।
तम् ते देवासः अनु केतम् आयन्
अध वर्धन्त प्रथमासः ऊमाः।।7।।

## सूक्त-7

8811. स्वस्ति नः दिवः अग्ने पृथिव्याः
विश्व-आयुः धेहि यजथाय देव।
सचेमहि तव दस्म प्रकेतैः
उरुष्य नः उरुभिः देव शंसैः।।1।।
8812. इमाः अग्ने मतयः तुभ्यम् जाताः
गोभिः अश्वैः अभि गृणन्ति राधः।
यदा ते मर्तः अनु भोगम् आनट्
वसो दधानः मतिभिः सुजात।।2।।
8813. अग्निम् मन्ये पितरम् अग्निम् आपिम्
अग्निम् भ्रातरम् सदम् इत् सखायम्।
अग्नेः अनीकम् बृहतः सपर्यन्
दिवि शुक्रम् यजतम् सूर्यस्य।।3।।
8814. सिध्राः अग्ने धियः अस्मे सनुत्रीः
यम् त्रायसे दमे आ नित्य-होता।
ऋतवा सः रोहित्-अश्वः पुरुक्षुः द्युभिः
अस्मै अहभिः वामम् अस्तु।।4।।
8815. द्युभिः हितम् मित्रम्-इव प्रयोगम्
प्रत्नम् ऋत्विजम् अध्वरस्य जारम्।
बाहुभ्याम् अग्निम् आयवः अजनन्त
विक्षु होतारम् नि असादयन्त।।।5।।
8816. स्वयम् यजस्व दिवि देव देवान्
किम् ते पार्कः कृणवत् अप्रचेताः।
यथा अयजः ऋतुभिः देव देवान्
एव यजस्व तन्वम् सुजात।।6।।
8817. भव नः अग्ने अविता उत गोपाः
भव वयःकृत् उत नः वयःधाः।
रास्व च नः सुमहः हव्यदातिम्
त्रास्व उत नः तन्वः अप्र-युच्छन्।।7।।

## सूक्त-8

8818. प्र केतुना बृहता याति अग्निः
आ रोदसी वृषभः रोरवीति।
दिवः चित् अन्तान् उप-मान् उत्
आनट् अपाम् उपस्थे महिषः ववर्ध।।1।।
8819. मुमोद गर्भः वृषभः ककुत्-मान्
अस्रेमा वत्सः शिमीवान् अरावीत्।
सः देव-ताति उत्-यतानि कृण्वन्
स्वेषु क्षयेषु प्रथमः जिगाति।।2।।
8820. आ यः मूर्धानम् पित्रोः अरब्ध
नि अध्वरे दधिरे सूरः अर्णः।
अस्य पत्मन् अरुषीः अश्व-बुध्नाः
ऋतस्य योनौ तन्वः जुषन्त।।3।।
8821. उषः-इवः हि वसो अग्रम्
एषि त्वम् यमयोः अभवः विभावा।
ऋताय सप्त दधिषे पदानि
जनयन् मित्रम् तन्वे स्वायै।।4।।
8822. भुवः चक्षुः महः ऋतस्य
गोपाः भुवः वरुणः यत् ऋताय वेषि।
भुवः अपाम् नपात् जात-वेदः
भुवः दूतः यस्य हव्यम् जुजोषः।।5।।
8823. भुवः यज्ञस्य रजसः च नेता
यत्र नियुत्-भिः सचसे शिवाभिः।
दिवि मूर्धानम् दधिषे स्वःसाम्
जिह्वाम् अग्ने चकृषे हव्य-वाहम्।।6।।
8824. अस्य त्रितः क्रतुना वव्रे अन्तः
इच्छन् धीतिम् पितुः एवैः परस्य।
सचस्यमानः पित्रोः उपस्थे
जामि ब्रुवाणः आयुधानि वेति।।7।।
8825. सः पित्र्याणि आयुधानि विद्वान्
इन्द्र-इषितः आप्त्यः अभि अयुध्यत्।
त्रि-शीर्षाणम् सप्त-रश्मिम् जघन्वान्
त्वाष्ट्रस्य चित् निः ससृजे त्रितः गाः।।8।।
8826. भूरि इत् इन्द्रः उत्-इनक्षन्तम् ओजः
अव अभिनत् सत्-पतिः मन्यमानम्।
त्वाष्ट्रस्य चित् विश्व-रूपस्य गोनाम्
आ-चक्राणः त्रीणि शीर्षा परा वर्क्।।9।।

## सूक्त-9

8827. आपः हि स्थ मयः-भुवः ताः नः ऊर्जे दधातन।
महे रणाय चक्षसे।।1।।
8828. यः वः शिवतमः रसः तस्य भाजयत् इह नः।

उशतीः-इव मातरः।।2।।
8829. तस्मै अरम् गमाम वः यस्य क्षयाय जिन्वथ।
आपः जनयथ च नः।।3।।
8830. शम् नः देवीः अभिष्टये आपः भवन्तु पीतये।
शम् योः अभिः स्रवन्तु नः।।4।।
8831. ईशानाः वार्याणाम् क्षयन्तीः चर्षणीनाम्।
अपः याचामि भेषजम्।।5।।
8832. अप्सु मे सोमः अब्रवीत् अन्तः विश्वानि भेषजा।
अग्निम् च विश्व-शम्भुवम्।।6।।
8833. आपः पृणीत भेषजम् वरूथम् तन्वे मम।
ज्योक् च सूर्यम् दृशे।।7।।
8834. इदम् आपः प्र वहत यत् किम् च दुः-इतम् मयि।
यत् वा अहम् अभि-दुद्रोह यत् वा शेपे उत अनृतम्।।8।।
8835. आपः अद्य अनु अचारिषम् रसेन सम् अगस्महि।
पयस्वान् अग्ने आ गहि तम् मा सम् सृज वर्चसा।।9।।

## सूक्त-10

8836. ओ चित् सखायम् सख्या ववृत्याम्
तिरः पुरु चित् अर्णवम् जगन्वान्।
पितुः नपातम् आ दधीत वेधाः
अधि क्षमि प्र-तरम् दीध्यानः।।1।।
8837. न ते सखा सख्यम् वष्टि एतत्
सलक्ष्मा यत् विषुरूपा भवाति।
महः पुत्रासः असुरस्य वीराः
दिवः धर्तारः उर्विया परि ख्यन्।।2।।
8838. उशन्ति घ ते अमृतासः एतत्
एकस्य चित् त्यजसम् मर्त्यस्य।
नि ते मनः मनसि धायि अस्मे
जन्युः पतिः तन्वम् आ विविश्याः।।3।।
8839. न यत् पुरा चकृम कत् ह
नूनम् ऋता वदन्तः अनृतम् रपेम।
गन्धर्वः अप्सु अप्या च योषा सा
नः नाभिः परमम् जामि तत् नौ।।4।।
8840. गर्भे नु नौ जनिता दम्पती कः
देवः त्वष्टा सविता विश्व-रूपः।
नकिः अस्य प्र मिनंति व्रतानि वेद
नौ अस्य पृथिवी उत द्यौः।।5।।
8841. कः अस्य वेद प्रथमस्य अह्नः
कः ईम् ददर्श कः इह प्र वोचत्।
बृहत् मित्रस्य वरुणस्य धाम कत्
ऊ ब्रवः आहनः वीच्या नॄन्।।6।।
8842. यमस्य मा यम्यम् कामः आ
अगन् समाने योनौ सह-शेय्याय।
जाया-इव पत्ये तन्वम् रिरिच्याम्
वि चित् वृहेव रथ्या-इव चक्रा।।7।।
8843. न तिष्ठन्ति न निमिषन्ति
एते देवानाम् स्पशः इह ये चरन्ति।
अन्येन मत् आहनः याहि तूयम्
तेन वि वृह रथ्या-इव चक्रा।।8।।
8844. रात्रीभिः अस्मै अहभिः दशस्येत्
सूर्यस्य चक्षुः मुहुः उत् मिमीयात्।
दिवा पृथिव्या मिथुना सबन्धू
यमीः यमस्य बिभृयात् अजामि।।9।।
8845. आ घ ता गच्छान् उत्-तरा
युगानि यत्र जामयः कृणवन् अजामि।
उप बर्बृहि वृषभाय बाहुम् अन्यम्
इच्छस्व सुभगे पतिम् मत्।।10।।
8846. किम् भ्राता असत् यत् अनाथम् भवाति
किम् ऊँ स्वसा यत् निः-ऋतिः नि-गच्छात्।
काम-मूता बहु एतत् रपामि
तन्वा मे तन्वम् सम् पिपृग्धि।।11।।
8847. न वै ऊँ ते तन्वा तन्वम् सम् पपृच्याम्
पापम् आहुः यः स्वसारम् नि-गच्छात्।
अन्येन मत् प्रमुदः कल्पयस्व
न ते भ्राता सुभगे वष्टि एतत्।।12।।
8848. बतः बत असि यम न एव
ते मनः हृदयम् च अविदाम्।
अन्या किल त्वाम् कक्ष्या-इव युक्तम्
परि स्वजाते लिबुजा-इव वृक्षम्।।13।।
8849. अन्यम् ऊँ सु त्वम् यमि अन्यः ऊँ
त्वाम् परि स्वजाते लिबुजा-इव वृक्षम्।
तस्य वा त्वम् मनः इच्छ सः वा
तव अध कृणुष्व सम्-विदम् सुभद्राम्।।14।।

## सूक्त-11

8850. वृषा वृष्णे दुदुहे दोहसा दिवः
पयांसि यह्वः अदितेः अदाभ्यः।
विश्वम् सः वेद वरुणः यथा धिया
सः यज्ञियः यजतु यज्ञियान् ऋतून्।।1।।
8851. रपत् गन्धर्वीः अप्या च योषणा
नदस्य नादे परि पातु मे मनः।
इष्टस्य मध्ये अदितिः नि धातु नः
भ्राता नः ज्येष्ठः प्रथमः वि वोचति।।2।।
8852. सो चित् नु भद्रा क्षुमती यशस्वती
उषाः उवास मनवे स्वः-वती।
यत् ईम् उशन्तम् उशताम् अनु क्रतुम्

अग्निम् होतारम् विदथाय जीजनन्।।3।।
8853. अध त्यम् द्रप्सम् विभ्वम् विचक्षणम्
विः आ अभरत् इषितः श्येनः अध्वरे।
यदि विशः वृणते दस्मम् आर्याः
अग्निम् होतारम् अध धीः अजायत।।4।।
8854. सदा असि रण्वः यवसा-इव पुष्यते
होत्राभिः अग्ने मनुषः सुअध्वरः।
विप्रस्य वा यत् शशमानः उक्थ्यम्
वाजम् ससवान् उप-यासि भूरि-भिः।।5।।
8856. उत् ईरय पितरा जारः आ
भगम् इयक्षति हर्यतः हृत्तः इष्यति।
विवक्ति वह्निः सु-अपस्यते मखः
तविष्यते असुरः वेपते मती।।6।।
8856. यः ते अग्ने सु-मतिम् मर्तः अक्षत्
सहसः सूनो अति सः प्र शृण्वे।
इषम् दधानः वहमानः अश्वैः आ
सः द्युमान् अमवान् भूषति द्यून्।।7।।
8857. यत् अग्ने एषा सम्-इतिः भवाति
देवी देवेषु यजता यजत्र।
रत्ना च यत् विभजासि स्वधा-वः
भागम् नः अत्र वसु-मन्तम् वीतात्।।8।।
8858. श्रुधि नः अग्ने सदने सध-स्थे
युक्ष्व रथम् अमृतस्य द्रवित्नुम्।
आ नः वह रोदसी देवपुत्रे माकिः
देवानाम् अप भूः इह स्याः।।9।।

## सूक्त-12

8859. द्यावा ह क्षामा प्रथमे ऋतेन
अभिश्रावे भवतः सत्यवाचा।
देवः यत् मर्तान् यजथाय कृण्वन् सीदत्
होता प्रत्यङ् स्वम् असुम् यन्।।1।।
8860. देवः देवान् परि-भूः ऋतेन
वह नः हव्यम् प्रथमः चिकित्वान्।
धूम-केतुः सम्-इधा भाः-जीकः
मन्द्रः होता नित्यः वाचा यजीयान्।।2।।
8861. स्वावृक् देवस्य अमृतम् यदि
गोः अतः जातासः धारयन्ते उर्वी।
विश्वे देवाः अनु तत् ते यजुः गुः
दुहे यत् एनी दिव्यम् घृतम् वाः।।3।।
8862. अर्चामि वाम् वर्धाय अपः घृतस्नू
द्यावाभूमी शृणुतम् रोदसी मे।
अहा यत् द्यावः असु-नीतिम् अयन्
मध्वा नः अत्र पितरा शिशीताम्।।4।।
8863. किम् स्वित् नः राजा जगृहे कत्
अस्य अति व्रतम् चकृम कः वि वेद।
मित्रः चित् हि स्म जुहुराणः देवान्
श्लोकः न याताम् अपि वाजः अस्ति।।5।।
8864. दुः-मन्तु अत्र अमृतस्य नाम
सलक्ष्मा यत् विषु-रूपा भवाति।
यमस्य यः मनवते सु-मन्तु अग्ने
तम् ऋष्व पाहि अप्र-युच्छन्।।6।।
8865. यस्मिन् देवाः विदथे मादयन्ते
विवस्वतः सदने धारयन्ते।
सूर्ये ज्योतिः अदधुः मासि अक्तून्
परि द्योतनिम् चरतः अजस्रा।।7।।
8866. यस्मिन् देवाः मन्मनि सम्-चरन्ति
अपीच्ये न वयम् अस्य विद्म।
मित्रः नः अत्र अदितिः अनागान्
सविता देवः वरुणाय वोचत्।।8।।
8867. श्रुति नः अग्ने सदने सधस्थे
युक्ष्व रथम् अमृतस्य द्रवित्नुम्।
आ नः वह रोदसी देवपुत्रे माकिः
देवानाम् अप भूः इह स्याः।।9।।

## सूक्त-13

8868. युजे वाम् ब्रह्म पूर्व्यम् नमः-भिः
वि श्लोकः एतु पथ्या-इव सूरेः।
शृण्वन्तु विश्वे अमृतस्य पुत्राः
आ ये धामानि दिव्यानि तस्थुः।।1।।
8869. यमे-इव यतमाने यत् ऐतम्
प्र वाम् भरन् मानुषाः देवयन्तः।
आ सीदतम् स्वम् ऊँ लोकम्
विदाने स्वासस्थे भवतम् इन्दवे नः।।2।।
8870. पञ्च पदानि रुपः अनु अरोहम्
चतुः-पदीम् अनु एमि व्रतेन।
अक्षरेण प्रति मिमे एताम्
ऋतस्य नाभौ अधि सम् पुनामि।।3।।
8871. देवेभ्यः कम् अवृणीत् मृत्युम्
प्रजायै कम् अमृतम् न अवृणीत।
बृहस्पतिम् यज्ञम् अकृण्वत ऋषिम्
प्रियाम् यमः तन्वम् प्र अरिरेचीत्।।4।।
8872. सप्त क्षरन्ति शिशवे मरुत्वे
पित्रे पुत्रासः अपि अवीवतन् ऋतम्।
उभे इत् अस्य उभयस्य राजतः
उभे यतेते उभयस्य पुष्यतः।।5।।

## सूक्त-14

8873. परेयि-वांसम् प्रवतः महीः
अनु बहुभ्यः पन्थाम् अनु-पस्पशानम्।
वैवस्वतम् सम्-गमनम् जनानाम्
यमम् राजानम् हविषा दुवस्य।।1।।
8874. यमः नः गातुम् प्रथमः विवेद
न एषा गव्यूतिः अप-भर्तवै ऊँ।
यत्र नः पूर्वे पितरः परा-ईयुः एना
जज्ञानाः पथ्याः अनु स्वाः।।2।।
8875. मातली कव्यैः यमः अङ्गिरःभिः
बृहस्पतिः ऋक्वभिः ववृधानः।
यान् च देवाः ववृधुः ये च देवान्
स्वाहा अन्ये स्वधया अन्ये मदन्ति।।3।।
8876. इमम् यम् प्र-स्तरम् आ हि सीद
अंगिरः-भिः पितृ-भिः सम्-विदानः।
आ त्वा मन्त्राः कवि-शस्ताः वहन्तु
एना राजन् हविषा मादयस्व।।4।।
8877. अङ्गिरः-भिः आ गहि यज्ञियेभिः
यम वैरूपैः इह मादयस्व।
विवस्वन्तम् हुवे यः पिता ते
अस्मिन् यज्ञे बर्हिषि आ निसद्य।।5।।
8878. अङ्गिरसः नः पितरः नव-ग्वाः
अथर्वाणः भृगवः सोम्यासः।
तेषाम् वयम् सुमतौ यज्ञियानाम्
अपि भद्रे सौमनसे स्याम्।।6।।
8879. प्र इहि प्र इहि पथिभिः पूर्व्येभिः
यत्र नः पूर्वे पितरः परा-ईयुः।
उभा राजाना स्वधया मदन्ता
यमम् पश्यासि वरुणम् च देवम्।।7।।
8880. सम् गच्छस्व पितृभिः सम्
यमेन इष्टापूर्तेन परमे विओमन्।
हित्वाय अवद्यम् पुनः अस्तम् आ
इहि सम् गच्छस्व तन्वा सुवर्चाः।।8।।
8881. अप इत वि इत वि च सर्पत
अतः अस्मै एतम् पितरः लोकम् अक्रन्।
अहः-भिः अत्-भिः अक्तु-भिः वि-अक्तम्
यमः ददाति अव-सानम् अस्मै।।9।।
8882. अति द्रव सारमेयौ श्वानौ
चतुः-अक्षौ शबलौ साधुना पथा।
अथ पितृन् सु-विदत्रान् उप इहि
यमेन ये सध-मादम् मदन्ति।।10।।
8883. यौ ते श्वानौ यम रक्षितारौ
चतुः-अक्षौ पथिरक्षी नृ-चक्षसौ।
ताभ्याम् एनम् परि देहि राजन्
स्वस्ति च अस्मै अनमीवम् च धेहि।।11।।
8884. उरु-नसौ असु-तृपौ उदुंबलौ
यमस्य दूत चरतः जनान् अनु।
तौ अस्मभ्यम् दृशये सूर्याय पुनः
दाताम् असुम् अद्य इह भद्रम्।।12।।
8885. यमाय सोमम् सुनुत यमाय जुहुत हविः।
यमम् ह यज्ञः गच्छति अग्निदूतः अरम्-कृतः।।13।।
8886. यमाय घृतवत् हविः जुहोत प्र च तिष्ठत।
सः नः देवेषु आ यमत् दीर्घम् आयुः प्र जीवसे।।14।।
8887. यमाय मधुमत्-तमम् राज्ञे हव्यम् जुहोतन।
इदम् नमः ऋषिभ्यः पूर्व-जेभ्यः
पूर्वेभ्यः पथिकृत्-भ्यः।।15।।
8888. त्रि-कद्रुकेभिः पतति षट्
उर्वीः एकम् इत् बृहत्।
त्रिस्तुप् गायत्री छन्दांसि सर्वा ता यमे आ-हिता।।16।।

## सूक्त-15

8889. उत् ईरताम् अवरे उत् परासः
उत् मध्यमाः पितरः सोम्यासः।
असुम् ये ईयुः अवृकाः ऋतज्ञाः
ते नः अवन्तु पितरः हवेषु।।1।।
8890. इदम् पितृभ्यः नमः अस्तु
अद्य ये पूर्वासः ये उपरासः ईयुः।
ये पार्थिवे रजसि आ निसत्ताः
ये वा नूनम् सु-वृजनासु विक्षु।।2।।
8891. आ अहम् पितृन् सु-विदत्रान् अवित्सि
नपातम् च वि-क्रमणम् च विष्णोः।
बर्हि-सदः ये स्वधया सुतस्य भजन्त
पित्वः ते इह आ-गमिष्ठाः।।3।।
8892. बर्हि-सदः पितरः ऊती अर्वाक्इमा
वः हव्या चकृम जुषध्वम्।
ते आ गत अवसा शम्-तमेन
अथ नः शम् योः अरपः दधात।।4।।
8893. उपहूताः पितरः सोम्यासः बर्हिष्येषु नि-धिषु प्रियेषु।
ते आ गमन्तु ते इह श्रुवन्तु
अधि ब्रुवन्तु ते अवन्तु अस्मान्।।5।।
8894. आ-अच्य जानु दक्षिणतः नि-सद्य
इमम् यज्ञम् अभि गृणीत् विश्वे।
मा हिंसिष्ट पितरः केन चित् नः
यत् वः आगः पुरुषता कराम।।6।।
8895. आसीनासः अरुणीनाम् उपस्थे
रयिम् धत्त दाशुषे मर्त्याय।
पुत्रेभ्यः पितरः तस्य वस्वः प्र

यच्छत ते इह ऊर्जम् दधात।।7।।
8896. ये नः पूर्वे पितरः सोम्यासः
अनु-ऊहिरे सोम-पीथम् वसिष्ठाः।
तेभिः यमः सम्-रराणः हवींषि उशन्
उशत्-भिः प्रति-कामम् अत्तु।।8।।
8897. ये ततृषुः देवत्रा जेहमानाः
होत्रा-विदः स्तोम-तष्टासः अर्कैः।
आ अग्ने याहि सु-विदत्रेभिः अर्वाङ्
सत्यैः कव्यैः पितृभिः घर्मसत्-भिः।।9।।
8898. ये सत्यासः हविः-अदः हविः-पाः
इन्द्रेण देवैः स-रथम् दधानाः।
आ अग्ने याहि सहस्रम् देव-वन्दैः
परैः पूर्वैः पितृ-भिः घर्मसत्-भिः।।10।।
8899. अग्नि-स्वात्ताः पितरः आ इह
गच्छत सदः-सदः सदत सु-प्रनीतयः।
अत्त हवींषि प्र-यतानि बर्हिषि
अथ रयिम् सर्व-वीरम् दधातन।।11।
8900. त्वम् अग्ने ईडतः जात-वेदः
अवाट् हव्यानि सुरभीणि कृत्वी।
प्र अदाः पितृभ्यः स्वधया ते अक्षन्
अद्धि त्वम् देव प्रयता हवींषि।।12।।
8901. ये च इह पितरः रे च न इह
यान् च विद्म यान् ऊँ च न प्र-विद्म।
त्वम् वेत्थ यति ते जात-वेदः
स्वधाभिः यज्ञम् सुकृतम् जुषस्व।।13।।
8902. ये अग्निदग्धाः ये अनग्नि-दग्धाः
मध्ये दिवः स्वधया मादयन्ते।
तेभिः स्वराट् असुनीतिम् एताम्
यथा-वशम् तन्वम् कल्पयस्व।।14।।

## सूक्त-16

8903. मा एनम् अग्ने वि दहः मा अभि शोचः
मा अस्य त्वचम् चिक्षिपः मा शरीरम्।
यदा शृतम् कृणवः जातवेदः अथ
ईम् एनम् प्र हिणुतात् पितृभ्यः।।1।।
8904. शृतम् यदा करसि जातवेदः
अथ ईम् एनम् परि दत्तात् पितृभ्यः।
यदा गच्छाति असु-नीतिम् एताम्
अथ देवानाम् वश-नीः भवाति।।2।।
8905. सूर्यम् चक्षुः गच्छतु वातम् आत्मा
द्याम् च गच्छ पृथिवीम् च धर्मणा।
अपः वा गच्छ यदि तत्र ते हितम्
ओषधीषु प्रति तिष्ठ शरीरैः।।3।।
8906. अजः भागः तपसा तम् तपस्व
तम् ते शोचिः तपतु तम् ते अर्चिः।
याः ते शिवाः तन्वः जातवेदः ताभिः
वह एनम् सुकृताम् ऊँ लोकम्।।4।।
8907. अव सृज पुनः अग्ने पितृभ्यः
यः ते आ-हुतः चरति स्वधाभिः।
आयुः वसानः उप वेतु शेषः
सम् गच्छताम् तन्वा जातवेदः।।5।।
8908. यत् ते कृष्णः शकुनः आ-तुतोद्
पिपीलः सर्पः उत् वा श्वापदः।
अग्निः तत् विश्व-अत् अगदम् कृणोतु
सोमः च यः ब्राह्मणान् आ-विवेश।।6।।
8909. अग्नेः वर्म परि गोभिः व्ययस्व
सम् प्र ऊर्णुष्व पीवसा मेदसा च।
न इत् त्वा धृष्णुः हरसा जर्हृषाणः
दधृक् विधक्ष्यन् परि-अङ्खयाते।।7।।
8910. इमम् अग्ने चमसम् मा वि जिह्वरः
प्रियः देवानाम् उत् सोम्यानाम्।
एषः यः चमसः देव-पानः
तस्मिन् देवाः अमृताः मादयन्ते।।8।।
8911. क्रव्य-अदम् अग्निम् प्र हिणोमि
दूरम् यमराज्ञः गच्छतु रिप्र-वाहः।
इह एव अयम् इतरः जात-वेदाः
देवेभ्यः हव्यम् वहतु प्र-जानन्।।2।।
8912. यः अग्निः क्रव्य-अत् प्र-विशेष वः
गृहम् इमम् पश्यन् इतरम् जात-वेदसम्।
तम् हरामि पितृ-यज्ञाय देवम् सः
घर्मम् इन्वात् परमे सधस्थे।।10।।
8913. यः अग्निः क्रव्य-वाहनः पितृन् यक्षत् ऋत-वृधः।
प्र इत् ऊ हव्यानि वोचति देवेभ्यः च पितृभ्यः आ।।11।।
8914. उशन्तः त्वा नि धीमहि उशन्तः सम् इधीमहि।
उशन् उशतः आ वह पितृन् हविषे अत्तवे।।12।।
8915. यम् त्वम् अग्ने सम्-अदहः
तम् ऊँ निः वापय पुनः।
कियाम्बु अत्र रोहतु पाक्-दूर्वा वि-अल्कशा।।13।।
8916. शीतिके शीतका-वति ह्लादिके ह्लादिका-वति।
मण्डूक्या सु सम् गमः इमम् सु अग्निम् हर्षय।।14।।

## सूक्त-17

8917. त्वष्टा दुहित्रे वहतुम् कृणोति इति
इदम् विश्वम् भुवनम् सम् एति।
यमस्य माता परि-उह्यमाना
महः जाया विवस्वतः ननाश।।1।।

8918. अप अगूहन् अमृताम् मर्त्येभ्यः
कृत्वी सवर्णाम् अददुः विवस्वते।
उत अश्विनौ अभरत् यत् तत् आसीत्
अजहात् ॐ द्वा मिथुना सरण्यूः।।2।।
8919. पूषा त्वा इतः च्यवयतु प्र
विद्वान् अनष्टपशुः भुवनस्य गोपाः।
सः त्वा एतेभ्य- परि ददत् पितृभ्यः
अग्निः देवेभ्यः सु-विदत्रियेभ्यः।।3।।
8920. आयुः विश्व-आयुः परि पासति
त्वा पूषा त्वा पातु प्र-पथे पुरस्तात्।
यत्र आसते सुकृतः यत्र ते ययुः
तत्र त्वा देवः सविता दधातु।।4।।
8921. पूषा इमाः आशाः अनु वेद सर्वाः
सः अस्मान् अभय-तमेन नेषत्।
स्वस्तिदाः आघृणिः सर्ववीरः
अप्रयुच्छन् पुरः एतु प्रजानन्।।5।।
8922. प्रपथे पथाम् अजनिष्ट
पूषा प्रपथे दिवः प्रपथे पृथिव्याः।
उभे अभि प्रियतमे सधस्थे
आ च परा च चरति प्रजानन्।।6।।
8923. सरस्वतीम् देवयन्तः हवन्ते
सरस्वतीम् अध्वरे तायमाने।
सरस्वतीम् सुकृतः अह्वयन्त
सरस्वती दाशुषे वार्यम् दात्।।7।।
8924. सरस्वति या सरथम् ययाथ
स्वधाभिः देवि पितृभिः मदन्ती।
आ-सद्य अस्मिन् बर्हिषि मादयस्व
अनमीवाः इषः आ धेहि अस्मे।।8।।
8925. सरस्वतीम् याम् पितरः हवन्ते
दक्षिणा यज्ञम् अभि-नक्षमाणाः।
सहस्र-अर्घम् इड अत्र भागम्
रायः पोषम् यजमानेषु धेहि।।9।।
8926. आपः अस्मान् मातरः शुन्धयन्तु
घृतेन नः घृतप्वः पुनन्तु।
विश्वम् हि रिप्रम् प्र-वहन्ति देवीः उत्
इत् आभ्यः शुचिः आ पूतः एमि।।10।।
8927. द्रप्सः चस्कन्द प्रथमान् अनु द्यून्
इमम् च योनिम् अनु यः च पूर्वः।
समानम् योनिम् अनु सम्-चरन्तम्
द्रप्सम् जुहोमि अनु सप्त होत्राः।।11।।
8928. यः ते द्रप्सः स्कन्दति यः ते अंशुः
बाहु-च्युतः धिषणायाः उप-स्थात्।
अध्वर्योः वा परि वा यः पवित्रात्
तम् ते जुहोमि मनसा वषट्-कृतम्।।12।।
8929. यः ते द्रप्सः स्कन्नः यः ते
अंशुः अवः च यः परः सुचा।
अयम् देवः बृहस्पतिः सम् तम् सिञ्चतु राधसे।।13।।
8930. पयस्वतीः ओषधयः पयस्वत् मामकम् वचः।
अपाम् पयस्वत् इत् पयः तेन मा सह शुन्धत।।14।।

## सूक्त-18

8931. परम् मृत्यो अनु परा इहि
पन्थाम् यः ते स्व-इतरः देव-यानात्।
चक्षुष्मते शृण्वते ते ब्रवीमि मा नः
प्रजाम् रिरिषः मा उत वीरान्।।1।।
8932. मृत्योः पदम् योपयन्तः यत्
ऐत द्राघीयः आयुः प्र-तरम् दधानाः।
आ-प्यायमानाः प्रजया धनेन
शुद्धाः पूताः भवत यज्ञियासः।।2।।
8933. इमे जीवाः वि मृतैः आ अववृत्रन्
अभूत् भद्रा देव-हूतिः नः अद्य।
प्राञ्चः अगाम नृतये हसाय
द्राघीयः आयुः प्र-तरम् दधानाः।।3।।
8934. इषम् जीवेभ्यः परिधिम् दधामि मा
एषाम् नु गात अपरः अर्थम् एतम्।
शतम् जीवन्तु शरदः पुरूचीः
अन्तः मृत्युम् दधताम् पर्वतेन।।4।।
8935. यथा अहानि अनुपूर्वम् भवन्ति
यथा ऋतवः ऋतुभिः यन्ति साधु।
यथा न पूर्वम् अपरः जहाति एव
धातः आयूंषि कल्पय एषाम्।।5।।
8936. आ रोहत आयुः जरसम् वृणानाः
अनु-पूर्वम् यतमानाः यति स्थ।
इह त्वष्टा सुजनिम सजोषाः
दीर्घम् आयुः करति जीवसे वः।।6।।
8937. इमाः नारीः अविधवाः सुपत्नीः
आ-अञ्जनेन सर्पिषा सम् विशन्तु।
अनश्रवः अनमीवाः सुरत्नाः आ
रोहन्तु जनयः योनिम् अग्रे।।7।।
8938. उत् ईर्ष्व नारि अभि जीव-लोकम्
गत-असुम् एतम् उप शेष आ इहि।
हस्त-ग्राभस्य दिधिषोः तव इदम्
पत्युः जनि-त्वम् अभि सम्-बभूथ।।8।।
8939. धनुः हस्तात् आ-ददानः मृतस्य
अस्मे क्षत्राय वर्चसे बलाय।
अत्र एव त्वम् इह वयम् सुवीराः

विश्वाः स्पृधः अभिमातीः जयेम।।9।।
8940. उप सर्प मातरम् भूमिम् एताम्
उरु-व्यचसम् पृथिवीम् सुशेवाम्।
ऊर्ण-म्रदाः युवतिः दक्षिणा-वते
एषा त्वा पातु निः-ऋतेः उपस्थात्।।10।।
8941. उत् श्वञ्चस्व पृथिवि मा नि बाधथाः
सु-उपायना अस्मै भव सु-उपवञ्चना।
माता पुत्रम् यथा सिचा अभि एनम् भूमे ऊर्णुहि।।11।।
8942. उत्-श्वञ्चमाना पृथिवी सु तिष्ठतु
सहस्रम् मितः उप हि श्रयन्ताम्।
ते गृहासः घृत-श्चुतः भवन्तु
विश्वाहा अस्मै शरणाः सन्तु अत्र।।12।।
8943. उत् ते स्तभ्नामि पृथिवीम् त्वत् परि
इमम् लोगम् नि-दधत् मो अहम् रिषम्।
एताम् स्थूणाम् पितरः धारयन्तु
ते अत्र यमः सदना ते मिनोतु।।13।।
8944. प्रतीचीने माम् अहनि इष्वाः पर्णम्-इव आ दधुः।
प्रतीचीम् जग्रभ वाचम् अश्वम् रशनया यथा।।14।।

## सूक्त-19

8945. नि वर्तध्वम् मा अनु गात
असमान् सिसक्त रेवतीः।
अग्नीषोमा पुनर्वसू अस्मे धारयतम् रयिम्।।1।।
8946. पुनः एनाः नि वर्तय पुनः एनाः नि आ कुरु।
इन्द्रः एनाः नि यच्छतु अग्निः एनाः उप-अजतु।।2।।
8947. पुनः एताः नि वर्तन्ताम् अस्मिन् पुष्यन्तु गोपतौ।
इह एव अग्ने नि धारय इह तिष्ठतु या रयिः।।3।।
8948. यत् नि-यानम् नि-अयनम्
सम्-ज्ञानम् यत् परा-अयनम्।
आ-वर्तनम् नि-वर्तनम् यः गोपाः अपि तम् हुवे।।4।।
8949. यः उत्-आनट् वि-अयनम्
यः उत्-आनट् परा-अयनम्।
आवर्तनम् नि-वर्तनम् अपि गोपाः नि वर्तताम्।।5।।
8950. आ निवर्त नि वर्तय पुनः नः इन्द्र गाः देहि।
जीवाभिः भुनजामहै।।6।।
8951. परि वः विश्वतः दधे ऊर्जा घृतेन पयसा।
ये देवाः के च यज्ञियाः ते रय्या सम् सृजन्तु नः।।7।।
8952. आ निवर्तन वर्तय नि निवर्तन वर्तय।
भूम्याः चतस्रः प्र-दिशः ताभ्यः एनाः नि वर्तय।।8।।

## सूक्त-20

8953. भद्रं नः अपि वातय मनः।।1।।
8954. अग्निम् ईड भुजाम् यविष्ठम्
शासा मित्रम् दुः-धरीतुम्।
यस्य धर्मन् स्वः एनीः सपर्यन्ति मातुः ऊधः।।2।।
8955. यम् आसा कृपनीडम् भासा-केतुम् वर्धयन्ति।
भ्राजते श्रेणिदन्।।3।।
8956. अर्यः विशाम् गातुः एति
प्र यत् आनट् दिवः अन्तान्।
कविः अभ्रम् दीद्यानः।।4।।
8957. जुषत् हव्या मानुषस्य ऊर्ध्वः तस्थौ ऋभ्वा यज्ञे।
मिन्वन् सद्म पुरः एति।।5।।
8958. सः हि क्षेमः हविः यज्ञः
श्रुष्टी इत् अस्य गातुः एति।
अग्निम् देवाः वाशी-मन्तम्।।6।।
8959. यज्ञ-सहम् दुवः इषे अग्निम् पूर्वस्य शेवस्य।
अद्रेः सूनुम् आयुम् आहुः।।7।।
8960. नरः ये के च अस्मत् आ
विश्वा इत् ते वामे आ स्युः।
अग्निम् हविषा वर्धन्तः।।8।।
8961. कृष्णः श्वेतः अरुषः यामः अस्य
बध्नः ऋज्रः उत शोणः यशस्वान्।
हिरण्यरूपम् जनिता जजान।।9।।
8962. एव ते अग्ने विमदः मनीषाम्
ऊर्जः नपात् अमृतेभिः सजोषाः।
गिरः वक्षत् सु-मतीः इयानः इषम् ऊर्जम्
सु-क्षितिम् विश्वम् आ अभारित्यभाः।।10।।

## सूक्त-21

8963. आ अग्निम् न स्ववृक्तिभिः होतारम् त्वा वृणीमहे।
यज्ञाय स्तीर्ण-बर्हिषे वि वः मदे
शीरम् पावक-शोचिम् विवक्षसे।।1।।
8964. त्वाम् ऊँ ते सु-आभुवः शुम्भन्ति अश्वराधसः।
वेति त्वाम् उप-सेचनी वि वः मदे
ऋजीतिः अग्ने आहुतिः विवक्षसे।।2।।
8965. त्वे धर्माणः आसते जुहूभिः सिञ्चतीः-इव।
कृष्णा रूपाणि अर्जुना वि वः मदे
विश्वाः अधि श्रियः धिषे विवक्षसे।।3।।
8966. यम् अग्ने मन्यसे रयिम् सहसा-वन् अमर्त्य।
तम् आ नः वाजसातये वि वः मदे
यज्ञेषु चित्रम् आ भर विवक्षसे।।4।।
8967. अग्निः जातः अतर्वणा विदत् विश्वानि काव्या।
भुवत् दूतः विवस्वतः वि वः मदे
प्रियः यमस्य काम्यः विवक्षसे।।5।।
8968. त्वाम् यज्ञेषु ईडते अग्ने प्र-यति अध्वरे।
त्वम् वसूनि काम्या वि वः मदे
विश्वा दधासि दाशुषे विवक्षसे।।6।।

8969. त्वाम् यज्ञेषु ऋत्विजम् चारुम् अग्ने नि सेदिरे।
घृत-प्रतीकम् मनुषः वि वः मदे
शुक्रम् चेतिष्ठम् अक्षभिः विवक्षसे।।7।।
8970. अग्ने शुक्रेण शोचिषा उरु प्रथयसे बृहत्।
अभि-क्रन्दन् वृषयसे वि वः मदे
गर्भम् दधासि जामिषु विवक्षसे।।8।।

## सूक्त-22

8971. कुह श्रुतः इन्द्रः कस्मिन्
अद्य जने मित्रः न श्रूयते।
ऋषीणाम् वा यः क्षये गुहा वा चर्कृषे गिरा।।1।।
8972. इह श्रुतः इन्द्रः अस्मे अद्य स्तवे वज्री ऋचीषमः।
मित्रः न यः जनेषु आ यशः चक्रे असामि आ।।2।।
8973. महः यः पतिः शवसः असामि
आ महः नृम्णस्य तूतुजिः।
भर्ता वज्रस्य धृष्णोः पिता पुत्रम्-इव प्रियम्।।3।।
8974. युजानः अश्वा वातस्य धुनी देवः देवस्य वज्रिवः।
स्यन्ता पथा विरुक्मता सृजानः स्तोषि अध्वनः।।4।।
8975. त्वम् त्या चित् वातस्य अश्वा
आ अगाः ऋज्रा त्मना वहध्यै।
ययोः देवः न मर्त्यः यन्ता नकिः विदाय्यः।।5।।
8976. अध ग्मन्ता उशना पृच्छते
वाम् कत्-अर्था नः आ गृहम्।
आ जग्मथुः पराकात् दिवः च ग्मः च मर्त्यम्।।6।।
8977. आ नः इन्द्र पृक्षसे अस्माकम् ब्रह्म उत्-यतम्।
तत् त्वा याचामहे अवः शुष्णम् यत् हन् अमानुषम्।।7।।
8978. अकर्मा दस्युः अभि नः
अमन्तुः अन्य-व्रतः अमानुषः।
त्वम् तस्य अमित्र-हन् वधः दासस्य दम्भय।।8।।
8979. त्वम् नः इन्द्र शूर शूरैः उत त्वा-ऊतासः बर्हणा।
पुरुत्रा ते बि पूर्तयः नवन्त क्षोणयः यथा।।9।।
8980. त्वम् तान् वृत्र-हत्ये चोदयः
नृन् कार्पाणे शूर वज्रि-वः।
गुहा यदि कवीनाम् विशाम् नक्षत्र-शवसाम्।।10।।
8981. मक्षु ता ते इन्द्र दान-अप्नसः आक्षाण शूर वज्रिवः।
यत् ह शुष्णस्य दम्भयः जातम् विश्वम् सयावभिः।।11।।
8982. मा अकुध्र्यक् इन्द्र शूर
वस्वीः अस्मे भूवन् अभिष्टयः।
वयम्-वयम् ते आसाम् सुम्ने स्याम वज्रिवः।।12।।
8983. अस्मे ता ते इन्द्र सन्तु
सत्या अहिंसन्तीः उप-स्पृशः।
विद्याम यासाम् भुजः धेनूनाम् न वज्रिवः।।13।।
8984. अहस्ता यत् अपदी वर्धत क्षाः शचीभिः वेद्यानाम्।
शुष्णम् परि प्र-दक्षिणित् विश्व-आयवे नि शिश्नयः।।14।।
8985. पिब-पिब इत् इन्द्र शूर सोमम्
मा रिषण्यः वसवान वसुः सन्।
उत त्रायस्व गृणतः मघोनः
महः च रायः रेवतः कृधि नः।।15।।

## सूक्त-23

8986. यजामहे इन्द्रम् वज्र-दक्षिणम्
हरीणाम् रथ्यम् वि-व्रतानाम्।
प्र श्मश्रु दोधुवत् ऊर्ध्वथा भूत्
वि सेनाभिः दयमानः वि राधसा।।1।।
8987. हरी नु अस्य या वने विदे वसु
इन्द्रः मघैः मघवा वृत्रहा भुवत्।
ऋभुः वाजः ऋभुक्षाः पत्यते शवः
अव क्ष्णौमि दासस्य नाम चित्।।2।।
8988. यदा वज्रम् हिरण्यम् इत् अथ रथम्
हरी यम् अस्य वहतः वि सूरिभिः।
आ तिष्ठति मघवा सनश्रुतः इन्द्रः
वाजस्य दीर्घ-श्रवसः पतिः।।3।।
8989. सो चित् नु वृष्टिः यूथ्या स्वा सचा
इन्द्रः श्मश्रूणि हरिता अभि प्रुष्णुते।
अव वेति सु-क्षयम् सुते मधु उत्
इत् धूनोति वातः यथा वनम्।।4।।
8990. यः वाचा विवाचः मृध्र-वाचः पुरु सहस्रा
अशिवा जघान।तत्-तत् इत् अस्य पौंस्यम्
गृणीमसि पिता-इव यः तविषीम् ववृधे शवः।।5।।
8991. स्तोमम् ते इन्द्र वि-मदाः
अजीजन् अपूर्व्यम् पुरु-तमम् सुदानवे।
विद्म हि अस्य भोजनम् इनस्य
यत् आ पशुम् न गोपाः करामहे।।6।।
8992. माकिः नः एना सख्या वि यौषुः
तव च इन्द्र वि-मदस्य च ऋषेः।
विद्म हि ते प्र-मतिम् देव जामिवत्
अस्मे ते सन्तु सख्या शिवानि।।7।।

## सूक्त-24

8993. इन्द्र सोमम् इमम् पिब मधु-मन्तम् चमू सुतम्।
अस्मे रयिम् नि धारय वि वः मदे
सहस्रिणम् पुरुवसो पुरुवसो विवक्षसे।।1।।
8994. त्वाम् यज्ञेभिः उक्थैः उप हव्येभिः ईमहे।
शची-पते शचीनाम् वि वः मदे
श्रेष्ठम् नः धेहि वार्यम् विवक्षसे।।2।।
8995. यः पतिः वार्याणाम् असि रध्रस्य चोदिता।
इन्द्र स्तोतृणाम् अविता वि वः मदे

द्विषः नः पाहि अंहसः विवक्षसे।।3।।
8996. युवम् शक्रा मायाविना समीची
इति सम्-ईची निः अमन्थतम्।
वि-मदेन यत् ईडता नासत्या निः-अमन्थतम्।।4।।
8997. विश्वे देवाः अकृपन्त सम्-ईच्योः निः-पतन्त्योः।
नासत्यौ अब्रुवन् देवाः पुनः आ वहतात् इति।।5।।
8998. मधुमत् मे परा-अयनम् मधु-मत् पुनः आ-अयनम्।
ता नः देवा देवतया युवम् मधु-मतः कृतम्।।6।।

## सूक्त-25

8999. भद्रम् नः अपि वातय मनः दक्षम् उत क्रतुम्।
अध ते सख्ये अंधसः वि वः मदे
रणन् गावः न यवसे विवक्षसे।।1।।
9000. हृदि-स्पृशः ते आसते विश्वेषु सोम धामसु।
अध कामाः इमे मम वि वः मदे
वि तिष्ठन्ते वसु-यवः विवक्षसे।।2।।
9001. उत व्रतानि सोम ते प्र अहम् मिनामि पाक्या।
अध पिता-इव सूनवे वि वः मदे मृड
नः अभि चित् वधात् विवक्षसे।।3।।
9002. सम् ऊँ प्र यन्ति धीतयः सर्गासः अवतान्-इव।
क्रतुम् नः सोम जीवसे वि वः मदे
धारय चमसान्-इव विवक्षसे।।4।।
9003. तव त्ये सोम शक्तिभिः नि-कामसः वि ऋण्विरे।
गृत्सस्य धीराः तवसः वि वः मदे
व्रजम् गोमन्तम् अश्विनम् विवक्षसे।।5।।
9004. पशुम् नः सोम रक्षसि पुरुत्रा विस्थितम् जगत्।
सम्-आकृणोषि जीवसे वि वः मदे
विश्वा सम्-पश्यन् भुवना विवक्षसे।।6।।
9005. त्वम् नः सोम विश्वतः गोपाः अदाभ्यः भव।
सेध राजन् अप स्रिधः वि वः मदे
मा नः दुः-शंसः ईशत विवक्षसे।।7।।
9006. त्वम् नः सोम सुक्रतुः वयः-धेयाय जागृहि।
क्षेत्रवित्-तरः मनुषः वि वः मदे
द्रुहः नः पाहि अहंसः विवक्षसे।।8।।
9007. त्वम् नः वृत्रहन्-तम इन्द्रस्य इन्दो शिवः सखा।
यत् सीम् हवन्ते सम्-इथे वि वः मदे
युध्यमानाः तोकसातौ विवक्षसे।।9।।
9008. अयम् घ सः तुरः मदः इन्द्रस्य वर्धत प्रियः।
अयम् कक्षीवतः महः वि वः मदे
मतिम् विप्रस्य वर्धयत् विवक्षसे।।10।।
9009. अयम् विप्राय दाशुषे वाजान् इयर्ति गोमतः।
अयम् सप्तभ्यः आ वरम् वि वः मदे
प्र अन्धम् श्रोणम् च तारिषत् विवक्षसे।।11।।

## सूक्त-26

9010. प्र हि अच्छ मनीषाः स्पार्हाः यन्ति नि-युतः।
प्र दस्रा नियुत्-रथः पूषा अविष्टु माहिनः।।1।।
9011. यस्य त्यत् महित्वम् वाताप्यम् अयम् जनः।
विप्रः आ वंसत् धीतिभिः चिकेत सु-स्तुतीनाम्।।2।।
9012. सः वेद सु-स्तुतीनाम् इन्दुः न पूषा वृषा।
अभि प्सुरः प्रुषायति व्रजम् नः आ प्रुषायति।।3।।
9013. मंसीमहि त्वा वयम् अस्माकम् देव पूषन्।
मतीनाम् च साधनम् विप्राणाम् च आधवम्।।4।।
9014. प्रति-अर्धिः यज्ञानाम् अश्व-हयः रथानाम्।
ऋषिः सः नः मनुः-हितः विप्रस्य यवयत्-सखः।।5।।
9015. आ-धीषमाणायाः पतिः शुचायाः च शुचस्य च।
वासः-वायः अवीनाम् आ वासांसि मर्मृजत्।।6।।
9016. इनः वाजानाम् पतिः इनः पुष्टीनाम् सखा।
प्र श्मश्रु हर्यतः दूधोत् वि वृथा यः अदाभ्यः।।7।।
9017. आ ते रथस्य पूषन् अजाः धुरम् ववृत्युः।
विश्वस्य अर्थिनः सखा सनः-जाः अनप-च्युतः।।8।।
9018. अस्माकम् ऊर्जा रथम् पूषा अविष्टु माहिनः।
भुवत् वाजानाम् वृधः इमम् नः शृणवत् हवम्।।9।।

## सूक्त-27

9019. असत् सु मे जरितः सः अभिवेगः
यत् सुन्वते यजमानाय शिक्षम्।
अनाशीः-दाम् अहम् अस्मि प्र-हन्ता
सत्य-ध्वृतम् वृजिन-यन्तम् आभुम्।।1।।
9020. यदि इत् अहम् युधये सम्-नयानि
अदेव-यून् तन्वा शूशुजानान्।
अमा ते तुम्रम् वृषभम् पचानि तीव्रम्
सुतम् पञ्चदशम् नि सिञ्चम्।।2।।
9021. न अहम् तम् वेद यः इति ब्रवीति
अदेव-यून् सम्-अरणे जघन्वान्।
यदा अव-अख्यत् सम्-अरणम् ऋघा-वत्
आत इत् ह मे वृषजा प्र ब्रुवन्ति।।3।।
9022. यत् अज्ञातेषु वृजनेषु आसम्
विश्वे सतः मघवानः मे आसन्।
जिनामि वा इत् क्षेमे आ सन्तम् आभुम्
प्र तम् क्षिणाम् पर्वते पाद-गृह्य।।4।।
9023. न वै उँ माम् वृजने वारयन्ते
न पर्वतासः यत् अहम् मनस्ये।
मम स्वनात् कृधुकर्णः भयाते एव
इत् अनु द्यून् किरणः सम् एजात्।।5।।
9024. दर्शन् नु अत्र शृतपान् अनिन्द्रान्
बाहु-क्षदः शरवे पत्यमानान्।

घृषुम् वा ये निनिदुः सखायम्
अधि ऊँ नु एषु पवयः ववृत्युः।।6।।
9025. अभूः ऊँ औक्षीः वि ऊँ आयुः
आनट् दर्शत् नु पूर्वः अपरः नु दर्षत्।
द्वे पवस्ते परि तम् न भूतः
यः अस्य पारे रजसः विवेष।।7।।
9026. गावः यवम् प्रयुताः अर्यः अक्षन्
ताः अपश्यम् सह-गोपाः चरन्तीः।
हवाः इत् अर्यः अभितः सम् आयन्
कियत् आसु स्व-पतिः छन्दयाते।।8।।
9027. सम् यत् वयम् यवस-अदः जनानाम्
अहम् यव-अदः उरु-अज्रे अन्तः।
अत्र युक्तः अव-सातारम् इच्छात्
अथो अयुक्तम् युनजत् ववन्वान्।।9।।
9028. अत्र इत् ऊँ मे मंससे सत्यम् उक्तम्
द्वि-पात् च यत् चतुः-पात् सम्-सृजानि।
स्त्रीभिः यः अत्र वृषणम् पृतन्यात्
अयुद्धः अस्य वि भजानि वेदः।।10।।
9029. यस्य अनक्षा दुहिता जातु आस कः
ताम् विद्वान् अभि मन्याते अन्धाम्।
कतरः मेनिम् प्रति तम् मुचाते यः
ईम् वहाते यः ईम् वा वरेयात्।।11।।
9030. कियती योषा मर्यतः वधूयोः
परिप्रीता पन्यसा वार्येण।
भद्रा वधूः भवति यत् सु-पेशाः
स्वयं सा मित्रम् वनुते जने चित्।।12।।
9031. पत्तः जगार प्रत्यञ्चम् अत्ति
शीर्ष्णा शिरः प्रति दधौ वरूथम्।
आसीनः ऊर्ध्वाम् उपसि क्षिणाति न्यङ्
उत्तानाम् अनु एति भूमिम्।।13।।
9032. बृहन् अच्छायः अपलाशः अर्वा
तस्थौ माता विसितः अत्ति गर्भः।
अन्यस्याः वत्सम् रिहती मिमाय
कया भुव नि दधे धेनुः ऊधः।।14।।
9033. सप्त वीरासः अधरात् उत् आयन्
अष्ट उत्तरात्तात् सम् अजग्मिरन् ते।
नव पश्चतात् स्थिवि-मन्तः आयन्
दश प्राक् सानु वि तिरन्ति अश्नः।।15।।
9034. दशानाम् एकम् कपिलम् समानम्
तम् हिन्वन्ति क्रतवे पार्याय।
गर्भम् माता सु-धितम् वक्षणासु
अवेनन्तम् तुषयन्ती बिभर्ति।।16।।
9035. पीवानाम् मेषम् अपचन्त वीराः
नि-उप्ताः अक्षाः अनु दीवे आसन्।
द्वा धनुम् बृहतीम् अप्सु अन्तः
पवित्र-वन्ता चरतः पुनन्ता।।17।।
9036. वि क्रोशनासः विष्वञ्चः
आयन् पचाति नेमः नहि पक्षत् अर्धः।
अयम् मे देवः सविता तत् आह
द्रु-अन्नः इत् वनवत् सर्पिः-अन्नः।।18।।
9037. अपश्यम् ग्रामम् वहमानम् आरात्
अचक्रया स्वधया वर्तमानम्।
सिसक्ति अर्यः प्र युगा जनानाम्
सद्यः शिश्ना प्र-मिनानः नवीयान्।।19।।
9038. एतौ मे गावौ प्र-मरस्य युक्तौ
मो सु प्र सेधीः मुहुः इत् ममन्धि।
आपः चित् अस्य वि नशन्ति अर्थम्
सूरः च मर्कः उपरः बभूवान्।।20।।
9039. अयम् यः वज्रः पुरुधा वि-वृत्तः
अवः सूर्यस्य बृहतः पुरीषात्।
श्रवः इत् एना परः अन्यत् अस्ति
तत् अव्यथीः जरिमाणः तरन्ति।।21।।
9040. दक्षे-वृक्षे नियता मीमयत् गौः
ततः वयः प्र पतान् पुरुष-अदः।
अथ इदम् विश्वम् भुवनम् भयाते
इन्द्राय सुन्वत् ऋषये च शिक्षत्।।22।।
9041. देवानाम् माने प्रथमाः अतिष्ठन्
कृन्तत्रात् एषाम् उपराः उत् आयन्।
त्रयः तपन्ति पृथिवीम् अनूपाः
द्वा बृबूकम् वहतः पुरीषम्।।23।।
9042. सा ते जीवातुः उत तस्य विद्धि
मा स्म एतादृक् अप गूहः समर्ये।
आविः स्वः कृणुते गूहते बुसम् सः
पादुः अस्य निः-निजः न मुच्यते।।24।।

## सूक्त-28

9043. विश्वः हि अन्यः अरिः आ-जगाम्
मम इत् अह श्वशुरः न आ जगाम।
जक्षीयात् धानाः उत सोमम् पपीयात्
सु-आशितः पुनः अस्तम् जगायात्।।1।।
9044. सः रोरुवत् वृषभः तिग्म-शृङ्गः
वर्ष्मन् तस्थौ वरिमन् आ पृथिव्याः।
विश्वेषु एनम् वृजनेषु पामि यः मे
कुक्षी इति सुत-सोमः पृणाति।।2।।
9045. अद्रिणा ते मन्दिनः इन्द्र तूयान्
सुन्वन्ति सोमान् पिबसि त्वम् एषाम्।

पचन्ति ते वृषभान् अत्सि तेषाम्
पृक्षेण यत् मघवन् हूयमानः।।3।।
9046. इदम् सु मे जरितः आ चिकिद्धि
प्रति-ईपम् शापम् नद्यः वहन्ति।
लोपाशः सिंहम् प्रत्यञ्चम् अत्साः
क्रोष्टा वराहम् निः अतक्ता कक्षात्।।4।।
9047. कथा ते एतत् अहम् आ चिकेतम्
गृत्सस्य पाकः तवसः मनीषाम्।
त्वम् नः विद्वान् ऋतुथा वि वोचः
यम् अर्धम् ते मघवन् क्षेम्या धूः।।5।।
9048. एव हि माम् तवसम् वर्धयन्ति
दिवः चित् मे बृहतः उत्-तरा धूः।
पुरु सहस्रा नि शिशामि साकम्
असत्रुम् हि मा जनिता जजान।।6।।
9049. एवा हि माम् तवसम् जज्ञुः उग्रम्
कर्मन् कर्मन् वृषणम् इन्द्र देवाः।
वधीम् वृत्रम् वज्रेण मन्दसानः
अप व्रजम् महाना दाशुषे वम्।।7।।
9050. देवासः अयन् परशून् अविभ्रन्
वृश्चन्तः अभि विड्भिः आयन्।
नि सुद्रवम् दधतो वक्षणासु यत्रा
कृपीटम् अनु तत् दहन्ति।।8।।
9051. शशः क्षुरम् प्रत्यञ्चम् जगार
अद्रिम् लोगेन वि अभेदम् आरात्।
बृहन्तम् चित् ऋहते रन्धयानि
वयत् वत्सः वृषभम् शूशुवानः।।9।।
9052. सुपर्णः इत्था नखम् आ सिसाय
अवरुद्धः परि-पदम् न सिंहः।
निरुद्धः चित् महिषः तर्ष्यावान्
गोधा तस्मै अयथम् कर्षत् एतत्।।10।।
9053. तेभ्यः गोधः अयथम् कर्षत् एतत्
ये ब्रह्मणः प्रति-पीयन्ति अन्नैः।
सिमः उक्ष्णः अव-सृष्टान् अदन्ति
स्वयम् बलानि तन्वः शृणानाः।।11।।
9054. एते शमीभिः सु-शमी अभूवन्
ये हिन्विरे तन्वः सोमे उक्थैः।
नृ-वृत् वदन् उप नः माहि वाजान्
दिवि श्रवः दधिषे नाम वीरः।।12।।

## सूक्त-29

9055. वने न वा यः नि अधायि चाकन्
शुचिः वाम् स्तोमः भुरणौ अजीगः।
यस्य इत् इन्द्रः पुरु-दिनेषु होता
नृणाम् नर्यः नृ-तमः क्षपा-वान्।।1।।
9056. प्र ते अस्याः उषसः प्र अपरस्याः
नृतौ स्याम नृ-तमस्य नृणाम्।
अनु त्रि-शोकः शतम् आ अवहत् नृन्
कुत्सेन रथः यः असत् सस-वान्।।2।।
9057. कः ते मदः इन्द्र रन्त्यः भूत्
दुरः गिरः अभि उग्रः वि धाव।
कत् वाहः अर्वाक् उप मा मनीषा आ
त्वा शक्याम् उप-मम् राधः अन्नैः।।3।।
9058. कत् ऊँ द्युम्नम् इन्द्र त्वा-वतः नृन्
कया धिया करसे कत् नः आ अगन्।
मित्रः न सत्यः उरुगाय भृत्यै
अन्ने समस्य यत् असन् मनीषाः।।4।।
9059. प्र ईरय सूरः अर्थम् न पारम् ये
अस्य कामम् जनिधाः-इव ग्मन्।
गिरः च ये ते तुविजात पूर्वीः
नरः इन्द्र प्रति-शिक्षन्ति अन्नैः।।5।।
9060. मात्रे नु ते सुमिते इन्द्र पूर्वी
द्यौः मज्मना पृथिवी काव्येन।
वराय ते घृत-वन्तः सुतासः
स्वाद्मन् भवन्तु पीतये मधूनि।।6।।
9061. आ मध्वः अस्मै असिचन् अमत्रम्
इन्द्राय पूर्णम् सः हि सत्य-राधाः।
सः ववृधे वरिमन् आ पृथिव्याः
अभि क्रत्वा नर्यः पौंस्यैः च।।7।।
9062. वि आनट् इन्द्रः पृतनाः सु-अजाः
आ अस्मै यतन्ते सख्याय पूर्वीः।
आ स्म रथम् न पृतनासु तिष्ठ
यम् भद्रया सु-मत्या चोदयासे।।8।।

## सूक्त-30

9063. प्र देव-त्रा ब्रह्मणे गातुः एतु
अपः अच्छ मनसः न प्रयुक्ति।
महीम् मित्रस्य वरुणस्य धासिम्
पृथुज्रयसे रीरध सुवृक्तिम्।।1।।
9064. अध्वर्यवः हविष्मन्तः हि भूत
अच्छ अपः इत् उशतीः उशन्तः।
अव याः चष्टे अरुणः सुपर्णः तम् आ
अस्यध्वम् ऊर्मिम् अद्य सु-हस्ताः।।2।।
9065. अध्वर्यवः अपः इत समुद्रम्
अपाम् नपातम् हविषा यजध्वम्।
सः वः ददत् ऊर्मिम् अद्य सु-पूतम्
तस्मै सोमम् मधु-मन्तम् सुनोत।।3।।

9066. यः अनिध्मः दीदयत् अप्सु
अन्तः यम् विप्रासः ईडते अध्वरेषु।
अपाम् नपात् मधु-मतीः अपः
दाः याभिः इन्द्रः ववृधे वीर्याय।।4।।
9067. याभिः सोमः मोदते हर्षते च
कल्याणीभिः युवतिभिः न मर्यः।
ताः अध्वर्यो अपः अच्छ परा इहि
यत् आ-सिञ्चाः ओषधीभिः पुनीतात्।।5।।
9068. एव इत् यूने युवतयः नमन्त
यत् ईम् उशन् उशतीः एति अच्छ।
सम् जानते मनसा सम् चिकित्रे
अध्वर्यवः धिषणा आपः च देवीः।।6।।
9069. यः वः वृताभ्यः अकृणोत् ऊँ लोकम्
यः वः मह्याः अभिशस्तेः अमुञ्चत्।
तस्मै इंद्राय मधुमन्तम् ऊर्मिम्
देव-मादनम् प्र हिणोतन आपः।।7।।
9070. प्र अस्मै हिनोत मधु-मन्तम् ऊर्मिम्
गर्भः यः वः सिन्धवः मध्वः उत्सः।
घृत-पृष्ठम् ईड्यम् अध्वरेषु
आपः रेवतीः शृणुत हवम् मे।।8।।
9071. तम् सिन्धवः मत्सरम् इन्द्र-
पानम् उर्मिम् प्र हत यः उभे यर्ति।
मद-च्युतम् औशानम् नभः-जाम्
परि त्रि-तन्तुम् वि-चरन्तम् उत्सम्।।9।।
9072. आ-वर्वृततीः अध नु द्वि-धाराः
गोषु-युधः न नि-यवम् चरन्तीः।
ऋषे जनित्रीः भुवनस्य पत्नीः
अपः वन्दस्व सवृधः स-योनीः।।10।।
9073. हिनोत नः अध्वरम् देव-यज्या
हिनोत ब्रह्म सनये धनानाम्।
ऋतस्य योगे वि स्यध्वम् ऊधः
श्रुष्टीवरीः भूतन् अस्मभ्यम् आपः।।11।।
9074. आपः रेवतीः क्षयथ हि वस्वः
क्रतुम् च भद्रम् बिभृथ अमृतम् च।
रायः च स्थ सु-अपत्यस्य पत्नीः
सरस्वती तत् गृणते वयः धात्।।12।।
9075. प्रति यत् आपः अदृश्रम् आयतीः
घृतम् पयांसि विभ्रतीः मधूनि।
अध्वर्युभिः मनसा संविदाना
इन्द्राय सोमम् सुषुतम् भरन्तीः।।13।।
9076. एमा अग्मन् रेवतीः जीवधन्याः
अध्वर्यवः सादयता सखायः।
नि बर्हिषि धत्तन सोम्यासो
अपाम् नप्त्र संविदानासः एनाः।।14।।
9077. आ अग्मन् आपः उशतीः बर्हिः
आ इदम् नि अध्वरे असदन् देव-यन्तीः।
अध्वर्यवः सुनुत इन्द्राय सोमम्
अभूत् ऊँ वः सु-शका देवयज्या।।15।।

## सूक्त-31

9078. आ नः देवानाम् उप वेतु शंसः
विश्वेभिः तुरैः अवसे यजत्रः।
तेभिः वयम् सु-सखायः भवेम
तरन्तः विश्वा दुः-इता स्याम।।1।।
9079. परि चित् मर्तः द्रविणम् ममन्यात्
ऋतस्य पथा नमसा आ विवासेत्।
उत स्वेन क्रतुना सम् वदेत
श्रेयांसम् दक्षम् मनसा जगृभ्यात्।।2।।
9080. अधायि धीतिः अससृग्रम् अंशाः
तीर्थे न दस्यम् उप यन्ति ऊमाः।
अभि आनश्म सुवितस्य शूषम्
नवेदसः अमृतानाम् अभूम्।।3।।
9081. नित्यः चाकन्यात् स्व-पतिः
दमूनाः यस्मै ऊँ देवः सविता जजान।
भगः त्वा गोभिः अर्यमा ईम् अनज्यात्
सः अस्मै चारुः छदयत् उत स्यात्।।4।।
9082. इयम् सा भूयाः उषसाम्-इव क्षाः
यत् ह क्षुमन्तः शवसा सम्-आयन्।
अस्य स्तुतिम् जरितुः भिक्षमाणाः
आ नः शग्मासः उप यन्तु वाजाः।।5।।
9083. अस्य इत् एषा सुमतिः पप्रथाना
अभवत् पूर्व्या भूमना गौः।
अस्य सनीड असुरस्य योनौ
समाने आ भरणे बिभ्रमाणाः।।6।।
9084. किम् स्वित् वनम् कः ऊँ सः वृक्षः
आस यतः द्यावापृथिवी निः-ततक्षुः।
सन्तस्थाने अजरे इतऊती अहानि पूर्वीः उषसः जरन्त।।7।।
9085. न एतावत् एना परः अन्यत् अस्ति
उक्षासः द्यावापृथिवी बिभर्ति।
त्वचम् पवित्रम् कृणुत स्वधा-वान्
यत् ईम् सूर्यम् न हरितः वहन्ति।।8।।
9086. स्तेगः न क्षाम् अति एति पृथ्वीम्
मिहम् न वातः वि हवाति भूम।
मित्रः यत्र वरुणः अज्यमानः अग्निः
वने न वि असृष्ट शोकम्।।9।।
9087. स्तरीः यत् सूत सद्यः अज्यमाना

व्यथिः अव्यथीः कृणुत स्वगोपा।
पुत्रः यत् पूर्वः पित्रोः जनिष्ट शम्याम्
गौः जगार यत् ह पृच्छान्।।10।।
9088. उत् कण्वम् नृ-सदः पुत्रम् आहुः
उत श्यावः धनम् आ अदत्त वाजी।
प्र कृष्णाय रुशत् अपिन्वत् ऊधः
ऋतम् अत्र नकिः अस्मै अपीपेत्।।11।।

## सूक्त-32

9089. प्र सु ग्मन्ता धियसानस्य सक्षणि
वरेभिः वरान् अभि सु प्रसीदतः।
अस्माकम् इन्द्रः उभयम् जुजोषति
यत् सोम्यस्य अन्धसः बुबोधति।।1।।
9090. वि इन्द्र यासि दिव्यानि रोचना
वि पार्थिवानि रजसा पुरु-स्तुत।
ये त्वा वहन्ति मुहुः अध्वरान् उप
ते सु वन्वन्तु वग्वनान् अराधसः।।2।।
9091. तत् इत् मे छन्त्सत् वपुषः वपुःतरम्
पुत्रः यत् जानम् पित्रोः अधि-ईयति।
जाया पतिम् वहति वग्नुना सु-मत्
पुंसः इत् भद्रः वहतुः परिकृतः।।3।।
9092. तत् इत् सध-स्थम् अभि चारु दीदय
गावः यत् शासन् वहतुम् न धेनवः।
माता यत् मन्तुः यूथस्य पूर्व्या अभि
वाणस्य सप्त-धातुः इत् जनः।।4।।
9093. प्र वः अच्छ रिरिचे देवयुः
पदम् एकः रुद्रेभिः याति तुर्वणिः।
जरा वा येषु अमतेषु दावने परि
वः ऊमेभ्यः सिञ्चत मधु।।5।।
9094. नि-धीयमानम् उप-गूळम्
अप्सु प्र मे देवानाम् व्रतपाः उवाच।
इन्द्रः विद्वान् अनु हि त्वा चचक्ष तेन
अहम् अग्ने अनु-शिष्टः आ अगाम्।।6।।
9095. अक्षेत्र-वित् क्षेत्र-विदम् हि अप्राट्
सः प्र एहि क्षेत्र-विदा अनु-शिष्टः।
एतत् वै भद्रम् अनु-शासनस्य
उत स्रुतिम् विन्दति अञ्जसीनाम्।।7।।
9096. अद्य इत् ऊँ प्र आनीत् अममन्
इमा अहा अपिवृतः अधयत् मातुः ऊधः।
आ ईम् एनम् आप जरिमा युवानम्
अहेळन् वसुः सुमनाः बभूव।।8।।
9097. एतानि भद्रा कलश क्रियाम कुरु-श्रवण
ददतः मघानि दानः इत् वः मघवानः।
सः अस्तु अयम् च सोमः हृदि यम् बिभर्मि।।9।।

## सूक्त-33

9098. प्र मा युयुज्रे प्र-युजः जनानाम्
वहामि स्म पूषणम् अन्तरेण।
विश्वे देवासः अध माम् अरक्षन् दुःशासुः
आ अगात् इति घोषः आसीत्।।1।।
9099. सम् मा तपन्ति अभितः सपत्नीः-इव पर्शवः।
नि बाधते अमतिः नग्नता जसुः वेः न वेवीयते मतिः।।2।।
9100. मूषः न शिश्ना वि अदन्ति मा
आध्यः स्तोतारम् ते शतक्रतो।
सकृत् सु नः मघवन् इन्द्र
मृडय अध पिता-इव नः भव।।3।।
9101. कुरु-श्रवणम् अवृणि राजानम् त्रासदस्यवम्।
मंहिष्ठम् वाघताम् ऋषिः।।4।।
9102. यस्य मा हिरतः रथे तिस्रः वहन्ति साधुया।
स्तवै सहस्रदक्षिणे।।5।।
9103. यस्य प्रस्वादसः गिरः उपम-श्रवसः पितुः।
क्षेत्रम् न रण्वम् ऊचुषे।।6।।
9104. अधि पुत्र उपम-श्रवः नपात् मित्र-अतिथेः इहि।
पितुः ते अस्मि वन्दिता।।7।।
9105. यत् ईशीय अमृतानाम् उत् वा मर्त्यानाम्।
जीवेत् इत् मघवा मम।।8।।
9106. न देवानाम् अति व्रतम् शत-आत्मा चन् जीवति।
तथा युजा वि ववृते।।9।।

## सूक्त-34

9107. प्रावेपाः मा बृहतः मादयन्ति
प्रवातेजाः इरिणे वर्वृतानाः।
सोमस्य-इव मौज-वतस्य भक्षः
विभीदकः जागृविः मह्यम् अच्छान्।।1।।
9108. न मा मिमेथ न जिहीळ एषा
शिवा सखिभ्यः उत मह्यम् आसीत्।
अक्षस्य अहम् एक-परस्य हेतोः
अनु-व्रताम् अप जायाम् अरोधम्।।2।।
9109. द्वेष्टि श्वश्रूः अप जाया रुणद्धि
न नाथितः विन्दते मर्डितारम्।
अश्वस्य-इव जरतः वरुणस्य न अहम्
विन्दामि कितवस्य भोगम्।।3।।
9110. अन्ये जायाम् परि मृशन्ति अस्य
यस्य अगृधत् वेदने वाजी अक्षः।
पिता माता भ्रातरः एनम् आहुः न
जानीमः नयत बद्धम् एतम्।।4।।
9111. यत् आदीध्यते न दविषाणि

एभिः परायत्-भ्यः अव हीये सखिभ्यः।
नि-उप्ताः च बभ्रवः वाचम् अक्रत एमि
इत् एषाम् निः-कृतम् जारिणी-इव।।5।।
9112. सभाम् एति कितवः पृच्छमानः
जेष्यामि तन्वा शूशुजानः।
अक्षासः अस्य वि तरन्ति कामम्
प्रति-दीव्ने दधतः आ कृतानि।।6।।
9113. अक्षासः इत् अंकुशिनः नि-तोदिनः
निकृत्वानः तपनाः तापयिष्णवः।
कुमार-देष्णाः जयतः पुनः-हनः मध्वा
सम्-पृक्ताः कितवस्य बर्हणा।।7।।
9114. त्रि-पञ्चाशः क्रीडति व्रातः
एषाम् देवः-इव सविता सत्य-धर्मा।
उग्रस्य चित् मन्यवे न नमन्ते राजा
चित् एभ्यः नमः इत् कृणोति।।8।।
9115. नीचा वर्तन्ते उपरि स्फुरन्ति
अहस्तासः हस्त-वन्तम् सहन्ते।
दिव्याः अङ्गाराः इरिणे नि-उप्ताः
शीताः सन्तः हृदयम् निः दहन्ति।।9।।
9116. जाया तप्यते कितवस्य हीना
माता पुत्रस्य चरतः क्व स्वित्।
ऋणवा बिभ्यत् धनम् इच्छमानः
अन्येषाम् अस्तम् उप नक्तम् एति।।10।।
9117. स्रियम् दृष्ट्वाय कितवम् ततापं
अन्येषाम् जायाम् सुकृतम् च योनिम्।
पूर्वाह्णे अश्वान् युयुजे हि बभ्रून्
सः अग्नेः अन्ते वृषलः पपाद।।11।।
9118. यः वः सेनाः-नीः महतः गणस्य
राजा व्रातस्य प्रथमः बभूव।
तस्मै कृणोमि न धना रुणध्मि दश
अहम् प्राचीः तत् ऋतम् वदामि।।12।।
9119. अक्षैः मा दीव्यः कृषिम् इत्
कृषस्व वित्ते रमस्व बहु मन्यमानः।
तत्र गावः कितव तत्र जाया तत् मे
वि चष्टे सविता अयम् अर्यः।।13।।
9120. मित्रम् कृणुध्वम् खलु मृडत
नः मा नः घोरेण चरत अभि धृष्णु।
नि वः नु मन्युः विशताम् अरातिः
अन्यः बभ्रूणाम् प्रसितौ नु असतु।।14।।

## सूक्त-35

9121. अबुध्रम् ऊँ त्ये इन्द्रवन्तः अग्नयः
ज्योतिः भरन्तः उषसः वि-उष्टिपु।
मही द्यावापृथिवी चेतताम् अपः
अद्य देवानाम् अवः आ वृणीमहे।।1।।
9122. दिवः-पृथिव्योः अवः आ वृणीमहे
मातृन् सिन्धून पर्वतान् शर्यणा-वतः।
अनागाःत्वम् सूर्यम् उषसम् ईमहे
भद्रम् सोमः सुवानः अद्य कृणोतु नः।।2।।
9123. द्यावा नः अद्य पृथिवी अनागसः
मही त्रायेथाम् सुविताय मातरा।
उषाः उच्छन्ती अप बाधताम् अघम्
स्वस्ति अग्निम् सम्-इधानम् ईमहे।।3।।
9124. इयम् नः उस्रा प्रथमा सु-देव्यम्
रेवत् सनि-भ्यः रेवती वि उच्छतु।
आरे मन्युम् दुः-विदत्रस्य धीमिह
स्वस्ति अग्निम् सम्-इधानम् ईमहे।।4।।
9125. प्र याः सिस्रते सूर्यस्य रश्मि-भिः
ज्योतिः भरन्तीः उषसः विउष्टिषु।
भद्राः नः अद्य श्रवसे वि उच्छत स्वस्ति
अग्निम् सम्-इधानम् ईमहे।।5।।
9126. अनमीवाः उषसः आ चरन्तु नः
उत् अग्नयः जिहताम् ज्योतिषा बृहत्।
अयुक्षाताम् अश्विना तूतुजिम् रथम्
स्वस्ति अग्निम् सम्-इधानम् ईमहे।।6।।
9127. श्रेष्ठम् नः अद्य सवितः वरेण्यम्
भागम् आ सुव सः हि रत्नधाः असि।
रायः जनित्रीम् धिषणाम् उप ब्रुवे
स्वस्ति अग्निम् सम्-इधानम् ईमहे।।7।।
9128. पिपर्तु मा तत् ऋतस्य प्र-वाचनम्
देवानाम् यत् मनुष्याः अमन्महि।
विश्वाः इत् उस्राः स्पट् उत् एति सूर्यः
स्वस्ति अग्निम् सम्-ईधानम् ईमहे।।8।।
9129. अद्वेषः अद्य बर्हिषः स्तरीमणि
ग्राव्णाम् योगे मन्मनः साधे ईमहे।
आदित्यानाम् शर्मणि स्थाः भुरण्यसि
स्वस्ति अग्निम् सम्-इधानम् ईमहे।।9।।
9130. आ नः बर्हिः सध-मादे बृहत् दिवि
देवान् ईड सादय सप्त होतृन्।
इंद्रम् मित्रम् वरुणम् सातये भगम्
स्वस्ति अग्निम् सम्-इधानम् ईमहे।।10।।
9131. ते आदित्याः आ गत सर्वतातये
वृधे नः यज्ञम् अवत सजोषसः।
बृहस्पतिम् पूषणम् अश्विना भगम्
स्वस्ति अग्निम् सम्-इधानम् ईमहे।।11।।
9132. तत् नः देवाः यच्छत सु-प्रवाचनम्

छर्दिः आदित्याः सुभरम् नृ-पाय्यम्।
पश्वे तोकाय तनयाय जीवसे स्वस्ति
अग्निम् सम्-इधानम् ईमहे।।12।।
9133. विश्वे अद्य मरुतः विश्वे
ऊती विश्वे भवन्तु अग्नयः सम्-इद्धाः।
विश्वे नः देवाः अवसा आ गमन्तु
विश्वम् अस्तु द्रविणम् वाजः अस्मे।।13।।
9134. यम् देवासः अवथ वाज-सातौ
यम् त्रायध्वे यम् पिपृथ अति अंहः।
यः वः गो-पीथे न भयस्य वेद
ते स्याम देव-वीतये तुरासः।।14।।

## सूक्त-36

9135. उषसानक्ता बृहती इति सुपेशसा
द्यावाक्षामा वरुणः मित्रः अर्यमा।
इन्द्रम् हुवे मरुतः पर्वतान् अपः
आदित्यान् द्यावापृथिवी इति अपः स्वः।।1।।
9136. द्यौः च नः पृथिवी च प्रचेतसा
ऋतवरी रक्षताम् अंहसः रिषः।
मा दुः-विदत्रा निः-ऋतिः नः ईशत
तत् देवानाम् अवः अद्य वृणामहे।।2।।
9137. विश्वस्मात् नः अदितिः पातु
अंहसः माता मित्रस्य वरुणस्य रेवतः।
स्वः-वत् ज्योतिः अवृकम् नशीमहि
तत् देवानाम् अवः अद्य वृणीमहे।।3।।
9138. ग्रावा वदन् अप रक्षांसि सेधतु
दुःस्वप्न्यम् निः-ऋतिम् विश्वम् अत्रिणम्।
आदित्यम् शर्म मरुताम् अशीमहि तत्
देवानाम् अवः अद्य वृणीमहे।।4।।
9139. आ इन्द्रः बर्हिः सीदतु पिन्वताम्
इड बृहस्पतिः साम-भिः ऋक्वः अर्चतु।
सु-प्रकेतम् जीवसे मन्म धीमिह तत्
देवानाम् अवः अद्य वृणीमहे।।5।।
9140. दिवि स्पृशम् यज्ञम् अस्माकम् अश्विना
जीर-अध्वरम् कृणुतम् सुम्नम् इष्टये।
प्राचीन-रश्मिम् आ-हुतम् घृतेन तत्
देवानाम् अवः अद्य वृणीमहे।।6।।
9141. उप ह्वये सु-हवम् मारुतम् गणम्
पावकम् ऋष्वम् सख्याय शम्-भुवम्।
रायः पोषम् सौश्रवसाय धीमिह तत्
देवानाम् अवः अद्यः वृणीमहे।।7।।
9142. अपाम् पेरुम् जीव-धन्यम् भरामहे
देव-अव्यम् सु-हवम् अध्वर-श्रियम्।
सु-रश्मिम् सोमम् इन्द्रियम् यमीमहि
तत् देवानाम् अवः अद्य वृणीमहे।।8।।
9143. सनेम तत् सु-सनिता सनित्व-भिः
वयम् जीवाः जीव-पुत्राः अनागसः।
ब्रह्म-द्विषः विष्वक् एनः भरेरत तत्
देवानाम् अवः अद्य वृणीमहे।।9।।
9144. ये स्थ मनोः यज्ञियाः ते
शृणोतन यत् वः देवाः ईमहे तत् दधातन।
जैत्रम् क्रतुं रयि-मत् वीर-वत् यशः
तत् देवानाम् अवः अद्य वृणीमहे।।10।।
9145. महत् अद्य महताम् आ वृणीमहे
अवः देवानाम् बृहताम् अनर्वणाम्।
यथा वसु वीर-जातम् नशामहै तत्
देवानाम् अवः अद्य वृणीमहे।।11।।
9146. महः अग्नेः सम्-इधानस्य
शर्मणि अनागाः मित्रे वरुणे स्वस्तये।
श्रेष्ठे स्याम सवितुः सवीमनि तत्
देवानाम् अवः अद्य वृणीमहे।।12।।
9147. ये सवितुः सत्य-सवस्य विश्वे
मित्रस्य व्रते वरुणस्य देवाः।
ते सौभगम् वीर-वत्त गो-मत् अप्नः
दधातन द्रविणम् चित्रम् अस्मे।।13।।
9148. सविता पश्चातात् सविता पुरस्तात्
सविता उत्तरात्तात् सविता अधरात्तात्।
सविता नः सुवतु सर्वतातिम् सविता
नः रासताम् दीर्घम् आयुः।।14।।

## सूक्त-37

9149. नमः मित्रस्य वरुणस्य चक्षसे
महः देवाय तत् ऋतम् सपर्यत्।
दूरे-दृशे देव-जाताय केतवे दिवः पुत्राय सूर्याय शंसत।।1।।
9150. सा मा सत्य-उक्तिः परि पातु विश्वतः
द्यावा च यत्र ततनन् अहानि च।
विश्वम् अन्यत् नि विशते यत् एजति
विश्वाहा आपः विश्वाहा उत् एति सूर्यः।।2।।
9151. न ते अदेवः प्र-दिवः नि वासते
यत् एतशेभिः पतरैः रथर्यसि।
प्राचीनम् अन्यत् अनु वर्तते रजः
उत् अन्येन ज्योतिषा यासि सूर्य।।3।।
9152. येन सूर्य ज्योतिषा बाधसे तमः
जगत् च विश्वम् उत्-इयर्षि भानुना।
तेन अस्मत् विश्वाम् अनिराम् अनाहुतिम्
अप अमीवाम् अप दुःस्वप्न्यम् सुव।।4।।

9153. विश्वस्य हि प्र-इषितः रक्षसि व्रतम्
अहेडयन् उत्-चरसि स्वधाः अनु।
यत् अद्य त्वा सूर्य उप-ब्रवामहै तत्
नः देवाः अनु मंसीरत क्रतुम्।।5।।
9154. तम् नः द्यावापृथिवी तत् नः
आपः इन्द्रः शृण्वन्तु मरुतः हवम् वचः।
मा शूने भूम सूर्यस्य सम्-दृशि भद्रम्
जीवन्तः जरणाम् अशीमहि।।6।।
9155. विश्वाहा त्वा सुमनसः सु-चक्षसः
प्रजावन्तः अनमीवाः अनागसः।
उत्-यन्तम् त्वा मित्र-महः दिवे-दिवे
ज्योक् जीवाः प्रति पश्येम सूर्य।।7।।
9156. महि ज्योतिः बिभ्रतम् त्वा
वि-चक्षण भास्वन्तम् चक्षुषे-चक्षुषे मयः।
आ-रोहन्तम् बृहतः पाजसः परि
वयम् जीवाः प्रति पश्येम सूर्य।।8।।
9157. यस्य ते विश्वाभुवनानि केतुना
प्र च ईरते नि च विशन्ते अक्तुभिः।
अनागाः-त्वेन हरिकेश सूर्य अह्ना-अह्ना
नः वस्यसा-वस्यसा उत् इहि।।9।।
9158. शम् नः भव चक्षसा शम् नः अह्ना
शम् भानुना शम् हिमा शम् घृणेन।
यथा शम् अध्वन् शम् असत् दुरोणे
तत् सूर्य द्रविणम् धेहि चित्रम्।।10।।
9159. अस्माकम् देवाः उभयाय जन्मने
शर्म यच्छत द्वि-पदे चतुः-पदे।
अदत् पिबत् ऊर्जयमानम् आशितम्
तत् अस्मे शम् योः अरपः दधातन।।11।।
9160. यत् वः देवाः चकृम जिह्वया गुरु
मनसः वा प्र-युती देव-हेडनम्।
अरावा यः नः अभि दुच्छुन-यते
तस्मिन् तत् एनः वसवः नि धेतन।।12।।

## सूक्त-38

9161. अस्मिन् नः इन्द्र पृत्सूतौ यशस्वति
शिमीवति क्रन्दसि प्र अव सातये।
यत्र गो-साता धृषितेषु स्वादिषु
विष्वक् पतन्ति दिद्यवः नृ-सह्ये।।1।।
9162. सः नः क्षुमन्तम् सदने वि ऊर्णुहि
गो-अर्णसम् रयिम् इन्द्र श्रवाय्यम्।
स्याम ते जयतः शक्र मेदिनः यथा
वयम् उश्मसि तत् वसो कृधि।।2।।
9163. यः नः दासः आर्यः वा पुरुस्तुत
अदेवः इन्द्र युधये चिकेतति।
अस्माभिः ते सु-सहाः सन्तु शत्रवः
त्वया वयम् तान वनुयाम सम्-गमे।।3।।
9164. यः दभ्रेभिः हव्यः यः च भूरिभिः
यः अभीके वरिवः-वित् नृ-सह्ये।
तम् विखादे सस्निम् अद्य श्रुतम् नरम्
अर्वाञ्चम् इन्द्रम् अवसे करामहे।।4।।
9165. स्व-वृजम् हि त्वाम् अहम् इन्द्र
शुश्रव अननृ-दम् वृषभ रध्र-चोदनम्।
प्र मुञ्चस्व परि कुत्सात् इह आ गहि किम्
ऊ त्वा-वान् मुष्कयोः बद्धः आसते।।5।।

## सूक्त-39

9166. यः वाम् परिज्मा सुवृत् अश्विना
रथः दोषाम् उषसः हव्यः हविष्मता।
शश्वत्-तमासः तम् ऊँ वाम् इदम्
वयम् पितुः न नाम सु-हवम् हवामहे।।1।।
9167. चोदयतम् सूनृताः पिन्वतम् धियः
उत् पुरम्-धीः ईरयतम् तत् उश्मसि।
यशसम् भागम् कृणुतम् नः अश्विना
सोमम् च चारुम्मघवत्-सु नः कृतम्।।2।।
9168. अमा-जुरः चित् भवथः युवम् भगः
अनाशोः चित् अवितारा अपमस्य चित्।
अन्धस्य चित् नासत्या कृशस्य चित्
युवाम् इत् आहुः भिषजा रुतस्य चित्।।3।।
9169. युवम् च्यवानम् सनयम् यथा रथम्
पुनः युवानम् चरथाय तक्षथुः।
निः तौग्र्यम् ऊहथुः अत्-भ्यः परि
विश्वा इत् ता वाम् सवनेषु प्र-वाच्या।।4।।
9170. पुराणा वाम् वीर्या प्र ब्रव जने
अथो ह आसथुः भिषजा मयः-भुवा।
ता वाम् नु नव्यौ अवसे करामहे अयम्
नासत्या श्रत् अरिः यथा दधत्।।5।।
9171. इयम् वाम् अह्वे शृणुतम् मे अश्विना
पुत्राय-इव पितरा मह्यम् शिक्षतम्।
अनापिः अज्ञाः असजात्या अमतिः पुरा
तस्याः अभि-शस्तेः अव स्पृशम्।।6।।
9172. युवम् रथेन वि-मदाय शुन्ध्ययुवम्
नि ऊहथुः पुरु-मित्रस्य योषणाम्।
युवम् हवम् वध्रि-मत्याः अगच्छतम्
युवम् सु-सुतिम् चक्रथुः पुरम्-धये।।7।।
9173. युवम् विप्रस्य जरणाम् उप-ईयुषः
पुनः कलेः अकृणुतम् युवत् वयः।

युवम् वन्दनम् ऋश्य-दात् उत् ऊपथुः
युवम् सद्यः विश्पलाम् एतवे कृथः।।8।।
9174. युवम् ह रेभम् वृषणा गुहा हितम्
उत् ऐरयतम् ममृ-वांसम् अश्विना।
युवम् ऋबीसम् उत तप्तम् अत्रये
ओमन्-वन्तम् चक्रथुः सप्त-वध्रये।।9।।
9175. युवम् श्वेतम् पेदवे अश्विना अश्वम्
नवभिः वाजैः नवती च वाजिनम्।
चर्कृत्यम् ददथुः द्रवयत्-सखम्
भगम् न नृभ्यः हव्यम् मयः-भुवम्।।10।।
9176. न तम् राजानौ अदिते कुतः चन
न अंहः अश्नोति दुः-इतम् नकिः भयम्।
यम् अश्विना सु-हवा रुद्रवतनी
पुरः-रथम् कृणुथः पत्न्या सह।।11।।
9177. आ तेन यातम् मनसः जवीयसा
रथम् यम् वाम् ऋभवः चक्रुः अश्विना।
यस्य योगे दुहिता जायते दिवः
उभे अहनी सुदिने विवस्वतः।।12।।
9178. ता वर्तिः यातम् जयुषा वि पर्वतम्
अपिन्वतम् शयवे धेनुम् अश्विना।
वृकस्य चित् वर्तिकाम् अन्तः आस्यात्
युवम् शचीभिः ग्रसिताम् अमुञ्चतम्।।13।।
9179. एतम् वाम् स्तोमम् अश्विनौ
अकर्म अतक्षाम भृगवः न रथम्।
नि अमृक्षाम् योषणाम् न मर्ये
नित्यम् न सूनुम् तनयम् दधानाः।।14।।

## सूक्त-40

9180. रथम् यान्तम् कुह कः ह वाम्
नरा प्रति द्यु-मन्तम् सुविताय भूषति।
प्रातः यावानम् वि-भ्वम् विशे-विशे
वस्तोः-वस्तोः वहमानम् धिया शमि।।1।।
9181. कुह स्वित् दोषा कुह वस्तोः अश्विना
कुह अभि-पित्वम् करतः कुह ऊषतुः।
कः वाम् शयुत्रा विधवा-इव देवरम्
मर्यम् न योषा कृणुते सधस्थे आ।।2।।
9182. प्रातः जरथे जरणा-इव कापया
वस्तोः-वस्तोः यजता गच्छथः गृहम्।
कस्य ध्वस्रा भवथः कस्य वा नरा
राजपुत्रा-इव सवना अव गच्छथः।।3।।
9183. युवाम् मृगा-इव वारणा मृगण्यवः
दोषा वस्तोः हविषा नि ह्वामहे।
युवम् होत्राम् ऋतुथा जुह्वते नरा
इषम् जना वहथः शुभः पती।।4।।
9184. युवाम् ह घोषा परि अश्विना यती
राज्ञः ऊचे दुहिता पृच्छे वाम् नरा।
भूतम् मे अह्ने उत भूतम् अक्तवे
अश्व-वते रथिने शक्तम् अर्वते।।5।।
9185. युवम् कवी स्थः परि अश्विना
रथम् विशः न कुत्सः जरितुः नशायथः।
युवोः ह मक्षा परि अश्विना मधु आसा
भरत निः-कृतम् न योषणा।।6।।
9186. युवम् ह भुज्युम् युवम् अश्विना वशम्
युवम् शिञ्जारम् उशनाम् उप आरथुः।
युवोः ररावा परि सख्यम् आसते
युवोः अहम् अवसा सुम्नम् आ चके।।7।।
9187. युवम् ह कृशम् युवम् अश्विना शयुम्
युवम् विधन्तम् विधवाम् उरुष्यथः।
युवम् सनिभ्यः स्तनयन्तम् अश्विना
अप व्रजम् ऊर्णुथः सप्त-आस्यम्।।8।।
9188. जनिष्ट योषा पतयत् कनीनकः
वि च अरुहन् वीरुधः दंसनाः अनु।
आ अस्मै रीयन्ते निवना-इव सिन्धवः
अस्मै अह्ने भवति तत् पति-त्वनम्।।9।।
9189. जीवम् रुदन्ति वि मयन्ते अध्वरे
दीर्घाम् अनु प्रसितिम् दीधियुः नरः।
वामम् पितृभ्यः ये इदम् सम्-एरिरे
मयः पतिभ्यः जनयः परि-स्वजे।।10।।
9190. न तस्य विद्म तत् उँ सु प्र वोचत
युवा ह यत् युवत्याः क्षेति योनिषु।
प्रिय-उस्रियस्य वृषभस्य रेतिनः
गृहम् गमेम अश्विना तत् उश्मसि।।11।।
9191. आ वाम् अगन् सु-मतिः वाजिनीवसू
नि अश्विना हृत्सु कामाः अयंसत।
अभूतम् गोपा मिथुना शुभः पती
प्रियाः अर्यम्णः दुर्यान् अशीमहि।।12।।
9192. ता मन्दसाना मनुषः दुरोणे आ
धत्तम् रयिम् सह-वीरम् वचस्यवे।
कृतम् तीर्थम् सु-प्रपानम् शुभः पति
स्थाणुम् पथे-स्थाम् अप दुःमतिम् हतम्।।13।।
9193. क्व स्वित् अद्य कतमासु अश्विना
विक्षु दस्रा मादयेते शुभः पती।
कः ईम् नि येमे कतमस्य जग्मतुः
विप्रस्य वाय यजमानस्य वा गृहम्।।14।।

## सूक्त-41

9194. समानम् ऊँ त्यम् पुरु-हूतम् उक्थ्यम्
रथम् त्रि-चक्रम् सवना गनिग्मतम्।
परि-ज्मानम् विदथ्यम् सुवृक्तिभिः
वयम् वि-उष्टाः उषसः हवामहे।।1।।
9195. प्रातः-युजम् नासत्या अधि तिष्ठथः
प्रातः-यावानम् मधु-वाहनम् रथम्।
विशः येन गच्छथः यज्वरीः नरा कीरेः
जित् यज्ञम् होतृ-मन्तम् अश्विना।।2।।
9196. अध्वर्युम् वा मधु-पाणिम् सु-हस्त्यम्
अग्निधम् वा धृत-दक्षम् दमूनसम्।
विप्रस्य वा यत् सवनानि गच्छथः
अतः आ यातम् मधु-पेयम् अश्विना।।3।।

## सूक्त-42

9197. अस्ता-इव सु प्र-तरम् लायम् अस्यन्
भूषन्-इव प्र भर स्तोमम् अस्मै।
वाचा विप्राः तरत वाचम् अर्यः
नि रमय जरितः सोमे इन्द्रम्।।1।।
9198. दोहेन गाम् उप शिक्ष सखायम्
प्र बोधय जरितः जारम् इन्द्रम्।
कोशम् न पूर्णम् वसुना नि-ऋष्टम्
आ च्यवय मघ-देयाय शूरम्।।2।।
9199. किम् अङ्ग त्वा मघवन् भोजम् आहुः
शिशीहि मा शिशयम् त्वा शृणोमि।
अप्नस्वती मम धीः अस्तु शक्र
वसु-विदम् भगम् इन्द्र आ भर नः।।3।।
9200. त्वाम् जनाः मम-सत्येषु इन्द्र
सम्-तस्थानाः वि ह्वयन्ते सम्-ईके।
अत्र युजम् कृणुते यः हविष्मान्
न असुन्वता सख्यम् वष्टि शूरः।।4।।
9201. धनम् न स्पन्द्रम् बहुलम् यः अस्मै
तीव्रान् सोमान् आ-सुनोति पयस्वान्।
तस्मै शत्रून् सु-तुकान् प्रातः अह्नः
नि सु-अष्ट्रान् युवति हन्ति वृत्रम्।।5।।
9202. यस्मिन् वयम् दधिम शंसम् इन्द्रे
यः शिश्राय मघवा कामम् अस्मे।
आरात् चित् सन् भयताम् अस्य अत्रुः
नि अस्मै द्युम्ना जन्या नमन्ताम्।।6।।
9203. आरात् शत्रुम् अप बाधस्व दूरम्
उग्रः यः शम्बः पुरु-हूत तेन।
अस्मे धेहि यव-मत् गो-मत् इन्द्र
कृधि धियम् जरित्रे वाज-रत्नाम्।।7।।
9204. प्र यम् अन्तः वृष-सवासः अग्मन्
तीव्राः सोमाः बहुल-अन्तासः इन्द्रम्।
न अह दामानम् मघवा नि यंसत्
नि सुन्वते वहति भूरि वामम्।।8।।
9205. उत प्रहाम् अति-दीव्य जयाति
कृतम् यत् श्वघ्नी वि-चिनोति काले।
यः देव-कामः न धना रुणद्धि सम्
इत् तम् राया सृजति स्वधा-वान्।।9।।
9206. गोभिः तरेम अमतिम् दुः-एवाम्
यवेन क्षुधम् पुरु-हूत विश्वाम्।
वयम् राजभिः प्रथमाः धनानि
अस्माकेन वृजनेन जयेम।।10।।
9207. बृहस्पतिः नः परि पातु पश्चात्
उत उत्-तरस्मात् अधरात् अघ-योः।
इन्द्रः पुरस्तात् उत मध्यतः नः
सखा सखिभ्यः वरिवः कृणोतु।।11।।

## सूक्त-43

9208. अच्छ मे इन्द्रम् मतयः स्वः-विदः
सध्रीचीः विश्वाः उशतीः अनूषत।
परि स्वजन्ते जनयः यथा पतिम्
मर्यम् न शुन्ध्युम् मघ-वानम् ऊतये।।1।।
9209. न घ त्वद्रिक् अप वेति मे मनः
त्वे इत् कामम् पुरु-हूत शिश्रय।
राजा-इव दस्म नि सदः अधि बर्हिषि
अस्मिन् सु सोमे अव-पानम् अस्तु ।।2।।
9210. विषु-वृत् इन्द्रः अमतेः उत क्षुधः
सः इत् प्रायः मघवा वस्वः ईशते।
तस्य इत् इमे प्रवणे सप्त सिन्धवः
वयः वर्धन्ति वृषभस्य शुष्मिणः।।3।।
9211. वयः न वृक्षम् सु-पलाशम् आ असदन्
सोमासः इन्द्रम् मन्दिनः चमू-सदः।
प्र एषाम् अनीकम् शवसा दविद्युतत्
विदत् स्वः मनवे ज्योतिः आर्यम्।।4।।
9212. कृतम् न श्वघ्नी वि चिनोति देवने
सम्-वर्गम् यत् मघवा सूर्यम् जयत्।
न तत् ते अन्यः अनु वीर्यम् शकत्
न पुराणः मघवन् न उत नूतनः।।5।।
9213. विशम्-विशम् मघवा परि अशायत
जनानाम् धेनाः अव-चाकशत् वृषा।
यस्य अह शक्रः सवनेषु रण्यति
सः तीव्रैः सोमैः सहते पृतन्यतः।।6।।
9214. आपः न सिन्धुम् अभि यत् सम्-अक्षरन्
सोमासः इन्द्रम् कुल्याः-इव ह्रदम्।

वर्धन्ति विप्राः महः अस्य सदने
यवम् न वृष्टिः दिव्येन दानुना।।7।।
9215. वृषा न क्रुद्धः पतयत् रजः-सु आ
यः अर्यपत्नीः अकृणोत् इमाः अपः।
सः सुन्वते मघवा जीर-दानवे
अविन्दत् ज्योतिः मनवे हविष्मते।।8।।
9216. उत् जायताम् परशुः ज्योतिषा
सह भूयाः ऋतस्य सु-दुघा पुराण-वत्।
वि रोचताम् अरुषः भानुना शुचिः
स्वः न शुक्रम् शुचुचीत सत्-पतिः।।9।।
9217. गोभिः तरेम अमतिम् दुः-एवाम्
यवेन क्षुधम् पुरु-हूत विश्वाम्।
वयम् राजभिः प्रथमाः धनानि
अस्माकेन वृजनेन जयेम।।10।।
9218. बृहस्पतिः नः परि पातु पश्चात्
उत उत्-तरस्मात् अधरात् अघयोः।
इन्द्रः पुरस्तात् उत मध्यतः नः
सखा सखिभ्यः वरिवः कृणोतु।।11।।

## सूक्त-44

9219. आ यातु इन्द्रः स्व-पतिः मदाय
यः धर्मणा तूतुजानः तुविष्मान्।
प्र-त्वक्षाणः अति विश्वा सहांसि
अपारेण महता वृष्ण्येन।।1।।
9220. सु-स्थामा रथः सु-यमा हरी
ते मिम्यक्ष वज्रः नृपते गभस्तौ।
शीभम् राजन् सुपथा आ याहि
अर्वाङ् वर्धाम ते पपुषः वृष्ण्यानि।।2।।
9221. आ इन्द्र-वाहः नृपतिम् वज्र-बाहुम्
उग्रम् उग्रासः तविषासः एनम्।
प्र-त्वक्षसम् वृषभम् सत्य-शुष्मम्
आ ईम् अस्म-त्रा सध-मादः वहन्तु।।3।।
9222. एव पतिम् द्रोण-साचम् स-चेतसम्
ऊर्जः स्कम्भम् धरुणे आ वृष-यसे।
ओजः कृष्व सम् गृभाय त्वे अपि
असः यथा के-निपानाम् इनः वृधे।।4।।
9223. गमन् अस्मे वसूनि आ हि शंसिषम्
सु-आशिषम् भरम् आ याहि सोमिनः।
त्वम् ईशिषे सः अस्मिन् आ सत्सि बर्हिषि
अनाधृष्या तव पात्राणि धर्मणा।।5।।
9224. पृथक् प्र आयन् प्रथमाः देव-हूतयः
अकृण्वत श्रवस्यानि दुस्तरा।
न ये शेकुः यज्ञियाम् नावम् आ-रुहम्
ईर्मा एव ते नि अविशन्त केपयः।।6।।
9225. एव एव अपाक् अपरे सन्तु दुः-ध्यः
अश्वाः येषाम् दुः-युजः आ-युयुज्रे।
इत्था ये प्राक् उपरे सन्ति दावने
पुरूणि यत्र वयुनानि भोजना।।7।।
9226. गिरीन् अज्रान् रेजमानान् अधारयत्
द्यौः क्रन्दत् अन्तरिक्षाणि कोपयत्।
समीचीने धिषणे वि स्कभायति वृष्णः
पीत्वा मदे उक्थानि शंसति।।8।।
9227. इमम् बिभर्मि सु-कृतम् ते अङ्कुशम्
येन आ-रुजासि मघ-वन् शफ-आरुजः।
अस्मिन् सु ते सवने अस्तु ओक्यम्
सुते इष्टौ मघवन् बोधि आभगः।।9।।
9228. गोभिः तरेम अमतिम् दुः-एवाम्
यवेन क्षुधम् पुरु-हूत विश्वाम्।
वयम् राजभिः प्रथमाः धनानि
अस्माकेन वृजनेन जयेम।।10।।
9229. बृहस्पतिः नः परि पातु पश्चात्
उत उत्-तरस्मात् अधरात् अघयोः।
इन्द्र पुरस्तात् उत मध्यतः नः
सखा सखिभ्यः वरिवः कृणोतु।।11।।

## सूक्त-45

9230. दिवः परि प्रथमम् जज्ञे अग्निः
अस्मत् द्वितीयम् परि जातवेदाः।
तृतीयम् अप्सु नृ-मनाः अजस्रम्
इन्धानः एनम् जरते सु-आधीः।।1।।
9231. विद्म ते अग्ने त्रेधा त्रायणि
विद्म ते धाम विभृता पुरुत्रा।
विद्म ते नाम परमम् गुहा यत्
विद्म तम् उत्सम् यतः आ-जगन्थ।।2।।
9232. समुद्रे त्वा नृ-मनाः अप्सु अन्तः
नृचक्षाः ईधे दिवः अग्ने ऊधन्।
तृतीये त्वा रजसि तस्थि-वांसम्
अपाम् उपस्थे महिषाः अवर्धन्।।3।।
9233. अक्रन्दत अग्निः स्तनयन्-इव
द्यौः क्षाम रेरिहत् धीरुधः सम्-अञ्जन्।
सद्यः जज्ञानः वि हि ईम् इद्धः अख्यत्
आ रोदसी भानुना भाति अन्तः।।4।।
9234. श्रीणाम् उत्-आरः धरुणः रयीणाम्
मनीषाणाम् प्र-अर्पणः सोम-गोपाः।
वसुः सूनुः सहसः अप्सु राजा
वि भाति अग्रे उषसाम् इधानः।।5।।

9235. विश्वस्य केतुः भुवनस्य गर्भः
आ रोदसी अपृणात् जायमानः।
वीडम् चित् अद्रिम् अभिनत् परा-यन्
जनाः यत् अग्निम् अयजन्त पञ्च।।6।।
9236. उशिक् पावकः अरतिः सुमेधाः
मर्तेषु अग्निः अमृतः नि धायि।
इयर्ति धूमम् अरुषम् भरिभ्रत्
उत् शुक्रेण शोचिषा द्याम् इनक्षन्।।7।।
9237. दृशानः रुक्मः उर्विया वि अद्यौत्
दुः-मर्षम् आयुः श्रिये रुचानः।
अग्निः अमृतः अभवत् वयः-भिः
यत् एनम् द्यौः जनयत् सुरेताः।।8।।
9238. यः ते अद्य कृणवत् भद्र-शोचे
अपूपम् देव घृत-वन्तम् अग्ने।
प्र तम् नय प्र-तरम् वस्यः अच्छ
अभि सुम्नम् देव-भक्तम् यविष्ठ।।9।।
9239. आ तम् भज सौश्रवसेषु अग्ने
उक्थे-उक्थे आ भज शस्यमाने।
प्रियः सूर्ये प्रियः अग्ना भवाति
उत् जातेन भिनदत् उत् जनित्वैः।।10।।
9240. त्वाम् अग्ने यजमानाः अनु द्यून्
विश्वा वसु दधिरे वार्याणि।
त्वया सह द्रविणम् इच्छमानाः
व्रजम् गो-मन्तम् उशिजः वि वव्रुः।।
9241. अस्तावि अग्निः नराम् सु-शेवः
वैश्वानरः ऋषिभिः सोम-गोपाः।
अद्वेषे द्यावापृथिवी हुवेम
देवाः धत्त रयिम् अस्मे सुवीरम्।।12।।

## सूक्त-46

9242. प्र होता जातः महान् नभःवित्
नृसंद्वा सीदत अपाम् उपस्थे।
दधिः यः धायि सः ते वयांसि
यन्ता वसूनि विधते तनूपाः।।1।।
9243. इमम् विधन्तः अपाम् सधस्थे
पशुम् न नष्टम् पदैः अनु ग्मन्।
गुहा चतन्तम् उशिजः नमभिः
इच्छन्तः धीराः भृगवः अविन्दम्।।2।।
9244. इमम् त्रितः भूरि अविन्दत् इच्छन्
वैभवसः मूर्धनि अघ्न्यायाः।
सः शेवृधः जातः आ हर्म्येषु
नाभिः युवा भवति रोचनस्य।।3।।
9245. मन्द्रम् होतारम् उशिजः नमःभिः
प्राञ्चम् यज्ञम् नेतारम् अध्वराणाम्।
विशाम् अकृण्वन् अरतिम् पावकम्
हव्यवाहम् दधतः मानुषेषु।।4।।
9246. प्र भूः जयन्तम् महाम् विपःधाम्
मूराः अमूरम् पुराम् दर्माणम्।
नयन्तः गर्भम् वनाम् धियम् धुः
हिरिश्मश्रुम् न अर्वाणम् धनअर्चम्।।5।।
9247. नि पस्त्यासु त्रितः स्तभुयन् परिवीतः
योनौ सीदत् अन्तरिति अतः।
सम्-गृभ्य विशाम् दमूनाः विधर्मणा अयत्रैः ईयते नृन्।।6।।
9248. अस्य अजरासः दमाम् अरित्राः
अर्चत्-धूमासः अग्नयः पावकाः।
श्वितीश्चयः श्वात्रासः अरण्यवः
वनसदः वायवः न सोमाः।।7।।
9249. प्र जिह्वया भरत वेपः अग्निः
प्र वयुनानि चेतंसा पृथिव्याः।
तम् आयवः शुचयन्तम् पावकम्
मन्द्रम् होतारम् दधिरे यजिष्ठम्।।8।।
9250. द्यावा यम् अग्निम् पृथिवी जनिष्टाम्
आपः त्वष्टा भृगवः यम् सहः-भिः।
ईडेन्यम् प्रथमम् मातरिश्वा
देवाः ततक्षुः मनवे यजत्रम्।।9।।
9251. यम् त्वा दधिरे हव्यवाहम्
पुरुस्पृहः मानुषासः यजत्रम्।
सः यामन् अग्ने स्तुवते वयः धाः
प्र देवयन् यशसः सम् हि पूर्वीः।।10।।

## सूक्त-47

9252. जगृम्भ ते दक्षिणम् इन्द्र हस्तम्
वसुयवः वसुपते वसूनाम।
विद्म हि त्वा गोपतिम् शूर गोनाम्
अस्मभ्यम् चित्रम् वृषणम् रयिम् दाः।।1।।
9253. सआयुधम् सुअवसम् सुनीथम्
चतुःसमुद्रम् धरुणम् रयीणाम्।
चर्कृत्यम् शंस्यम् भूरिवारम्
अस्मभ्यम् चित्रम् वृषणम् रयिम् दाः।।2।।
9254. सुब्रह्माणम् देववन्तम् बृहन्तम्
उरुम् गभीरम् पृथुबुध्नम् इन्द्र।
श्रुतऋषिम् उग्रम् अभिमातिसहम्
अस्मभ्यम् चित्रम् वृषणम् रयिम् दाः।।3।।
9255. सन्त्-वाजम् विप्रवीरम् तरुत्रम्
धनस्पृतम् शूशुवांसम् सुदक्षम्।
दस्युहनम् पूःभिदम् इन्द्र सत्यम्

अस्मभ्यम् चित्रम् वृषणम् रयिम् दाः।।4।।
9256. अश्ववन्तम् रथिनम् वीरवन्तम्
सहस्रिणम् शतिनम् वाजम् इन्द्र।
भद्रव्रातम् विप्रवीरम् स्वःसाम्
अस्म्भ्यम् चित्रम् वृषणम् रयिम् दाः।।5।।
9257. प्र सप्तगम् ऋतधीतिम् सुमेधाम्
बृहस्पतिम् मतिः अच्छ जिगाति।
यः आङ्गिरसः नमसा उपसद्यः
अस्म्भ्यम् चित्रम् वृषणम् रयिम् दाः।।6।।
9258. वनीवानः मम दूतासः इन्द्रम्
स्तोमाः चरन्ति सुमतीः इयानाः।
हृदिस्पृशः मनसा वच्यमानाः
अस्म्भ्यम् चित्रम् वृषणम् रयिम् दाः।।7।।
9259. यत् त्वा याभि दद्धि तत् नः इन्द्र
बृहन्तम् क्षयम् असमम् जनानाम्।
अभि तत् द्यावापृथिवी गृणीताम्
अस्मभ्यम् चित्रम् वृषणम् रयिम् दाः।।7।।

## सूक्त-48

9260. अहम् भुवम् वसुनः पूर्व्यः पतिः अहम्
धनानि सम् जयामि शश्वतः माम् हवन्ते।
पितरम् न जन्तवः अहम् दाशुषे वि भजामि भोजनम्।।1।।
9261. अहम् इन्द्रः रोधः वृक्षः अथर्वणः
त्रिताय गाः अजनयम् अहः अधि।
अहम् दस्युभ्यः परि नृम्णम् आ
ददे गोवा शिक्षन् दधीचे मातरिश्वने।।2।।
9262. मह्यम् त्वष्टा वज्रम् अतक्षत् आयसम्
मयि देवासः अवृजन् अपि क्रतुम्।
मम अनीकम् सूर्यस्यइव दुस्तरम्
माम् आर्यन्ति कृतेन कर्त्वेन च।।3।।
9263. अहम् एतम् गव्ययम् अश्व्यम्
पशुम् पुरीषिणम् सायकेन हिरण्यम्।
पुरु सहस्रा नि शिशामि दाशुषे यत्
मा सोमासः उक्थिनः अमन्दिषुः।।4।।
9264. अहम् इन्द्रः न परा जिग्ये इत्
धनम् न मृत्यवे अव तस्थे कदा चन।
सोमम् इत् मा सुन्वतः याचत वसु
न मे पूरवः सख्ये रिषाथन।।5।।
9265. अहम् एतान् शाश्वसतः द्वाद्वा
इन्द्रम् ये वज्रम् युधये अकृण्वत।
आह्वयमानान् अव हन्मना अहनम्
दृह्ला वदन् अनमस्युः नमस्विनः।।6।।
9266. अभि इदम् एकम् एकः अस्मि निष्षाट्
अभि द्वा किम् ऊ त्रयः करन्ति।
खले न पर्षान् प्रति हन्मि भूरि
किम् मा निन्दन्ति शत्रवः अनिन्द्राः।।7।।
9267. अहम् गुङ्गुभ्यः अतिथिग्वम् इष्करम्
इषम् न वृत्रतुरम् विक्षु धारयम्।
यत् पर्णयघ्ने उत वा करञ्जहे
प्र अहम् महे वृत्रहत्ये अशुश्रवि।।8।।
9268. प्र मे नमी साप्यः इषे भुजे भूत्
गवाम् एषे सख्या कृणुत द्विता।
यत् अस्य सम्-इथेषु मंहयम् आत्
इत् एनम् शंस्यम् उक्थ्यम् करम्।।9।।
9269. प्र नेमस्मिन् ददृशे सोमः अन्तः
गोपाः नेमम् आविः अस्था कृणोति।
सः तिग्मशृङ्गम् वृषभम् युयुत्सन्
द्रुहः तस्थौ बहुले बद्धः अन्तरिति।।10।।
9270. आदित्यानाम् वसूनाम रुद्रियाणाम्
देवः देवानाम् न मिनामि धाम।
ते मा भद्राय शवसे ततक्षुः
अपराजितम् अस्तृतम् अषाह्लम्।।11।।

## सूक्त-49

9271. अहम् दाम् गृणते पूर्व्यम् वसु
अहम् ब्रह्म कृणवम् मह्यम् वर्धनम्।
अहम् भुवम् यजमानस्य चोदिता
अयज्वनः साक्षि विश्वस्मिन् भरे।।1।।
9272. माम् धुः इन्द्रम् नाम देवता दिवः
च ग्मः च अपाम् च जन्तवः।
अहम् हरी वृषणा विव्रता रघू अहम्
वज्रम् शवसे धृष्णु आ ददे।।2।।
9273. अहम् अत्कम् कवये शिश्नथम् हथैः
अहम् कुत्सम् आवम् आभिः ऊतिभिः।
अहम् शुष्णस्य श्नथिता वधः यमम्
न यः ररे आर्यम् नाम दस्यवे।।3।।
9274. अहम् पिताइव वेतसून अभिष्टये
तुग्रम् कुत्साय स्मत्-इभम् च रन्धयम्।
अहम् भुवम् यजमानस्य राजनि प्र
यत् भरे तुजये न प्रिया आधृषे।।4।।
9275. अहम् रन्धयम् मृगयम् श्रुतर्वणे यत्
मा अजिहीत वयुना चन् आनुषक्।
अहम् वेशम् नम्रम् आयवे अकरम्
अहम् सव्याय पट्-गृभिम् अरन्धयम्।।5।।
9276. अहम् सः यः नववास्त्वम् बृहत्-रथम्
सम् वृत्राइव दासम् वृत्रहा अरुजम्।

यत् वर्धयन्तम् प्रथयन्तम् आनुषक्
दूरे पारे रजसः रोचना अकरम्।।6।।
9277. अहम् सूर्यस्य परि यामि आशुभिः
प्र एतशेभिः वहमानः ओजसा।
यत् मा सावः मनुषः आह निःनिजे
ऋधक् कृषे दासम् कृत्व्यम् हथैः।।7।।
9278. अहम् सप्तहा नहुषः नहुःतरः
प्र अश्रवयम् शवसा तुर्वशम् यदुम्।
अहम् नि अन्यम् सहसा सहः करम्
नव व्राधतः नवतिम् च वक्षयम्।।8।।
9279. अहम् सप्त स्रवतः धारयम् वृषा
द्रवित्न्वः पृथिव्याम् सीराः अधि।
अहम् अर्णांसि वि तिरामि सुकृतुः
युधा विदम् मनवे गातुम् इष्टये।।9।।
9280. अहम् तत् आसु धारयम् यत् आसु
न देवः चन् त्वष्टा अधारयत् रुशत्।
स्पार्हम् गवाम् ऊधःसु वृक्षणासु आ
मधोः मधु श्वात्र्यम् सोमम् आशिरम्।।10।।
9281. एव देवान् इन्द्रः विव्ये नृन् प्र
च्यौत्नेन मघवा सत्यराधाः।
विश्वा इत् ता ते हरिवः शचीवः
अभि तुरासः स्वयशः गृणन्ति।।11।।

## सूक्त-50

9282. प्र वः महे मन्दमानाय अन्धसः
अर्च विश्वानराय विश्वभुवे।
इन्द्रस्य सुमरवम् सहः महि
श्रवः नृम्णम् च रोदसी सर्पयतः।।1।।
9283. सः चित् नु सख्या नर्यः इनः
स्तुतः चर्कृत्यः इन्द्र मावते नरे।
विश्वासु धूःसु वाजकृत्येषु सत्-पते
वृत्रे वा अपसु भि शूर मन्दसे।।2।।
9284. के ते नरः इन्द्र ये ते इषे
ये त सुम्नम् सधन्यम् इयक्षान्।
के ते वाजाय असुर्याय हिन्विरे
के अप्सु स्वासु उर्वरासु पौंस्ये।।3।।
9285. भुवः त्वम् इन्द्र ब्रह्मणा महान्
भुवः विश्वेषु सवनेषु यज्ञियः।
भुवः नृन् च्यौत्नः विश्विस्मन्
भरे ज्येष्ठः च मन्त्रः विश्वचर्षणे।।4।।
9286. अव नु कम् ज्यायान् यज्ञवनसः
महीम् ते ओमात्राम् कृष्टयः विदुः।
असः नु कम् अजरः वर्धाः च
विश्वा इत् एता सवना तूमुमा कृषे।।5।।
9287. एता विश्वा सवना तूतुमा कृषे
स्वयम् सूनो सहसः यानि दधिषे।
वराय ते पात्रम् धर्मणे तना
यज्ञः मन्त्रः ब्रह्म उत्-यतम् वचः।।6।।
9288. ये ते विप्र ब्रह्मकृतः सुते सचा
वसूनाम् च वसुनः च दावने।
प्र ते सुम्नस्य मनसा पथा भुवन्
मदे सुतस्य सोम्यस्य अन्धसः।।7।।

## सूक्त-51

9289. महत् तत् उल्बम् स्थविरम् तत्
आसीत् येन आविष्टितः प्रविवेशिथ अपः।
विश्वाः अपश्यत् बहुधा ते अग्ने
जातवेदः तन्वः देवः एकः।।1।।
9290. कः मा ददर्श कतमः सः देवः
यः मे तन्वः बहुधा परिअपश्यत्।
क्व अह मित्रावरुणा क्षियन्ति
अग्नेः विश्वाः समिधः देवयानीः।।2।।
9291. ऐच्छाम त्वा बहुधा जातवेदः
प्रविष्टम् अग्ने अप्सु ओषधीषु।
तम् त्वा यमः अचिकेत् चित्रभानो
दश-अन्तरुष्यात् अतिरोचमानम्।।3।।
9292. होत्रात् अहम् वरुण बिभ्यत् आयम्
न इत् एव मा युनजन् अत्र देवाः।
तस्य मे तन्वः बहुधा निविष्टाः
एतम् अर्थम् न चिकेत् अहम् अग्निः।।4।।
9293. आ इहि मनुः देवयुः यज्ञकामः
अरम् कृत्य तमसि क्षेषि अग्ने।
सुगान् पथः कृणुहि देवयानान्
वह हव्यानि सुमनस्यमानः।।5।।
9294. अग्नेः पूर्वे भ्रातरः अर्थम् एतम्
रथीइव अध्वानम् अनु आ अवरीवुः।
तस्मात् भिया वरुण दूरम् आयम्
गौरः न क्षेमोः अविजे ज्यायाः।।6।।
9295. कुर्मः ते आयुः अजरम् यत्
अग्ने यथा युक्तः जातवेदः न रिष्याः।
अथ वहासि सुमनस्यमानः
भागम् देवेभ्यः हविषः सुजात।।7।।
9296. प्रयाजान् मे अनुयाजान् च केवलान्
ऊजस्वन्तम् हविषः दत्त भागम्।
घृतम् च अपाम् पुरुषम् च ओषधीनाम्
अग्नेः च दीर्घम् आयुः अस्तु देवाः।।8।।

9297. तव प्रयाजाः अनुयाजाः च केवले
ऊर्जस्वन्तः हविषः सन्तु भागाः।
तव अग्ने यज्ञः अयम् अस्तु सर्वः
तुभ्यम् नमन्ताम् प्र-दिशः चतस्रः।।9।।

## सूक्त-52

9298. विश्वे देवाः शास्तन मा यथा
इह होता वृतः मनवै यत् निसद्य।
प्र मे ब्रूत भागधेयम् यथा वः
येन पथा हव्यम् आ वः वहानि।।1।।
9299. अहम् होता नि असीदम् यजीयान्
विश्वे देवाः मरुतः मा जुनन्ति।
अहः-अहः अश्विना आध्वर्यवम् वाम्
ब्रह्मा समित् भवति सा आहुतिः वाम्।।2।।
9300. अयम् यः होता किः ॐ सः यमस्य
कम् अपि ऊहे यत् सम्-अञ्जन्ति देवाः।
अहः-अहः जायते मासि-मासि
अथ देवाः दधिरे हव्यवाहम्।।3।।
9301. माम् देवाः दधिरे हव्यवाहम्
अप-म्लुप्तम् बहु कृच्छा चरन्तम्।
अग्निः विद्वान् यज्ञम् नः कल्पयाति
पञ्चयामम् त्रिवृतम् सप्त-तन्तुम्।।4।।
9302. आ वः यक्षि अमृत-त्वम् सुवीरम्
यथा वः देवाः वरिवः कराणि।
आ बाह्वोः वज्रम् इन्द्रस्य धेयाम्
अथ इमाः विश्वाः पृतनाः जयाति।।5।।
9303. त्रीणि शता त्री सहस्राणि अग्निम्
त्रिंशत् च देवाः नव च असर्पयन्।
औक्षन् घृतैः अस्तृणन् बर्हिः अस्मै
आत् इत् होतारम् नि असादयन्त।।6।।

## सूक्त-53

9304. यम् ऐच्छाम मनसा सः अयम् आ
अगात् यज्ञस्य विद्वान् परुषः चिकित्वान्।
सः नः यक्षत् देवताता यजीयान् नि हि
सत्सत् अन्तरः पूर्वः अस्मत्।।1।।
9305. अराधि होता निसदा यजीयान्
अभि प्रयांसि सुधितानि हि ख्यत्।
यजामहै यज्ञियान् हन्त देवान्
ईलामहै ईड्यान् आज्येन।।2।।
9306. साध्वीम् अकः देववीतिम् नः अद्य
यज्ञस्य जिह्वाम् अविदाम गुह्याम्।
सः आयुः आ अगात् सुरभिः वसानः
भद्राम् अकः देवहूतिम् नः अद्य।।3।।
9307. तत् अद्य वाचः प्रथमम् मसीय
येन असुरान् अभि देवाः असम।
ऊर्जअदः उत यज्ञियासः
पञ्च जनाः मम होत्रम् जुषध्वम्।।4।।
9308. पञ्च जनाः मम होत्रम् जुषन्ताम्
गोजाताः उत ये यज्ञियासः।
पृथिवी नः पार्थिवात् पातु अंहसः
अन्तरिक्षम् दिव्यात् पातु अस्मान्।।5।।
9309. तन्तुम् तन्वन् रजसः भानुम् अनु इहि
ज्योतिष्मतः पथः रक्ष धिया कृतान्।
अनुल्बणम् वयत जोगुवाम् अपः मनुः
भव जनय दैव्यम् जनम्।।6।।
9310. अक्षनहः नह्यतन उत सोम्याः
इष्कृणुध्वम् रशनाः आ उत पिंशत।
अष्टावन्धुरम् वहत अभितः रथम्
येन देवासः अनयन् अभि प्रियम्।।7।।
9311. अश्मन्-वती रीयते सम् रभध्वम्
उत् तिष्ठत प्र तरत सखायः।
अत्र जहाम ये असन् अशेवाः शिवान्
वयम् उत् तरेम अभि वाजान्।।8।।
9312. त्वष्टा मायाः वेत् अपसाम् अपःतमः
बिभ्रत् पात्रा देवपानानि शम्-तमा।
शिशीते नूनम् परशुम् सुआयसम्
येन वृश्वात् एतशः ब्रह्मणः पतिः।।9।।
9313. सतः नूनम् कवयः सम् शिशीत
वाशीभिः याभिः अमृताय तक्षथ।
विद्वांसः पदा गुह्यानि कर्तन
येन देवासः अमृतत्वम् आनशुः।।
9314. गर्भे योषाम् अदधुः वत्सम् आसनि
अपीच्येन मनसा उत जिह्वया।
सः विश्वाहा सुमनाः योग्याः अभि
सिसासनिः वनते कारः इत् जितिम्।।11।।

## सूक्त-54

9315. ताम् सु ते कीर्तिम् मघवन् महित्वा
यत् त्वा भीते रोदसी अह्वयेताम्।
प्र आवऋ देवान् आ अतिरः दासम्
ओजः प्रजायै त्वस्यै यत् अशिक्षः इन्द्र।।1।।
9316. यत् अचरः तन्वा ववृधानः
बलानि इन्द्र प्रब्रुवाणः जनेषु।
माया इत् सा ते यानि युद्धानि आहुः
न अद्य शत्रुम् ननु पुरा विवित्से।।2।।

9317. के ॐ नु ते महिमनः समस्य
अस्मत् पूर्वे ऋषयः अन्तम् आपुः।
यत् मातरम् च पितरम् च साकम्
अजनयथाः तन्वः स्वायाः।।3।।
9318. चत्वारि ते असुर्याणि नाम
अदाभ्यानि महिषस्य सन्ति।
त्वम् अङ्ग तानि विश्वानि वित्से
येभिः कर्माणि मघवन् चकर्थ।।4।।
9319. त्वम् विश्वा दधिषे केवलानि
यानि आविः या च गुहा वसूनि।
कामम् इत् मे मघवन् मा वि तारीः
त्वम् आज्ञाता त्वम् इन्द्र असि दाता।।5।।
9320. यः अदधात् ज्योतिषि ज्योतिः अन्तः
यः असृजत् मधुना सम् मधूनि।
अध प्रियम् शूषम् इन्द्राय मन्म
ब्रह्मकृतः बृहत्-उक्थात् अवाचि।।6।।

## सूक्त-55

9321. दूरे तत् नाम गुह्यम् पराचैः
यत् त्वा भीते अह्वयेताम् वयःधै।
उत् अस्तभ्नाः पृथिवीम् द्याम् अभीके
भ्रातुः पुत्रान् मघवन् तित्विषाणः।।1।।
9322. महत् यत् नाम गुह्यम् पुरुस्पृक्
येन भूतम् जनयः येन भव्यम्।
प्रत्नम् जातम् ज्योतिः यत् अस्य
प्रियम् प्रियाः सम् अविशन्त पञ्च।।2।।
9323. आ रोदसी अपृणात् आ उत मध्यम्
पञ्च देवान् ऋतुशः सप्त-सप्त।
चतुःत्रिंशता पुरुधा वि चष्टे सरूपेण ज्योतिषा विव्रतेन।।3।।
9324. यत् उषः औच्छः प्रथमा विभानाम्
अजनयः येन पुष्टस्य पुष्टम्।
यत् ते जाभित्वम् अवरम् परस्याः
महत् महत्याः असुरत्वम् एकम्।।4।।
9325. विधुम् दद्राणम् समने बहूनाम्
युवानम् सन्तम् पलितः जगार।
देवस्य पश्य काव्यम् महित्वा
अद्य ममार सः ह्यः समान।।5।।
9326. शाक्मना शाकः अरुणः सुपर्णः
आ यः महः शूरः सनात् अनीलः।
यत् चिकेत सत्यम् इत तत् न मोघम्
वसु स्पार्हम् उत जेता उत दाता।।6।।
9327. आ एभिः ददे वृष्ण्या पौंस्यानि
येभिः औक्षत् वृत्रहत्याय वज्री।
ये कर्मणः क्रियमाणस्य मह्ना
ऋतेकर्मम् उत्-अजायन्त देवाः।।7।।
9328. युजा कर्माणि जनयन् विश्व-ओजाः
अशस्तिहा विश्वमनाः तुषाराट्।
पीत्वी सोमस्य दिवः आ वृधानः
शूरः निः युधा अधमत् दस्यून्।।8।।

## सूक्त-56

9329. इदम् ते एकम् परः ॐ ते एकम्
तृतीयेन ज्योतिषा सम् विशस्व।
सम्-वेशने तन्वः चारुः एधि
प्रियः देवानाम् परमे जनित्रे।।1।।
9330. तनूः ते वाजिन् तन्वम् नयन्ती
वामम् अस्म्भ्यम् धातु शर्म तुभ्यम्।
अह्रुतः महः धरुणाय देवान् दिवि-इव
ज्योतिः स्वम् आ मिमीयाः।।2।।
9331. वाजी असि वाजिनेन सुवेनीः
सुवितः स्तोमम् सुवितः दिवम् गाः।
सुवितः धर्म प्रथमा अनु सत्या
सुवितः देवान् सुवितः अनु पत्म।।3।।
9332. महिम्नः एषाम् पितरः चन् ईशरे
देवाः देवेषु अदधुः अपि क्रतुम्।
सम् अविव्यचुः उत यानि अत्विषुः
आ एषाम् तनूषु नि विविशुः पुनरिति।।4।।
9333. सहः-भिः विश्वम् परि चक्रमुः रजः
पूर्वा धामानि अमिताः मिमानाः।
तनूषु विश्वा भुवना नि येमिरे
प्र असारयन्त पुरुध प्रजाः अनु।।5।।
9334. द्विधा सूनवः असुरम् स्वः-विदम्
आ अस्थापयन्त तृतीयेन कर्मणा।
स्वाम् प्रजाम् पितरः पित्र्यम् सहः
आ अवरेषु अदधुः तन्तुम् आततम्।।6।।
9335. नावा न क्षोदः प्रदिशः पृथिव्याः
स्वस्तिभिः अति दुःगानि विश्वा।
स्वाम् प्रजाम् बृहत्-उक्तः महित्वा
आ अवरेषु अदधात् आ परेषु।।7।।

## सूक्त-57

9336. मा प्र गाम पथः वयम्, मा यज्ञात् इन्द्र सोमिनः।
मा अन्तः स्थुः नः अरातयः।।1।।
9337. यः यज्ञस्य प्रसाधनः, तन्तुः देवेषु आततः।
तम् आहुतम् नशीमहि।।2।।
9338. मनः नु आ हवामहे, नाराशंसेन सोमेन।
पितृणाम् च मन्मभिः।।3।।

9339. आ ते एतु मनः पुनः, क्रत्वे दक्षाय जीवसे।
ज्योक् च सूर्यम् दृशे।।4।।
9340. पुनः नः पितरः मनः, ददातु दैव्यः जनः।
जावम् व्रातम् सचेमहि।।5।।
9341. वयम् सोम व्रते तव, मनः नतूषु बिभ्रतः।
प्रजावन्तः सचेमहि।।6।।

## सूक्त-58

9342. यत् त यज्ञम् वैवस्वतम्, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इय क्षयाय जीवसे।।1।।
9343. यत् ते दिवम् यत् पृथिवीम्, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।2।।
9344. यत् ते भूमिम् चतुः-भृष्टिम्, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।3।।
9345. यत् ते चतस्रः प्रदिशः, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।4।।
9346. यत् ते समुद्रम् अर्णवम्, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।5।।
9347. यत् ते मरीचीः प्रवतः, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।6।।
9348. यत् ते अपः यत् ओषधीः, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।7।।
9349. यत् ते सूर्यम् यत् उषषम्, मनः जगम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।8।।
9350. यत् ते पर्वतान् बृहतः, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।9।।
9351. यत् ते विश्वम् इदम् जगत्, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।10।।
9352. यत् ते पराः परावतः, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।11।।
9353. यत् ते भूतम् च भव्यम् च, मनः जगाम दूरकम्।
तत् ते आ वर्तयामसि, इह क्षयाय जीवसे।।12।।

## सूक्त-59

9354. प्र तारि आयुः प्रतरम् नवीयः
स्थातारा-इव क्रतुमता रथस्य।
अध च्यवानः उत् तवीति अर्थम्
परातरम् सु निःऋतिः जहीताम्।।1।।
9355. सामन् नु राये निधिमत् नु
अन्नम् करामहे सु पुरुध श्रवांसि।
ता नः विश्वानि जरिता ममत्तु
परातरम् सु निःऋतिः जिहीताम्।।2।।
9356. अभि सु अर्यः पौंस्यैः भवेम
द्यौः न भूमिम् गिरयः न अज्रान्।
ता नः विश्वानि जरिता चिक्ते
परातरम् सु निःऋतिः जिहीताम्।।3।।
9357. मो सु नः सोम मृत्यवे परा दाः
दश्येम नु सूर्यम् उत्-चरन्तम्।
द्युभिः हितः जरिमा सु नः अस्तु
परातरम् सु निःऋतिः जिहीताम्।।4।।
9358. असुनीते मनः अस्मासु धारय
जीवातवे सु प्र तिर नः आयुः।
ररन्धि नः सूर्यस्य सम्-दृशि
घृतेन त्वम् तन्वम् वर्धयस्व।।5।।
9359. असुनीते पुनः अस्मासु चक्षुः
पुनः प्राणम् इह नः धेहि भोगम्।
ज्योक् पश्येम सूर्यम् उत्-चरन्तम्
अनुमते मृडय नः स्वस्ति।।6।।
9360. पुनः नः असुम् पृथिवी ददातु
पुनः द्यौः देवी पुनः अन्तरिक्षम्।
पुनः नः सोमः तन्वम् ददातु
पुनः पूषा पथ्याम् या स्वस्तिः।।7।।
9361. शम् रोदसी सुबन्धवे यह्वी ऋतस्य मातरा।
भरताम् अप यत् रपः द्यौः पृथिवी
क्षमा रपः मो सु ते किम् चन आममत्।।8।।
9362. अव द्वके अव त्रिका दिवः चरन्ति भेषजा।
क्षमा चरिष्णु एककम् भरताम् अप यत्
रपः द्यौः पृथिवी क्षमा रपः मो
सु ते किम् चन आममत्।।9।।
9363. इन्द्र ईरय गाम अनड्वाहम्
यः आ अवहत् उशीनराण्याः अनः।
भरताम् अप यत् रपः द्यौः पृथिवी क्षमा
रपः मो सु ते किम् चन आममत्।।10।।

## सूक्त-60

9364. आ जनम् त्वेष-सन्दृशम्, माहीनानाम् उप-स्तुतम्।
अगन्म बिभ्रतः नमः।।1।।
9365. असमातिम् नितोशनम्, त्वेषम् निययिनम् रथम्।
अजेरथस्य सत्-पतिम्।।2।।
9366. यः जनान् महिषान्-इव, अतितस्थौ पवीरवान्।
उत् अपवीरवान् युधा।।3।।
9367. यस्य इक्ष्वाकुः उप व्रते, रेवान् मरायी एधते।
दिवि-इव पञ्च कृष्टयः।।4।।
9368. इन्द्र क्षत्रा असमातिषु, रथ-प्रोष्ठेषु धारय।
दिवि-इव सूर्यम् दृशे।।5।।
9369. अगस्त्यस्य नत्-भ्यः, सप्ती युनक्षि रोहिता।
नि अक्रमीः अभि विश्वान्, राजन् अराधसः।।6।।

9370. अयम् माता अयम् पिता,
अयम् जीवातुः आ अगमत्।
इदम् तव प्र-सपरणम् सुबन्धो आ इहि निः इहि।।7।।
9371. यथा युगम् वरत्रया नह्यन्ति, धरुणाय कम्।
एव दाधार ते मनः जीवातवे
न मृत्यवे अथो अरिष्टतातये।।8।।
9372. यथा इयम् पृथिवी मही दाधार इमान्।
वनस्पतीन् एव दाधार ते मनः जीवातवे
न मृत्यवे अथो अरिष्ट-तातये।।9।।
9373. यमात् अहम् वैवस्वतात्
सुबन्धोः मनः आ अभरम्।
जीवातवे न मृत्यवे अथो अरिष्टतातये।।10।।
9374. न्यक् वातः अव वाति न्यक् तपति सूर्यः।
नीचीनम् अघ्न्या दुहे न्यक् भवतु ते रपः।।11।।
9375. अयम् मे हस्तः भगवान अयम मे भगवतरः।
अयम मे विश्वभेषजः अयम् शिव-अभिमर्शनः।।12।।

## सूक्त-61

9376. इदम् इत्था रौद्रम् गूर्तवचाः
ब्रह्म क्रत्वा शच्याम अन्तः आजौ।
क्राणा यत् अस्य पितरा मंहनेस्थाः
पर्षत् पक्थे अहन् आ सप्त होतृन्।।1।।
9377. सः इत् दानाय दभ्याय वन्वन्
च्यवानः सूदैः अभिमीत वेदिम्।
तूर्वयाणः गूर्तवचोतमः क्षोदः न रेतः दुतःऊति सिंचत्।।2।।
9378. मनः न येषु हवनेषु तिग्मम्
विपः शच्या वनुथः द्रवन्ता।
आ यः शर्याभिः तुविनृम्णः अस्य
अश्रीणीत आदिशम् गभस्तौ।।3।।
9379. कृष्णा यत् गोषु अरुणीषु
सीदत् दिवः नपाता अश्विना हुवे वाम्।
वीतम् मे यज्ञम् आ गतम् मे अन्नम्
ववन्वांसा न इषम् अस्मृतद्रू इत्यस्मृतधू।।4।।
9380. प्रिथष्ट यस्य वीरकर्मम् इष्णत्
अनस्थितम् नु नर्यः अप औहत्।
पुनः तत् आ वृहति यत् कनायाः
दुहितुः आः अनुभृतम् अनर्वा।।5।।
9381. मध्या यत् कर्त्वम् अभवत् अभीके
कामम् कृण्वाने पितरि युवत्याम्।
मनानक् रेतः जहतुः वियन्ता
सानौ निसिक्तम् सुकृतस्य योनौ।।6।।
9382. पिता यत् स्वाम् दुहितरम् अधिस्कन्
क्ष्मया रेतः सम्-जग्मानः नि सिञ्चत्।
सुआध्यः अजनयन् ब्रह्म देवाः वास्तौः
पतिम् व्रतपाम् निः अतक्षन्।।7।।
9383. सः ईम् वृषा न फेनम् अस्यत्
आजौ स्मत् आ परा ऐत अप् दभ्रचेताः।
सरत् पदा न दक्षिणा परावृक् न
ताः नु मे पृशन्यः जगृभ्रे।।8।।
9384. मक्षु न बह्निः प्रजायाः उपब्दिः
अग्निम् न नग्नाः उप सीदत् ऊधः।
सनिता इध्यम् सनिता उत वाजम्
सः धर्ता जज्ञे सहसा यवियुत्।।9।।
9385. मक्षु कनायाः सख्यम् नवग्वाः
ऋतम् वदन्तः ऋतयुक्तिम् अग्मन्।
द्विबर्हसः ये उप गोपम् आ अगुः
अदक्षिणासः अच्युता दुदुक्षन्।।10।।
9386. मक्षु कनायाः सख्यम् नवीयः
ऋतम् वन्दतः ऋतयुक्तिम् अग्मन्।
शुचि यत् ते रेक्णः आ अयजन्त
सबः दुधायाः पयः उस्रियायाः।।11।।
9387. पश्वा यत् पश्चा वियुता
बुधन्त ब्रवीति वक्तरि रराणः।
वसोः वसुत्वा कारवः अनेहा विश्वम्
विवेष्टि द्रविणम् उप क्षु।।12।।
9388. तत् इत् नु अस्य परिसद्वानः अग्मन्
पुरु सदन्तः नार्सदम् बिभित्सन्।
वि शुष्णस्य सम्-ग्रथितम् अनर्वा
विदत् पुरुप्रजातस्य गुहा यत्।।13।।
9389. भर्गः ह नाम उत यस्य देवाः
स्वः न ये त्रिसधस्थे निसेदुः।
अग्निः ह नाम उत जातवेदाः
श्रुधि नः होताः ऋतस्य होता अध्रुक्।।14।।
9390. उत त्या मे रौद्रौ अर्चिमन्ता
नासत्यौ इन्द्र गूर्तये यजध्यै।
मनुष्वत् वृक्तबर्हिषे रराणा
मन्दू हित प्रयसा विक्षु यज्यू।।15।।
9391. अयम् स्तुतः राजा वन्दि वेदाः
अपः च विप्रः तरति स्वसेतुः।
सः कक्षीवन्तम् रेजयत् सः अग्निम्
नेमिम् न चक्रम् अर्वतः रघुद्रु।।16।।
9392. सः द्विबन्धुः वैतरणः यष्टा
सबःधुम् धेनुम् अस्वम् दुहध्यै।
सम् यत् मित्रावरुणा वृञ्जे उक्थैः
ज्येष्ठेभिः अर्यमणम् वरूथैः।।17।।
9393. तत्-बन्धुः सूरिः दिवि ते धियम्

धाः नाभानेदिष्ठः रपति प्र वेनन्।
सा नः नाभिः परमा अस्य वा घ
अहम् तत् पश्चा कतिथः चित् आस।।18।।
9394. इयम् मे नाभिः इह मे सधस्थम्
इमे मे देवाः अयम् अस्मि सर्वः।
द्विजाः अह प्रथमजाः ऋतस्य
इदम् धेनुः अदुहत् जायमाना।।19।।
9395. अध आसु मन्द्रः अरतिः विभावा
अव स्यति द्विवर्तनिः वनेषाट्।
ऊर्ध्वा यत् श्रेणिः न शिशुः दन्
मक्षु स्थिरम् शेवृधम् सूत माता।।20।।
9396. अध गावः उपमातिम् कनायाः
अनु श्वान्तस्य कस्य चित् परा ईयुः।
श्रुधि त्वम् सुद्रविणः नः त्वम्
याट् आश्वघ्नस्य ववृधे सूनृताभिः।।21।।
9397. अध त्वम् इन्द्र विद्धि अस्मान्
महः राये नृपते वज्रबाहुः।
रक्ष च नः मघोनः पाहि सूरीन्
अनेहसः ते हरिवः अभिष्टौ।।22।।
9398. अध यत् राजाना गोइष्टौ
सरत् सरण्युः कारवे जरण्युः।
विप्रः प्रेष्ठः सः हि एषाम् बभूव
परा च वक्षेत् उत पर्षत् एनान्।।23।।
9399. अध नु अस्य जेन्यस्य पुष्टौ
वृथा रेभन्तः ईमहे तत् ऊँ नु।
सरण्युः अस्य सूनुः अश्वः
विप्रः च असि श्रवसः च सातौ।।24।।
9400. युवोः यदि सख्याय अस्मे
शर्धाय स्तोमम् जुजुषे नमस्वान्।
विश्वत्र यस्मिन् आ गिरः समिचीः
पूर्वीइव गातुः दाशत् सूनृतायै।।25।।
9401. सः गृणानः अत्-भिः देववान्
सुबन्धुः नमसा सुउक्तैः।
वर्धत् उक्थैः वचोभिः आ हि नूनम्
वि अध्वा एति पयसः उस्रियायाः।।26।।
9402. ते ऊँ सु नः महः यजत्राः
भूत देवासः ऊतये सजोषाः।
ये वाजान् अनयत वियन्तः
ये स्थ निचेतारः अमूराः।।27।।

## सूक्त-62

9403. ये यज्ञेन दक्षिणया सम्-अक्ताः
इन्द्रस्य सख्यम् अमृतत्वम् आनश।
तेभ्यः भद्रम् अङ्गिरसः वः अस्तु
प्रति गृभ्णीत मानवम् सुमेधसः।।1।।
9404. ये उत्-आजन् पितरः गोमयम् वसु
ऋतेन अभिन्दन परिवत्सरे बलम्।
दीर्घायुत्वम् अङ्गिरसः वः अस्तु
प्रति गृभ्णीत् मानवम् सुमेधसः।।2।।
9405. ये ऋतेन सूर्यम् आ अरोहयन्
दिवि अप्रथयन् पृथिवीम् मातरम् वि।
सुप्रजाः-त्वम् अङ्गिरसः वः अस्तु
प्रति गृभ्णीत मानवम् सुमेधसः।।3।।
9406. अयम् नाभा वदति वल्गु वः
गृहे देवपुत्राः ऋषयः तत् शृणोतन।
सुब्रह्मण्यम् अङ्गिरसः वः अस्तु
प्रति गृभ्णीत मानवम् सुमेधसः।।4।।
9407. विरूपासः इत् ऋषयः ते इत् गम्भीर-वेपसः।
ते अङ्गिरसः सूनवः ते अग्नेः परि जज्ञिरे।।5।।
9408. ये अग्नेः परि जज्ञिरे विरूपासः दिविः परि।
नवग्वः नु दशग्वः अङ्गिरः-तमः सचा देवेषु महते।।6।।
9409. इन्द्रेण युजा निः सृजन्त वाघतः
व्रजम् गोमन्तम् अश्विनम्।
सहस्रम् मे ददतः अष्टकर्ण्यः श्रवः देवेषु अक्रत।।7।।
9410. प्र नूनम् जायताम् अयम् मनुः तोक्म-इव रोहतु।
यः सहस्रम् शत-अश्वम् सद्यः दानाय मंहते।।8।।
9411. न तम् अश्नोति कः चन दिवः-इव सानु आरभम्।
सावर्ण्यस्य दक्षिणा वि सिन्धुः-इव पप्रथे।।9।।
9412. उत दासा परिविषे, स्मद्दिष्टी गोपरीणसा।
यदुः तुर्वः च ममहे।।10।।
9413. सहस्रदाः ग्रामनीः मा रिषत् मनुः
सूर्येण अस्य एतमाना एतु दक्षिणा।
सावर्णेः देवाः प्र तिरन्तु आयुः यस्मिन्
अश्रान्ताः असनाम वाजम्।।11।।

## सूक्त-63

9414. परावतः ये दिधिषन्ते आप्यम्
मनुप्रीतासः जनिम विवस्वतः।
ययातेः ये नहुष्यस्य बर्हिषि
देवाः आसते ते अधि ब्रुवन्तु नः।।1।।
9415. विश्वा हि वः नमस्यानि वन्द्या
नामानि देवाः उत यज्ञियानि वः।
ये स्थ जातः अदितेः अत्-भ्यः परि
ये पृथिव्याः ते मे इह श्रुत हवम्।।2।।
9416. येभ्यः माता मधुमत् पिन्वते पयः
पीयूषम् द्यौः अदितिः अद्रिबर्हाः।

उक्थ-शुष्मान् वृषभरान् सु-अप्नसः
तान् आदित्यान् अनु मद स्वस्तये।।3।।
9417. नृ-चक्षसः अनि-मिषन्तः अर्हणा
बृहत् देवासः अमृतत्वम् आनशुः।
ज्योतिषः-रथाः अहिमायाः अनागसः
दिवः वर्ष्माणम् वसते स्वस्तये।।4।।
9418. सम्-राजः ये सुवृधः यज्ञम् आययुः
अपरि-ह्वृताः दधिरे दिवि क्षयम्।
तान् आ विवास नमसा सुवृक्तिभिः
महः आदित्यान् अदितिम् स्वस्तये।।5।।
9419. कः वः स्तोमम् राधति यम् जुजोषथ
विश्वे देवासः मनुषः यति स्थन।
कः वः अध्वरम् तुविजाताः अरम् करत्
यः नः पर्षत् अति अहः स्वस्तये।।6।।
9420. येभ्यः हगोत्राम् पृथमाम् आयेजे मनुः,
समिद्ध-अग्निः मनसा सप्त होतृभिः।।
ते आदित्याः अभयम् शर्म यच्छत
सुगा नः कर्त सुपथा स्वस्तये।।7।।
9421. ये ईशिरे भुवनस्य प्रचेतसः
विश्वस्य स्थातुः जगतः च मन्तवः।
ते नः कृतात् अकृतात् एनसः परि
अद्य देवासः पिपृत स्वस्तये।।8।।
9422. भरेषु इन्दरम् सुहवम् हवामहे,
अंहः-मुचम् सुकृतम् दैव्यम् जनम्।
अग्निम् मित्रम् वरुणम् सातये
भगम्, द्यावापृथिवी मरुतः स्वस्तये।।9।।
9423. सुत्रामाणम् पृथिवीम् द्याम् अनेहसम्
सुशर्माणम् अदितिम् सुप्रनीतिम्।
दैवीम् नावम् सु-अरित्राम् अनागसम्
अस्रवन्तीम् आ रुहेम स्वस्तये।।10।।
9424. विश्वे यजत्राः अधि वोचत ऊतये
त्रायध्वम् नः दुः-एवायाः अभिह्नुतः।
सत्यया वः देवहूत्या हुवेम
शृण्वतः देवाः अवसे स्वस्तये।।11।।
9425. अप अमीवाम् अप विश्वाम् अनाहुतिम्
अप अरातिम् दुःविदत्राम् अघयतः।
आरे देवाः द्वेषः अस्मत् युयोतन
उरु नः शर्म यच्छत स्वस्तये।।12।।
9426. अरिष्टः सः मर्तः विश्वः एधते
प्र प्रजाभिः जायते धर्मणः परि।
यम् आदित्यासः नयथ सुनीति-भिः
अति विश्वानि दुः-इता स्वस्तये।।13।।
9427. यम् देवासः अवथ वाजसातौ
यम् शूर-साता मरुतः हिते धने।
प्रातः-यावानम् रथम् इन्द्र सानसिम्
अरिष्यन्तम् आ रुहेम स्वस्तये।।14।।
9428. स्वस्ति नः पथ्यासु धन्वसु,
स्वस्ति अप्सु वृजने स्वः-वति।
स्वस्ति नः पुत्रकृथेषु योनिषु,
स्वस्ति राये मरुतः दधातन्।।15।।
9429. स्वस्तिः इत हि प्रपथे श्रेष्ठा
रेक्णस्वती अभि या वामम् एति।
सा नः अमा सो अरणे नि पातु
सु-आवेशा भवतु देवगोपा।।16।
9430. एव प्लतेः सूनुः अवीवृधत् वः
विश्वे आदित्याः अदिते मनीषी।
ईशानासः नरः अमर्त्येन
अस्तावि जनः दिव्यः गयेन।।17।।

## सूक्त-64

9431. कथा देवानाम् कतमस्य यामानि
सुमन्तु नाम शृण्वताम् मनामहे।
कः मृडति कतमः नः मयः करत्
कतमः ऊती अभि आ ववर्तति।।1।।
9432. क्रतुयन्ति क्रतवः हृत्सु धीतयः
वेनन्ति वेनाः पतयन्ति आ दिशः।
न मर्डिता विद्यते अन्यः एभ्यः
देवेषु मे अधि कामाः अंयसत।।2।।
9433. नराशंसम् वा पूषणम् अगोह्यम्
अग्निम् देव-इद्धम् अभि अर्चसे गिरा।
सूर्यामासा चन्द्रमसा यमम् दिवि त्रितम्
वातम् उषसम् अक्तुम् अश्विना।।3।।
9434. कथा कविः तुवि-रवान् कया गिरा
बृहस्पतिः ववृधते सुवृक्तिभिः।
अजः एकपात् सुहवेभिः ऋक्वभिः
अहिः शृणोतु बुध्न्यः हवीमनि।।4।।
9435. दक्षस्य वा अदिते जन्मनि व्रते
राजाना मित्रावरुणा आ विवाससि।
अतूर्त-पन्थाः पुरुरथः अर्यमा
सप्तहोता विषुरूपेषु जन्मसु।।5।।
9436. ते नः अर्वन्तः हवन-श्रुतः
हवम् विश्वे शृण्वन्तु वाजिनः मितद्रवः।
सहस्रसाः मेधसातौ-इव त्मना महः
ये धनम् समः-इथेषु जभ्रिरे।।6।।
9437. प्र वः वायुम् रथयुजम् पुरम्-धिम्
स्तोमैः कृणुध्वम् सख्याय पूषणम्।

ते हि देवस्य सवितुः सवीमनि
क्रतुम् सचन्ते सचितः सचेतसः।।7।।
9438. त्रिः सप्त सस्राः नद्यः महीः अपः
वनस्पतीन् पर्वतान् अग्निम् ऊतये।
कृशानुम् अस्तृन् तिष्यम् सधस्थे आ
रुद्रम् रुद्रेषु रुद्रियम् हवामहे।।8।।
9439. सरस्वती सरयुः सिन्धुः ऊर्मिभिः
महः महीः अवसा आ यन्तु वक्षणीः।
देवीः आपः मातरः सूदयित्नवः
घृतवत् पयः मधुमत् नः अर्चत।।9।।
9440. उत माता बृहत्-दिवा शृणोतु नः
त्वष्टा देवेभिः जनिभिः पिता वचः।
ऋभुक्षाः वाजः रथः-पतिः भगः
रण्वः शंसः शशमानस्य पातु नः।।10।।
9441. रण्वः समिष्टौ पितुमान्-इव क्षयः
भद्रा रुद्राणाम् मरुताम् उपस्तुतिः।
गोभिः स्याम् यशसः जनेषु आ
सदा देवासः इलाया सचेमहि।।11।।
9442. याम् मे धियम् मरुतः इन्द्र
देवाः अददात वरुण मित्र यूयम्।
ताम् पीपयत पयसा-इव धेनुम्
कुवित् गिरः अधि रथे वहाथ।।12।।
9443. कुवित् अङ्ग प्रति यथा चित् अस्य
नः सजात्यस्य मरुतः बुबोधथ।
नाभा यत्र प्रथमम् सम्-नसामहे
तत्र जामित्वम् अदितिः दधातु नः।।13।।
9444. ते हि द्यावापृथिवी मातरा मही
देवी देवान् जन्मना यज्ञिये इतः।
उभे बिभृतः उभयम् भरीमभिः
पुरु रेतांसि पितृभिः च सिञ्चतः।।14।।
9445. वि सा होत्रा विश्वम् अश्नोति
वार्यम् बृहस्पतिः अरमतिः पनीयसी।
ग्रावा यत्र मधुसुत् उच्यते बृहत्
अवीवशन्त मतिभिः मनीषिणः।।15।।
9446. एव कविः तुविरवान् ऋतज्ञाः
द्रविणस्युः द्रविणसः चकानः।
उक्थेभिः अत्र मतिभिः च विप्रः
अपीपयत् गयः दिव्यानि जन्म।।16।।
9447. एव प्लतेः सूनुः अवीवृधत्
वः विश्वे आदित्याः अदिते मनीषी।
ईशानासः नरः अमर्त्येन
अस्तावि जनः दिव्यः गयेन।।17।।

## सूक्त-65

9448. अग्निः इन्द्रः वरुणः मित्रः अर्यमा
वायुः पूषा सरस्वती सजोषसः।
आदित्याः विष्णुः मरुतः स्वः बृहत्
सोमः रुद्रः अदितिः ब्रह्मणः पतिः।।1।।
9449. इन्द्राग्नी वृत्र-हत्येषु सपत्नी मिथः
हिन्वाना तन्वा सम्-ओकसा।
अन्तरिक्षम् महि आ पप्रुः ओजसा
सोमः घृतश्रीः महिमानम् ईरयन्।।2।।
9450. तेषाम् हि मह्ना महताम् अनर्वणाम्
स्तोमान् इयर्मि ऋतज्ञाः ऋत-वृधाम्।
ये अप्सवम् अर्णवम् चित्रराधसः ते
नः रासन्ताम् महये सुमित्र्याः।।3।।
9451. स्वः-नरम् अन्तरिक्षाणि रोचना
द्यावाभूमि पृथिवीम् स्कम्भः ओजसा।
पृक्षाः-इव महयन्तः सुरातयः
देवाः स्तवन्ते मनुषाय सूरयः।।4।।
9452. मित्राय शिक्ष वरुणाय दाशुषे
या सम्-राजा मनसा न प्रयुच्छतः।
युयोः धाम धर्मणा रोचते बृहत्
ययोः उभे रोदसी नाधसी वृतौ।।5।।
9453. या गौः वर्तनिम् परि-एति निः-कृतम्
पयः दुहाना व्रतनीः अवारतः।
सा प्रब्रुवाणा वरुणा दाशुषे
देवेभ्यः दाशत् हविषा विवस्वते।।6।।
9454. दिवक्षसः अग्नि-जिह्वाः ऋतवृधः
ऋतस्य योनिम् विमृशन्तः आसते।
द्याम स्कभित्वी अपः आ चक्रुः ओजसा
यज्ञम् जनित्वी तन्वि नि ममृजुः।।7।।
9455. परिक्षिता पितरा पूर्वजावरी
ऋतस्य योना क्षयतः सम्-ओकसा।
द्यावापृथिवी वरुणाय सव्रते
घृतवत् पयः महिषाय पिन्वतः।।8।।
9456. पर्जन्यावाता वृषभा पुरीषिणा
इन्द्रवायू वरुणः मित्रः अर्यमा।
देवान् आदित्यान् अदितिम् हवामहे
ये पार्थिवासः दिव्यासः अप्सु ये।।9।।
9457. त्वष्टारम् वायुम् ऋभवः यः ओहते
दैव्या होतारौ उषसम् स्वस्तये।
बृहस्पतिम् वृत्र-रवादम् सुमेधसम्
इन्द्रियम् सोमम् धनसाः ऊँ ईमहे।।10।।
9458. ब्रह्म गाम् अश्वम् जनयन्तः ओषधीः

वनस्पतीन् पृथिवीम् पर्वतान् अपः।
सूर्यम् दिवि रोहयन्तः सुदानवः आर्या
व्रता विसृजन्तः अधि क्षमि।।11।।
9459. भुज्युम् अहंसः पिपृथः नि अश्विना
श्यावम् पुत्रम् वध्रिमत्याः अजिन्वतम्।
कमद्युवम् विमदाय ऊहथुः युवम्
विष्णाप्वम् विश्वकाय अव सृजथः।।12।।
9460. पावीरवी तन्यतुः एकपात् अजः
दिवः धर्ता सिन्धुः आपः समुद्रियः।
विश्वे देवासः शृणवन् वचांसि मे
सरस्वती सह धीभिः पुरम्-ध्या।।13।।
9461. विश्वे देवाः सह धीभिः पुरम्-ध्या
मनोः यजत्राः अमृताः ऋतज्ञाः।
रातिसाचः अभिसाचः स्वः-विदः स्वः
गिरः ब्रह्म सुउक्तम् जुषेरत।।14।।
9462. देवान् वसिष्ठः अमृतान् ववन्दे
ये विश्वा भुवना अभि प्रतस्थुः।
ते नः रासन्ताम् उरुगायम् अद्य
यूयम् पात स्वस्तिभिः सदा नः।।15।।

## सूक्त-66

9463. देवान् हुवे बृहत्-श्रवसः स्वस्तये
ज्योतिः-कृतः अध्वरस्य प्रचेतसः।
ये ववृधुः प्रतरम् विश्व-वेदसः
इन्द्रज्येष्ठासः अमृताः ऋतवृधः।।1।।
9464. इन्द्रप्रसूताः वरुणप्रशिष्टाः ये
सूर्यस्य ज्योतिषः भागम् आनशुः।
मरुत्-गणे वृजने मन्म धीमहि
मघोने यज्ञम् जनयन्त सूरयः।।2।।
9465. इन्द्रः वसुभिः परि पातु नः गयम्
आदित्यैः नः अदितिः शर्म यच्छतु।
रुद्रः रुद्रेभिः देवः मृडयाति नः त्वष्टा
नः ग्नाभिः सुविताय जन्वतु।।3।।
9466. अदितिः द्यावापृथिवी ऋतम्
महत् इन्द्राविष्णू मरुतः स्वः बृहत्।
देवान् आदित्यान् अवसे हवामहे वसून्
रुद्रान् सवितारम् सुदंससम्।।4।।
9467. सरस्वान् धीभिः वरुणः धृतव्रतः
पूषा विष्णुः महिमा वायुः अश्विना।
ब्रह्मकृतः अमृताः विशववेदसः
शर्म नः यंसन् त्रिवरूथम् अहंसः।।5।।
9468. वृषा यज्ञः वृषणः सन्तु यज्ञियाः
वृषणः देवाः वृषणः हविः-कृतः।
वृषणा द्यावापृथिवी ऋतवरी
वृषा पर्जन्यः वृषणः वृषस्तुभः।।6।।
9469. अग्नीषोमा वृषणा वाजसातये
पुरप्रशस्ता वृषणौ उप ब्रुवे।
यौ ईजिरे वृषणः देवयज्यया
ता नः शर्म त्रिवरूथम् वि यंसतः।।7।।
9470. धृतव्रताः क्षत्रियाः यज्ञनिः कृतः
बृहत्-दिवाः अध्वराणाम् अभि-श्रियः।
अग्निहोतारः ऋत-सापः अद्रुहः
अपः असृजन् अनु वृत्रतूर्ये।।8।।
9471. द्यावापृथिवी जनयन् अभि व्रता,
आपः ओषधी वनिनानि यज्ञिया।
अन्तरिक्षम् स्वः आ पप्रुः ऊतये
वशम् देवासः तन्वि नि ममृजुः।।9।।
9472. धर्तारः दिवः ऋभवः सुहस्ताः
वातापर्जन्या महिषस्य तन्यतोः।
आपः ओषधीः प्र तिरन्तु नः गिरः
भगः रातिः वाजिनः यन्तु मे हवम्।।10।।
9473. समुद्रः सिन्धुः रजः अन्तरिक्षम्
अजः एकपात् तनयित्नुः अर्णवः।
अहिः बुध्न्यः शृणवत् वचांसि मे
विश्वे देवासः उत सूरयः मम।।11।।
9474. स्याम वः मनवः देववीतये
प्राञ्चयम् नः यज्ञम् प्र नयत साधुया।
आदित्याः रुद्राः वसवः सुदानवः
इमा ब्रह्म शस्यमानानि जिन्वत।।12।।
9475. दैव्या होतारा प्रथमा पुरःहिता
ऋतस्य पन्थाम् अनु एमि साधुया।
क्षेत्रस्य पतिम् प्रतिवेशम् ईमहे
विश्वान् देवान् अमृतान् अप्रयुच्छतः।।13।।
9476. वसिष्ठासः पितृवत् वाचम् अक्रत
देवान् ईडनाः ऋषिवत् स्वस्तये।
प्रीताः-इव ज्ञातयः कामम् आ-इत्य
अस्मे देवासः अव धूनुत वसु।।14।।
9477. देवान् वसिष्ठः अमृतान् ववन्दे
ये विश्वा भुवना अभि प्रतस्थुः।
ते नः रासन्ताम् उरुगायम् अद्य
यूयम् पात स्वस्तिभिः सदा नः।।15।।

## सूक्त-67

9478. इमाम् धियम् सप्तशीर्ष्णीम् पिता
नः ऋतप्रजाताम् बृहतीम् अविन्दत्।
तुरीयम् स्वित् जनयत् विश्वजन्यः

अयास्यः उक्थम् इन्द्राय शंसन्।।1।।
9479. ऋतम् शंसन्तः ऋतु दीध्यानाः,
दिवः पुत्रासः असुरस्य वीराः।
विप्रम् पदम् अङ्गिरसः दधानाः,
यज्ञस्य धाम प्रथमम् मनन्त।।2।।
9480. हंसैः-इव सखिभिः वावदत्-भिः,
अश्मन्-मयानि नहना वि-अस्यन्।
बृहस्पतिः अभिकनिक्रदत् गाः उत प्र
अस्तौत् उत् च विद्वान् अगायत्।।3।।
9481. अवः द्वाभ्याम् परः एकया गाः
गुहा तिष्ठन्तीः अनृतस्य सेतौ।
बृहस्पतिः तमसि ज्योतिः इच्छन् उत् उस्राः
आ अकः वि हि तिस्रः आवरित्यावः।।4।।
9482. विभिद्य पुरम् शयथ ईम् अपाचीम्
निः त्रीणि साकम् उदधेः अकृन्तत्।
बृहस्पतिः उषसम् सूर्यम् गाम्
अर्कम् विवेद स्तनयन्-इव द्यौः।।5।।
9483. इन्द्रः बलम् रक्षितारम् दुधानाम
करेण-इव वि चकर्त रवेण।
स्वेदाञ्जिभिः आशिरम् इच्छमानः
अरोदयत् पणिम् आ गाः अमुष्णात्।।6।।
9484. सः ईम् सत्येभिः सखिभिः शुचत्-भिः
गोधायसम् वि धनसैः अदर्दः।
ब्रह्मणः पतिः वृषभिः वराहैः
धर्मस्वेदेभिः द्रविणम् व आनट्।।7।।
9485. ते सत्येन मनसा गोपतिम्
गाः इयानासः इषणयन्त धीभिः।
बृहस्पतिः मिथः अवद्यपेभिः उत्
उस्रियाः असृजत स्वयुक्-भिः।।8।।
9486. तम् वर्धयन्तः मतिभिः शिवाभिः
सिंहम्-इव नानदतम् सधस्थे।
बृहस्पतिम् वृषणम् शूरसातौ
भरे-भरे अनु मदेम जिष्णुम्।।9।।
9487. यदा वाजम् असनत् विश्वरूपम्
आ द्याम् अरुक्षत् उत्-तराणि सद्म।
बृहस्पतिम् वृषणम् वर्धयन्तः
नाना सन्तः बिभ्रतः ज्योतिः आसा।।10।।
9488. सत्याम् आशिषम् कृणुत वयः-धै
कीरिम् चित् हि अवथ स्वेभिः एवैः।
पश्चा मृधः अप भवन्तु विश्वाः
तत् रोदसी शृणुतम् विश्वमिन्वे।।11।।
9489. इन्द्रः मह्ना महतः अर्णवस्य
वि मूर्धानम् अभिनत् अर्बुदस्य।
अहन् अहिम् अरिणात् सप्त सिन्धून
देवैः द्यावापृथिवी प्र अवतम् नः।।12।।

## सूक्त-68

9490. उद-प्रुतः न वयः रक्षमाणाः
वावदतः अभ्रियस्य-इव घोषाः।
गिरिभ्रजः न ऊर्मयः मदन्तः
बृहस्पतिम् अभि अर्काः अनावन्।।1।।
9491. सम् गोभिः आङ्गिरसः नक्षमाणः
भगः-इव इत् अर्यमणम् निनाय।
जने मित्रः न दम्पती अनक्ति
बृहस्पते वाजाय आशून्-इव आजौ।।2।।
9492. साधु-अर्याः अतिथिनीः इषिराः
स्पार्हाः सुवर्णाः अनवद्य-रूपाः।
बृहस्पतिः पर्वतेभ्यः वितूर्य निः
गाः ऊपे यवम्-इव स्थिविभ्यः।।3।।
9493. आ-प्रुषायन् मधुना ऋतस्य योनिम्
अवक्षिपन् अर्कः उल्काम्-इव द्योः।
बृहस्पतिः उद्धरन् अश्मनः गाः भूम्याः
उद्ना-इव वि त्वचम् बिभेद।।4।।
9494. अप ज्योतिषा तमः अन्तरिक्षात्
उद्नः शीपलाम्-इव वातः आजत्।
बृहस्पतिः अनुमृश्य वलस्य
अभ्रम्-इव वातः आ चक्रे आ गाः।।5।।
9495. यदा वलस्य पीयतः जसुम् भेत्
बृहस्पतिः अग्नितपः-भिः अर्कैः।
दत्-भिः न जिह्वा परिविष्टम् आदत्
आविः निधीन् अकृणोत् उस्रियाणाम्।।6।।
9496. बृहस्पतिः अमत हि त्यत् आसाम्
नाम स्वरीणाम् सदने गुहा यत्।
आण्डा-इव भित्वा शकुनस्य गर्भम्
उत् उस्रियाः पर्वतस्य त्मना आजत्।।7।।
9497. अश्ना अपिनद्धम् मधु परि अपश्यत्
मत्स्यम् न दीने उदनि क्षियन्तम्।
निः तत् जभार चमसम् न वृक्षात्
बृहस्पतिः विरवेण विकृत्य।।8।।
9498. सः उषाम् अविन्दत सः स्वः सः
अग्निम् सः अर्केण वि बबाधे तमांसि।
बृहस्पतिः गोवपुषः वलस्य निः
मज्जानम् न पर्वणः जभार।।9।।
9499. हिमा-इव पर्णा मुषिता वनानि
बृहस्पतिना अकृपयत् वलः गाः।
अननुकृत्यम् अपुनः चकार यात्

सूर्यामासा मिथः उत्-चरातः।।10।।
9500. अभि श्वावम् न कृशनेभिः अश्वम्
नक्षत्रेभिः पितरः द्याम् अपिंशन्।
रात्र्याम् तमः अदधुः ज्योतिः अहन्
बृहस्पतिः भिनत् अद्रिम् विदत् गाः।।11।।
9501. इदम् अकर्म नमः अभ्रियाय
यः पूर्वीः अनु आ-नोनवीति।
बृहस्पतिः सः हि गोभिः सः अश्वैः
सः वीरेभिः सः नृभिः नः वयः धात्।।12।।

## सूक्त-69

9502. भद्राः अग्नेः वध्रि-अश्वस्य सम्-दृशः
वामी प्रनीतिः सुरणाः उप-इतयः।
यत् ईम् सुमित्राः विशः अग्ने इन्धते
घृतेन आहुतः जरते दविद्युतत्।।1।।
9503. घृतम् अग्नेः वध्रि-अश्वस्य वर्धनम्
घृतम् अन्नम् घृतम् ऊ अस्य मेदनम्।
घृतेन आहुतः उर्विया वि पप्रथे
सूर्यः-इव रोचते सर्पिः-आसुतिः।।2।।
9504. यत् ते मनुः यत् अनीकम् सुमित्रः
सम-ईधे अग्ने तत् इदम् नवीयः।
स रेवत् शोच सः गिरः जुषस्व
सः वाजम् दर्षि सः इह श्रवः धाः।।3।।
9505. यम् त्वा पूर्वम् ईडतः वध्रि-अश्वः
सम-ईधे अग्ने सः इदम् जुषस्व।
सः नः स्तिपाः उत भव तनूपाः
दात्रम् रक्षस्व यत् इदम् ते अस्मे।।4।।
9506. भव द्युम्नी वाध्रि-अश्व उत गोपा
मा त्वा तारीत् अभिमातिः जनानाम्।
शूरः-इव धृष्णुः च्यवनः सुमित्रः प्र नु
वोचम् वाध्रि-अश्वस्य नाम।।5।।
9507. सम् अज्र्या पर्वत्या वसूनि
दासा वृत्राणि आर्या जिगेथ।
शूरः-इव धृष्णुः च्यवनः जनानाम्
त्वम् अग्ने पृतना-यून् अभि स्याः।।6।।
9508. दीर्घतन्तुः बृहत्-उक्षा अयम्
अग्निः सहस्रस्तरीः शतनीथः ऋभ्वा।
द्युमान् द्युमत्-सु नृभिः मृज्यमानः
सुमित्रेषु दीदयः देवयत्-सु।।7।।
9509. त्वे धेनुः सुदुघा जातवेदः
अश्वता-इव समना सबः-धुक्।
त्वम् नृभिः दक्षिणावत्-भिः अग्ने
सुमित्रेभिः इध्यसे देवयत्-भिः।।8।।
9510. देवाः चित् ते अमृताः जातवेदः
महिमानम् वाध्रि-अश्व प्र वोचन्।
यत् सम्-पृच्छम् मानुषीः विशः आयन्
त्वम् नृभिः अजयः त्वा-वृधेभि।।9।।
9511. पिता-इव पुत्रम् अबिभः उपस्थे
त्वाम् अग्ने वध्रि-अश्वः सपर्यन्।
जुषाणः अस्य समिधम् यविष्ठ
उत पूर्वान् अवनोः व्राधतः चित्।।10।।
9512. शश्वत् अग्निः वध्रि-अश्वस्य
शत्रून् नृभिः जिगाय सुतसोमवत्-भिः।
समनम् चित् अदहः चित्रभानो
अव व्राधन्तम् अभिनत् वृधः चित्।।11।।
9513. अयम् अग्निः वध्रि-अश्वस्य वृत्रहा
सनकात् प्रइद्धः नमसा उपवाक्यः।
सः नः अजीमीन् उत वा विजामीन्
अभि तिष्ठ शर्धतः वाध्रि-अश्व।।12।।

## सूक्त-70

9514. इमाम् मे अग्ने समिधम् जुषस्व
इड पदे प्रति हर्य घृताचीम्।
वर्ष्मन् पृथिव्याः सुदिनत्वे अह्नाम्
ऊर्ध्वः भव सुक्रतो देवयज्या।।1।।
9515. आ देवानाम अग्रयावा इह
यातु नराशंसः विश्वरूपेभिः अश्वैः।
ऋतस्य पथा नमसा मियेधः देवेभ्यः देवतमः सुसूदत्।।2।।
9516. शश्वत्-तमम् ईडते दूत्याय
हविष्मन्तः मनुष्यासः अग्निम्।
वहिष्ठैः अश्वैः सुवृता रथेन आ
देवान् वक्षि नि सद इह होता।।3।।
9517. वि प्रथताम् देवजुष्टम् तिरश्वा
दीर्घम् द्राघ्मा सुरभि भूतु अस्मे।
अहेडता मनसा देव बर्हिः
इन्द्रज्येष्ठान् उशतः यक्षि देवान्।।4।।
9518. दिवः वा सानु स्पृशत वरीयः
पृथिव्या वा मात्रया वि श्रयध्वम्।
उशतीः द्वारः महिना महत्-भिः
देवम् रथम् रथयुः धारयध्वम्।।5।।
9519. देवी दिवः दुहितरा सुशिल्पे
उषसानक्ता सदताम् नि योनौ।
आ वाम् देवासः उशती उशन्तः
उरौ सीदन्तु सुभगे उपस्थे।।6।।
9520. ऊर्ध्वः ग्रावा बृहत् अग्निः
समिद्धः प्रिया धामानि अदितेः उपस्थे।

पुरः-हितौ ऋत्विजा यज्ञे अस्मिन्
विदुः-तरा द्रविणम् आ यजेथाम्।।7।।
9521. तिस्रः देवीः बर्हिः इदम् वरीयः
आ सीदत चकृम् वः स्योनम्।
मनुष्वत् यज्ञम् सुधिता हवींषि
इड देवी घृतपदी जुषन्त।।8।।
9522. देव त्वष्टः यत् ह चारुत्वम् आनट्
यत् अङ्गिरसाम् अभवः सचाभूः।
सः देवानाम् पाथः उप प्र विद्वान्
उशन् यक्षि द्रविणः-दः सुरत्नः।।9।।
9523. वनस्पते रशनया नियूय
देवानाम् पाथः उप वक्षि विद्वान्।
स्वदाति देवः कृणवत् हवींषि
अवताम् द्यावापृथिवी हवम् मे।।10।।
9524. आ अग्ने वह वरुणम् इष्टये नः
इन्द्रम् दिवः मरुतः अन्तरिक्षात्।
सीदन्तु बर्हिः विश्वे आ यजत्राः
स्वाहा देवाः अमृताः मादयन्ताम्।।11।।

## सूक्त-71

9525. बृहस्पते प्रथमम् वाचः अग्रम्
यत् प्र ऐरत नाम-धेयम् दधानाः।
यत् एषाम् श्रेष्ठम् यत् अरिप्रम् आसीत्
प्रेणा तत् एषाम् निहितम् गुहा आविः।।1।।
9526. सक्तुम्-इव तितउना पुनन्तः यत्र
धीराः मनसा वाचम् अक्रत अत्र।
सखायः सख्यानि जानते भद्रा
एषाम् लक्ष्मीः निहिता अधि वाचि।।2।।
9527. यज्ञेन वाचः पदवीयम् आयन्
ताम् अनु अविन्दन् ऋषिषु प्र-विष्टाम्।
ताम् आभृत्य वि अदधुः पुरुत्रा ताम्
सप्त रेभाः अभि सम् नवन्ते।।3।।
9528. उत त्वः पश्यन् न ददर्श वाचम्
उत त्वः शृण्वन् न शृणोति।
एनाम् उतो त्वस्मै तन्वम् वि सस्रे
जाया-इव पत्ये उशती सुवासाः।।4।।
9529. उत त्वम् सख्ये स्थिरपीतम् आहुः
न एनम् हिन्वन्ति अपि वाजिनेषु।
अधेन्वा चरति मायया एषः
वाचम् शुश्रुवान् अफलाम् अपुष्पाम्।।5।।
9530. यः तित्याज सचिविदम् सखायम्
न तस्य वाचि अपि भागः अस्ति।
यत् ईम् शृणोति अलकम् शृणोति
नहि प्रवेद सुकृतस्य पन्थाम्।।6।।
9531. अक्षण्-वन्तः कर्णवन्तः सखायः
मनः-जवेषु असमाः बुभूवुः।
आदघ्नासः उपकक्षासः ऊँ त्वे
ह्रदाः-इव स्नात्वाः ऊँ त्वे ददृश्रे।।7।।
9532. हृदा तष्टेषु मनसः जवेषु यत्
ब्राह्मणाः सम्-यजन्ते सखायः।
अत्र अह त्वम् वि जुहुः वेद्याभिः
ओह-ब्रह्माणः वि चरन्ति ऊँ त्वे।।8।।
9533. इमे ये न अर्वाक् न परः चरन्ति
न ब्राह्मणासः न सुते-करासः।
ते एते वाचम् अभि-पद्य पापया
सिरीः तन्त्रम् तन्वते अप्रजज्ञयः।।9।।
9534. सर्वे नन्दन्ति यशसा आगतेन
सभासहेन सख्या सखायः।
किल्बिष-स्पृत् पितुसनिः हि एषाम
अरम् हितः भवति वाजिनाय।।10।।
9535. ऋचाम् त्वः पोषम् आस्ते पुपुष्वान्
गायत्रम् त्वः गायति शक्वरीषु।
ब्रह्मा त्वः वदति जात-विद्याम्
यज्ञस्य मात्राम् वि मिमीते ऊँ त्वः।।11।।

## सूक्त-72

9536. देवानाम् नु वयम् जाना प्र वोचाम् विपन्यया।
उक्थेषु शस्यमानेषु यः पश्यात् उत्-तरे युगे।।1।।
9537. ब्रह्मणः पतिः एता सम् कर्मार-इव अधमत्।
देवानाम् पूर्व्ये युगे असतः सत् अजायत्।।2।।
9538. देवानाम् युगे प्रथमे असतः सत् अजायत।
तत् आशाः अनु अजायन्त तत् उत्तानपदः परि।।3।।
9539. भूः जज्ञे उत्तान-पदः भुवः आशाः अजायन्त।
अदितेः दक्षः अजायत तक्षात् ऊँ अदितिः परि।।4।।
9540. अदितिः हि अजनिष्ट दक्ष या दुहिता तव।
ताम् देवाः अनु अजायन्त भद्राः अमृत-बन्धवः।।5।।
9541. यत् देवाः अदः सलिले सुसरब्धाः अतिष्ठत।
त्र वः नृत्यताम्-इव तीव्रः रेणुः अप आयत।।6।।
9542. यत् देवाः यतयः यथा भुवनानि अपिन्वत।
अत्र समुद्रे आ गूडम् आ सूर्यम् अजभर्तन्।।7।।
9543. अष्टौ पुत्रासः अदितेः ये जाताः तन्वः पि।
देवान् उप प्र एत् सप्तभिः परा मार्ताण्डम् आस्यत्।।8।।
9544. सप्तभिः पुत्रैः अदितिः उप प्र ऐत् पूर्व्यम् युगम्।
प्रजायै मृत्यवे त्वत् पुनः मार्ताण्डम् आ अभरत्।।9।।

## सूक्त-73

9545. जनिष्ठाः उग्रः सहसे तुराय

मन्द्रः ओजिष्ठः बहुल-अभिमानः।
अवर्धन् इन्द्रम् मरुतः चित् अत्र
माता यत् वीरम् दधनत् धनिष्ठा।।1।।
9546. द्रुहः निसत्ता पृशनी चित् एवैः
पुरु संशेन ववृधुः ते इन्द्रम्।
अभिवृता-इव ता महापदेन ध्वान्तात्
प्रपित्वात् उत् अरन्त गर्भाः।।2।।
9547. ऋष्वा ते पादा प्र यत् जिगासि
अवर्धन् वाजाः उत ये चित् अत्र।
त्वम् इन्द्र सालावृकान् सहस्रम्
आसन् दधिषे अश्विना आ ववृत्याः।।3।।
9548. समना तूर्णिः उप यासि यज्ञम्
आ नासत्या सख्याय वक्षि।
वसाव्याम् इन्द्र धारयः सहस्रा
अश्विना शूर ददतुः मघानि।।4।।
9549. मन्दमानः ऋतात् अधि प्रजायै
सखिभिः इन्द्रः इषिरेभिः अर्थम्।
आ आभिः हि मायाः उप दस्युम् आ
अगात् मिहः प्र तम्राः अपवत् तमांसि।।5।।
9550. सनामाना चित् ध्वसयः नि अस्मै
अव अहन् इन्द्रः उषसः यथा अनः।
ऋष्वैः अगच्छः सखिभिः निकामैः
साकम् प्रतिस्था हृद्या जघन्थ।।6।।
9551. त्वम् जघन्थ नमुचिम् मखस्युम्
दासम् कृण्वानः ऋषये विमायम्।
त्वम् चकर्थ मनवे स्योनान्
पथः देवत्रा अञ्जसा-इव यानान्।।7।।
9552. त्वम् एतानि पप्रिषे वि नाम
ईशानः इन्द्र दधिषे गभस्तौ।
अनु त्वा देवाः शवसा मदन्ति
उपरिबुध्नान् वनिनः चकर्थ।।8।।
9553. चक्रम् यत् अस्य अप्-सु आ निसंत्तम्
इतो तत् अस्मै मधु इत् चच्छद्यात्।
पृथिव्याम् अतिसितम् यत् ऊधः
पयः गोषु अदधाः ओषधीषु।।9।।
9554. अश्वात् इयाय इति यत् वदन्ति
ओजसः जातम् उत मन्ये एनम्।
मन्योः इयाय हर्म्येषु तस्थौ
यतः प्रजज्ञे इन्द्रः अस्य वेद।।10।
9555. वयः सुपर्णाः उप सेदुः इन्द्रम्
प्रियमेधाः ऋषयः नाधमानाः।
अप ध्वान्तम् ऊर्णुहि पूर्धि चक्षुः
मुमुग्धि अस्मान् निधया-इव बद्धान्।।11।।

## सूक्त-74

9556. वसूनाम् वा चर्कृषे इयक्षन्
धिया वा यज्ञैः वा रोदस्योः।
अर्वन्तः वा ये रयिमन्तः सातौ
वनुम् वा ये सुश्रुणम् सुश्रुतः धुः।।1।।
9557. हवः एषाम् असुरः नक्षत् द्याम
श्रवस्यता मनसा निसत क्षाम्।
चक्षाणाः यत्र सुविताय देवाः
द्यौः न वारेभिः कृणवन्त स्वैः।।2।।
9558. इयम् एषाम् अमृतानाम् गीः
सर्वताता ये कृपणन्त रत्नम्।
धियम् च यज्ञम् च साधन्तः ते
नः धान्तु वसव्यम् असामि।।3।।
9559. आ तत् ते इन्द्र आयवः पनन्त
अभि ये ऊर्वम् गोमन्तम् तितृत्सान्।
सुकृत्-स्वम् ये पुरुपुत्राम् महीम्
सहस्रधाराम् बृहतीम् दुधुक्षन्।।4।।
9560. शचीवः इन्द्रम् अवसे कृणुध्वम्
अनानतम् दमयन्तम् पृतन्यून्।
ऋभुक्षणम् मघवानम् सुवृक्तिम्
भर्ता यः वज्रम् नर्यम् पुरुक्षुः।।5।।
9561. यत् ववान पुरुतमम् पुराषाट्
आ वृत्रहा इन्द्रः नामानि अप्राः।
अचेति प्रसहः पतिः तुविष्मान्
यत् ईम् उश्मसि कर्तवे करत् तत्।।6।।

## सूक्त-75

9562. प्र सु वः आपः महिमानम् उत्-तमम्
कारुः वोचाति सदने विवस्वतः।
प्र सप्त-सप्त त्रेधा हि चक्रमुः प्र
सृत्वरीणाम् अति सिन्धुः ओजसा।।1।।
9563. प्र ते अरदत् वरुणः यातवे पथः
सिन्धो यत् वाजान् अभि अद्रवः तम्।
भूम्याः अधि प्रवता यासि सानुना यत्
एषाम् अग्रम् जगताम् इरज्यसि।।2।।
9564. दिवि स्वनः यतते भूम्या उपरि
अनन्तम् शुष्मम् उत् इयर्ति भानुना।
अभ्रात्-इव प्र स्तनयन्ति वृष्टयः सिन्धुः
यत् एति वृषभः न रोरुवत्।।3।।
9565. अभि त्वा सिन्धि शिशुम् इत् न मातरः
वाश्राः अर्षन्ति पयसा-इव धेनवः।
राजा-इव युध्वा नयसि त्वम् इत् सिचौ
यत् आसाम् अग्रम् प्रवताम् इनक्षसि।।4।।

9566. इमम् मे गङ्गे यमुने सरस्वति
शुतुद्रि स्तोमम् सचत् परुष्णि आ।
असिक्न्या मरुत्-वृधे वितस्तया
आर्जीकीये शृणुहि आ सुसोमया।।5।।
9567. तृष्ट-अमया मथमम् यातवे
सजूः सुसत्वाः रसया श्वेत्या त्या।
त्वम् सिन्धो कुभया गोमतीम् क्रुमुम्
मेहत्न्वा सरथम् याभिः ईयसे।।6।।
9568. ऋजीती एनी रुशती महित्वा
परि ज्रयांसि भरते रजांसि।
अदब्धा सिन्धुः अपसाम् अपः-तमा
अश्वा न चित्रा वपुषी-इव दर्शता।।7।।
9569. सु-अश्वा सिन्धुः सुरथा सुवासाः
हिरण्ययी सुकृता वाजिनीवती।
उर्णावती युवतिः सीलमावती उत
अधि वस्ते सुभगा मधुवृधम्।।8।।
9570. सुखम् रथम् युयुजे सिन्धुः अश्विनम्
तेन वाजम् सनिषत् अस्मिन् आजौ।
महान् हि अस्य महिमा पनस्यते
अदब्धस्यः स्वयशसः विरप्शिनः।।9।।

## सूक्त-76

9571. आ वः ऋञ्जसे ऊर्जाम् वि-उष्टिषु
इन्द्रम् मरुतः रोदसी अनक्तन।
उभे यथा नः अहनी सचाभुवा
सदः-सदः वरिवस्यातः उत्-भिदा।।1।।
9572. तत् ऊँ श्रेष्ठम् सवनम् सुनोतन
अत्यः न हस्तयतः अद्रिः सोतरि।
विदत् हि अर्यः अभिभूति पौंस्यम्
महः राये चित् तरुते यत् अर्वतः।।2।।
9573. तत् इत् हि अस्य सवनम् विवेः
अपः यथा पुरा मनवे गातुम् अश्रेत्।
गो-अर्णसि त्वाष्ट्रे अश्वनिर्निजि प्र
ईम् अध्वरेषु अध्वरान् अशिश्रयुः।।3।।
9574. अप हत रक्षसः भङ्गुरवतः
स्कभायत निःऋतिम् सेधत अमतिम्।
आ नः रयिम् सर्ववीरम् सुनोतन
देव-अव्यम् भरत श्लोकम् अद्रयः।।4।।
9575. दिवः चित् आ वः अमवत्-तरेभ्यः
विभ्वना चित् आश्वपः-रेभ्यः।
वायोः चित् आ सोमरभः-तरेभ्यः
अग्नेः चित् अर्च पितुकृत्-तरेभ्यः।।5।।
9576. भरन्तु नः यशसः सोतु अन्धसः
ग्रावाणः वाचा दिविता दिवित्मता।
नरः यत्र दुहते काम्यम् मधु
आ-घोषयन्तः अभितः मिथ-तुरः।।6।।
9577. सुन्वन्ति सोमम् रथिरासः अद्रयः
निः अस्य रसम् गो-इषः दुहन्ति ते।
दुहन्ति ऊधः उपसेचनाय कम्
नरः हव्या न मर्जयन्ते आसभिः।।7।।
9578. एते नरः सु-अपसः अभूतन ये
इन्द्राय सुनुथ सोमम् अद्रयः।
वामम्-वामम् वः दिव्या धाम्ने
वसु-वसु वः पार्थिवाय सुन्वते।।8।।

## सूक्त-77

9579. अभ्र-प्रुषः न वाचा प्रुष वसु
हविष्मन्तः न यज्ञाः विजानुषः।
सुमारुतम् न ब्रह्माणम् अर्हसे
गणम् अस्तोषि एषाम् न शोभसे।।1।।
9580. श्रिये मर्यासः अञ्जीन् अकृण्वत
सुमारुतम् न पूर्वीः अति क्षपः।
दिवः पुत्रासः एताः न येतिरे
आदित्यासः ते अक्राः न ववृधुः।।2।।
9581. प्र ये दिवः पृथिव्याः न बर्हणा
त्वमना रिरिच्रे अभ्रात् न सूर्यः।
पाजस्वन्तः न वीराः पनस्यवः
रिशादसः न मर्याः अभिद्यवः।।3।।
9582. युष्माकम् बुध्ने अपाम् न यामनि
विथुर्यति न मही श्रथर्यति।
विश्वप्सुः यज्ञः अर्वाक् अयम् सु
वः प्रयस्वन्तः न सत्राचः आ गत।।4।।
9583. यूयम् धूःसु प्रयुजः न रश्मिभिः
ज्योतिष्मन्तः न भाशा वि-उष्टिषु।
श्येनासः न स्व-यशसः रिशादसः
प्रवासः न प्रसितासः परिप्रुषः।।5।।
9584. प्र यत् वहध्वे मरुतः पराकात्
यूयम् महः सम्-वरणस्य वस्वः।
विदानासः वसवः राध्यस्य
आरात् चित् द्वेषः सनुतः युयोत।।6।।
9585. यः उत्-ऋचि यज्ञे अध्वरेस्थाः
मरुत्-भ्यः न मानुषः ददाशत्।
रेवत् सः वयः दधते सुवीरम् सः
देवानाम् अपि गोपीथे अस्तु।।7।।
9586. ते हि यज्ञेषु यज्ञियासः ऊमाः
आदित्येन नाम्ना शम्-भविष्ठाः।

ते नः अवन्तु रथ-तूः मनीषाम्
महः च यामन् अध्वरे चकानाः।।8।।

## सूक्त-78

9587. विप्रासः न मन्मभिः सुआध्यः
देवअव्यः न यज्ञैः सुअप्नसः।
राजानः न चित्राः सुसन्दृशः
क्षितीनाम् न मर्याः अरेपसः।।1।।
9588. अग्निः न ये भ्राजसा रुक्म-वक्षसः
वातासः न स्वयुजः सद्यः-ऊतयः।
प्रज्ञातारः न ज्येष्ठाः सुनीतयः
सुशर्माणः न सोमाः ऋतम् यते।।2।।
9589. वातासः न ये धुनयः जिगत्नवः
अग्नीनाम् न जिह्वाः विरोकिणः।
वर्मण्-वन्तः न योधाः शिमीवन्तः
पितृणाम् न शंसाः सुरातयः।।3।।
9590. रथानाम् न ये अराः सनाभयः
जिगीवांसः शूराः अभिद्यवः।
वरे-यवः न मर्याः घृतप्रुष
अभिस्वर्तारः अर्कम् न सुस्तुभः।।4।।
9591. अश्वासः न ये ज्येष्ठासः आशवः
दिधिषवः न रथ्यः सुदानवः।
आपः न निम्नैः उदभिः जिगत्नवः
विश्वरूपाः अङ्गिरसः न सामभिः।।5।।
9592. ग्रावाणः न सूयः सिन्धुमातरः
आदर्दिरासः अद्रयः न विश्वहगा।
शिशूलाः न क्रीडयः सुमातरः
महाग्रामः न यामन् उत त्विषा।।6।।
9593. उषसाम् न केतवः अध्वर-श्रियः
शुभम्-यवः न अञ्जिभिः वि अश्वितन्।
सिन्धवः न ययिनः भ्राजत्-ऋष्टयः
परावतः न योजनानि ममिरे।।7।।
9594. सुभागान् नः देवाः कृणुत सुरत्नान्
अस्मान् स्तोतृन् मरुतः ववृधानाः।
अधि स्तोत्रस्य सखस्य गात सनात्
हि वः रत्नधेयानि सन्ति।।8।।

## सूक्त-79

9595. अपश्यम् अस्य महतः महित्वम्
अमर्त्यस्य मर्त्यासु विक्षु।
नाना हनू विभृते सम् भरेते
असिन्वती बप्सती भूरि अत्तः।।1।।
9596. गुहा शिरः निहितम् ऋधक् अक्षी
असिन्वन् अत्ति जिह्वया वनानि।
अत्राणि अस्मै पट्-भिः सम् भरन्ति
उत्तान-हस्ताः नमसा अधि विक्षु।।2।।
9597. प्र मातुः प्रतरम् गुह्यम् इच्छन्
कुमारः न वीरुधः सर्पत् उर्वीः।
ससम् न पक्वम् अविदत् शुचन्तम्
रिरिह्वांसम् रिपः उपस्थे अन्तः।।3।।
9598. तत् वाम् ऋतम् रोदसी प्र
ब्रवीमि जायमानः मातरा गर्भः।
अत्ति न अहम् देवस्य मर्त्यः चिकेत
अग्निः अङ्ग विचेताः सः प्रचेताः।।4।।
9599. यः अस्मै अन्नम् तृषु आ-दधाति
आज्यैः घृतैः जुहोति पुष्यति।
तस्मै सहस्रम् अक्षभिः वि चक्षे
अग्ने विश्वतः प्रत्यङ् असि त्वम्।।5।।
9600. किम् देवेषु त्यजः एनः चकर्थ
अग्ने पृच्छामि नु त्वाम् अविद्वान्।
अक्रीडन् क्रीडन् हरिः अत्तवे अदन्
वि पर्वशः चकर्त गाम्-इव असिः।।6।।
9601. विषूचः अश्वान् युयुजे वनेजाः
ऋजीतिभिः रशनाभिः गृभीतान्।
चक्षदे मित्रः वसुभिः सुजातः
सम् आनृधे पर्वभिः ववृधानः।।7।।

## सूक्त-80

9602. अग्निः सप्तिम् वाजम्-भरम् ददाति
अग्निः वीर् श्रुत्यम् कर्मनिः-स्थाम्।
अग्निः रोदसी वि चरत् सम्-अञ्जन्
अग्निः नारीम् वीर-कुक्षिम् पुरम्-धिम्।।1।।
9603. अग्नेः अप्नसः सम्-इत् अस्तु भद्रा
अग्निः मही रोदसी आ विवेश।
अग्निः एकम् चोदयत् समत्-सु
अग्निः वृत्राणि दयते पुरूणि।।2।।
9604. अग्निः ह त्यम् जरतः कर्णम् आव
अग्निः अत्-भ्यः निः अदहत् जरूथम्।
अग्निः अत्रिम् घर्मे उरुष्यत् अन्तः
अग्निः नृमेधम् प्रजया असृजत् सम्।।3।।
9605. अग्निः दात् द्रविणम् वीरपेशाः
अग्निः ऋषिम् यः सहस्रा सनोति।
अग्निः दिवि हव्यम् आ ततान
अग्नेः धामानि विभृता पुरुत्रा।।4।।
9606. अग्निम् उक्थैः ऋषयः वि ह्वयन्ते
अग्निम् नरः यामनि बाधितासः।
अग्निम् वयः अन्तरिक्षे पतन्तः

अग्निः सहस्रा परि याति गोनाम्।।5।।
9607. अग्निम् विशः ईडते मानुषीः याः
अग्निम् मनुषः नहुषः वि जाताः।
अग्निः गान्धर्वीम् पथ्याम् ऋतस्य
अग्नेः गव्यूतिः घृते आ निसत्ता।।6।।
9608. अग्नये ब्रह्म ऋभवः ततक्षुः
अग्निम् महाम् अवोचाम सुवृक्तिम्।
अग्ने प् अव जरितारम् यविष्ठ
अग्ने महि द्रविणम् आ यजस्व।।7।।

## सूक्त-81

9609. यः इमा विश्वा भुवनानि जुह्वत्
ऋषिः होता नि असीदत् पिता नः।
सः आशिषा द्रविणम् इच्छमानः
प्रथमच्छत् अवरान् आ विवेश।।1।।
9610. किम् स्वित् आसीत् अधिस्थानम्
आरम्भणम् कतमत् स्वित् कथा आसीत्।
यतः भूमिम् जनयन् विश्वकर्मा वि
द्याम् और्णोत् महिना विश्वचक्षाः।।2।।
9611. विश्वतः-चक्षुः उत विश्वतः-मुखः
विश्वतःबाहुः उत विश्वतः-पात्।
सम् बाहुभ्याम् धमति सम् पतत्रैः
द्यावाभूमी जनयन् देवः एकः।।3।।
9612. किम् स्वत् वनम् कः ऊँ सः वृक्षः
आस यतः द्यावापृथिवी निःततक्षुः।
मनीषिणः मनसा पृच्छत इत् ऊँ तत्
तत् अधि-अतिष्ठत् भुवनानि धारयन्।।4।।
9613. या ते धामानि परमाणि या अवमा
या मध्यमा विश्वकर्मन् उत् इमा।
शिक्ष सखिभ्यः हविषि स्वधावः
स्वयम् यजस्व तन्वम् वृधानः।।5।।
9614. विश्व-कर्मन् हविषा ववृधानः
स्वयम् यजस्व पृथिवीम् उत द्याम्।
मुह्यन्तु अन्ये अभितः जनासः इह
अस्माकम् मघवा सूरिः अस्तु।।6।।
9615. वाचः पतिम् विश्वकर्माणम्
ऊतये मनः-जुवम् वाजे अद्य हुवेम।
सः नः विश्वानि हवनानि जोषत्
विश्वशंभूः अवसे साधुकर्मा।।7।।

## सूक्त-82

9616. चक्षुषः पिता मनसा हि धीरः
घृतम् एने अजनत् नम्नमाने।
यदा इत् अन्ताः अदद्दहन्त पूर्वे
आत् इत् द्यावापृथिवी अप्रथेताम्।।1।।
9617. विश्वकर्मा विमनाः आत् विहायाः
धाता विधाता परमा उत सम्-दृक्।
तेषाम् इष्टानि सम् इषा मदन्ति
यत्र सप्तऋषीन् परः एकम् आहुः।।2।।
9618. यः नः पिता जनिता यः विधाता,
धामानि वेद भुवनानि विश्वा।
यः देवा नामधाः एकः एव तम्
सम्-प्रश्नम् भुवना यन्ति अन्या।।3।।
9619. ते आ अजयन्त द्रविणम् सम्
अस्मै ऋषयः पूर्वे जरितारः न भूना।
असूर्ते सूर्ते रजसि निसत्ते ये
भूतानि सम्-अकृण्वन् इमानि।।4।।
9620. परः दिवा परः एना पृथिव्या
परः देवेभिः असुरैः यत् अस्ति।
कम् स्वित् गर्भम् प्रथमम् दध्रे आपः
यत्र देवाः सम्-अप्श्यन्त विश्वे।।5।।
9621. तम् इत् गर्भम् प्रथमम् दध्रे
आपः यत्र देवाः सम्-अगच्छन्त विश्वे।
अजस्य नाभौ अधि एकम् अर्पितम्
यस्मिन् विश्वानि भुवनानि तस्थुः।।6।।
9622. न तम् विदाथ यः इमा जजना
अन्यत् युष्माकम् अन्तरम् बभूव।
नीहारेण प्रावृताः जल्प्या च
असुतृपः उक्थशसः चरन्ति।।7।।

## सूक्त-83

9623. यः ते मन्यो अविधत् वज्र सायक
सहः ओजः पुष्यति विश्वम् आनुषक्।
सह्याम दासम् आर्यम् त्वया युजा
सहः-कृतेन सहसा सहस्वता।।1।।
9624. मन्युः इन्द्रः मन्यु एव आस
देवः मन्युः होता वरुणः जातवेदाः।
मन्युम् विशः ईडते मानुषीः याः
पाहि नः मन्यो तपसा सजोषाः।।2।।
9625. अभि इहि मन्यो तवसः तवीयान्
तपसा युजा वि जहि शत्रून्।
अमित्रहा वृत्रहा दस्युहा च
विश्वा वसूनि आ भर त्वम् नः।।3।।
9626. त्वम् हि मन्यो इति अभिभूति-ओजाः
स्वयम्-भूः भामः अभिमाति-सहः।
विश्वचर्षणिः सहुरिः सहावान्
अस्मासु ओजः पृतनासु धेहि।।4।।

9627. अभागः सन् अप परा-इतः
अस्मि तव क्रत्वा तविषस्य प्रचेतः।
तम् त्वा मन्यो अक्रतुः जिहीड अहम्
स्वा तनूः बलदेयाय मा आ इहि।।5।।
9628. अयम् ते अस्मि उप मा आ इहि
अर्वाङ् प्रतीचीनः सहुरे विश्वधायः।
मन्यो वज्रिन् अभि माम् आ ववृत्स्व
हनाव दस्यून् उत बोधि आपेः।।6।।
9629. अभि प्र इहि दक्षिणतः भव
मे अध वृत्राणि जंघनाव भूरि।
जुहोमि ते धरुणम् मध्वः अग्रम्
उभौ उपअंशु प्रथमा पिबाव।।7।।

## सूक्त-84

9630. त्वया मन्यो सरथम् आ-रुजन्तः
हर्षमाणासः धृषिताः मरुत्वः।
तिग्म-इषवः आयुधा सम्-शिशानाः
अभि प्र यन्तु नरः अग्नि-रूपाः।।1।।
9631. अग्निः-इव मन्यो त्विषितः सहस्व
सेनानीः नः सहुरे हूतः एधि।
हत्वाय शत्रून् वि भजस्व वेदः
ओजः मिमानः वि मृधः नुदस्व।।2।।
9632. सहस्व मन्यो अभिमातिम् अस्मे
रुजन् मृणन् प्रमृणन् प्र इहि शत्रून्।
उग्रम् ते पाजः ननु आ रुरुध्रे
वशी वशम् नयसे एकज त्वम्।।3।।
9633. एकः बहूनाम् असि मन्यो ईडतः
विशम् विशम् युधये सम् शिशाधि।
अकृत्त-रुक् त्वत्या युजा वयम्
द्यु-मन्तम् घोषम् वि-जयाय कृण्महे।।4।।
9634. विजेष-कृत् इन्द्रः-इव अनवब्रवः
अस्माकम् मन्यो अधिपाः भव इह।
प्रियम् ते नाम सहुरे गृणीमसि
विद्म तम् उत्सम् यतः आबभूथ।।5।।
9635. आभूत्या सहजाः वज्र सायक
सहः बिभर्षि अभिभूते उत्-तरम्।
क्रत्वा नः मन्यो इति सह मेदी एधि
महा-धन्यस्य पुरहूत सम्-सृजि।।6।।
9636. सम्-सृष्टम् धनम् उभयम् सम्-आकृतम्
अस्मभ्यम् दत्ताम् वरुणः च मन्युः।
भियम् दधानाः हृदयेषु शत्रवः
परा-जितासः अप नि लयन्ताम्।।7।।

## सूक्त-85

9637. सत्येन उत्तभिता भूमिः सूर्येण उत्तभिता द्यौः।
ऋतेन आदित्याः तिष्ठन्ति दिवि सोमः अधि श्रितः।।1।।
9638. सोमेन आदित्याः बलिनः सोमने पृथिवी मही।
अथो नक्षत्राणाम् एषाम् उपस्थे सोमः आहितः।।2।।
9639. सोमम् मन्यते पपिवान् यत्सम्-पिषन्ति ओषधिम्।
सोमम् यम् ब्रह्माणः विदुः
न तस्य अश्नाति कः चन।।3।।
9640. आच्छत्-विधानैः गुपितः बार्हतैः सोम रक्षितः।
ग्राव्णाम् इत् शृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः।।4।।
9641. यत् त्वा देव प्रपिबन्ति ततः आ प्यायसे पुनः।
वायुः सोमस्य रक्षिता समानाम् मासः आकृतिः।।5।।
9642. रैभी आसीत् अनुदेयी नाराशंसी नि-ओचनी।
सूर्यायाः भद्रम् इत् वासः गाथया एति परिकृतम्।।6।।
9643. चित्तिः आः उप-बर्हणम् चक्षुः आः अभि-अञ्जनम्।
द्यौः भूमिः कोशः आसीत् यत् अयात् सूर्या पतिम्।।7।।
9644. स्तोमाः आसन् प्रतिधयः कुरीरम् छन्दः ओपशः।
सूर्यायाः अश्विना वरा अग्निः आसीत् पुरः-गवः।।8।।
9645. सोमः वधू-युः अभवत् अश्विना आस्ताम् उभा वरा।
सूर्याम् यत् पत्ये शंसन्तीम् मनसा सविता अददात्।।9।।
9646. मनः अस्याः अनः आसीत्
द्यौः आसीत् उत् छदिः।
शुक्रौ अनड्वाहौ आस्ताम् यत् अयात् सूर्या गृहम्।।10।।
9647. ऋक्-सामाभ्याम् अभिहितौ गावौ ते सामनौ इतः।
श्रोत्रम् ते चक्रे इति आस्ताम् दिवि पन्थाः चराचरः।।11।।
9648. शुची ते चक्रे यात्या वि-आनः अक्षः आहतः।
अनः मनस्मयम् सूर्या आ अरोहत् प्रयती पतिम्।।12।।
9649. सूर्यायाः वहतुः प्र अगात् सविता यम् अव-असृजत्।
अघासु हन्यन्ते गावः अर्जुन्योः परि उह्यते।।13।।
9650. यत् अश्विना पृच्छमानौ अयातम्
त्रिचक्रेण वहतुम् सूर्यायाः।
विश्वे देवाः अनु तत् वाम् अजानन्
पुत्रः पितरौ अवृणीत पूषा।।14।।
9651. यत् अयातम् शुभः पती वरेयम् सूर्याम् उप।
क्व एकम् चक्रम् वाम् आसीत् क्व देष्ट्राय तस्थथुः।।15।।
9652. द्वे ते चक्रे सूर्ये ब्रह्माणः ऋतुथा विदुः।
अथ एकम् चक्रम् यत् गुहा
तत् अद्धातयः इत् विदुः।।16।।
9653. सूर्यायै देवेभ्यः मित्राय वरुणाय च।
ये भूतस्य प्र चेतसः इदम् तेभ्यः अकरम् नमः।।17।।
9654. पूर्व-अपरम् चरतः मायया एतौ
शिशू कीडन्तौ परि यातः अध्वरम्।
विश्वानि अन्यः भुवना अभिचष्टे
क्रतून् अन्यः वि-दधत् जायते पुनः।।18।।

9655. नवः-नवः भवति जायमानः
अह्नाम् केतुः उषसाम् एति अग्रम्।
भागम् देवेभ्यः वि दधाति आ-यन्
प्र चन्द्रमाः तिरते दीर्घम् आयुः।।19।।
9656. सु-किंशुकम् शल्मलिम् विश्व-रूपम्
हिरण्य-वर्णम् सु-वृतम् सुचक्रम्।
आ रोह सूर्ये अमृतस्य लोकम्
स्योनम् पत्ये वहतुम् कृणुष्व।।20।।
9657. उत् ईर्ष्व अतः पति-वती हि एषा
विश्व-वसुम् नमसा गीः-भिः ईड।
अन्याम् इच्छ पितृ-सदम् वि-अक्ताम्
सः ते भागः जनुषा तस्य विद्धि।।21।।
9658. उत् ईर्ष्व अतः विश्ववसो नमसा ईडमहे त्वा।
अन्याम् इच्छ प्रफर्व्यम् सम् जायाम् पत्या सृज।।22।।
9659. अनृक्षराः ऋजवः सन्तु पन्थाः
येभिः सखायः सन्ति नः वरेयम्।
सम् अर्यमा सम् भगः नः निनीयात् सम्
जाःपत्यम् सु-यमम् अस्तु देवाः।।23।।
9660. प्र त्वा मुञ्चामि वरुणस्य पाशात्
येन त्वा अबध्नात् सविता सुशेवः।
ऋतस्य योनौ सु-कृतस्य लोके
अरिष्टाम् त्वा सह पत्या दधामि।।24।।
9661. प्र इतः मुञ्चामि न अमुतः
सु-बद्धाम् अमुतः करम्।
यथा इयम् इन्द्र मीढ्वः सुपुत्रा सुभगा असति।।25।।
9662. पूषा त्वा इतः नयतु हस्तगृह्य
अश्विना त्वा प्र वहताम् रथेन।
गृहान् गच्छ गृहपत्नी यथा असः वशिनी
त्वम् विदथम् आ वदासि।।26।।
9663. इह प्रियम् प्रजया ते सम् ऋध्यताम्
अस्मिन् गृहे गार्ह-पत्याय जागृहि।
एना पत्या तन्वम् सम् सृजस्व अध
जिव्री विदथम् आ वदाथः।।27।।
9664. नील-लोहितम् भवति कृत्या आसक्तिः वि अज्यते।
एधन्ते अस्याः ज्ञातयः पतिः बन्धेषु बध्यते।।28।।
9665. परा देहि शामुल्यम् ब्रह्मभ्यः वि भज वसु।
कृत्या एषा पत्-वती भूत्वी आ जाया विशते पतिम्।।29।।
9666. अश्रीरा तनूः भवति रुशती पापया अमुया।
पतिः यत् वध्वः वाससा स्वम् अङ्गम् अभिधित्सते।।30।।
9667. ये वध्वः चन्द्रम् वहतुम्
यक्ष्माः यन्ति जनात् अनु।
पुनः तान् यज्ञियाः देवाः नयन्तु यतः आगताः।।31।।
9668. मा विदन् परि-पन्थिनः ये आ-सीदन्ति दम्पती।
सुगेभिः दुःगम् अति इताम् अप द्रान्तु अरातयः।।32।।
9669. सुमङ्गलीः इयम् वधूः इमाम् सम्-एत पश्यत।
सौभाग्यम् अस्यै दत्वाय अथ अस्तम् वि परा इतन।।33।।
9670. तृष्टम् एतत् कटुकम् एतत्
अपाष्ठवत् विषवत् न एतत् अत्तवे।
सूर्याम् यः ब्रह्मा विद्यात् सः इत् वाधूयम् अर्हति।।34।।
9671. आशसनम् विशसनम् अथो अधि-विकर्तनम्।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मा तु शुन्धति।।35।।
9672. गृभ्णामि ते सौभगत्वाय हस्तम्
मया पत्या जरत्-अष्टिः यथा असः।
भगः अर्यमा सविता पुरम्-धिः मह्यम्
त्वा अदुः गार्ह-पत्याय देवाः।।36।।
9673. ताम् पूषन् शिव-तमाम् आ ईरयस्व
यस्याम् बीजम् मनुष्याः वपन्ति।
या नः ऊरू उशती विश्रयाते
यस्याम् उशन्तः प्रहराम शेपम्।।37।।
9674. तुभ्यम् अग्रे परि अवहन् सूर्याम् वहतुना सह।
पुनः पतिभ्यः जायाम् दाः अग्ने प्रजया सह।।38।।
9675. पुनः पत्नीम् अग्निः अदात् आयुषा सह वर्चसा।
दीर्घ-आयुः अस्याः यः पतिः जीवति शरदः शतम्।।39।।
9676. सोमः प्रथमः विविदे गन्धर्वः विवदे उत्-तरः।
तृतीयः अग्निः ते पतिः तुरीयः ते मनुष्यजाः।।40।।
9677. सोमः ददत् ग्न्धर्वाय गन्धर्वः ददत् अग्नये।
रयिम् च पुत्रान् च अदात्
अग्निः मह्यम् अथो इमाम्।।41।।
9678. इह एव स्तम् मा वि यौष्टम्
विश्वम् आयुः वि अश्नुतम्।
क्रीडन्तौ पुत्रैः नप्तृभिः मोदमानौ स्वे गृहे।।42।।
9679. आ नः प्रजाम् जनयतु प्रजापतिः
आजरसाय सम् अनक्तु अर्यमा।
अदुःमङ्गलीः पति-लोकम् आ विश
शम् नः भव द्वि-पदे शम् चतुः-पदे।।43।।
9680. अघोर-चक्षुः अपति-घ्नी एधि
शिवा पशुभ्यः सुमनाः सुवर्चाः।
वीरसूः देवकामा स्योना शम् नः
भव द्विपदे शम् चतुः-पदे।।44।।
9681. इमाम् त्वम् इन्द्र मीढ्वः
सुपत्राम् सुभगाम् कृणु दश।
अस्याम् पुत्रान् आ धेहि पतिम् एकादशम् कृधि।।45।।
9682. सम्-राज्ञी श्वसुरे भव सम्-राज्ञी श्वश्वाम् भव।
ननान्दरि सम्-राज्ञी भव सम्-राज्ञी अधि देवृषु।।46।।
9683. सम् अञ्जन्तु विश्वे देवाः सम् आपः हृदयानि नौ।
सम् मातरिश्वा सम् धाता सम् ऊँ देष्ट्री दधातु नौ।।47।।

## सूक्त-86

9684. वि हि सोतोः असृक्षत न इन्द्रम् देवम् अमंसत।
यत्र अमदत् वृषाकपिः अर्यः पुष्टेषु
मत्-सखा विश्वस्मात् इन्द्रः उत्-तरः।।1।।
9685. परा हि इन्द्र धावसि वृषाकपेः अति व्यथिः।
नो अह प्र विन्दसि अन्यत्र
सोमपीतये विश्वस्मात् इन्द्रः उत्-तरः।।2।।
9686. किम् अयम् त्वाम् वृषाकपिः चकार हरितः मृगः।
यस्मै इरस्यसि इत् ऊँम् नु अर्यः वा
पुष्टिमत् वसु विश्वस्मात् इन्द्रः उत्-तरः।।3।।
9687. यम् इमम् त्वम् वृषाकपिम् प्रियम् इन्द्र भिरक्षसि।
श्वा नु अस्य जंभिषत् अपि कर्णे
वराह-युः विश्वस्मात् इन्द्रः उत्-तरः।।4।।
9688. प्रिया तष्टानि मे कपिः विअक्ता वि अदूदुषत्।
शिरः न अस्य राविषम् न सुगम् दुःकृते
भवम् विश्वस्मात् इन्द्रः उत्-तरः।।5।।
9689. न मत् स्त्री सुभसत्-तरा न सुयाशु-तरा भुवत्।
न मत् प्रति-च्यवीयसी न सक्थि
उत्-यमीयसी विश्वस्मात् इन्द्रः उत्-तरः।।6।।
9690. उवे अम्ब सुलाभिके यथा-इव अङ्ग भविष्यति।
असत् मे शिरः मे वि-इव हृष्यति
विश्वस्मात् इन्द्रः उत्-तरः।।7।।
9691. किम् सुबाहो सु-अङ्गुरे पृथुस्तो पृथु-जघने।
किम् शूर-पत्नि नः त्वम् अभि अमीषि
वृषाकपिम् विश्वस्मात् इन्द्रः उत्-तरः।।8।।
9692. अवीराम्-इव माम् अयम् शरारुः अभि मन्यते।
उत् अहम् अस्मि वीरिणी इन्द्र-पत्नी
मरुत्-सखा विश्वस्मात् इन्द्रः उत्-तरः।।9।।
9693. सम्-होत्रम् स्म पुरा नारी समनम् वा अव च्छति।
वेधाः ऋतस्य वीरिणी इन्द्र-पत्नी
महीयते विश्वस्मात् इन्द्रः उत्-तरः।।10।।
9694. इन्द्राणीम् आसु नारिषु सुभगाम् अहम् अश्रवम्।
नहि अस्याः अपरम् चन जरसा
मरते पतिः विश्वस्मात् इन्द्रः उत्-तरः।।11।।
9695. न अहम् इन्द्राणि रारण सख्युः वृषाकपेः ऋते।
यस्य इदम् अप्यम् हविः प्रियम् देवेषु
गच्छति विश्वस्मात् इन्द्रः उत्-तरः।।12।।
9696. वृषाकपायि रेवति सुपुत्रे आत् ऊँ सु-स्नुषे।
घसत् ते इन्द्रः उक्षणः प्रियम् काचित्-करम्
हविः विश्वस्मात् इन्द्रः उत्-तरः।।13।।
9697. उक्षणः हि मे पञ्चदश साकम् पचन्ति विंशतिम्।
उत् अहम् अद्भि पीवः इत् उभा कुक्षी
पृणन्ति मे विश्वस्मात् इन्द्रः उत्-तरः।।14।।
9698. वृषभः न तिग्म-शृङ्गः अन्तः यूथेषु रोरुवत्।
मन्थः ते इन्द्र शम् हृदे यम् ते सुनोति
भावयुः विश्वस्मात् इन्द्रः उत्-तरः।।15।।
9699. न सः ईशे यस्य रम्बते अन्तरा सक्थ्या कपृत्।
सः इत् ईशे यस्य रोमशम् निसेदुषः
विजृम्भते विश्वस्मात् इन्द्रः उत्-तरः।।16।।
9700. न सः ईशे यस्य रोमशम् निसेदुषः विजृम्भते।
सः इत् ईशे यस्य रम्बते अन्तरा
सक्थ्या कपृत् विश्वस्मात् इन्द्रः उत्-तरः।।17।।
9701. अयम् इन्द्र वृषाकपिः परस्वन्तम् हतम् विदत्।
असिम् सूनाम् नवम् चरुम् आत् एधस्य
अनः आचितम् विश्वस्मात् इन्द्रः उत्-तरः।।18।।
9702. अयम् एमि विचाकशत् विचिन्वन् दासम् आर्यम्।
पिबामि पाक-सुत्वनः अभि धीरम्
अचाकशम् विश्वस्मात् इन्द्रः उत्-तरः।।19।।
9703. धन्व च यत् कृन्तत्रम् च
कति स्वित ता वि योजना।
नेदीयसः वृषाकपे अस्तम् आ इहि
गृहान् उप विश्वस्मात् इन्द्रः उत्-तरः।।20।।
9704. पुनः आ इहि वृषाकपे सुविता कल्पावहै।
यः एषः स्वप्न-नंशनः अस्तम् एषि
पथा पुनः विश्वस्मात् इन्द्रः उत्-तरः।।21।।
9705. यत् उतञ्चः वृषाकपे गृहम् इन्द्र अजगन्तन।
क्व स्यः पुल्वघः मृगः कम् अगन्
जन-योपनः विश्वस्मात् इन्द्रः उत्-तरः।।22।।
9706. पर्शुः ह नाम मानवी साकम् ससूव विंशतिम्।
भद्रम् भल त्यस्यै अभूत् यस्याः उदरम्
आमयत् विश्वस्मात् इन्द्रः उत्-तरः।।23।।

## सूक्त-87

9707. रक्षः-हनम् वाजिनम् आ जिघर्मि
मित्रम् प्रथिष्ठम् उप यामि शर्म।
शिशानः अग्निः ऋतुभिः सम्-इद्धः
सः नः दिवा सः रिषः पातु नक्तम्।।1।।
9708. अयः-दंष्ट्रः अरचिषा यातु-धानान्
उप स्पृश जातवेदः सम्-इद्धः।
आ जिह्वया मूर-देवान् रभस्व
क्रव्य-अदः वृक्त्वी अपि धत्स्व आसन्।।2।।
9709. उभा अभाविन् उप धेहि दंष्ट्रा
हिंस्रः शिशानः अवरम् परम् च।
उत अन्तरिक्षे परि याहि राजन् जम्भैः
सम् धेहि अभि यातु-धानान्।।3।।

9710. यज्ञैः इषूः सम्-नममानः अग्ने
वाचा शल्यान् अशनिभिः दिहानः।
ताभिः विध्य हृदये यातु-धानान्
प्रतीचः बाहून् प्रति भङ्धि एषाम्।।4।।
9711. अग्ने त्वचम् यातु-धानस्य भिन्धि
हिंस्रा अशनिः हरसा हन्तु एनम्।
प्र पर्वाणि जातवेदः शृणीहि क्रव्य-अत्
क्रविष्णुः वि चिनोतु वृक्णम्।।5।।
9712. यत्र इदानीम् पश्यसि जातवेदः
तिष्ठन्तम् अग्ने उत् वा चरन्तम्।
यत् वा अन्तरिक्षे पथिभिः पतन्तम्
अस्ता विध्य शर्वा शिशानः।।6।।
9713. उत् आलब्धम् स्पृणुहि जातवेदः
आलेभानात् ऋष्टिभिः यातु-धानात्।
अग्ने पूर्वः नि जहि शोशुचानः आम-अदः
क्ष्विङ्काः तम् अदन्तु एनीः।।7।।
9714. इह प्र ब्रूहि यतमः सः अग्ने
यः यातु-धानः यः इदम् कृणोति।
तम् आ रभस्व सम्-इद्धा यविष्ठ
नृचक्षसः चक्षुषे रन्धय एनम्।।8।।
9715. तीक्ष्णेन अग्ने चक्षुषा रक्ष यज्ञम्
प्राञ्चम् वसुभ्यः प्र नय प्रचेतः।
हिंस्रम् रक्षांसि अभि शोशुचानम्
मा त्वा दभन् यातु-धानाः नृचक्षः।।9।।
9716. नृचक्षाः रक्षः परि पश्य विक्षु
तस्य त्रीणि प्रति शृणीहि अग्रा।
तस्य अग्ने पृष्टीः हरसा शृणीहि
त्रेधा मूलम् यातु-धानस्य वृश्च।।10।।
9717. त्रिः यातु-धानः प्र-सितिम् ते एतु
ऋतम् यः अग्ने अनृतेन हन्ति।
तम् अर्चिषा स्फूर्जयन् जातवेदः
सम्-अक्षम् एतम् गृणते नि वृङ्धि।।11।।
9718. तत् अग्ने चक्षुः प्रति धेहि रेभे
शफ-आरुजम् येन पश्यसि यातुधानम्।
अथर्ववत् ज्योतिषा दैव्येन सत्यम्
धूर्वन्तम् अचितम् नि ओष।।12।।
9719. यत् अग्ने अद्य मिथुना शपातः
यत् वाचः तृष्टम् जनयन्त रेभाः।
मन्योः मनसः शरव्या जायते
या तया विध्य हृदये यातुधानान्।।13।।
9720. परा शृणीहि तपसा यातुधानान्
परा अग्ने रक्षः हरसा शृणीहि।
परा अर्चिषा मूर-देवान् शृणीहि
परा असुतृपः अभि शोशुचानः।।14।।
9621. परा अद्य देवाः वृजिनम् शृणन्तु
प्रत्यक् एनम् शपथाः यन्तु तृष्टाः।
वाचा-स्तेनम् शरवः ऋच्छन्तु मर्मन्
विश्वस्य एतु प्र-सितिम् यातुधानः।।15।।
9722. यः पौरुषेयेण क्रविषा सम्-अंक्ते
यः अश्व्येन पशुना यातुधानः।
यः अघ्न्यायाः भरति क्षीरम् अग्ने
तेषाम् शीर्षाणि हरसा अपि वृश्च।।16।।
9723. संवत्सरीणम् पयः उस्रियायाः
तस्य मा आशीत् यातुधानः नृचक्षः।
पीयूषम् अग्ने यतमः तितृप्सात्
तम् प्रत्यञ्चम् अर्चिषा विध्य मर्मन्।।17।।
9724. विषम् गवाम् यातुधानाः पिबन्दु
आ वृश्च्यन्ताम् अदितये दुःएवाः।
परा एनान् देवः सविता ददातु
परा भागम् ओषधीनाम् जयन्ताम्।।18।।
9725. सनात् अग्ने मृणसि यातुधानान्
न त्वा रक्षांसि पृतनासु जिग्युः।
अनु दह सहमूरान् क्रव्य-अदः
मा ते हेत्याः मुक्षत् दैव्यायाः।।19।।
9726. त्वम् नः अग्ने अधरात् उदक्तात्
त्वम् पश्चात् उत् रक्ष पुरस्तात्।
प्रति ते ते अजरासः तपिष्ठाः
अघशंसम् शोशुचतः दहन्तु।।20।।
9727. पश्चात् पुरस्तात् अधरात्
उदक्तात् कविः काव्येन परि पाहि राजन्।
सरवे सखायम् अजरः जरिम्णे
अग्ने मर्तान् अमर्त्यः त्वम् नः।।21।।
9728. परि त्वा अग्ने परम् वयम् विप्रम् सहस्य धीमहि।
धृषत्-वर्णम् दिवे-दिवे हन्तारम् भङ्गुर-वताम्।।22।।
9729. विषेण भङ्गुरवतः प्रति स्म रक्षसः दह।
अग्ने तिग्मेन शोचिषा तपुःअग्राभिः ऋष्टिभिः।।23।।
9730. प्रति अग्ने मिथुना दह यातुधाना किमीदिना।
सम् त्वा शिशामि जागृहि अदब्धम् विप्र मन्मभिः।।24।।
9731. प्रति अग्ने हरसा हरः शृणीहि विश्वतः प्रति।
यातुधानस्य रक्षसः बलम् वि रुज वीर्यम्।।25।।

## सूक्त-88

9732. हविः पान्तम् अजरम् स्वः-विदि
दिवि-स्पृशि आहुतम् जुष्टम् अग्नौ।
तस्य भर्मणे भुवनाय देवाः
धर्मणे कम् स्वधया पप्रथन्त।।1।।

9733. गीर्णम् भुवनम् तमसा अप-गूड्म्
आविः स्वः अभवत् जाते अग्नौ।
तस्य देवाः पृथिवी द्यौः उत आपः
अरणयन् ओषधीः सख्ये अस्य।।2।।
9734. देवेभिः नु इषितः यज्ञियेभिः
अग्निम् स्तोषाणि अजरम् बृहन्तम्।
यः भानुना पृथिवीम् द्याम् उत् इमाम्
आ-ततान रोदसी अन्तरिक्षम्।।3।।
9735. यः होता आसीत् प्रथमः देवजुष्टः
यम् सम्-आञ्जम् आज्येन वृणानाः।
सः पतत्रि इत्वरम् स्थाः जगत् यत्
श्वात्रम् अग्निः अकृणोत् जातवेदाः।।4।।
9736. यत् जातवेदः भुवनस्य मूर्धन्
अतिष्ठः अग्ने सह रोचनेन।
तम् त्वा अहेम मतिभिः गीःभिः उक्थैः
सः यज्ञियः अभवः रोदसिप्राः।।5।।
9737. मूर्धा भुवः भवति नक्तम् अग्निः
ततः सूर्यः जायते प्रातः उत्-यन्।
मायाम् ऊँ यज्ञियानाम् एताम्
अपः यत् तूर्णिः चरति प्रजानन्।।6।।
9738. दृशेन्यः यः महिना सम्-इद्धः
अरोचत दिवियोनिः विभावा।
तस्मिन् अग्नौ सूक्त-वाकेन देवाः
हविः विश्वे आ अजुहवुः तनूपाः।।7।।
9739. सूक्त-वाकम् प्रथमम् आत् इत् अग्निम्
आत् इत् हविः अजनयन्त देवाः।
सः एषाम् यज्ञः अभवत् तनूपाः तम्
द्यौः वेद तम् पृथिवी तम् आपः।।8।।
9740. यम् देवासः अजनयन्त अग्निम्
यस्मिन् आ अजुहवुः भुवनानि विश्वा।
सः अर्चिषा पृथिवीम् द्याम् उत् इमाम्
ऋजुयमानः अतपत् महित्वा।।9।।
9741. स्तोमेन हि दिवि देवासः अग्निम्
अजीजनन् शक्तिभि रोदसिप्राम्।
तम् ऊ अकृण्वन् त्रेधा भुवे कम्
सः ओषधीः पचति विश्वरूपाः।।10।।
9742. यदा इत् एनम् अदधुः यज्ञियासः
दिवि देवाः सूर्यम् आदितेयम्।
यदा चरिष्णू मिथुनौ अभूताम्
आत् इत् प्र अपश्यन् भुवनानि विश्वा।।11।।
9743. विश्वस्मै अग्निम् भुवनाय देवाः
वैश्वानरम् केतुम् अह्नाम् अकृण्वन्।
आ यः ततान उषसः विभातीः अपो
ऊर्णोति तमः अर्चिषा यन्।।12।।
9744. वैश्वानरम् कवयः यज्ञियासः
अग्निम् देवाः अजनयन् अर्जुयम्।
नक्षत्रम् प्रत्नम् अमिनत् चरिष्णु
यक्षस्य अधि-अक्षम् तविषम् बृहन्तम्।।13।।
9745. वैश्वानरम् विश्वहा दीदिवांसम् मन्त्रैः
अग्निम् कविम् अच्छ वदामः।
यः महिम्ना परिबभूव उर्वी
उत अवस्तात् उत देवः परस्तात्।।14।।
9746. द्वे स्रुती अशृणवम् पितृणाम्
अहम् देवानाम् उत् मर्त्यानाम्।
ताभ्याम् इदम् विश्वम् एजत् सम्
एति यत् अन्तरा पितरम् मातरम् च।।15।।
9747. द्वे समीची बिभृतः चरन्तम्
शीर्षतः जातम् मनसा विमृष्टम्।
सः प्रत्यङ् विश्वा भुवनानि तस्थौ
अप्रयुच्छन् तरणिः भ्राजमानः।।16।।
9748. यत्र वदेते अवरः परः च
यज्ञन्योः कतरः नौ वि वेद।
आ शेकुः इत् सधमादम् सखायः
नक्षन्त यज्ञम् कः इदम् वि वोचत्।।17।।
9749. कति अग्न्यः कति सूर्यासः
कति उषसः कति ऊँ स्वित् आपः।
न उपस्फिजम् वः पितरः वदामि
पृच्छामि वः कवयः विद्मने कम्।।18।।
9750. यावत्-मान्नम् उषसः न प्रतीकम्
सुपर्ण्यः वसते मातरिश्वः।
तावत् दधाति उप यज्ञम् आयन्
ब्राह्ममः होतुः अवरः निसीदन्।।19।।

## सूक्त-89

9751. इन्द्रम् स्तव नृतमम् यस्य मह्ना
विबबाधे रोचना वि ज्मः अन्तान्।
आ यः पप्रौ चर्षणिधृत् वरः-भिः
प्र सिन्धुभ्यः रिरिचानः महित्वा।।1।।
9752. सः सूर्यः परि उरु वरांसि इन्द्रः
ववृत्यात् रथ्या-इव चक्रा।
अतिष्ठन्तम् अपस्यम् न सर्गम्
कृष्णा तमांसि त्विष्या जघान।।2।।
9753. समानम् अस्मै अनपवृत अर्च
क्ष्मया दिविः असमम् ब्रह्म नव्यम्।
वि यः पृष्ठा-इव जनिमानि अर्यः
इन्द्रः चिकाय न सखायम् ईषे।।3।।

9754. इन्द्राय गिरः अनिशित-सर्गाः
अपः प्र ईरयम् सगरस्य बुध्नात्।
यः अक्षेण-इव चक्रिया शचीभिः विष्वक्
तस्तम्भ पृथिवीम् उत द्याम्।।4।।
9755. आपान्तमन्युः तृपल-प्रभर्मा
धुनिः शिमीवान् शरुमान् ऋषीजी।
सोमः विश्वानि अतसा वनानि न
अर्वाक् इन्द्रम् प्रति-मानानि देभुः।।5।।
9756. न यस्य द्यावापृथिवी न धन्व
न अन्तरिक्षम् न अद्रयः सोमः अक्षाः।
यत् अस्य मन्युः अधिनीयमानः
शृणाति वीड रुजति स्थिराणि।।6।।
9757. जघान वृत्रम् स्वधितिः वना-इव
रुरोज पुरः अरदत् न सिन्धून्।
बिभेद गिरिम् नवम् इत् न कुम्भम
आ गाः इन्द्रः अकृणुत स्वयुक्-भिः।।7।।
9758. त्वम् ह त्यत् ऋणयाः इन्द्र धीरः
असिः न पर्व वृजिना शृणासि।
प्र ये मित्रस्य वरुणस्य धाम
युजम् न जनाः मिनन्ति मित्रम्।।8।।
9759. प्र ये मित्रम् प्र अर्यमणम् दुःएवाः
प्र सम्-गिरः प्र वरुणम् मिनन्ति।
नि अमित्रेषु वधम् इन्द्र तुम्रम्
वृषन् वृषाणम् अरुषम् शिशीहि।।9।।
9760. इन्द्रः दिवः इन्द्रः ईशे पृथिव्याः
इन्द्रः अपाम् इन्द्रः इत् पर्वतानाम्।
इन्द्रः वृधाम् इन्द्रः इत् मेधिराणाम्
इन्द्रः क्षेमे योगे हव्यः इन्द्रः।।10।।
9761. प्र अक्तुभ्यः इन्द्रः प्र वृधः अहभ्यः
प्र अन्तरिक्षात् प्र समुद्रस्य धासेः।
प्र वातस्य प्रथसः प्र ज्मः अन्तात्
प्र सिन्धुभ्यः रिरिचे प्र क्षितिभ्यः।।11।।
9762. प्र शोशुचत्याः उषसः न केतुः
असिन्वा ते वर्तताम् इन्द्र हेतिः।
अश्मा-इव विध्य दिवः आ सृजानः
तपिष्ठेन हेषसा द्रोघ-मित्रान्।।12।।
9763. अनु अह मासाः अनु इत्
वनानि अनु ओषधी अनु पर्वतासः।
अनु इन्द्रम् रोदसी वावशाने
अनु आपः अजिहत जायमानम्।।13।।
9764. कर्हि स्वित् सा ते इन्द्रचेत्या असत्
अघनस्य यत् भिनदः रक्षः आ-ईषत्।
मित्र-क्रुवः यत् शसने न गावः
पृथिव्याः आपृक् अमुया शयन्ते।।14।।
9765. शत्रु-यन्तः अभि ये नः ततस्रे
महि व्राधन्तः ओगणासः इन्द्र।
अन्धेन अमित्राः तमसा सचन्ताम्
सुज्योतिषः अक्तवः तान् अभि स्युः।।15।।
9766. पुरूणि हि त्वा सवना जनानाम्
ब्रह्माणि मन्दन् गृणताम् ऋषीणाम्।
इमाम् आ-घोषन् अवसा सहूतिम्
तिरः विश्वान् अर्चतः याहि अर्वाङ्।।16।।
9767. एव ते वयम् इन्द्र भुञ्जतीनाम्
विद्याम् सुमतीनाम् नवानाम्।
विद्याम् वस्तोः अवसा गृणन्तः
विश्वामित्राः उत् ते इन्द्र नूनम्।।17।।
9768. शुनम् हुवेम मघवानम् इन्द्रम्
अस्मिन् भरे नृतमम् वाजसातौ।
शृण्वन्तम् उग्रम् ऊतये सम्त्-सु
घ्नन्तम् वृत्राणि सम्-जितम् धनानाम्।।18।।

## सूक्त-90

9769. सहस्रशीर्षा पुरषः सहस्रअक्षः सहस्र-पात् सः।
भूमिम् विश्वतः वृत्वा अति अतिष्ठत् दश-अङ्गुलम्।।1।।
9770. पुरुषः इव इदम् सर्वम् यत् भूतम् यत् च भव्यम्।
उत अमृतत्वस्य ईशानः यत् अन्नेन अति-रोहति।।2।।
9771. एतावान् अस्य महिमा अतः ज्यायान् च पुरुषः।
पादः अस्य विश्वा भूतानि
त्रिपात् अस्य अमृतम् दिवि।।3।।
9772. त्रिपात् ऊर्ध्वः उत् ऐत् पुरुषः
पादः अस्य इह अभवत् पुनः।
ततः विष्वङ् वि अक्रामत् साशनानशने अभि।।4।।
9773. तस्मात् वि-राट् अजायत् विराजः अधि पुरुषः।
सः जातः अति अरिच्यत पश्चात् भूमिम् अथो पुरः।।5।।
9774. यत् पुरुषेण हविषा देवाः यज्ञम् अतन्वत।
वसन्तः अस्य आसीत् आज्यम्
ग्रीष्मः इध्मः शरत् हविः।।6।।
9775. तम् यज्ञम् बर्हिषि प्र
औक्षन् पुरुषम् जातम् अग्रतः।
तेन देवाः अयजन्त साध्याः ऋषयः च ये।।7।।
9776. तस्मात् यज्ञात् सर्व-हुतः सम्-भृतम् पृषत्-आज्यम्।
पशून् तान् चक्रे वायव्यान् आरण्यान् ग्राम्याः च ये।।8।।
9777. तस्मात् यज्ञात् सर्व-हुतः ऋचः सामानि जज्ञिरे।
छन्दांसि जज्ञिरे तस्मात् यजुः तस्मात् अजायत्।।9।।
9778. तस्मात् अश्वाः अजायन्त ये के च उभयादतः।
गार्वः ह जज्ञिरे तस्मात् तस्मात् जाताः अजावयः।।10।।

9779. यत् पुरुषम् वि अदधुः कतिधा वि अकल्पयन्।
मुखम् किम् अस्य कौ बाहू कौ उरू पादौ उच्येते।।11।।
9780. ब्राह्मणः अस्य मुखम् आसीत् बाहू राजन्यः कृतः।
उरू तत् अस्य यत् वैश्यः पत्-भ्याम् शूद्रः अजायत।।12।।
9781. चन्द्रमाः मनसः जातः चक्षोः सूर्यः अजायत।
मुखात् इन्द्रः च अग्निः च प्राणात् वायुः अजायत।।13।।
9782. नाभ्याः आसीत् अन्तरिक्षम्
शीर्ष्णः द्यौः सम् अवर्तत।
पत्-भ्याम् भूमिः दिशः श्रोत्रात्
तथा लोकान् अकल्पयन्।।14।।
9783. सप्त अस्य आसन् परिधयः
त्रिः सप्त सम्-इधः कृताः।
देवाः यत् यज्ञम् तन्वानाः अबध्नन् पुरुषम् पशुम्।।15।।
9784. यज्ञेन यज्ञम् अयजन्त देवाः
तानि धर्माणि प्रथमानि आसन्।
ते ह नाकम् महिमानः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः।।16।।

## सूक्त-91

9785. सम् जागृवत्-भिः जरमाणः इध्यते
दमे दमूनाः इषयन् इड पदे।
विश्वस्य होता हविषः वरेण्यः
विभुः विभावा सुसरवा सखियते।।1।।
9786. सः दर्शत-श्रीः अतिथिः गृहे-गृहे
वने-वने शिश्रिये तक्ववीः-इव।
जनम्-जनम् जन्यः न अति मन्यते
विशः आ क्षेति विश्यः विशम्-विशम्।।2।।
9787. सुदक्षः दक्षैः क्रतुना असि सुक्रतुः
अग्ने कविः काव्येन असि विश्ववित्।
वसुः वसूनाम् क्षयसि त्वम् एकः इत्
द्यावा च यानि पृथिवी च पुष्यतः।।3।।
9788. प्रजानन् अग्ने तव योनिम् ऋत्वियम्
इडयाः पदे घृतवन्तम् आ असदः।
आ ते चिकित्रे उषसाम्-इव एतयः
अरेपसः सूर्यस्य-इव रश्मयः।।4।।
9789. तव श्रियः वर्ष्यस्य-इव विद्युतः
चित्राः चिकित्रे उषसाम् न केतवः।
यत् ओषधीः अभिसृष्टः वनानि च
परि स्वयम् चिनुषे अन्नम् आस्ये।।5।।
9790. तम् ओषधीः दधिरे गर्भम् ऋत्वियम्
तम् आपः अग्निम् जनयन्त मातरः।
तम् इत् समानम् वनिनः च वीरुधः
अन्तःवतीः च सुवते च विश्वहा।।6।।
9791. वात-उपधूतः इषितः वशान् अनु
तृषु यत् अन्ना वेविषत् वितिष्ठसे।
आ ते यतन्ते रथ्यः यथा पृथक्
शर्धांसि अग्ने अजराणि धक्षतः।।7।।
9792. मेधाकारम् विदथस्य प्रसाधनम्
अग्निम् होतारम् परिभूतमम् मतिम्।
तम् इत् अर्भे हविषि आ समानम् इत्
तम् इत् महे वृणते न अन्यम् त्वत्।।8।।
9793. त्वाम् इत् अत्र वृणते त्वा-यवः
होतारम् अग्ने विदथेषु वेधसः।
यत् देवयन्तः दधति प्रयांसि ते
हविष्मन्तः मनवः वृक्त-बर्हिषः।।9।।
9794. तव अग्ने होत्रम् तव पोत्रम् ऋत्वियम्
तव नेष्ट्रम् त्वम् अग्नित् ऋतयतः।
तव प्रशास्त्रम् त्वम् अध्वरियसि ब्रह्मा
च असि गृहपतिः च नः दमे।।10।।
9795. यः तुभ्यम् अग्ने अमृताय मर्त्यः
सम्-इधा दाशत् उत् वा हविः-कृति।
तस्य होता भवसि यासि दूत्यम्
उप ब्रूषे यजसि अध्वरियसि।।11।।
9796. इमाः अस्मै मतयः वाचः असम्त्
आ ऋचः गिरः सु-स्तुतयः सम् अग्मत्।
वसुयवः वसवे जात-वेदसे वृद्धासु
चित् वर्धनः यासु चाकनत्।।12।।
9797. इमाम् प्रत्नाय सु-स्तुतिम् नवीयसीम्
वोचेयम् अस्मै उशते शृणोतु नः।
भूयाः अन्तरा हृदि अस्य नि-स्पृशे
जाया-इव पत्ये उशती सुवासाः।।13।।
9798. यस्मिन् अश्वासः ऋषभासः उक्षणः
वशाः मेषाः अव-सृष्टासः आहुताः।
कीलाल-पे सोम-पृष्ठाय वेधसे हृदा
मतिम् जनये चारुम् अग्नये।।14।।
9799. अहावि अग्ने हविः आस्ये ते
सुचि-इव घृतम् चम्वि-इव सोमः।
वाज-सनिम् रयिम् अस्मे सुवीरम्
प्रशस्तम् धेहि यशसम् बृहन्तम्।।15।।

## सूक्त-92

9800. यज्ञस्य वः रथ्यम् विश्पतिम् विशाम्
होतारम् अक्तोः अतिथिम् विभा-वसुम्।
शोचन् शुष्कासु हरिणीषु जर्भुरत् वृषा
केतुः यजतः द्याम् अशायत्।।1।।
9801. इमम् अञ्जः-पाम् उभये अकृण्वत

धर्माणम् अग्निम् विदथस्य साधनम्।
अक्तुम् न यह्वम् उषसः पुरः-हितम्
तनू-नपातम् अरुषस्य निंसते।।2।।
9802. बट् अस्य नीथा वि पणेः च मन्महे
वयाः अस्य प्र-हुताः आसुः अत्तवे।
यदा घोरासः अमृत-त्वम् आशत
आत् इत् जनस्य दैव्यस्य चर्किरन्।।3।।
9803. ऋतस्य हि प्रसितिः द्यौः उरु
व्यचः नमः मही अरमतिः पनीयसी।
इन्द्रः मित्रः वरुणः सम् चिकित्रिरे
अथो भगः सविता पूत-दक्षसः।।4।।
9804. प्र रुद्रेण ययिना यन्ति सिन्धवः
तिरः महीम् अरमतिम् दधन्विरे।
येभिः परिज्मा परि-यन् उरु ज्रयः वि
रोरुवत् जठरे विश्वम् उक्षते।।5।।
9805. क्राणाः रुद्राः मरुतः विश्वकृष्टयः
दिवः श्येनासः असुरस्य नीडयः।
तेभिः चष्टे वरुणः मित्रः अर्यमा
इन्द्रः देवेभिः अर्वशेभिः अर्वशः।।6।।
9806. इन्द्रे भुजम् शशमानासः आशत
सूरः दृशीके वृषणः च पौंस्ये।
प्र ये नु अस्य अर्हणा ततक्षिरे
युजम् वज्रम् नृ-सदनेषु कारवः।।7।।
9807. सूरः चित् आ हरितः अस्य रीरमत्
इन्द्रात् आ कः चित् भयते तवीयसः।
भीमस्य वृष्णः जठरात् अभिश्वसः
दिवे-दिवे सहुरिः स्तन् अबाधितः।।8।।
9808. स्तोमम् वः अद्य रुद्राय शिक्वसे
क्षयत्-वीराय नमसा दिदिष्टन।
येभिः शिवः स्व-वान् एवयाव-भिः दिवः
सिसक्ति स्व-यशाः निकामभिः।।9।।
9809. ते हि प्रजायाः अभरन्त वि श्रवः
बृहस्पतिः वृषभः सोम-जामयः।
यज्ञैः अथर्वा प्रथमः वि धारयत्
देवाः दक्षैः भृगवः सम् चिकित्रिरे।।10।।
9810. ते हि द्यावापृथिवी भूरिरेतसा
नराशंसः चतुःअङ्गः यमः अदितिः।
देवः त्वष्टा द्रविणः-दाः ऋभुक्षणः
प्र रोदसी मरुतः विष्णुः अर्हिरे।।11।।
9811. उत स्यः नः उशिजाम् उर्विया
कविः अहिः शृणोतु बुध्नयः हवीमनि।
सूर्यामासा विचरन्ता दिविक्षिता
धिया शमीनहुषी अस्य बोधतम्।।12।।
9812. प्र नः पूषा चरथम् विश्व-देव्यः
अपाम् नपात् अवतु वायुः इष्टये।
आत्मानम् वस्यः अभि वातम् अर्चत
तत् अश्विना सुहवा यामनि श्रुतम्।।13।।
9813. विशाम् आसाम् अभयानाम् अधिक्षितम्
गीः-भिः ॐ स्वयशसम् गृणीमसि।
ग्नाभिः विश्वाभिः अदितिम् अनर्वणम्
अक्तोः युवानम् नृमनाः अध पतिम्।।14।।
9814. रेभत् अत्र जनुषा पूर्वाः अङ्गिराः
ग्रावाणः ऊर्ध्वाः अभि चक्षुः अध्वरम्।
येभिः विहायाः अभवत् विचक्षणः
पाथः सुमेकम् स्वधितिः वनन्-वति।।15।।

## सूक्त-93

9815. महि द्यावापृथिवी भूतम् ऊर्वी
नारी यह्वी न रोदसी सदम् नः।
तेभिः नः पातम् सह्यसः एभिः नः पातम् शूषणि।।1।।
9816. यज्ञे-यज्ञे सः मर्त्यः देवान् सपर्यति।
यः सुम्नैः दीर्घश्रुत्-तमः आ-विवासाति एनान्।।2।।
9817. विश्वेषाम् इरज्यवः देवानाम् वाः महः।
विश्वे हि विश्व-महसः विश्वे यज्ञेषु यज्ञियाः।।3।।
9818. ते घ राजानः अमृतस्य मन्द्राः
अर्यमा मित्रः वरूणः परिज्मा।
कत् रुद्रः नृणाम् स्तुतः मरुतः पूषणः अर्गः।।4।।
9819. उत नः नक्तम् अपाम् वृषण्वसू
वृषण्-वसू सूर्यामासा सदनाय स-धन्या।
सचा यत् सादि एषाम् अहिः बुध्नेषु बुध्न्यः।।5।।
9820. उत नः देवौ अश्विना शुभः
पती धामभिः मित्रावरुणौ उरुष्यताम्।
महः सः रायः आ ईषते अति धन्व-इव दुःइता।।6।।
9821. उत नः रुद्रा चित् मृडताम् अश्विना
विश्वे देवासः रथः-पतिः भगः।
ऋभुः वाजः ऋभुक्षणः परिज्मा विश्व-वेदसः।।7।।
9822. ऋभुः ऋभुक्षाः ऋभुः विधतः मदः
आ ते हरी जूजुवानस्य वाजिना।
दुस्तरम् यस्य साम चित् ऋधक् यज्ञः न मानुषः।।8।।
9823. कृधि नः अह्नयः देव सवितः
सः च स्तुषे मघोनाम्।
सहो नः इन्द्रः वह्निभिः नि एषाम्
चर्षणीनाम् चक्रम् रश्मिम् न योयुवे।।9।।
9824. आ एषु द्यावापृथिवी धातम्
महत् अस्मे वीरेषु विश्व-चर्षणि श्रवः।
पृक्षम् वाजस्य सातये पृक्षम् राया उत तुर्वणे।।10।।

9825. एतम् शंसम् इन्द्र अस्म-युः त्वम् कू-चित्
सन्तम् सहसा-वन् अभिष्टये सदा पाहि अभिष्टये।
मेदताम् वेदता वसो।।11।।
9826. एतम् मे स्तोमम् तना न सूर्ये
द्युतत्-यामानम् ववृधन्त नृणाम्।
सम्-वननम् न अश्व्यम् तष्टा-इव अनप-च्युतम्।।12।।
9827. ववर्त येषाम् राया युक्ता एषाम् हिरण्ययी।
नेम-धिता न पौंस्या वृथा-इव विष्ट-अन्ता।।13।।
9828. प्र तत् दुः-शीमें पृथवाने वेने प्र
रामे वोचम् असुरे मघवत् सु।
युक्त्वाय पञ्च शता अस्म-यु पथा विश्रावि एषाम्।।14।।
9829. अधि इत् नु अत्र सप्ततिम् च।
सप्त च सद्यः दिदिष्ट तान्वः सद्य
दिदिष्ट पार्थ्यः सद्यः दिदिष्ट मायवः।।15।।

## सूक्त-94

9830. प्र एते वदन्तु प्र वयम् वदाम्
ग्राव-भ्यः वाचम् वदत वदत्-भ्यः।
यत् अद्रय पर्वता साकम् आशर्व
श्लोकम् घोषम् रथ इन्द्राय सोमिन।।1।।
9831. एते वदन्ति शत्-वत् सहस्र-वत् अभि
क्रन्दन्ति हरितेभिः आस-भिः।
विष्ट्वी ग्रावाणः सुकृतः सु-कृत्यया
होतुः चित् पूर्वे हविः-अद्यम् आशत।।2।।
9832. एते वदन्ति अविदन् अना मधु
नि ऊङ्खयन्ते अधि पक्वे आमिषि।
वृक्षस्य शाखाम् अरुणस्य बप्सतः
ते सूभर्वा वृषभाः प्र ईम् अराविषुः।।3।।
9833. बृहत् वदन्ति मदिरेण मन्दिना
इन्द्रम् कोशन्तः अविदन् अना मधु।
सम्-रभ्य धीराः स्वसृभिः अनर्तिषुः
आ-घोषयन्तः पृथिवीम् उपब्दि-भिः।।4।।
9834. सु पर्णाः वाचम् अक्रत उप द्यवि
आ-खरे कृष्णाः इषिराः अनर्तिषुः।
न्यक् नि यन्ति उपरस्य निः-कृतम्
पुरु रेतः दधिरे सूर्य-श्वितः।।5।।
9835. उग्राः-इव प्र-वहन्तः सम्-आयमुः
साकम् युक्ताः वृषणः बिभ्रतः धुरः।
यत् श्वसन्तः जग्रसानाः अराविषुः शृण्वे
एषाम् प्रोथथः अर्वताम्-इव।।6।।
9836. दशावनिभ्यः दशकक्षेभ्यः
दशयोक्त्रेभ्यः दशयोजनेभ्यः।
दशामीशु-भ्यः अर्चत अजरेभ्यः
दश धुरः दश युक्ताः वहत्-भ्यः।।7।।
9837. ते अद्रयः दश-यंत्रासः आशवः
तेषाम् आ-धानम् परि एति-हर्तयम्।
ते ॐ सुतस्य सोमस्य अन्धसः
अंशोः पीयूषम् प्रथमस्य भेजिरे।।8।।
9838. ते सोम-अदः हरी इन्द्रस्य नंसते
अंशुम् दुहन्तः अधि आसते गवि।
तेभिः दुग्धम् पपिवान् सोम्यम्
मधु इन्द्रः वर्धते प्रथते वृषयते।।9।।
9839. वृषा वः अंशुः न कल रिषाथन
इडवन्तः सदम् इत् स्थन आशिताः।
रैवत्या-इव महसा चारवः स्थन यस्य
ग्रावाणः अजुषध्वम् अध्वरम्।।10।।
9840. तृदिलाः अतृदिलासः अद्रयः
अश्रमणाः अशृथिताः अमृत्यवः।
अनातुराः अजराः स्थ अमविष्णवः
सुपीवसः अतृषिताः अतृष्णजः।।11।।
9841. ध्रुवः एव वः पितरः युगे-युगे
क्षेमकामासः सदसः न युञ्जते।
अजुर्यासः हरि-साचः हरिद्रवः आ
द्याम रवेण पृथिवीम् अशुश्रवुः।।12।।
9842. तत् इत् वदन्ति अद्रयः विमोचने
यामन् अञ्जपाः-इव द्य इत् उपब्दिभिः।
वपन्तः बीजम्-इव धान्यकृतः पृञ्चन्ति
सोमम् न मिनन्ति बप्सतः।।13।।
9843. सुते अध्वरे अधि वाचम् अक्रत्
आ क्रीडयः न मातरम् तुदन्तः।
वि सु मुञ्च सुसु-वुषः मनीषाम्
वि वर्तन्ताम् अद्रयः चायमानाः।।14।।

## सूक्त-95

9844. हये जाये मनसा तिष्ठ घोरे
वचांसि मिश्रा कृणवावहै नु।
न नौ मन्त्राः अनुदितासः एते
मयः करन् पर-तरे चन अहन्।।1।।
9845. किम् एता वाचा कृणव तव अहम्
प्र अक्रमिषम् उषसाम् अग्रिया-इव।
पुरूरवः पुनः अस्तम् परा इहि
दुः-आपना वातः-इव अहम् अस्मि।।2।।
9846. इषुः न श्रिये इषुधेः असना गोसाः शतसाः न रंहिः।
अवीरे क्रतौ वि दविद्युतत् न
उरा न मायुम् चितयन्त धुनयः।।3।।
9847. सा वसु दधती श्वशुराय वयः

उषः यदि वष्टि अन्ति-गृहात्।
अस्तम् ननक्षे यस्मिन् चाकन्
दिवा नक्तम् श्नथिता वैतसेन।।4।।
9848. त्रिः स्म मा अह्नः श्नथयः
वैतसेन उत स्म मे अव्यत्यै पृणासि।
पुरूरवः अनु ते केतम् आयम् राजा
मे वीर तन्वः तत् आसीः।।5।।
9849. या सुजूर्णिः श्रेणिः सुम्ने-आपिः
ह्रदे-चक्षुः न ग्रन्थिनी चरण्युः।
ताः अञ्जयः अरुणयः न सस्रुः
श्रिये गावः न धेनवः अनवन्त।।6।।
9850. सम् अस्मिन् जायमाने आसत् ग्नाः
उत् ईम् अवर्धन् नद्यः स्व-गूर्ताः।
महे यत् त्वा पुरूरवः रणाय
अवर्धयन् दस्यु-हत्याय देवाः।।7।।
9851. सचा यत् आसु जहतीषु अत्कम्
अमानुषीषु मानुषः न-सेवे।
अप स्म मत् तरसन्ती न भुज्युः
ताः अत्रसन् रथ-स्पृशः न अश्वाः।।8।।
9852. यत् आसु मर्तः अमृतासु नि-स्पृक्
सम् क्षोणीभिः क्रतुभिः न पृङ्क्ते।
ताः आतयः न तन्वः शुंभत स्वाः
अश्वासः न क्रीडयः दन्दशानाः।।9।।
9853. वि-द्युत् न या पतन्ती दविद्योत
भरन्ती मे अप्या काम्यानि।
जनिष्टो अपः नर्यः सुजातः
प्र उर्वशी तिरत दीर्घम् आयुः।।10।।
9854. जज्ञिषे इत्था गोपपीथ्याय हि
दधाथ तत् पुरूरवः मे ओजः।
अशासम् त्वा विदुषी सस्मिन् अहन् न
मे आ अशृणोः किम् अभुक् वदासि।।11।।
9855. कदा सूनुः पितरम् जातः इच्छात्
चक्रम् न अश्रु वर्तयत् विजानन्।
कः दम्पती समनसा वि यूयोत् अध
यत् अग्निः श्वशुरेषु दीदयत्।।12।।
9856. प्रति ब्रवाणि वर्तयते अश्रु
चक्रन् न क्रन्दत् आध्ये शिवायै।
प्र तत् ते हिनव यत् ते अस्मे परा
इह अस्तम् नहि मूर मा आपः।।13।।
9857. सुदेवः अद्य प्रपतेत् अनावृत्
परावतम् परमाम् गन्तवै ऊँ।
अध शयीत निःऋतेः उपस्थे
अध एनम् वृकाः रभसासः अद्युः।।14।।
9858. पुरूरवः मा मृथाः मा प्र पप्तः
मा त्वा वृकासः अशिवासः ऊँ क्षन्।
न वै स्त्रैणानि सख्यानि सन्ति
सालावृकाणाम् ह्रदयानि एता।।15।।
9859. यत् विरूपा अचरम् मर्त्येषु
अवसम् रात्रीः शरदः चतस्रः।
घृतस्य स्तोकम् सकृत् अह्नः आश्नाम्
तात् एव इदम् ततृपाणा चरामि।।16।।
9860. अन्तरिक्ष-प्राम् रजसः वि-मानीम्
उप शिक्षामि उर्वशीम् वसिष्ठः।
उप त्वा रातिः सु-कृतस्य तिष्ठात्
नि वर्तस्व ह्रदयम् तप्यते मे।।17।।
9861. इति त्वा देवाः इमे आहुः ऐड
यथा ईम् एतत् भवसि मृत्युबन्धुः।
प्रजा ते देवान् हविषा यजाति
स्वःगे ऊँ त्वम् अपि मादयासे।।18।।

## सूक्त-96

9862. प्र ते महे विदथे शंसिषम् हरी
प्र ते वन्वे वनुषः हर्यतम् मदम्।
घृतम् न यः हरिभिः चारु सेचते
आ त्वा विशन्तु हरि-वर्पसम् गिरः।।1।।
9863. हरिम् हि योनिम् अभि ये सम्-अस्वरन्
हिन्वन्तः हरी दिव्यम् यथा सदः।
आ यम् पृणन्ति हरिभिः न धेनवः
इन्द्राय शूषम् हरि-वन्तम् अर्चत।।2।।
9864. सः अस्य वज्रः हरितः यः आयसः
हरिः निकामः हरिः आ गभस्त्योः।
धुम्नी सुशिप्रः हरिमन्यु-सायकः
इन्द्रे नि रूपा हरिता मिमिक्षिरे।।3।।
9865. दिवि न केतुः अधि धायि हर्यतः
विव्यचत् वज्रः हरितः न रंह्या।
तुदत् अहिम् हरिशिप्रः यः आयसः
सहस्र-शोकाः अभवत् हरिम्-भरः।।4।।
9866. त्वम्-त्वम् अहर्यथाः उप-स्तुतः
पूर्वेभिः इन्द्र हरि-केश यज्वभिः।
त्वम् हर्यसि तव विश्वम् उक्थ्यम्
असामि राधः हरिजात हर्यतम्।।5।।
9867. ता वज्रिणम् मन्दिनम् स्तोम्यम्
मदे इन्द्रम् रथे वहतः हर्यता हरी।
पुरूणि अस्मै सवनानि हर्यते
इन्द्राय सोमाः हरयः दधन्विरे।।6।।
9868. अरम् कामाय हरयः दधन्विरे

स्थिराय हिन्वन् हरयः हरी तुरा।
अर्वत्-भिः यः हरिभिः जोषम् ईयते सः
अस्य कामम् हरिवन्तम् आनशे।।7।।
9869. हरिःस्मशारुः हरिकेशः आयसः
तुरः-पेये यः हरिपाः अवर्धत्।
अर्वत्-भिः यः हरिभिः वाजिनीवसुः
अति विश्वा दुः-इता पारिषत् हरी।।8।।
9870. स्रुव-इव यस्य हरिणी विपेततुः
शिप्रे वाजाय हरिणी दविध्वतः।
प्र यत् कृते चमसे मर्मृजत् हरी
पीत्वा मदस्य हर्यतस्य अन्धसः।।9।।
9871. उत् स्म सद्म हर्यतस्य पस्त्योः
अत्यः न वाजम् हरि-वान् अचिक्रदत्।
मही चित् हि धिषणा अहर्यत् ओजसा
बृहत् वयः दधिषे हर्यतः चित् आ।।10।।
9872. आ रोदसी हर्यमाणः महित्वा
नव्यम्-नव्यम् हर्यसि मन्म नु प्रियम्।
प्र पस्त्यम् असुर हर्यतम् गोः
आविः कृधि हरये सूर्याय।।11।।
9873. आ त्वा हर्यन्तम् प्रयुजः जनानाम्
रथे वहन्तु हरि-शिप्रम् इन्द्र।
पिब यथा प्रति-भृतस्य मध्वः हर्यन्
यज्ञम् सध-मादे दश-ओणिम्।।12।।
9874. अपाः पूर्वेषाम् हरिवः सुतानाम्
अथो इदम् सवनम् केवलम्।
ते ममद्धि सोमम् मधुमन्तम् इन्द्र
सत्रा वृषन् जठरे आ वृषस्व।।13।।

## सूक्त-97

9875. याः ओषधीः पूर्वाः जाताः देवेभ्यः त्रि-युगम् पुरा।
मनै नु बभ्रूणाम् अहम् शतम् धामानि सप्त च।।1।।
9876. शतम् वः अम्ब धामानि सहस्रम् उत् वः रुहः।
अध शत-क्रत्वः यूयम् इमम् मे अगदम कृत्।।2।।
9877. ओषधीः प्रति मोदध्वम् पुष्पवतीः प्रसूवरीः।
अश्वाः-इव सजित्वरीः वीरुधः पारयिष्णवः।।3।।
9878. ओषधीः इति मातरः तत् वः देवीः उप ब्रुवे।
सनेयम् अश्वम् गाम् वासः आत्मानम् तव पुरुष।।4।।
9879. अश्वत्थे वः नि-सदनम् पर्णे वः वसतिः कृता।
गोभाजः इत् किल असथ यत् सनवथ पुरुषम्।।5।।
9880. यत्र ओषधीः सम्-अग्मत् राजानः समितौ-इव।
विप्रः सः उच्यते भिषक् रक्षः-हा अमीवचातनः।।6।।
9881. अश्व-वतीम् सोम-वतीम् ऊर्जयन्तीम् उत्-ओजसम्।
आ अवित्सि सर्वाः ओषधीः अस्मै अरिष्टतातये।।7।।
9882. उत् शुष्माः ओषधीनाम् गावः गोस्थात्-इव ईरते।
धनम् सनिष्यन्तीनाम् आत्मानम् तव पुरुष।।8।।
9883. इष्कृतिः नाम वः माता अथो यूयम् स्थ निः-तीः।
सीराः पतत्रिणीः स्थन यत् आमयति निः कृथ।।9।।
9884. अति विश्वाः परिस्थाः स्तेनः-इव व्रजम् अक्रमुः
ओषधीः प्र अचुच्यवुः यत् किम् च तन्वः रपः।।10।।
9885. यत् इमाः वाजयन् अहम् ओषधीः हस्ते आदधे।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभः यथा।।11।।
9886. यस्य ओषधीः प्रसर्पथ अङ्गम्-अङ्गम् परुः-परुः।
ततः यक्ष्मम् वि बाधध्वे उग्रः मध्यमशीःइव।।12।।
9887. साकम् यक्ष्म प्र पत चाषेण किकिदीविना।
साकम् वातस्य ध्राज्या साकम् नश्य नि-हाकया।।13।।
9888. अन्यावः अन्याम् अवतु
अन्या अन्यस्याः उप अवत।
ताः सर्वाः सम्-विदानाः इदम् मे प्र अवत वचः।।14।।
9889. याः फलिनीः याः अफलाः पुष्पाः याः च पुष्पिणीः।
बृहस्पति-प्रसूताः ताः नः मुञ्चन्तु अंहसः।।15।।
9890. मुञ्चन्तु मा शपथ्यात् अथो वरुण्यात् उत अथो
यमस्य पड्वीशात् सर्वस्मात् देव-किल्बिषात्।।16।।
9891. अव-पतन्तीः अवदन् दिवः ओषधयः परि।
यम् जीवम् अश्नवामहै न सः रिष्याति पुरुषः।।17।।
9892. याः ओषधीः सोम-राज्ञीः बह्वीः शत-विचक्षणाः।
तासाम् त्वम् असि उत्-तमा अरम् कामाय शम् हृदे।।18।।
9893. याः ओषधीः सोम-राज्ञीः विस्थिताः पृथिवीम् अनु।
बृहस्पति-प्रसूताः अस्यै सम् दत्त वीर्यम्।।19।।
9894. मा वः रिषत् खनिता यस्मै च अहम् खनामि वः।
द्विपत् चतुः-पत् अस्माक् सर्वम् अस्तु अनातुरम्।।20।।
9895. याः च इदम् उप-शृण्वन्ति याः च दूरम् परागताः।
सर्वाः सम्-गत्य वीरुधः अस्यै सम् दत्त वीर्यम्।।21।।
9896. ओषधयः सम् वदन्ते सोमेन सह राज्ञा।
यस्मै कृणोति ब्राह्मणः तम् राजन् पारयामसि।।22।।
9897. त्वम् उत्-तमा असि ओषधे तव वृक्षाः उपस्त्यः
उपस्तिः अस्तु सः अस्माकम्
यः अस्माकम् अभिदासति।।23।।

## सूक्त-98

9898. बृहस्पते प्रति मे देवताम् इहि
मित्रः वा यत् वरुणः वा असि पूषा।
आदित्यैः वा यत् वसुभिः मरुत्वान्
सः पर्जन्यम् शम्-तनवे वृषय।।1।।
9899. आ देवः दूतः अजिरः चिकित्वान्
त्वत् देव-आपे अभि माम् अगच्छत्।
प्रतीचीनः प्रति माम् आ ववृत्स्व

दधामि ते द्यु-मतीम् वाचम् आसन्।।2।।
9900. अस्मे धेहि द्युमतीम् वाचम्
आसन् बृहस्पते अनमीवाम् इषिराम्।
यया वृष्टिम् शम्-तनवे वनाव
दिवः द्रप्सः मधुमान् आ विवेश।।3।।
9901. आ नः द्रप्साः मधुमन्तः
विशन्तु इन्द्र देहि अधिरथम् सहस्रम्।
नि सीद होत्रम् ऋतुथा यजस्व
देवान् देव-आपे हविषा सपर्य।।4।।
9902. आर्ष्टिषेणः होत्रम् ऋषिः नि-सीदन्
देव-आपिः देवसुमतिम् चिकित्वान्।
सः उत्-तरस्मात् अधरम् समुद्रम्
अपः दिव्याः असृजत् वर्ष्याः अभि।।5।।
9903. अस्मिन् समुद्रे अधि उत्-तरस्मिन्
आपः देवेभिः निवृताः अतिष्ठन्।
ताः अद्रवन् आर्ष्टिषेणेन सृष्टाः
देव-आपिना प्र-इषिताः मृक्षिणीषु।।6।।
9904. यत् देव-आपिः शम्-तनवे पुरः-हितः
होत्राय वृतः कृपयन् अदीधेत्।
देव-श्रुतम् वृष्टि-वनिम् रराणः
बृहस्पतिः वाचम् अस्मै अयच्छत्।।7।।
9905. यम् त्वा देव-आपिः शुशुचानः
अग्ने आर्ष्टिषेणः मनुष्यः सम्-ईधे।
विश्वेभिः देवैः अनु-मद्यमानः
प्र पर्जन्यम् ईरय वृष्टिमन्तम्।।8।।
9906. त्वाम् पूर्वे ऋषयः गीः-भिः
आयन् त्वाम् अध्वरेषु पुरुहूत विश्वे।
सहस्राणि अधिरथानि अस्मे आ नः
यज्ञम् रोहित्-अश्व उप याहि।।9।।
9907. एतानि अग्ने नवतिः नव
त्वे आहुतानि अधिरथा सहस्रा।
तेभिः वर्धस्व तन्वः शूर पूर्वीः
दिवः नः वृष्टिम् इषितः रिरीहि।।10।।
9908. एतानि अग्ने नवतिम् सहस्रा
सम् प्र यच्छ वृष्णे इन्द्राय भागम्।
विद्वान् पथः ऋतुशः देवयानान्
अपि औलानम् दिवि देवेषु धेहि।।11।।
9909. अग्ने बाधस्व वि मृधः वि दुःगहा
अप अमीवाम् अप रक्षांसि सेध।
अस्मात् समुद्रात् बृहतः दिवः नः
अपाम् भूमानम् उप नः सृज इह।।12।।

## सूक्त-99

9910. कम् नः चित्रम् इषण्यसि चिकित्वान्
पृथु-ग्मानम् वाश्रम् ववृधध्यै।
कत् तस्य दातु शवसः वि-उष्टौ
तक्षत् वज्रम् वृत्र-तुरम् अपिन्वत्।।1।।
9911. सः हि द्युता वि-द्युता वेति साम
प्रथुम् योनिम् असुरत्वा ससा।
सः सनीडभिः प्रसहानः अस्य भ्रातुः
न ऋते सप्तथस्य मायाः।।2।।
9912. सः वाजम् याता अपदुःपदा
यन् स्वःसाता परि सदत् सनिष्यन्।
अनर्वा यत् शत-दुरस्य वेदः घ्नन्
शिश्न-देवान् अभि वर्पसा भूत।।3।।
9913. सः यह्व्यः अवनीः गोषु
अर्वा आ जुहोति प्र-धन्यासु सस्रिः।
अपादः यत्र युज्यासः अरथाः
द्रोणि-अश्वासः ईरते घृतम् वाः।।4।।
9914. सः रुद्रेभिः अशस्त-वारः ऋभ्वा
हित्वी गयम् आरे-अवद्यम् आ अगात्।
वम्रस्य मन्ये मिथुना विवव्री अन्नम्
अभि-इत्य अरोदयत् मुषायन्।।5।।
9915. सः इत् दासम् तुविरवम् पतिः
दन् षट्-अक्षम् त्रि-शीर्षाणम् दमन्यत्।
अस्य त्रितः नु ओजसा वृधानः
विपा वराहम् अयः-अग्रया हन्।।6।।
9916. सः द्रुह्वणे मनुषे ऊर्ध्वसानः
आ साविषत् अर्शसानाय शरुम्।
सः नृतमः नहुषः असम्त् सुजातः
पुरः अभिनत् अर्हन् दस्यु-हत्ये।।7।।
9917. सः अभ्रियः न यवसे उदन्यन्
क्षयाय गातुम् विदत् नः अस्मे।
उप यत् सीदत् इन्दुम् शरीरैः श्येनः
अयः-अपाष्टिः हन्ति दस्यून्।।8।।
9918. सः व्राधतः शवसानेभिः अस्य
कुत्साय शुष्णम् कृपणे परा अदात्।
अयम् कविम् अनयत् शस्यमानम्
अत्कम् यः अस्य सनिता उत नृणाम्।।9।।
9919. अयम् दशस्य नर्येभिः अस्य
दस्मः देवेभिः वरुणः न मायी।
अयन् कनीनः ऋतुपाः अवेदि
अमिमीत अररुम् यः चतुःपात्।।10।।
9920. अस्य स्तोमेभिः औशिजः ऋजिश्वा
व्रजम् दरयत् वृषभेण पिप्रोः।
सुत्वा यत् यजतः दीदयत् गीः

पुरः इयानः अभि वर्पसा भूत्।।11।।
9921. एव महः असुर वक्षथाय
वम्रकः पट्-भिः उप सर्पत् इन्द्रम्।
सः इयानः करति स्वस्तिम् अस्मै इषम्
ऊर्जम् सुक्षितिम् विश्वम् आ अभारित्यभाः।।12।।

## सूक्त-100

9922. इन्द्र दृह्य मघवन् त्वा-वत् इत् भुजे
इह स्तुतः सुतपाः बोधि नः वृधे।
देवेभिः नः सविता प्र अवतु श्रुतम्
आ सर्वतातिम् अदितिम् वृणीमहे।।1।।
9923. भराय सु भरत भागम् ऋत्वियम्
प्र वायवे शुचिपे क्रन्दत्-इष्टये।
गौरस्य यः पयसः पीतिम् आनशे
आ सर्व-तातिम् अदितिम् वृणीमहे।।2।।
9924. आ नः देवः सविता साविषत्
वयः ऋजु-यते यजमानाय सुन्वते।
यथा देवान् प्रति-भूषेम पाक्-वत्
आ सर्व-तातिम् अदितिम् वृणीमहे।।3।।
9925. इन्द्रः अस्मे सुमनाः अस्तु विश्वहा
राजा सोमः सुवितस्य अधि एतु नः।
यथा-यथा मित्र-धितानि सम्-दधुः आ
सर्व-तातिम् अदितिम् वृणीमहे।।4।।
9926. इन्द्रः उक्थेन शवसा परुः
दधे बृहस्पते प्र-तरीता असि आयुषः।
यज्ञः मनुः प्रमतिः नः पिता हि कम्
आ सर्व-तातिम् अदितिम् वृणीमहे।।5।।
9927. इन्द्रस्य नु सुकृतम् दैव्यम् सहः
अग्निः गृहे जरिता मेधिरः कविः।
यज्ञः च भूत् विदथे चारुः अन्तमः
आ सर्व-तातिम् अदितिम् वृणीमहे।।6।।
9928. न वः गुहा चकृम भूरि दुः-कृतम्
न आविः-त्यम् वसवः देव-हेडनम्।
माकिः नः देवाः अनृतस्य वर्पसः
आ सर्वतातिम् अदितिम् वृणीमहे।।7।।
8829. अप अमीवाम् सविता साविषत्
न्यक् वरीयः इत् अप सेधन्तु अद्रयः।
ग्रावा यत्र मधुसुत् उच्यते बृहत् आ
सर्वतातिम् अदितिम् वृणीमहे।।8।।
9930. ऊर्ध्वः ग्रावा वसवः अस्तु सोतरि
विश्वा द्वेषांसि सनुतः युयोत।
सः नः देवः सविता पायुः ईड्यः
आ सर्व-तातिम् अदितिम् वृणीमहे।।9।।
9931. ऊर्जम् गावः यवसे पीवः अत्तन
ऋतस्य याः सदने कोशे अङ्ध्वे।
तनूः एव तन्वः अस्तु भेषजम्
आ सर्व-तातिम् अदितिम् वृणीमहे।।10।।
9932. ऋतु-प्रावा जरिता शश्वताम् अवः इन्द्रः
इत् भद्रा प्र-मतिः सुत-वताम्।
पूर्णम् ऊधः दिव्यम् यस्य सिक्तये
आ सर्व-तातिम् अदितिम् वृणीमहे।।11।।
9933. चित्रः ते भानुः क्रतुप्राः अभिष्टिः
सन्ति स्पृधः जरणिप्राः अधृष्टाः।
रजिष्ठया रज्या पश्वः आ
गोः तूतूर्षति परि अग्रम् दुवस्युः।।12।।

## सूक्त-101

9934. उत् बुध्यध्वम् समनसः सखायः
सम् अग्निम् इन्ध्वम् बहवः सनीड।
दधिक्राम् अग्निम् उषसम् च देवीम्
इन्द्रवतः अवसे नि ह्वये वः।।1।।
9935. मन्द्रा कृणुध्वम् धियः आ तनुध्वम्
नावम् अरित्र-परणीम् कृणुध्वम्।
इष्कृणुध्वम् आयुधा अरम् कृणुध्वम्
प्राञ्चम् यज्ञम् प्र नयत सखायः।।2।।
9936. युनक्त सीरा वि युगा तनुध्वम्
कृते योनौ वपत इह बीजम्।
गिरा च श्रुष्टिः सभराः असत् नः
नेदीयः इत् शृण्यः पक्वम् आ इयात्।।3।।
9937. सीरा युञ्जन्ति कवयः युगा वि तन्वते पृथक्।
धीराः देवेषु सुम्नया।।4।।
9938. निः आ-हावान् कृणोतन सम् वरत्राः दधातन्।
सिञ्चामहै अवतम् उद्रिणम्
वयम् सुसकम् अनुप-क्षितम्।।5।।
9939. इष्कृत-आहावम् अवतम् सुवरत्रम् सु-सेचनम्।
उद्रिणम् सिञ्चे अक्षितम्।।6।।
9940. प्रीणीत अश्वान् हितम् जयाथ
स्वस्ति-वाहम् रथम् इत् कृणुध्वम्।
द्रोण-आहावम् अवतम् अश्म-चक्रम्
अंसत्र-कोशम् सिञ्चत नृ-पानम्।।7।।
9941. व्रजम् कृणुध्वम् सः हि वः नृपानः
वर्म सीव्यध्वम् बहुला पृथूनि।
पुरः कृणुध्वम् आयसीः अधृष्टाः
मा वः सुस्रोत् चमसः दृंहत तम्।।8।।
9942. आ वः धियम् यज्ञियाम् वर्ते ऊतये
देवाः देवीम् यजताम् यजियाम् इह।

सा नः दुहीयत् यवसा-इव गत्वी
सहस्र-धारा पयसा मही गौः।।9।।
9943. आ तु सिञ्च हरिम् ईम् द्रोः
उपस्थे वाशीभिः तक्षत् अश्मन् मयीभिः।
परि स्वजध्वम् दश कक्ष्याभिः उभे
धुरौ प्रति वह्निम् युनक्त।।10।।
9944. उभे धुरौ वह्निः आ-पिब्दमानः
अन्तः योना-इव चरति द्विजानिः।
वनस्पतिम् वने आ अस्थापयध्वम्
नि सुदधिध्वम् अखनन्तः उत्सम्।।11।।
9945. कपृत् नरः कपृथम् उत्
दधातन चोदयन खुदत वाजसातये।
निष्ठिग्र्यः पुत्रम् आ च्यवय ऊतये
इन्द्रम् स-बाधः इह सोम-पीतये।।12।।

## सूक्त-102

9946. प्र ते रथम् मिथु-कृतम् इन्द्रः अवतु धृष्णु-या।
अस्मिन् आजौ पुरु-हूत् श्रवाय्ये धन-भक्षेषु नः अव।।1।।
9947. उत् स्म वातः वहति वासः अस्याः
अधि-रथम् यत् अजयत् सहस्रम्।
रथीः अभूत् मुद्गलानी गो-इष्टौ
भरे कृतम् वि अचेत् इन्द्र-सेना।।2।।
9948. अन्तः यच्छ जिघांसतः वज्रम् इन्द्र अभि-दासतः।
दासस्य वा मघवन् आर्यस्य वा सुनतः यवय वधम्।।3।।
9949. उद्नः ह्रदम् अपिबत् जर्हृषाणः
कूटम् स्म तृंहत् अभि-मातिम् एति।
प्र मुष्कभारः श्रवः इच्छमानः
अजिरम् बाहू अभरत् सिसासन्।।4।।
9950. नि अक्रन्दयन् उप-यन्तः
एनम् अमेहयन् वृषभम् मध्ये आजेः।
तेन सूभर्वम् शतवत् सहस्रम्
गवाम् मुद्गलः प्रधने जिगाय।।5।।
9951. ककर्दवे वृषभः युक्तः आसीत्
अवावचीत् सारथिः अस्य केशी।
दुधेः युक्तस्य द्रवतः सह अनसा
ऋच्छन्ति स्म निःपदः मद्गलानीम्।।6।।
9952. उत् प्र-धिम् उत् अहन् अस्य
विद्वान् उप अयुनक् बंसगम् अत्र शिक्षन्।
इन्द्रः उत् आवत् पतिम् अघ्न्यानाम्
अरंहत पद्याभिः ककुत्-मान्।।7।।
9953. शुनम् अष्ट्रावी अचरत् कपर्दी
वरत्रायाम् दारु आ-नह्यमानः।
नृम्णानि कृण्वन् बहवे जनाय
गाः पस्पानः तविषीः अधत्त।।8।।
9954. इमम् तम् पश्य वृषभस्य युञ्जम्
काष्ठायाः मध्ये द्रु-घनम् शयानम्।
येन जिगाय शत-वत् सहस्रम्
गवाम् मुद्गलः पृतनाज्येषु।।9।।
9955. आरे अघा कः नु इत्था ददर्श
यम् युञ्जन्ति तम् ऊँ आ स्थापयन्ति।
न अस्मै तृणम् न उदकम् आ भरन्ति
उ-तरः धुरः वहति प्रदेदिशत्।।10।।
9956. परिवृक्ता-इव पति-विद्यम् आनट्
पीप्याना कूचक्रेण-इव सिञ्चन्।
एष-एष्या चित् रथ्या जयेम
सु-मङ्गलम् सिन-वत् अस्तु सातम्।।11।।
9957. त्वम् विश्वस्य जगतः चक्षुः इन्द्र असि चक्षुषः।
वृषा यत् आजिम् वृषणा
सिसाससि चोदयन् बध्रिणा युजा।।12।।

## सूक्त-103

9958. आशुः शिशानः वृषभः न
भीमः घनाघनः क्षोभणः चर्षणीनाम्।
सम्-क्रन्दनः अनिमिषः एकवीरः
शतम् सेनाः अजयत् साकम् इन्द्रः।।1।।
9959. सम्-क्रन्दनेन अनि-मिषेण जिष्णुना
युत्-कारेण दुःच्यवनेन धृष्णुना।
तत् इन्द्रेण जयत तत् सहध्वम्
युधः नरः इषु-हस्तेन वृष्णा।।2।।
9960. सः इषु-हस्तैः सः निषङ्गिभिः वशी
सम्-स्रष्टा सः युधः इन्द्रः गणेन।
संसृष्टजित् सोमपाः बाहुशर्धी
उग्र-धन्वा प्रति-हिताभिः अस्ता।।3।।
9961. बृहस्पते परि दीय रथेन
रक्षःहा अमित्रान् अप-बाधमानः।
प्र-भञ्जन् सेनाः प्र-मृणः युधा जयन्
अस्माकम् एधि अविता रथानाम्।।4।।
9962. बल-विज्ञायः स्थविरः प्रवीरः
सहस्वान् वाजी सहमानः उग्रः।
अभिवीरः अभिसत्वा सहः-जाः
जैत्रम् इन्द्र रथम् आ तिष्ठ गो-वित्।।5।।
9963. गोत्र-भिदम् गो-विदम् वज्र-बाहुम्
जयन्तम् अज्म प्र-मृणन्तम् ओजसा।
इमम् सजाताः अनु वीरयध्वम्
इन्द्रम् सखायः अनु सम् रभध्वम्।।6।।
9964. अभि गोत्राणि सहसा गाहमानः

अदयः वीरः शत-मन्युः इन्द्रः।
दुः-च्यवनः पृतनाषाट् अयुध्यः
अस्माकम् सेनाः अवतु प्र युत्-सु।।7।।
9965. इन्द्रः आसाम् नेता बृहस्पतिः
दक्षिणा यज्ञः पुरः एतु सोमः।
देव-सेनानाम् अभि-भञ्जतीनाम्
जयन्तीनाम् मरुतः यन्तु अग्रम्।।8।।
9966. इन्द्रस्य वृष्णः वरुणस्य राज्ञः
आदित्यानाम् मरुताम् शर्धः उग्रम्।
महा-मनसाम् भुवन-च्यवानाम् घोषः
देवानाम् जयताम् उत् अस्थात्।।9।।
9967. उत् हर्षय मघवन् आयुधानि उत्
सत्वनाम् मामकानाम् मनांसि।
उत् वृत्रहन् वाजिनाम् वाजिनानि उत्
रथानाम् जयताम् यन्तु घोषाः।।10।।
9968. अस्माकम् इन्द्रः सम्-ऋतेषु ध्वजेषु
अस्माकम् याः इषवः ताः जयन्तु।
अस्माकम् वीराः उत्-तरे भवन्तु
अस्मान् ऊँ देवाः अवत हवेषुः।।11।।
9969. अमीषाम् चित्तम् प्रति-लोभयन्ती
गृहाण अङ्गानि अप्वे परा इह।
अभि प्र इह निः दह हृत्-सु शोकैः
अन्धेन अमित्राः तमसा सचन्ताम्।।12।।
9970. प्र इत् जयत नरः इन्द्रः वः शर्मः यच्छतु।
उग्राः वः सन्तु बाहवः अनाधृष्याः यथा असथ।।13।।

## सूक्त-104

9971. असावि सोमः पुरुहूत तुभ्यम्
हरिभ्याम् यज्ञम् उप याहि तूयम्।
तुभ्यम् गिरः विप्र-वीराः इयानाः
दधन्विरे इन्द्र पिब सुतस्य।।11।।
9972. अप्सु धूतस्य हरिवः पिब
इह नृभिः सुतस्य जठरम् पृणस्व।
मिमिक्षुः यम् अद्रयः इन्द्र तुभ्यम्
तेभिः वर्धस्व मदम् उक्थ-वाहः।।2।।
9973. प्र उग्राम् पीतिम् वृष्णे इयर्मि सत्याम्
प्रयै सुतस्य हरि-अश्व तुभ्यम्।
इन्द्र धेनाभिः इह मादयस्व
धीभिः विश्वाभिः शच्या गृणानः।।3।।
9974. ऊती शचीः-वः तव वीर्येण
वयः दधानाः उशिजः ऋतज्ञाः।
प्रजा-वत् इन्द्र मनुषः दुरोणे
तस्थुः गृणन्तः सध-माद्यासः।।4।।
9975. प्रनीति-भिः ते हरि-अश्व सुस्तोः
सु-सुम्नस्य पुरु-रुचः जनासः।
मंहिष्ठाम् ऊतिम वि-तिरे इधानाः
स्तोतारम् इन्द्र तव सूनृताभिः।।5।।
9976. उप ब्रह्माणि हरिवः हरिभ्याम्
सोमस्य याहि पीतये सुतस्य।
इन्द्र त्वा यज्ञः क्षममाणम् आनट्
दाश्वान् असि अध्वरस्य प्र-केतः।।6।।
9977. सहस्र-वाजम् अभिमाति-सहम्
सुते-रणम् मघवानम् सुवृक्तिम्।
उप भूषन्ति गिरः अप्रति-इतम्
इन्द्रम् नमस्याः जरितुः पनन्त।।7।।
9978. सप्त आपः देवीः सुरणाः अमृक्ताः
याभिः सिन्धुम् अतरः इन्द्र पूःभित्।
नवतिम् स्रोत्याः नव च स्रवन्तीः
देवेभ्यः गातुम् मनुषे च विन्दः।।8।।
9979. अपः महीः अभि-शस्तेः अमुञ्चः
अजागः आसु अधि देवः एकः।
इन्द्र याः त्वम् वृत्र-तूर्ये चकर्थ
ताभिः विश्व-आयुः तन्वम् पुपुष्याः।।9।।
9980. वीरेण्यः क्रतुः इन्द्रः सु-शस्तिः
उत अपि धेना पुरु-हूतम् ईट्टे।
आर्दयत् वृत्रम् अकृणोत् उ लोकम्
ससहे शक्रः पृतनाः अभिष्टिः।।10।।
9981. शुनम् हुवेम मघ-वानम् इन्द्रम्
अस्मिन् भरे नृ-तमम् वाज-सातौ।
शृण्वन्तम् उग्रम् ऊतये समत्-सु
घ्नन्तम् वृत्राणि सम्-जितम् धनानाम्।।11।।

## सूक्त-105

9982. कदा वसो स्तोत्रम् हर्यते आ अव श्मसा रूधत्।
वाः दीर्घम् सुतम् वाताप्याय।।1।।
9983. हरी यस्य सु-युजा विव्रता वेः अर्वन्ता अनु शेपा।
उभा रजी न केशिना पतिः दन्।।2।।
9984. अप योः इन्द्रः पापजे
आ मर्तः न शश्रमाणः बिभीवान्।
शुभे यत् युयुजे तविषी-वान्।।3।।
9985. सचा आयोः इन्द्रः चर्कृषे आ उपानसः सपर्यन्।
नदयोः वि-व्रतयोः शूरः इन्द्रः।।4।।
9986. अधि यः तस्थौ केशवन्ता व्यचस्वन्ता न पुष्टयै।
वनोति शिप्राभ्याम् शिप्रिणीवान्।।5।।
9987. प्र अस्तौत् ऋष्व-ओजाः
ऋष्वेभिः ततक्ष शूरः शवसा।

ऋभुः न क्रतुभिः मातरिश्वा।।6।।
9988. वज्रम् यः चक्रे सु-हनाय
दस्यवे हिरीमशः हिरीमान्।
अरुत-हनुः अद्भुतम् न रजः।।7।।
9989. अव नः वृजिना शिशीहि ऋचा वनेम अनृचः।
न अब्रह्मा यज्ञः ऋधक् जोषति त्वे।।8।।
9990. ऊर्ध्वा यत् ते त्रेतिनी भूत् यज्ञस्य धूः-सु सद्मन।
स-जूः नावम् स्व-यशसम् सचा आयोः।।9।।
9991. श्रिये ते पृश्निः उपसेचनी भूत् श्रिये दर्विः अरेपाः
यया स्वे पात्रे सिञ्चसे उत्।।10।।
9992. शतम् वा यत् असुर्य प्रति
त्वा सु-मित्रः इत्था अस्तौत्।
दुः-मित्रः इत्था अस्तौत् आवः यत् दस्यु-हत्ये
कुत्स-पुत्रम् प्र आवः यत् दस्यु-हत्ये कुत्स-वत्तम्।।

## सूक्त-106

9993. उभौ उ नूनम् तत् इत् अर्थयेथे
वि तन्वाथे धियः वस्रा अपसा-इव।
शध्रीचीना यातवे प्र ईम् अजीगः
सुदिना-इव पृक्षः आ तंसयेथे।।1।।
9994. उष्टारा-इव फर्वरेषु श्रयेथे
प्रायोगा-इव श्वात्र्या शासुः आ इथः।
दूता-इव हि स्थः यशसा जनेषु मा
अप स्थातम् महिषा-इव अव-पानात्।।2।।
9995. साकम्-युजा शकुनस्य-इव पक्षा
पश्वा-इव चित्रा यजुः आ गमिष्टम्।
अग्निः-इव देवयोः दीदिवांसा
परिज्माना-इव यजथः पुरुत्रा।।3।।
9996. आपी वः अस्मे पितरा-इव पुत्रा
उग्रा-इव रुचा नृपती-इवेति नृपती-इव।
तुर्यै इर्या-इव पुष्ट्यै किरणा-इव भुज्यै
श्रुष्टीवाना-इव हवम् आ गमिष्टम्।।4।।
9997. वंसगा-इव पूषर्या शिम्बाता
मित्रा-इव ऋता शतरा शातपन्ता।
वाजा-इव उच्चा वयसा घर्म्ये-स्था
मेषा-इव इषा सपर्या पुरीषा।।5।।
9998. सृण्या-इव जर्भरी इति तुर्फरीतू
नैतोशा-इव तुर्फरी पर्फरीका।
उदन्यजा-इव जेमना मदेरू
ता मे जरायु अजरम् मरायु।।6।।
9999. पज्रा-इव चर्चरम् जारम् मरायु
क्षद्म-इव अर्थेषुतर्तरथिः उग्रा।
ऋभू न आपत् खरमज्रा खर-ज्रुः
वायुः न पर्फरत् क्षयत् रयीणाम्।।7।।
10000. घर्मा-इव मधु जठरे सनेरू
भगे-अविता तुर्फरी फारिवा अरम्।
पतरा-इव चचरा चन्द्र-निर्निक्
मनः-ऋङ्गा मनन्या न जग्मी।।8।।
10001. बृहन्ता-इव गम्भरेषु प्रति-स्थातम्
पादा-इव गाधम् तरते विदाथः।
कर्णा-इव शासुः अनु हि स्मराथः
अंशा-इव नः भजतम् चित्रम् अप्नः।।9।।
10002. आरङ्गरा-इव मधु आ ईरयेथे
सारघा-इव गवि नीचीनबारे।
कीनारा-इवस्वेदम् आ-सिस्विदाना
क्षाम-इव ऊर्जा सुयवस-अत् सचथे।।10।।
10003. ऋध्याम स्तोमम् सनुयाम वाजम्
मा नः मन्त्रम् स-रथा इह उप यातम्।
यशः न पक्वम् मधु गोषु अन्तः आ
भूत-अंशः अश्विनोः कामम् अप्राः।।11।।

## सूक्त-107

10004. आविः अभूत् महि माघोनम् एषाम्
विश्वम् जीवम् तमसः निः अमोचि।
महि ज्योतिः पितृभिः दत्तम् आ
अगात् उरुः पन्थाः दक्षिणायाः अदर्शि।।1।।
10005. उच्चा दिवि दक्षिणा-वन्तः अस्थुः
ये अश्व-दाः सह ते सूर्येण।
हिरण्यदाः अमृत-त्वम् भजन्ते
वासः-दाः सोम प्र तिरन्ते आयुः।।2।।
10006. दैवी पूर्तिः दक्षिणा देव-यज्या
न कव-अरिभ्यः नहि ते पृणन्ति।
अथ नरः प्रयत-दक्षिणासः
अवद्य-भिया बहवः पृणन्ति।।3।।
10007. शतधारम् वायुम् अर्कम् स्वः-विदम्
नृ-चक्षसः ते अभि चक्षते हविः।
ये पृणन्ति प्र च यच्छन्ति सम्-गमे
ते दक्षिणाम् दुहते सप्त-मातरम्।।4।।
10008. दक्षिणा-वान् प्रथमः हूतः एति
दक्षिणा-वान् ग्राम-नीः अग्रम् एति।
तम् एव मन्ये नृ-पतिम् जनानाम्
यः प्रथमः दक्षिणाम् आ-विवाय।।5।।
10009. तम् एव ऋषिम् तम् ऊँ ब्रह्माणम्
आहुः यज्ञ-न्यम् सामगाम् उक्त-शासम्।
शसः शुक्रस्य तन्वः वेद तिस्रः
यः प्रथमः दक्षिणया रराध।।6।।

10010. दक्षिणा अश्वम् दक्षिणा गाम् ददाति
दक्षिणा चन्द्रम् उत यत् हिरण्यम्।
दक्षिणा अन्नम् वनुते यः नः आत्मा
दक्षिणाम् वर्म कृणुते विजानन।।7।।
10011. न भोजाः ममुः न नि-अर्थम् ईयुः
न रिष्यन्ति न व्यथंते ह भोजाः।
इदम् यत् विश्वम् भुवनम् स्वः च
एतत् सर्वम् दक्षिणा एभ्यः ददाति।।8।।
10012. भोजाः जिग्युः सुरभिम् योनिम् अग्रे
भोजाः जिग्युः वध्वम् या सु-वासाः।
भोजाः जिग्युः अन्तः-पेयम् सुरायाः
भोजाः जिग्युः ये अहूताः प्रयन्ति।।9।।
10013. भोजाय अश्वम् सम् मृजन्ति आशुम्
भोजाय आस्ते कन्या शुम्भमाना।
भोजस्य इदम् पुष्करिणी-इव वेश्म
परिकृतम् देवमाना-इव चित्रम्।।10।।
10014. भोजम् अश्वाः सुष्ठुवाहः वहन्ति
सुवृत् रथः वर्तते दक्षिणायाः।
भोजम् देवासः अवत भरेषु भोजः
शत्रून् सम्-अनीकेषु जेता।।11।।

## सूक्त-108

10015. किम् इच्छन्ती सरमा प्र इदम्
आनट् दूरे हि अध्वा जगुरिः पराचैः।
का अस्मे-हितिः का परि-तक्म्या
आसीत् कथम् रसायाः अतरः पयांसि।।1।।
10016. इन्द्रस्य दूतः इषिता चरामि महः
इच्छन्ती पणयः निधीन् वः।
अति-स्कदः भियसा तत् नः आवत्
तथा रसायाः अतरम् पयांसि।।2।।
10017. कीदृङ् इन्द्रः सरमे का दृशीका
यस्य इदम् दूतीः असरः पराकात्।
आ च गच्छात् मित्रम् एन दधाम
अथ गवाम् गोपतिः नः भवाति।।3।।
10018. न अहम् तम् वेद दभ्यम् दभत्
सः यस्य इदम् दूतीः असरम् पराकात्।
न तम् गूहन्ति स्रवतः गभीराः
हताः इन्द्रेण पणयः शयध्वे।।4।।
10019. इमाः गावः सरमे याः ऐच्छः
परि दिवः अन्तान् सुभगे पतन्ती।
कः ते एनाः अव सृजात् अयुध्वी उत्
अस्माकम् आयुधा सन्ति तिग्मा।।5।।
10020. असेन्या वः पणयः वचांसि
अनिषव्याः तन्वः सन्तु पापीः।
अधृष्टः वः एतवै अस्तु पन्थाः
बृहस्पतिः वः उभया न मृडत्।।6।।
10021. अयम् नि-धिः सरमे अद्रि-बुध्नः
गोभिः अश्वेभिः वसु-भिः नि-ऋष्टः।
रक्षन्ति तम् पणयः ये सुगोपाः
रेकु पदम् अलकम् आ जगन्थ।।7।।
10022. आ इह गमन् ऋषयः सोम-शिताः
अयास्यः अङ्गिरसः नवग्वाः।
ते एतम् ऊर्वम् वि भजन्त गोनाम्
अथ एतत् वचः पणयः वमन् इत्।।8।।
10023. एव च त्वम् सरमे आ-जगन्थ
प्र-बाधिता सहसा दैव्येन।
स्वसारम् त्वा कृणवै मा पुनः
गाः अप ते गवाम् सुभगे अजाम।।9।।
10024. न अहम् वेद भ्रातृ-त्वम् नो स्वसृत्वम्
इन्द्रः विदुः अङ्गिरसः च घोराः।
गो-कामाः मे अच्छदयन् यत् आयम्
अप अतः इत प्रणयः वरीयः।।10।।
10025. दूरम् इत पणयः वरीयः उत्
गावः यन्तु मिनतीः ऋतेन।
बृहस्पतिः याः अविन्दत् नि-गूड
सोमः ग्रावाणः ऋषयः च विप्राः।।11।।

## सूक्त-109

10026. ते अवदन् प्रथमाः ब्रह्म-किल्बिषे
अकूपारः सलिलः मातरिश्वा।
वीडहराः तपः उग्रः मयःभूः
आपः देवीः प्रथमजाः ऋतेन।।1।।
10027. सोमः राजा प्रथमः ब्रह्मजायाम्
पुनः प्र अयच्छत् अहृणीयमानः।
अनु-अर्तिता वरुणः मित्रः आसीत्
अग्निः होता हस्त-गृह्य आ निनाय।।2।।
10028. हस्तेन एव ग्राह्यः आधिः अस्याः
ब्रह्मजाया इयम् च इत् अवोचन्।
न दूताय प्रह्ये तस्थे एषा
तथा राष्ट्रम् गुपितम् क्षत्रियस्य।।3।।
10029. देवाः एतस्याम् अवदन्त पूर्वे
सप्तऋषयः तपसे ये निसेदुः।
भीमा जाया ब्राह्मस्य उपनीता
दुः-धाम दधातिपरमे विओमन्।।4।।
10030. ब्रह्मचारी चरति वेविषत् विषः
सः देवानाम् भवति एकम् अङ्गम्।

तेन जायाम् अनु अविन्दत् बृहस्पतिः
सोमेन नीताम् जुह्वम् न देवाः।।5।।
10031. पुनः वै देवाः अददुः पुनः मनुष्याः उत।
राजानः सत्यम् कृण्वानाः ब्रह्मजायाम् पुनः ददुः।।6।।
10032. पुनः-दाय ब्रह्मजायाम् कृत्वी देवैः नि-किल्बिषम्।
ऊर्जम् पृथिव्याः भक्त्वाय उरुगायम् उप आसते।।7।।

## सूक्त-110

10033. सम्-इद्धः अद्य मनुषः दुरोणे
देवः देवान् यजसि जातवेदः।
आ च वह मित्रमहः चिकित्वान्
त्वम् दूतः कविः असि प्रचेताः।।1।।
10034. तनूनपात् पथः ऋतस्य यानात्
मध्वा सम्-अञ्जन् स्वदय सु-जिह्व।
मन्मानि धीभिः उत यज्ञम् ऋन्धन्
देवत्रा च कृणुहि अध्वरम् नः।।2।।
10035. आ-जुह्वनः ईड्यः वन्द्यः च
आ याहि अग्ने वसुभिः सजोषाः।
त्वम् देवानाम् असि यह्व होता सः
एनान् यक्षि इषितः यजीयान्।।3।।
10036. प्राचीतम् बर्हिः प्र-दिशा पृथिव्याः
वस्तोः अस्या वृज्यते अग्रे अह्नाम्।
वि ऊँ प्रथते वितरम् वरीयः देवेभ्यः अदितये स्योनम्।।4।।
10037. व्यचस्वतीः उर्विया वि श्रयन्ताम्
पतिभ्यः न जनयः शुम्भमानाः।
देवीः द्वारः बृहतीः विश्वम्-इन्वाः
देवेभ्यः भवत् सुप्र-अयनाः।।5।।
10038. आ सुस्वयन्ती यजते उपाके
उषसानक्ता सदताम् नि योनौ।
दिव्ये योषणे बृहती सुरुक्मे
आधि श्रियम् शुक्र-पिशम् दधाने।।6।।
10039. दैव्या होतारा प्रथमा सुवाचा
मिमाना यज्ञम् मनुषः यजध्यै।
प्रचोयन्ता विदथेषु कारू
प्राचीनम् ज्योतिः प्र-दिशा दिशन्ता।।7।।
10040. आ नः यज्ञम् भारती तूयम्
एतु इड मनुष्वत् दह चेतयन्ती।
तिस्रः देवीः बर्हिः आ इदम् स्योनम्
सरस्वती सु-अपसः सदन्तुः।।8।।
10041. यः इमे द्यावापृथिवी जनित्री
रूपैः अपिंशत् भुवनानि विश्वा।
तम् अद्य होतः इषितः यजीयान्
देवम् त्वष्टारम् इह यक्षि विद्वान।।9।।
10042. उप-अवसृज त्वन्या सम्-अञ्जन्
देवानाम् पाथः ऋतु-था हवींषि।
वनस्पतिः शमिता देवः अग्निः
स्वदन्तु हव्यम् मधुना घृतेन।।10।।
10043. सद्यः जातः वि अमिमीत यज्ञम्
अग्निः देवानाम् अभवत् पुरःगाः।
अस्य होतुः प्रदिशित ऋतस्य वाचि
स्वाहा-कृतम् हविः अदन्तु देवाः।।11।।

## सूक्त-111

10044. मनीषिणः प्र भरध्वम् मनीषाम्
यथा-यथा मतयः सन्ति नृणाम्।
इन्द्रम् सत्यैः आ ईरयाम कृतेभिः
सः हि वीरः गिर्वणस्युः विदानः।।1।।
10045. ऋतस्य हि सदसः धीतिः अद्यौत्
सम् गार्ष्टेयः वृषभः गोभिः आनट्।
उत् अतिष्ठत् तविषेण रवेण
महान्ति चित् सम् विव्याच रजांसि।।2।।
10046. इन्द्रः किल श्रुत्यै अस्य वेद सः
हि जिष्णुः पथि-कृत् सूर्याय।
आत् मेनाम् कृण्वन् अच्युतः भुवत्
गोः पतिः दिवः सनजाः अप्रति-इतः।।3।।
10047. इन्द्रः मह्ना महतः अर्वणस्य व्रता
मिनात् अङ्गिरः-भिः गृणानः।
पुरूणि चित् नि ततान रजांसि
दाधार यः धरुणम् सत्य-ताता।।4।।
10048. इन्द्रः दिवः प्रति-मानम् पृथिव्याः
विश्वा वेद सवना हन्ति शुष्णम्।
महीम् चित् द्याम् आ अतनोत् सूर्येण
चास्कम्भ चित् स्कम्भेन स्कभीयान्।।5।।
10049. वज्रेण हि वृत्रहा वृत्रम् अस्तः
अदेवस्य शूशुवानस्य मायाः।
वि धृष्णो अत्र धृषता जघन्थ
अथ अभवः मघवन् बाहु-ओजाः।।6।।
10050. सचन्त यत् उषसः सूर्येण चित्राम्
अस्य केतवः राम् अविन्दन्।
आ यत् नक्षत्रम् ददृशे दिवः न
पुनः यतः नकिः अद्धा नु वेद।।7।।
10051. दूरम् किल प्रथमाः जग्मुः आसाम्
इन्द्रस्य याः प्रसवे सस्रुः आपः।
क्व स्वित् अग्रम् क्व बुध्नः आसाम्
आपः मध्यम् क्व वः नूनम् अन्तः।।8।।
10052. सृजः सिन्धून् अहिना जग्रसानान्

आत् इत् एताः प्र विविज्रे जवेन।
मुमुक्षमाणाः उत याः मुमुच्रे अध
इत् एताः न रमन्ते नि-तिक्ताः।।9।।
10053. सध्रीचीः सिन्धुम् उशतीः-इव आयन्
सनात् जारः आरितः पूः-भित् आसाम्।
अस्तम् आ ते पार्थिवा वसूनि
अस्मे जग्मुः सूनृताः इन्द्र पूर्वीः।।

## सूक्त-112

10054. इन्द्र पिब प्रति-कामम् सुतस्य
प्रातः-सावः तव हि पूर्व-पीतिः।
हर्षस्व हन्तवे शूर शत्रून् उक्थेभिः ते वीर्या प्र ब्रवाम।।1।।
10055. यः ते रथः मनसः जवीयान्
आ इन्द्र तेन सोम-पेयाय याहि।
तूयम् आ ते हरयः प्र द्रवन्तु
येभिः यासि वृषभिः मन्दमानः।।2।।
10056. हरित्वता वर्चसा सूर्यस्य
श्रेष्ठैः रूपैः तन्वम् स्पर्शयस्व।
अस्माभिः इन्द्र सखिभिः हुवानः
सध्रीचीनः मादयस्व नि-सद्य।।3।।
10057. यस्य त्यत् ते महिमानम् मदेषु
इमे मही रोदसी न अविविक्ताम्।
तत् ओकः आ हरिभिः इन्द्र युक्तैः
प्रियेभिः याहि प्रियम् अन्नम् अच्छ।।4।।
10058. यस्य शश्वत् पपि-वान् इन्द्र
शत्रून् अननु-कृत्या रण्या चकर्थ।
सः ते पुरम्-धिम् तविषीम् इयर्ति
सः ते मदाय सुतः इन्द्र सोमः।।5।।
10059. इदम् दे पात्रम् सन-वित्तम्
इन्द्र पिब सोमम् एना शतक्रतो।
पूर्णः आ-हावः मदिरस्य मध्वः यम्
विश्वे इत् अभि-हर्यन्ति देवाः।।6।।
10060. वि हि त्वाम् इन्द्र पुरुधा जनासः
हित-प्रयसः वृषभ ह्वयन्ते।
अस्माकम् ते मधुमत्-तमानि
इमा भुवन् सवना तेषु हर्य।।7।।
10061. प्र ते इन्द्र पूर्व्याणि प्र नूनम्
वीर्या वोचम् प्रथमा कृतानि।
सतीन-मन्युः अश्रथयः अद्रिम्
सु-वेदनाम् अकृणोः ब्रह्मणे गाम्।।8।।
10062. नि सु सीद गण-पते गणेषु
त्वाम् आहुः विप्र-तमम् कवीनाम्।
न ऋते त्वत् क्रियते किम् चन् आरे
महाम् अर्कम् मघवन् चित्रम् अर्च।।9।।
10063. अभिख्या नः मघवन् नाधमानान्
सखे बोधि वसु-पते सखीनाम्।
रणम् कृधि रण-कृत् सत्य-शुष्म अभक्ते
चित् आ भज राये अस्मान्।।10।।

## सूक्त-113

10064. तम् अस्य द्यावापृथिवी सचेतसा
विश्वेभिः देवैः अनु शुष्मम् आवताम्।
यत् येत् कृण्वानः महिमानम् इन्द्रियम्
पीत्वी सोमस्य क्रतुमान् अवर्धत्।।1।।
10065. तम् अस्य विष्णुः महिमानम् ओजसा
अंशुम् दधन्वान् मधुनः वि रप्शते।
देवेभिः इन्द्रः मघवा सयाव-भिः
वृत्रम् जघन्वान् अभवत् वरेण्यः।।2।।
10066. वृत्रेण यत् अहिना बिभ्रत् आयुधा
सम्-अस्थिथाः युधये शंसम् आ-विदे।
विश्वे ते अत्र मरुतः सह त्मना
अवर्धन् उग्र महिमानम् इन्द्रियम्।।3।।
10067. जज्ञानः एव वि अबाधत स्पृधः
प्र अपश्यत् वीरः अभि पौंस्यम् रणम्।
अवृश्चत् अद्रिम् अव स-स्यदः सृजत्
अस्तभ्नात् नाकम् सु-अपस्यया पृथुम्।।4।।
10068. आत् इन्द्रः सत्रा तविषीः अपत्यत
वरीयः द्यावापृथिवी अबाधत।
अव अभरत् धृषितः वज्रम् आयसम्
शेवम् मित्राय वरुणाय दाशुषे।।5।।
10069. इन्द्रस्य अत्र तविषीभ्यः वि-रप्शिनः
ऋघायतः अरंहयन्त मन्यवे।
वृत्रम् यत् उग्रः वि अवृश्चत् ओजसा
अपः बिभ्रतम् तमसा परिवृतम्।।6।।
10070. या वीर्याणि प्रथमानि कर्त्वा
महित्वेभिः यतमानौ सम्-ईयतुः।
ध्वान्तम् तमः अव दध्वसे हते
इन्द्रः मह्ना पूर्वहूतौ अपत्यत्।।7।।
10071. विश्वे देवासः अध वृष्ण्यानि
ते अवर्धयन् सोम-वत्या वचस्यया।
रद्धम् वृत्रम् अहिम् इन्द्रस्य हन्मना अग्निः
न जम्भैः तृषु अन्नम् आवयत्।।8।।
10072. भूरि दक्षेभिः वचनेभिः ऋक्व-भिः
सख्येभिः सख्यानि प्र वोचत।
इन्द्रः धुनिम् च चुमुरिम् च दम्भयन्
श्रद्धा-मनस्या शृणुते दभीतये।।9।।

10073. त्वम् पुरूणि आ भर सु-अश्व्या
येभिः मंसै नि-वचनानि शंसन्।
सु-गेभिः विश्वा दुःइता तरेम विदो
सु नः उर्विया गाधम् अद्य।।10।।

10083. भूम्याः अन्तम् परि एके चरन्ति
रथस्य धूःसु युक्तासः अस्थुः।
श्रमस्य दायम् वि भजन्ति एभ्यः
यदा यमः भवति हर्म्ये हितः।।10।।

## सूक्त-114

10074. घर्मा सम्-अन्ता त्रिवृत्रम् वि आपतुः
तयोः जुष्टिम् मातरिश्वा जगाम।
दिवः पयः दिधिषाणाः अवेषन्
विदुः देवाः सम्-सामानम् अर्कम्।।1।।
10075. तिस्रः देष्ट्राय निःऋतीः उप आसते
दीर्घश्रुतः वि हि जानन्ति वह्नयः।
साताम् नि चिक्युः कवयः
निदानम् परेषु या गुह्येषु व्रतेषु।।2।।
10076. चतुःकपर्दा युवतिः सुपेशाः
घृतप्रतीका वयुनानि वस्ते।
तस्याम् सुपर्णा वृषणा नि
सेदतुः यत्र देवाः दधिरे भागधेयम्।।3।।
10077. एकः सुपर्णः सः समुद्रम् आ विवेश
सः इदम् विश्वम् भुवनम् वि चष्टे।
तम् पाकेन मनसा अपश्यम् अन्तितः
तम् माता रेड सः ॐ रेड मातर्म।।4।।
10078. सुपर्णम् विप्राः कवयः वचः-भिः
एकम् सन्तम् बहुधा कल्पयन्ति।
छन्दांसि च दधतः अध्वरेषु
ग्रहान् सोमस्य मिमिते द्वादश।।5।।
10079. षट्-त्रिंशान् च चतुरः कल्पयन्तः
छन्दांसि च दधतः आ-द्वादशम्।
यज्ञम् वि-माय कवयः मनीषा
ऋक्-सामाभ्याम् प्र रथम् वर्तयन्ति।।6।।
10080. चतुः-दश अन्ये महिमानः अस्य
तम् धीराः वाचा च नयन्ति सप्त।
आप्नामनम् तीर्थम् कः इह प्र वोचत्
येन पथा प्र-पिबन्ते सुतस्य।।7।।
10081. सहस्रधा पञ्चदशानि उक्था
यावत् द्यावापृथिवी तावत् इत् तत्।
सहस्रधा महिमानः सहस्रम् यावत्
ब्रह्म विस्थितम् तावती वाक्।।8।।
10082. कः छन्दसाम् योगम् आ वेद धीरः
कः धिष्ण्याम् प्रति वाचम् पपाद।
कम् ऋत्विजाम् अष्टमम् शूरम् आहुः
हरी इन्द्रस्य नि चिकाय कः स्वित्।।9।।

## सूक्त-115

10084. चित्रः इत् शिशोः तरुणस्य वक्षथः
न यः मातरौ अपि-एति धातवे।
अनूधाः यदि जीजनत् अध च नु
ववक्ष सद्यः महि दूत्यम् चरन्।।1।।
10085. अग्निः ह नाम धायि दन् अपःतमः
सम् यः वना युवते भस्मना दता।
अभि-प्रमुरा जुह्वा सु-अध्वरः
इनः न प्रोथमानः यवसे वृषा।।2।।
10086. तम् वः विम् न द्रु-सदम् देवम् अन्धसः
इन्दुम् प्रोथन्तम् प्र-वपन्तम् अर्णवम्।
आसा वह्निम् न शोचिषा वि-रप्शिनम्
महि-व्रतम् न सरजन्तम् अध्वनः।।3।।
10087. वि यस्य ते ज्रयसानस्य अजर
धक्षोः न वाताः परि सन्ति अच्युताः।
आ रण्वासः युयुधयः न सत्वनम्
त्रितम् नशन्त प्र शिषन्तः इष्टये।।4।।
10088. सः इत् अग्निः कण्व-तमः कण्व-सखा
अर्यः परस्य अन्तरस्य तरुषः।
अग्निः पातु गृणतः अग्निः सूरीन्
अग्निः ददातु तेषाम् अवः नः।।5।।
10089. वाजिन्-तमाय सह्यसे सुपित्र्य
तृषु च्यवानः अनु जात-वेदसे।
अनुद्रे चित् यः धृषता वरम् सते
महिन्-तमाय धन्वना इत् अविष्यते।।6।।
10090. एव अग्निः मर्तैः सह सूरिभिः
वसुः स्तवे सहसः सूनरः नृभिः।
मित्रासः य ने सुधिताः ऋत-यवः द्यावः
न द्युम्नैः अभि सन्ति मानुषान्।।7।।
10091. ऊर्जः नपात् सहसावन् इति त्वा
उप-स्तुतस्य वन्दते वृषा वाक्।
त्वाम् स्तोषाम त्वया सुवीराः
द्राघीयः आयुः प्रतरम् दधानाः।।8।।
10092. इति त्वा अग्ने वृष्टिहव्यस्य
पुत्राः उप-स्तुतासः ऋषयः अवोचन्।
तान् च पाहि गृणतः च सूरीन्
वषट् वषट् इति ऊर्ध्वासः अनक्षन्

नमः नमः इति ऊर्ध्वासः अनक्षन्।।9।।

## सूक्त-116

10093. पिब सोमम् महते इन्द्रियाय
पिब वृत्राय हन्तवे शविष्ठ।
पिब राये शवसे हूयमानः पिब
मध्वः तृपत् इन्द्र आ वृषस्व।।1।।
10094. अस्य पिब क्षुमतः प्र-स्थितस्य
इन्द्र सोमस्य वरम् आ सुतस्य।
स्वस्ति-दाः मनसा मादयस्व
अर्वाचीनः रेवते सौभगाय।।2।।
10095. ममत्तु त्वा दिव्यः सोमः
इन्द्र ममत्तु यः सूयते पार्थिवेषु।
ममत्तु येन वरिवः चकर्थ
ममत्तु येन निरिणासि शत्रून्।।3।।
10096. आ द्विबर्हाः अमिनः यातु इन्द्रः
वृषा हरिभ्याम् परि-सिक्तम् अन्धः।
गवि आ सुतस्य प्र-भृतस्य मध्वः
सत्रा खेदाम् अरुशहा आ वृषस्व।।4।।
10097. नि तिग्मानि भ्राशयन् भ्राश्यानि
अव स्थिरा तनुहि यातु-जूनाम्।
उग्राय ते सहः बलम् ददामि
प्रति-इत्य शत्रून् वि-गदेषु वृश्व।।5।।
10098. वि अर्यः इन्द्र तनुहि श्रवांसि
ओजः स्थिरा-इव धन्वनः अभिमातीः।
अस्मद्र्यक् ववृधानः सहः-भिः
अनिभृष्टः तन्वम् ववृधस्व।।6।।
10099. इदम् हविः मघ-वन् तुभ्यम् रातम्
प्रति सम्-राट् अहृणानः गृभाय।
तुभ्यम् सुतः मघ-वन् तुभ्यम् पक्वः
अद्धि इन्द्र पिब च प्र-स्थितस्य।।7।।
10100. अद्धि इत् इन्द्र प्रस्थिता इमा हवीषि
चनः दधिष्व पचता उत सोमम्।
प्रयस्वन्तः प्रति हर्यामसि त्वा
सत्याः सन्तु यजमानस्य कामाः।।8।।
10101. प्र इन्द्राग्नि-भ्याम् सुवचस्याम् इयर्मि
सिन्धौ-इव प्र ईरयम् नावम् अर्कैः।
अयाःइव परि चरन्ति देवाः ये
अस्मभ्यम् धनदाः उत्-भिदः च।।9।।

## सूक्त-117

10102. न वै ॐ देवाः क्षुधम् इत् वधम् ददुः
उत आशितम् उप गच्छन्ति मृत्यवः।
उतो रयिः पृणतः न उप दस्यति उत
अपृणन् मर्डितारम् न विन्दते।।1।।
10103. यः आध्राय चकमानाय पित्वः
अन्न-वान् सन् रफिताय उप-जग्मुषे।
स्थिरम् मनः कृणुते सेवते पुरा उतो
चित् सः मर्डितारम् न विन्दते।।2।।
10104. सः इत् भोजः यः गृहवे ददाति
अन्न-कामाय चरते कृशाय।
अरम् अस्मै भवति याम-हूतौ
उत अपरीषु कृणुते सखायम्।।3।।
10105. न सः सखा यः न ददाति
सख्ये सचा-भुवे सचमानाय पित्वः।
अप अस्मात् प्र इयात् न तत् ओकः अस्ति
पृणन्तम् अन्यम् अरणम् चित् इच्छेत्।।4।।
10106. पृणीयात् इत् नाधमानाय तव्यान्
द्राघीयांसम् अनु पश्येत् पन्थाम्।
ओ हि वर्तन्ते रथ्या-इव चक्रा
अन्यम्-अन्यम् उप तिष्ठन्त रायः।।5।।
10107. मोघम् अन्नम् विन्दते अप्र-चेताः
सत्यम् ब्रवीमि वदः इत् सः तस्य।
न अर्यमणम् पुष्यति नो सखायम्
केवल-अघः भवति केवल-आदी।।6।।
10108. कृषन् इत् फालः आशितम् कृणोति
यन् अध्वानम् अप वृङ्क्ते चरित्रैः।
वदन् ब्रह्मा अवदतः वनीयान् पृणन्
आपिः अपृणन्तम् अभि स्यात्।।7।।
10109. एक पात् भूयः द्वि-पदः वि चक्रमे
द्वि-पात् त्रि-पादम् अभि एति पश्चात्।
चतुःपात् एति द्वि-पदाम् अभि-स्वरे
सम्-पश्यन् पंक्तीः उप-तिष्ठमानः।।8।।
10110. समौ चित् हस्तौ न समम् विविष्टः
सम्-मातरा चित् न समम् दुहाते।
यमयोः चित् न समा वीर्याणि ज्ञाती
चित् सन्तौ न समम् पृणीतः।।9।।

## सूक्त-118

10111. अग्ने हंसि न अत्रिणम् दीद्यत् मर्त्येषु आ।
स्वे क्षये शुचि-व्रत।।1।।
10112. उत् तिष्ठसि सु-आहुतः घृतानि प्रति मोदसे।
यत् त्वा स्रुचः सम्-अस्थिरन्।।2।।
10113. सः आहुतः वि रोचते अग्निः ईडन्यः गिरा।
स्रुचा प्रतीकम् अज्यते।।3।।
10114. घृतेन अग्निः सम् अज्यते मधु-प्रतीकः आहुतः।
रोचमानः विभावसुः।।4।।

10115. जरमाणः सम् इध्यसे देवभ्यः हव्य-वान्।
तम् त्वा हवन्त मर्त्याः।।5।।
10116. तम् मर्ताः अमर्त्यम् घृतेन अग्निम् सपर्यत्।
अदाभ्यम् गृहपतिम्।।6।।
10117. अदाभ्येन शोचिषा अग्ने रक्षः त्वम् दह।
गोपाः ऋतस्य दीदिहि।।7।।
10118. सः त्वम् अग्ने प्रतीकेन प्रति ओष यातुधान्यः।
उरुक्षयेषु दीद्यत्।।8।।
10119. तम् त्वा गीः-भिः उरुक्षयाः हव्यवाहम् सम् ईधरे।
यजिष्ठम् मानुषे जने।।9।।

## सूक्त-119

10120. इति वै इति मे मनः गाम् अश्वम् सनुयाम् इति।
कुवित् सोमस्य अपाम् इति।।1।।
10121. प्र वाताः-इव दोधतः उत् मा पीताः अयंसत।
कुवित् सोमस्य अपाम् इति।।2।।
10122. उत् मा पीताः अयंसत रथम् अश्वाः-इव आशवः।
कुवित् सोमस्य अपाम् इति।।3।।
10123. उत मा मतिः अस्थित वाश्रा पुत्रम्-इव प्रियम्।
कुवित् सोमस्य अपाम् इति।।4।।
10124. अहम् तष्टा-इव वन्धुरम्
परि अचामि त्द्दा मतिम्।
कुवित् सोमस्य अपाम् इति।।5।।
10125. नहि मे अक्षिपत् चन् अच्छान्त्सुः पञ्च कृष्टयः।
कुवित् सोमस्य अपाम् इति।।6।।
10126. नहि मे रोदसी उभे अन्यम् पक्षम् चन् प्रति।
कुवित् सोमस्य अपाम् इति।।7।।
10127. अभि द्याम् महिना भुवम्
अभि इमाम् पृथिवीम् महीम्।
कुवित् सोमस्य अपाम् इति।।8।।
10128. हन्त अहम् पृथिवीम् इमाम्
नि दधानि इह वा इह वा।
कुवित् सोमस्य अपाम् इति।।9।।
10129. ओषम् इत् पृथिवीम् अहम्
जंघनानि इह वा इह वा।
कुवित् सोमस्य अपाम् इति।।10।।
10130. दिवि मे अन्यः पक्षः अधः अन्यम् अचीकृषम्।
कुवित् सोमस्य अपाम् इति।।11।।
10131. अहम् अस्मि महा-महः अभि-नभ्यम् उत्-ईषतः।
कुवित् सोमस्य अपाम् इति।।12।।
10132. गृहः यामि अरम्-कृतः देवेभ्यः हव्य-वाहनः।
कुवित् सोमस्य अपाम् इति।।13।।

## सूक्त-120

10133. तत् इत् आस भुवनेषु ज्येष्ठम्
यतः यज्ञे उग्रः त्वेष-नृम्णः।
सद्यः जज्ञानः नि रिणाति शत्रून्
अनु यम् विश्वे मदन्ति ऊमाः।।1।।
10134. ववृधानः शवसा भूरि-ओजाः
शत्रुः दासाय भियसम् दधाति।
अवि-अनत् च वि-अनत् च सस्निः
सम् ते नवन्त प्रभृता मदेषु।।2।।
10135. त्वे क्रतुम् अपि वृञ्जन्ति विश्वे
द्विः यत् एते त्रिः भवन्ति ऊमाः।
स्वादोः स्वादीयः स्वादुना सृज सम्
अदः सु मधु मधुना अभि योधीः।।3।।
10136. इति चित् हि त्वा धना जयन्तम्
मदे-मदे अनु-मदन्ति विप्राः।
ओजीयः धृष्णो स्थिरम् आ तनुष्व
मा त्वा दभन् यातु-धानाः दुःएवाः।।4।।
10137. त्वया वयम् शाशद्महे रणेषु
प्र-पश्यन्तः युधेन्यानि भूरि।
चोदयामि ते आयुधा वचः-भिः
सम् ते शिशामि ब्रह्मणा वयांसि।।5।।
10138. स्तुषेय्यम् पुरु-वर्पसम् ऋभ्वम्
इन-तमम् आप्त्यम् आप्त्यानाम्।
आ दर्षते शवसा सप्त दानून्
प्र साक्षते प्रति-मानानि भूरि।।6।।
10139. नि तत् दधिषे अवरम् परम्
च यस्मिन् आविथ अवसा दुरोणे।
आ मातरा स्थापयसे जिगत्नू
अतः दनोषि कर्वरा पुरूणि।।7।।
10140. इमा ब्रह्म बृहत्-दिवः विवक्ति
इन्द्राय शूषम् अग्रियः स्वः-साः।
महः गोत्रस्य क्षयति स्व-राजः दुरः
च विश्वाः अवृणोत् अप स्वाः।।8।।
10141. एव महान् बृहत्-दिवः अथर्वा
अवोचत् स्वाम् तन्वम् इन्द्रम् एव।
स्वसारः मातरिभ्वरीः अरिप्राः
हिन्वन्ति च शवसावर्धयन्ति च।।9।।

## सूक्त-121

10142. हिरण्यगर्भः सम् अवर्तत अग्रे,
भूतस्य जातः पतिः एकः आसीत्।
सः दाधार पृथिवीम् द्याम् उत् इमाम्,
कस्मै देवाय हविषा विधेम।।1।।
10143. यः आत्मदाः बलदाः यस्य विश्वे,

उपासते प्रशिषम् यस्य देवाः।
यस्य छाया अमृतम् यस्य मृत्युः,
कस्मै देवाय हविषा विधेम।।2।।
10144. यः प्राणतः निमिषतः महित्वा,
एकः इत् राजा जगतः बभूव।
यः ईशे अस्य द्विपदः चतुष्पदः,
कस्मै देवाय हविषा विधेम।।3।।
10145. यस्य इमे हिमवन्तः महित्वा,
यस्य समुद्रम् रसया सह आहुः।
यस्य इमाः प्रदिशः यस्य बाहू,
कस्मै देवाय हविषा विधेम।।4।।
10146. येन द्यौः उग्रा पृथिवी च दृहड,
येन स्वः स्तभितम् येन नाकः।
यः अन्तरिक्षे रजसः विमानः,
कस्मै देवाय हविषा विधेम।।5।।
10147. यम् क्रन्दसी अवसा तस्तभाने,
अभि ऐक्षेताम् मनसा रेजमाने।
यत्र अधि सूरः उत्-इतः विभाति,
कस्मै देवाय हविषा विधेम।।6।।
10148. आपः ह यत् बृहतीः विश्वम् आयन्,
गर्भम् दधानाः जनयन्तीः अग्निम्।
ततः देवानाम् सम् अवर्तत असुः एकः,
कस्मै देवाय हविषा विधेम।।7।।
10149. यः चित् आपः महिना परि-अपश्यत्,
दक्षम् दधानाः जनयन्तीः यज्ञम्।
यः देवेषु अधि देवः एकः आसीत्,
कस्मै देवाय हविषा विधेम।।8।।
10150. मा नः हिंसीत् जनिता यः पृथिव्याः,
यः वा दिवम् सत्यधर्मा जजान।
यः च अपः चन्द्राः बृहतीः जजान,
कस्मै देवाय हविषा विधेम।।9।।
10151. प्रजा-पते न त्वतेतानि अन्यो,
विश्वा जातानि परिता बभूव।
यत् कामाः ते जुहुमः तत् नो,
अस्तु वयम् स्याम पतयो रयीणाम्।।10।।

## सूक्त-122

10152. वसुम् न चित्र-महसम् गृणीषे
वामम् शेवम् अतिथिम् अद्विषेण्यम्।
सः रासते शुरुधः विश्वधायसः
अग्निः होता गृहपतिः सुवीर्यम्।।1।।
10153. जुषाणः अग्ने प्रति हर्य मे वचः
विश्वानि विद्वान् वयुनानि सुक्रतो।
घृतनिर्निक् ब्रह्मणे गातुम् आ ईरय
तव देवाः अजनयन् अनु व्रतम्।।2।।
10154. सप्त धामानि परियन् अमर्त्यः
दाशत् दाशुषे सुकृते ममहस्व।
सुवीरेण रयिणा अग्ने सु-आभुवा यः
ते आनट् सम्-इधा तम् जुषस्व।।3।।
10155. यज्ञस्य केतुम् प्रथमम् पुरःहितम्
हविष्मन्तः ईडते सप्त वाजिनम्।
शृण्वन्तम् अग्निम् घृतपृष्ठम् उक्षणम्
पृणन्तम् देवम् पृणते सुवीर्यम्।।4।।
10156. त्वम् दूतः प्रथमः वरेण्यः
सहूयमानः अमृताय मत्स्व।
त्वाम् मर्जयन् मरुतः दाशुषः गृहे
त्वाम् स्तोमेभिः भृगवः वि रुरुचुः।।5।।
10157. इषम् दुहन् सु-दुघाम् विश्वधायसम्
यज्ञप्रिये यजमानाय सुक्रतो।
अग्ने घृत-स्नुः त्रिः क्रतानि दीद्यत्
वर्तिः यज्ञम् परियन् सुक्रतु-यसे।।6।।
10158. त्वाम् इत् अस्याः उषसः वि-उष्टिषु
दूतम् कृण्वानाः अजयन्त मानुषाः।
त्वाम् देवाः महयाय्याय ववृधुः
आज्यम् अग्ने नि-मृजन्तः अध्वरे।।7।।
10159. नि त्वा वसिष्ठाः अह्वन्त वाजिनम्
गृणन्तः अग्ने विदथेषु वेधसः।
रायः पोषम् यजमानेषु धारय
यूयम् पात स्वस्तिभिः सदा नः।।8।।

## सूक्त-123

10160. अयम् वेनः चोदयत् पृश्निगर्भाः
ज्योतिः-जरायुः रजसः विमाने।
इमम् अपाम् सम्-गमे सूर्यस्य
शिशुम् न विप्राः मतिभिः रिहन्ति।।1।।
10161. समुद्रात् ऊर्मिम् उत् इयर्ति वेनः
नभः-जाः पृष्ठम् हर्यतस्य दर्शि।
ऋतस्य सानौ अधि विष्टपि भ्राट्
समानम् योनिम् अभि अनूषत व्राः।।2।।
10162. समानम् पूर्वीः अभि वावशानाः
तिष्ठन् वत्सस्य मातरः सनीड।
ऋतस्य अधि चक्रमाणाः
रिहन्ति मध्वः अमृतस्य वाणीः।।3।।
10163. जानन्तः रूपम् अकृपन्त विप्राः
मृगस्य घोषम् महिषस्य हि ग्मन्।
ऋतेन यन्तः अधि सिन्धुम् अस्थुः

विदत् गन्धर्वः अमृतानि नाम।।4।।
10164. अप्सराः जारम् उप-सिष्मियाणा
योषा बिभर्ति परमे वि-ओमन्।
चरत् प्रियस्य योनिषु प्रियः सन्
सीदत् पक्षे हिरण्यये सः वेनः।।5।।
10165. नाके सुपर्णम् उप यत् पतन्तम्
त्द्दा वेनन्तः अभि अचक्षत त्वा।
हिरण्य-पक्षम् वरुणस्य दूतम्
यमस्य योनौ शकुनम् भुरण्युम्।।6।।
10166. ऊर्ध्वः गन्धर्वः अधि नाके अस्थात्
प्रत्यङ् चित्रा बिभ्रत् अस्य आयुधानि।
वसानः अत्कम् सुरभिम् दृशे कम्
स्वः न नाम जनत प्रियाणि।।7।।
10167. द्रप्सः समुद्रम् अभि यत् जिगाति
पश्यन् गृध्रस्य चक्षसा वि-धर्मन्।
भानुः शुक्रेण शोचिषा चकानः
तृतीये चक्रे रजसि प्रियाणि।।8।।

## सूक्त-124

10168. इमम् नः अग्ने उप यज्ञम् आ इहि
पञ्च-यामम् त्रि-वृतम् सप्त-तन्तुम्।
असः हव्य-वाट् उत नः पुरः-गाः ज्योक्
एव दीर्घम् तमः आ अशयिष्ठाः।।1।।
10169. अदेवात् देवः प्र-चता गुहा यन्
प्र-पश्यमानः अमृत-त्वम् एमि।
शिवम् यत् सन्तम् अशिवः जहामि
स्वात् सख्यात् अरणीम् नाभिम् एमि।।2।।
10170. पश्यन् अन्यस्याः अतिथिम् वयायाः
ऋतस्य धाम वि मिमे पुरूणि।
शंसामि पित्रे असुराय शेवम्
अयज्ञियात् यज्ञियम् भागम् एमि।।3।।
10171. बह्वीः समाः अकरम् अन्तः अस्मिन्
इन्द्रम् वृणानः पितरम् जहामि।
अग्निः सोमः वरुणः ते च्यवन्ते
परि-आवर्त् राष्ट्रम् तत् अवामि आ-यन्।।4।।
10172. निः-मायाः ऊँ त्वे असुराः अभूवन्
त्वम् च मा वरुण कामयासे।
ऋतेन राजन् अनृतम् वि-विञ्चन् मम
राष्ट्रस्य अधिपत्यम् आ इहि।।5।।
10173. इदम् स्वः इदम् इत् आस वामम्
अयम् प्र-काशः उरु अन्तरिक्षम्।
हनाव वृत्रम् निःएहि सोम हविः
त्वा सन्तम् हविषा यजाम।।6।।
10174. कविः कवित्वा दिवि रूपम् आ
असजत् अप्र-भूती वरुणः निः अपः सृजत्।
क्षेमम् कृण्वानाः जनयः न सिन्धवः
ताः अस्य वर्णम् शुचयः भरिभ्रति।।7।।
10175. ताः अस्य ज्येष्ठम् इन्द्रियम् सचन्ते
ताः ईम् आ क्षेति स्वधया मदन्तीः।
ताः ईम् विशः न राजानम् वृणानाः
बीभत्सुवः अप वृत्रात् अतिष्ठन्।।8।।
10176. बीभत्सूनाम् सयुजम् हंसम् आहुः
अपाम् दिव्यानाम् सख्ये चरन्तम्।
अनु-स्तुभम् अनु चर्चूर्यमाणम्
इन्द्रम् नि चिक्युः कवयः मनीषा।।9।।

## सूक्त-125

10177. अहम् रुद्रेभिः वसुभिः चरामि
अहम् आदित्यैः उत विश्व-देवैः।
अहम् मित्रावरुणा उभा बिभर्मि
अहम् इन्द्राग्नी अहम् अश्विना उभा।।1।।
10178. अहम् सोमम् आहनसम् बिभर्मि
अहम् त्वष्टारम् उत पूषणम् भगम्।
अहम् दधामि द्रविणम् हविष्मते
सुप्र-अव्ये यजमानाय सुन्वते।।2।।
10179. अहम् राष्ट्री सम्-गमनी वसूनाम्
चिकितुषी प्रथमा यज्ञियानाम् ताम्।
मा देवाः वि अदधुः पुरुत्रा
भूरि-स्थात्राम् भूरि आ-वेशयन्तीम्।।3।।
10180. मया सः अन्नम् अत्ति यः वि-पश्यति
यः प्राणिति यः ईम् शृणोति उक्तम्।
अमन्तवः माम् ते उप क्षियन्ति
श्रुधि श्रुत श्रद्धिवम् ते वदामि।।4।।
10181. अहम् एव स्वयम् इदम् वदामि
जुष्टम् देवेभिः उत मानुषेभिः।
यम् कामये तम्-तम् उग्रम् कृणोमि तम्
ब्रह्माणम् तम् ऋषिम् तम् सु-मेधाम्।।5।।
10182. अहम् रुद्राय धनुः आ तनोमि
ब्रह्मद्विषे शरवे हन्तवै ऊँ।
अहम् जनाय समदम् कृणोमि
अहम् द्यावापृथिवी आ विवेश।।6।।
10183. अहम् सुवे पितरम् अस्य मूर्धन्
मम योनिः अप्सु अन्तः समुद्रे।
ततः वि तिष्ठे भुवना अनु विश्वा उत
अमूम् द्याम् वर्ष्मणा उप स्पृशामि।।7।।
10184. अहम् एव वातः-इव प्र वामि

आ-रभमाणा भुवनानि विश्वा।
परः दिवा परः एना पृथिव्या
एतावती महिना सम् बभूव।।8।।

## सूक्त-126

10185. न तम् अंहः न दुः-इतम्
देवासः अष्ट मर्त्यम्।
सजोषसः यम् अर्यमा मित्रः
नयन्ति वरुणः अत द्विषः।।1।।
10186. तत् हि वयम् वृणीमहे वरुण मित्र अर्यमन्।
येन निः अंहसः यूयम् पाथ
नेथ च मर्त्यम् अति द्विषः।।2।।
10187. ते नूनम् नः अयम् ऊतये वरुणः मित्रः अर्यमा।
नयिष्ठाः ऊँ नः नेषणि पर्षिष्ठाः
उ नः पर्षणि अति द्विषः।।3।।
10188. यूयम् विश्वम् परि पाथ वरुणः मित्रः अर्यमा।
युष्काम् शर्मणि प्रिये स्याम सु-प्रनीतयः अति द्विषः।।4।।
10189. आदित्यासः अति स्रिधः वरुणः मित्रः अर्यमा।
उग्रम् मरुत्-भिः रुद्रम् हुवेम इन्द्रम्
अग्निम् स्वस्तये अति द्विषः।।5।।
10190. नेतारः ऊ सु नः तिरः वरुणः मित्रः अर्यमा।
अति विश्वानि दुः-इता राजानः
चर्षणीनाम् अति द्विषः।।6।।
10191. शुनम् अस्मभ्यम् ऊतये वरुणः मित्रः अर्यमा।
शर्म यच्छन्तु सप्रथः आदित्यासः
यत् ईमहे अति द्विषः।।7।।
10192. यथा ह त्यत् वसवः गौर्यम्
चित् पदि सिताम् अमुञ्चता यजत्राः।
एवो सु अस्मत् मुञ्चत वि अंहः प्र
तारि अग्ने प्र-तरम् नः आयुः।।8।।

## सूक्त-127

10193. रात्री वि अख्यत् आ-यती पुरुत्रा देवी अक्षभिः।
विश्वाः अधि श्रियः अधित।।1।।
10194. आ उरु अप्राः अमर्त्या निवतः देवी उत्-वतः।
ज्योतिषा बाधते तमः।।2।।
10195. निः ऊँ स्वसारम् अकृत उषसम् देवी आयती।
अप इत् ऊँ हासते तमः।।3।।
10196. सा नः अद्य यस्या
वयम् नि ते यामन् अविक्ष्महि।
वृक्षे न वसतिम् वयः।।4।।
10197. नि ग्रामासः अविक्षत नि पत्-वन्तः नि पक्षिणः।
नि श्येनासः चित् अर्थिनः।।5।।
10198. यवय वृक्यम् वृकम् यवय स्तेनम् ऊर्म्ये।
अथ नः सु-तरा भव।।6।।
10199. उप मा पेपिशत् तमः
कृष्णम् वि-अक्तम् अस्थित।
उषः ऋणा-इव यातय।।7।।
10200. उप ते गाः-इव आ अकरम् वृणीष्व दुहितः दिवः।
रात्रि स्तोतम् न जिग्युषे।।8।।

## सूक्त-128

10201. मम अग्ने वर्चः वि-हवेषु अस्तु
वयम् त्वा इन्धानाः तन्वम् पुषेम।
मह्यम् नमन्ताम् प्र-दिशः चतस्रः
त्वया अधि-अक्षेण पृतनाः जयेम।।1।।
10202. मम देवाः वि-हवे सन्तु सर्वे
इन्द्र-वन्तः मरुतः विष्णु अग्निः।
मम अन्तरिक्षम् उरु-लोकम् अस्तु मह्यम्
वातः पवताम् कामे अस्मिन्।।2।।
10203. मयि देवाः द्रविणम् आ यजन्ताम्
मयि आशीः अस्तु मयि देव-हूतिः।
दैव्याः होतारः वनुषन्त पूर्वे
अरिष्टाः स्याम् तन्वा सु-वीराः।।3।।
10204. मह्यम् यजन्तु मम यानि हव्या
आकूतिः सत्या मनसः मे अस्तु।
एनः मा नि गाम् कतमत् चन
अहम् विश्वे देवासः अधि वोचत नः।।4।।
10205. देवीः षट् उर्वीः उरु नः कृणोत
विश्वे देवासः इह वीरयध्वम्।
मा हास्यमहि प्र-जया मा तनूभिः
मा रधाम द्विषते सोम राजन्।।5।।
10206. अग्ने मन्युम् प्रति-नुनद् परिषाण्
अदब्धः गोपाः परि पाहि नः त्वम्।
प्रत्यञ्चः यन्तु नि-गुतः पुनः ते अमा
एषाम् चित्तम् प्र-बुधाम् वि नेशत्।।6।।
10207. धाता धातॄणाम् भुवनस्य यः पतिः
देवम् त्रातारम् अभिमाति-सहम्।
इमम् यज्ञम् अश्विना उभा बृहस्पतिः
देवाः पान्तु यजमानम् नि-अर्थात्।।7।।
10208. उरु-व्यचाः नः महिषः शर्म यंसत्
अस्मिन् हवे पुरु-हूतः पुरुक्षुः।
सः नः प्र-जायै हरि-अश्व मृडय
इन्द्र मा नः रिरिषः मा परा दाः।।8।।
10209. ये नः स-पत्नाः अप ते भवन्तु
इन्द्राग्नि-भ्याम् अव बाधामहे तान्।
वसवः रुद्राः आदित्याः उपरि-स्पृशन् मा

उग्रम् चेत्तारम् अधि-राजम् अक्रन्।।9।।

## सूक्त-129

10210. न असत् आसीत् नो सत् आसीत् तदानीम्
न आसीत् रजः नो वि-ओम परः यत्।
किम् आ अवरीवः कुह कस्य शर्मन्
अम्भः किम् आसीत् गहनम् गभीरम्।।1।।
10211. न मृत्युः आसीत् अमृतम् न तर्हि
न रात्र्याः अह्नः आसीत् प्रकेतः।
आनीत् अवातम् स्वधया तत् एकम् तस्मात्
ह अन्यत् न परः किम् चन् आस।।2।।
10212. तमः आसीत् तमसा गूड्म् अग्रे
अप्रकेतम् सलिलम् सर्वम् आः इदम्।
तुच्छयेन आभु अपिहितम् यत् आसीत्
तपसः तत् महिना अजायत एकम्।।3।।
10213. कामः तत् अग्रे सम् अवर्तत अधि
मनसः रेतः प्रथमम् यत् आसीत्।
सतः बन्धुम् असति निः अविन्दन्
हृदि प्रति-इष्य कवयः मनीषा।।4।।
10214. तिरश्चीनः विततः रश्मिः एषाम् अधः
स्वित् आसीत् उपरि स्वित् आसीत्।
रेतः-धाः आसन् महिमानः आसन् स्वधा
अवस्तात् प्र-यतिः परस्तात्।।5।।
10215. कः अद्धा वेद कः इह प्र वोचत्
कुतः आजाता कुतः इयम् विसृष्टिः।
अर्वाक् देवाः अस्य वि-सर्जनेन
अथ कः वेद यतः आ-बभूव।।6।।
10216. इयम् वि-सृष्टिः यतः आ-बभूव
यदि वा दधे यदि वा न।
यः अस्य अधि-अक्षः परमे वि-ओमन्
सः अङ्ग वेद यदि वा न वेद।।7।।

## सूक्त-130

10217. यः यज्ञः विश्वतः तन्तुभिः ततः
एक-शतम् देव-कर्मेभिः आ-यतः।
इमे वयन्ति पितरः ये आ-ययुः प्र
वय अप वय इति आसते तते।।1।।
10218 पुमान् एनम् तनुने उत् कृणत्ति
पुमान् वि तत्ने अधि नाके अस्मिन्।
इमे मयूखाः उप सेदुः ऊँ सदः
सामानि चक्रुः तसराणि ओतवे।।2।।
10219. का आसीत् प्रमा प्रतिमा किम् निदानम्
आज्यम् किम् आसीत् परिधिः कः आसीत्।
छन्दः किम् आसीत् प्रउगम् किम् उक्थम्
यत् देवाः देवम् अयजन्त विश्वे।।3।।
10220. अग्नेः गायत्री अभवत् सयुग्वा
उष्णिहया सविता सम् बभूव।
अनुस्तुभा सोमः उक्थैः महस्वान्
बृहस्पतेः बृहती वाचम् आवत्।।4।।
10221. विराट् मित्रावरुणयोः अभिश्रीः
इन्द्रस्य त्रिस्तुप् इह भागः अह्नः।
विश्वान् देवान् जगती आ विवेश
तेन चाकृप्रे ऋषयः मनुष्याः।।5।।
10222. चाकृप्रे तेन ऋषयः मनुष्याः
यज्ञे जाते पितरः नः पुराणे।
पश्यन् मन्ये मनसा चक्षसा तान्
ये इमम् यज्ञम् अयजन्त पूर्वे।।6।।
10223. सहस्तोमाः सह-छन्दसः आवृतः
सहप्रमाः ऋषयः सप्त दैव्याः।
पूर्वेषाम् पन्थाम् अनु-दृश्य धीराः
अनु-आलेभिरे रथ्यः न रश्मीन्।।7।।

## सूक्त-131

10224. अप प्राचः इन्द्र विश्वान् अमित्रान्
अप अपाचः अभिभूते नुदस्व।
अप उदीचः अप शूर अधराचः
उरौ यथा तव शर्मन् मदेम।।1।।
10225. कुवित् अङ्ग यवमन्तः यवम्
चित् यथा दान्ति अनुपूर्वम् वियूय।
इह-इह एषाम कृणुहि भोजनानि ये
बर्हिषः नमः-वृक्तिम् न जग्मुः।।2।।
10226. नहि स्थूरि ऋतुथा यातम् अस्ति
न उत श्रवः विविदे सम्-गमेषु।
गव्यन्तः इन्द्रम् सख्या विप्राः
अश्व-यन्तः वृषणम् वाजयन्तः।।3।।
10227. युवम् सरामम् अश्विना निमुचौ आसुरे सचा।
वि-पिपाना शुभः पती इन्द्रम् कर्मसु आवतम्।।4।।
10228. पुत्रम्-इव पितरौ अश्विना
उभा इन्द्र आवथुः काव्यैः दंसनाभिः।
यत् सुरामम् वि अपिबः शचीभिः
सरस्वती त्वा मघवन् अभिष्णक्।।5।।
10229. इन्द्रः सु-त्रामा स्वा-वान् अवः-भिः
सुमृडकः भवतु विश्ववेदाः।
बाधताम् द्वेषः अभयम् कृणोतु
सुवीर्यस्य पतयः स्याम।।6।।
10230. तस्य वयम् सुमतौ यज्ञियस्य
अपि भद्रे सौमनसे स्याम।

सः सु-त्रामा स्व-वान् इन्द्रः अस्मे
आरात् चित् द्वेषः सनुतः युयोतु।।7।।

## सूक्त-132

10231. ईजानम् इत् द्यौः गूर्तवसुः
ईजानम् भूमिः अभि प्रभूषणि।
ईजानम् देवौ अश्विनौ अभि सुम्नैः अवधताम्।।1।।
10232. ता वाम् मित्रावरुणा
धारयत्क्षिती सुसुम्ना इषितत्वता यजामसि।
युवोः क्राणाय सख्यैः अभि स्याम रक्षसः।।2।।
10233. अध चित् नु यत् द्विषामहे
वाम् अभि प्रियम् रेक्णः पत्यमानाः।
ददवान् वा यत् पुष्यति रेक्णः सम्
ऊ आरन् नकिः अस्य मघानि।।3।।
10234. असौ अन्यः असुर सूयत द्यौः
त्वम् विश्वेषाम् वरुण असि राजा।
मूर्धा रथस्य चाकन् न एतावता एनसा अन्तक-धुक्।।4।।
10235. अस्मिन् सु एतत् शकपूते एनः
हिते मित्रे नि-गतान् हन्ति वीरान्।
अवोः वा यत् धात् तनूषु
अवः प्रियासु यज्ञियासु अर्वा।।5।।
10236. युवोः हि माता अदितिः वि-चेतसा
द्यौः न भूमिः पर्यसा पुपूतानि।
अव प्रिया दिदिष्टन सूरः निनिक्त रश्मिभिः।।6।।
10237. युवम् हि अप्नराजौ असीदतम्
तिष्ठत् रथम् न धूः-सदम् वन-सदम्।
ताः नः कणूक-यन्तीः नृ-मेधः
तत्रे अंहसः सु-मेधः तत्रे अंहसः।।7।।

## सूक्त-133

10238. प्रो सु अस्मै पुरः-रथम् इन्द्राय शूषम् अर्चत।
अभीके चित् ऊँ लोक-कृत् सम्-गे समत्-सु वृत्रहा
अस्माकम् बोधि चोदिता नभन्ताम्
अन्यकेषाम् ज्याकाः अधि धन्वसु।।1।।
10239. त्वम् सिन्धून् अव असृजः
अधराचः अहन् अहिम्।
अशत्रुः इन्द्र जज्ञिषे विश्वम् पुष्यसि वार्यम् तम् त्वा परि
स्वजामहे नभन्ताम् अन्यकेषाम् ज्याकाः अधि न्वसु।।2।।
10240. वि सु विश्वाः अरातयः अर्यः नशन्त नः धियः।
अस्ता असि शत्रवे वधम् यः नः इन्द्र
जिघांसति या ते रातिः ददिः वसु नभन्ताम्
अन्यकेषाम् ज्याकाः अधि धन्वसु।।3।।
10241. यः नः इन्द्र अभितः जनः वृकयुः आ-दिदेशति।
अधःपदम् तम् ईम् कृधि विबाधः असि ससहिः
नभन्ताम् अन्यकेषाम् ज्याकाः अधि धन्वसु।।4।।
10242. यः नः इन्द्र अभिदासति
स-नाभिः यः चः निष्ट्यः।
अव तस्य बलम् तिर मही-इव द्यौः अध त्मना
नभन्ताम् अन्यकेषाम् ज्याकाः अधि धन्वसु।।5।।
10243. वयम् इन्द्र त्वा-यवः सखित्वम् आ रभामहे।
ऋतस्य नः पथा नय अति विश्वानि दुः-इता
नभन्ताम् अन्यकेषाम् ज्याकाः अधि धन्वसु।।6।।
10244. अस्मभ्यम् सु त्वम् इन्द्र ताम्
शिक्ष या दोहते प्रति वरम् जरित्रे।
अच्छिद्र-ऊध्नी पीपयत् यथा नः
सहस्रधारा पयसा मही गौः।।7।।

## सूक्त-134

10245. उभे यत् इन्द्र रोदसी आ-पप्राथ उषाः-इव।
महान्तम् त्वा महीनाम् सम्-राजम् चर्षणीनाम् देवी
जनित्री अजीजनत् भद्रा जनित्री अजीजनत्।।1।।
10246. अव स्म दुः-हनायतः मर्तस्य तनुहि स्थिरम्।
अधः-पदम् तम् ईम् कृधि यः अस्मान् आ-दिदेशति
देवी जनित्री अजीजनत् भद्रा जनित्री अजीजनत्।।2।।
10247. अव त्याः बृहतीः इषः विश्वचन्द्राः अमित्र-हन्।
शचीभिः शक्र धूनुहि इन्द् विश्वाभिः ऊतिभिः देवी
जनित्री अजीजनत् भद्रा जनित्री अजीजनत्।।3।।
10248. अव यत् त्वम् शतक्रतो इन्द्र विश्वानि धूनुषे।
रयिम् न सुन्वते सचा सहस्रिणीभिः ऊतिभिः देवी
जनित्री अजीजनत् भद्रा जनित्री अजीजनत्।।4।।
10249. अव स्वेदाः-इव अभितः विष्वक् पतन्तु द्यवः।
दूर्वायाः-इव तन्तवः वि अस्मत् एतु दुःमतिः देवी
जनित्री अजीजनत् भद्रा जनित्री अजीजत्।।5।।
10250. दीर्घम् हि अंकुशम् यथा
शक्तिम् बिभर्षि मन्तुमः।
पूर्वेण मघवन् पदा अजः वयाम् यथा यमः देवी
जनित्री अजीजनत् भद्रा जनित्री अजीजनत्।।6।।
10251. नकिः देवाः मिनीमसि नकिः आ
योपयामसि मंत्र-श्रुत्यम् चरामसि।
पक्षेभिः अपिकक्षेभिः अत्र अभि सम् रभामहे।।7।।

## सूक्त-135

10252. यस्मिन् वृक्षे सु-पलाशे देवैः सम्-पिबते यमः।
अत्र नः विश्पतिः पिता पुराणान् अनु वेनति।।1।।
10253. पुराणान् अनु-वेनन्तम् चरन्तम् पापया अमुया।
असूयन् अभि अचाकशम् तस्मै अस्पृयम् पुनः।।2।।
10254. यम् कुमार नवम् रथम् अचक्रम् मनसा अकृणोः।
एक-ईषम् विश्वतः पाञ्चम् अपश्यन् अधि तिष्ठसि।।3।।

10255. यम् कुमार प्र अवर्तयः रथम् विप्रेभ्यः परि।
तम् साम अनु प्र अवर्तत सम् इतः नावि आ-हितम्।।4।।
10256. कः कुमारम् अजनयत् रथम् कः निः अवर्तयत्।
कः स्वित् तत् अद्य नः ब्रूयात्
अनुदेयी यथा अभवत्।।5।।
10257. यथा अभवत् अनुदेयी ततः अग्रम् अजायत।
पुरस्तात् बुध्नः आततः पश्चात् निः-अयनम् कृतम्।।6।।
10258. इदम् यमस्य सदनम् देवमानम् यत् उच्यते।
इयम् अस्य धम्यते नाड अयम् गीः-भिः परिकृतः।।7।।

## सूक्त-136

10259. केशी अग्निम् केशी विषम् केशी बिभर्ति रोदसी।
केशी विश्वम् स्वः दृशे केशी इदम् ज्योतिः उच्यते।।1।।
10260. मुनयः वातरशनाः पिशङ्गा वसते मला।
वातस्य अनु धाजिम् यन्ति यत् देवासः अविक्षत।।2।।
10261. उत्-मदिताः मौनेयेन वातान् आ तस्थिम वयम्।
शरीरा इत अस्माकम् यूयम् मर्तासः अभि पश्यथ।।3।।
10262. अन्तरिक्षेण पतति विश्वा रूपा अव-चाकशत्।
मुनिः देवस्य-देवस्य सौकृत्याय सखा हितः।।4।।
10263. वातस्य अश्वः वायोः सखा
अथो देव-इषितः मुनिः।
उभौ समुद्रौ आ क्षेति यः च पूर्वः उत अपरः।।5।।
10264. अप्सरसाम् गन्धर्वाणाम् मृगाणाम् चरणे चरन्।
केशी केतस्य विद्वान् सखा स्वादुः मदिन्-तमः।।6।।
10265. वायुः अस्मै उप अमन्थत् पिनष्टि स्म नन्नमा।
केशी विषस्य पात्रेण यत् रुद्रेण अपिबत् सह।।7।।

## सूक्त-137

10266. उत देवाः अव-हितम् देवाः उत् नयथ पुनः।
उत आगः चक्रुषम् देवाः देवाः जीवयथ पुनः।।1।।
10267. द्वौ इमौ वातौ वातः आ सिन्धोः आ परा-वतः।
दक्षम् ते अन्यः आ वातु परा अन्यः वातु यत् रपः।।2।।
10268. आ वात वाहि भेषजम् वि वात वाहि यत् रपः।
त्वम् हि विश्वभेषजः देवानाम् दूतः ईयसे।।3।।
10269. आ त्वा अगमम् शन्ताति-भिः
अथो अरिष्टताति-भिः।
दक्षम् ते भद्रम् आ अभार्षम् परा यक्ष्मम् सुवामि ते।।4।।
10270. त्रायन्ताम् इह देवाः त्रायताम् मरुताम् गणः।
त्रायन्ताम् विश्वा भूतानि यथा अयम् अरपाः असत्।।5।।
10271. आपः इत् वै ॐ भेषजीः आपः अमीव-चातनीः।
आपः सर्वस्य भेषजीः ताः ते कृण्वन्तु भेषजम्।।6।।
10272. हस्ताभ्याम् दश-शाखाभ्याम् जिह्वा वाचः पुरः-वी।
अनामयित्नु-भ्याम् त्वा ताभ्याम् त्वा उप स्पृशामसि।।7।।

## सूक्त-138

10273. तव त्ये इन्द्र सख्येषु बह्नयः ऋतम्
मन्वानाः वि अदर्तदिरुः वलम्।
यत्र दशस्यन् उषसः रिणन् अपः
कुत्साय मन्मन् अह्यः च दंसयः।।1।।
10274. अव असृजः प्र-स्वः श्वश्चयः गिरीन्
उत् आजः उस्राः अपिबः मधु प्रियम्।
अवर्धयः वनिनः अस्य दंससा
शुशोच सूर्यः ऋतजातया गिरा।।2।।
10275. वि सूर्यः मध्ये अमुचत् रथम् दिवः
विदत् दासाय प्रति-मानम् आर्यः।
दृह्डानि पिप्रोः असुरस्य मायिनः इन्द्रः
वि आस्यत् चकृवान् ऋजिश्वना।।3।।
10276. अनाधृष्टानि धृषितः वि आस्यत्
नि-धीन् अदेवान् अमृणत् अयास्यः।
मासा-इव सूर्यः वसु पुर्यम् आ ददे
गृणानः शत्रून् अशृणात् विरुक्मता।।4।।
10277. अयुद्ध-सेनः विभ्वा विभिन्दता
दाशत् वृत्रहा तुज्यानि तेजते।
इन्द्रस्य वज्रात् अबिभेत् अभि-श्नथः प्र
अक्रामत् शुन्ध्यूः अजहात् उषाः अनः।।5।।
10278. एता त्या ते श्रुत्यानि केवला
यत् एकः एकम् अकृणोः अयज्ञम्।
मासाम् विधानम् अदधाः अधि द्यवि
त्वया विभिन्नम् भरति प्रधिम् पिता।।6।।

## सूक्त-139

10279. सूर्य-रश्मिः हरिकेशः पुरस्तात्
सविता ज्योतिः उत् अयान् अजस्रम्।
तस्य पूषा प्रसवे याति विद्वान्
सम्-पश्यन् विश्वाः भुवनानि गोपाः।।1।।
10280. नृचक्षाः एषः दिवः मध्ये आस्ते
आपप्रिवान् रोदसी अन्तरिक्षम्।
सः विश्वाचीः अभि चष्टे घृताचीः
अन्तरा पूर्वम् अपरम् च केतुम्।।2।।
10281. रायः बुध्नः सम्-गमनः वसूनाम
विश्वा रूपा अभि चष्टे शचीभिः।
देवः-इव सविता सत्य-धर्मा इन्द्रः
न तस्थौ सम्-अरे धनानाम्।।3।।
10282. विश्ववसुम् सोम गन्धर्वम् आपः
ददृशुषीः तत् ऋतेन वि आयन्।
तत् अनु-अवैत् इन्द्रः ररहाणः आसाम्
परि सूर्यस्य परिधीन् अपश्यत्।।4।।
10283. विश्ववसुः अभि तत् नः गृणातु

दिव्यः गन्धर्वः रजसः विमानः।
यत् वा घ सत्यम् उत यत् न विद्म
धियः हिन्वानः धियः इत् नः अव्याः।।5।।
10284. सस्निम् अविन्दत् चरणे नदीनाम्
अप अवृणोत् दुरः अश्म-व्रजानाम्।
प्र आसाम् गन्धर्वः अमृतानि वोचत्
इन्द्रः दक्षम् परि जाना अहीनाम्।।6।।

## सूक्त-140

10285. अग्ने तव श्रवः वयः महि
भ्राजन्ते अर्चयः विभावसो।
बृहद्भानो शवसा वाजम् उक्थ्यम् दधासि दाशुषे कवे।।1।।
10286. पावक-वर्चाः शुक्र-वर्चाः
अनून-वर्चाः उत् इयर्षि भानुना।
पुत्रः मातरा वि-चरन् उप अवसि पृणक्षि रोदसी उभे।।2।।
10287. ऊर्जः नपात् जातवेदः
सुशस्ति-भिः मन्दस्व धीति-भिः हितः।
त्वे इषः सम् दधुः भूरि-वर्पसः चित्र-ऊतयः वामजाताः।।3।।
10288. इरज्यन् अग्ने प्रथयस्व
जन्तुभिः अस्मे रायः अमर्त्य।
सः दर्शतस्य वपुषः वि राजसि
पृणक्षि सानसिम् क्रतुम्।।4।।
10289. इष्कर्तारम् अध्वरस्य प्र-चेतसम्
क्षयन्तम् राधसः महः।
रातिम् वामस्य सुभगाम् महीम्
इषम् दधासि सानसिम् रयिम्।।5।।
10290. ऋत-वानम् महिषम् विश्व-दर्शतम्
अग्निम् सुम्नाय दधिरे पुरः जनाः।
श्रुत-कर्णम् सप्रथः-तमम् त्वा
गिरा दैव्यम् मानुषा युगा।।6।।

## सूक्त-141

10291. अग्ने अच्छ वद इह नः प्रत्यङ् नः सुमनाः भव।
प्र नः यच्छ विशः पते धनदाः असि नः त्वम्।।1।।
10292. प्र नः यच्छतु अर्यमा प्र भगः प्र बृहस्पतिः।
प्र देवाः प्र उत सूनृता रायः देवी ददातु नः।।2।।
10293. सोमम् राजानम् अवसे अग्निम् गीः-भिः हवामहे।
आदित्यान् विष्णुम् सूर्यम् ब्रह्माणम् च बृहस्पतिम्।।3।।
10294. इन्द्रवायू बृहस्पतिम् सुहवा इह हवामहे।
यथा नः सरवः इत् जनः सम्-गत्याम् सुमनाः असत्।।4।।
10295. अर्यमणम् बृहस्पतिम् इन्द्रम् दानाय चोदय।
वातम् विष्णुम् सरस्वतीम् सवितारम् च वाजिनम्।।5।।
10296. त्वम् नः अग्ने अग्नि-भिः ब्रह्म यज्ञम् च वर्धय
त्वम् नः देव-तातये रायः दानाय चोदय।।6।।

## सूक्त-142

10297. अयम् अग्ने जरिता त्वे अभूत् अपि
सहसः सूनो नहि अन्यत् अस्ति आप्यम्।
भद्रम् हि शर्म त्रिवरूथम् अस्ति ते आरे
हिंसानाम् अप दिद्युम् आ कृधि।।1।।
10298. प्र-वत् ते अग्ने जनिम पितु-यतः
साची-इव विश्वा भुवना नि ऋञ्जसे।
प्र सप्तयः प्र सनिषन्त नः धियः
पुरः चरन्ति पशुपाः-इव त्मना।।2।।
10299. उत् वै ॐ परि वृणक्षि बप्सत्
बहोः अग्ने उलपस्य स्वधा-वः।
उत खिल्याः उर्वराणाम् भवन्ति
मा ते हेतिम् तविषीम् चुक्रुधाम।।3।।
10300. यत् उत्-वतः निवतः यासि बप्सत्
पृथक् एषि प्रगर्धिनी-इव सेना।
यदा ते वातः अनु-वाति शोचिः
वप्ताइव श्मश्रु वपसि प्र भूम।।4।।
10301. प्रति अस्य श्रेणयः ददृश्रे
एकम् नि-यानम् बहवः रथासः।
बाहू यत् अग्ने अनु-मर्मृजानः
न्यङ् उत्तानाम् अनु-एषि भूमिम्।।5।।
10302. उत् ते शुष्माः जिहताम् उत् ते अर्चिः
उत् ते अग्ने शशमानस्य वाजाः।
उत् श्वञ्चस्व नि नम वर्धमानः
आ त्वा अद्य विश्वे वसवः सदन्तु।।6।।
10303. अपाम् इदम् नि-अयनम् समुद्रस्य निवेशनम्।
अन्यम् कृणुष्व इतः पन्थाम् तेन याहि वशान् अनु।।7।।
10304. आ-अयने ते परा-अयने दूर्वाः रोहन्तु पुष्पिणीः।
ह्रदाः च पुण्डरीकाणि समुद्रस्य गृहाः इमे।।8।।

## सूक्त-143

10305. त्यम् चित् अत्रिम् ऋत-जुरम्
अर्थम् अश्वम् न यातवे।
कक्षीवन्तम् यदि पुनः रथम् न कृणुथः नवम्।।1।।
10306. त्यम् चित् अश्वम् न वाजिनम्
अरेणवः यम् अत्नत।
दृह्ळम् ग्रन्थिम् न वि स्यतम्
अत्रिम् यविष्ठम् आ रजः।।2।।
10307. नरा दंसिष्ठौ अत्रये शुभ्रा सिसासतम् धियः।
अथ हि वाम् दिवः नरा पुनः स्तोमः न विशसे।।3।।
10308. चिते तत् वाम् सु-राधसा रातिः सुमतिः अश्विना।
आ यत् नः सदने पृथौ समने पर्षथः नरा।।4।।
10309. युवम् भुज्युम् समुद्रे आ रजसः पारे ईङ्खितम्।

यातम् अच्छ पतत्रि-भिः नासत्या सायै कृतम्।।5।।
10310. आ वाम् सुम्नैः शंयू-इव महिष्ठा विश्ववेदसा।
सम् अस्मे भूषतम् नरा उत्सम् न पिप्युषीः इषः।।6।।

## सूक्त-144

10311. अयम् हि ते अमर्त्यः इन्दुः अत्यः न पत्यते।
दक्षः विश्वआयुः वेधसे।।1।।
10312. अयम् अस्मासु काव्यः ऋभुः वज्रः दास्वते।
अयम् बिभर्ति ऊर्ध्वकृशनम्
मदम् ऋभुः न कृत्व्यम् मदम्।।2।।
10313. धृषुः श्येनाय कृत्वने आसु स्वासु वंसगः।
अव दीधेत् अहीशुवः।।3।।
10314. यम् सुपर्णः परावतः श्येनस्य पुत्रः आ अभरत्।
शत-चक्रम् यः अह्यः वर्तनिः।।4।।
10315. यम् ते श्येनः चारुम् अवृकम् पदा
आ अभरत् अरुणम् मानम् अन्धसः।
एना वयः वि तारि आयुः जीवसे एना जागार बन्धुता।।5।।
10316. एव तत् इन्द्रः इन्दुना देवेषु
चित् धारयाते महि त्यजः।
क्रत्वा वयः वि तारि आयुः सुक्रतो
क्रत्वा अयम् अस्मत् आ सुतः।।6।।

## सूक्त-145

10317. इमाम् खनामि ओषधिम् वीरुधम् बलवत्-तमाम्।
यया सपत्नीम् बाधते यया सम्-विन्दते पतिम्।।1।।
10318. उत्तान-पर्णे सु-भगे देव-जूते सहस्वति।
स-पत्नीम् मे परा धम पतिम् मे केवलम् कु।।2।।
10319. उत्-तरा अहम् उत्-तरे उत्-तरा इत् उत्-तराभ्यः।
अथ स-पत्नी या मम अधरा सा अधराभ्यः।।3।।
10320. नहि अस्याः नाम गृभ्णामि
नो अस्मिन् रमते जने।
पराम् एव परावतम् स-पत्नीम् गमयामसि।।4।।
10321. अहम् अस्मि सहमाना अथ त्वम् असि ससहिः।
उभे सहस्वती भूत्वी स-पत्नीम् मे सहावहै।।5।।
10322. उप ते अधाम् सहमानाम्
अभि त्वा अधाम् सहीयसा।
माम् अनु प्र ते मनः वत्सम् गौः-इव
धावतु पथा वाःइव धावतु।।6।।

## सूक्त-146

10323. अरण्यानि अरण्यानि असौ या प्रइव नश्यसि।
कथा ग्रामम् न पृच्छसि न त्वा भीः-इव विन्दतीँ।।1।।
10324. वृष-रवाय वदते यत् उप-अवति चिच्चिकः।
आघाटिभिः-इव धावयन् अरण्यानिः महीयते।।2।।
10325. उत गावः-इव अदन्ति उतवेश्म-इव दृश्यते।
उतो अरण्यानिः सायम् शकटीः-इव सर्जति।।3।।
10326. गाम् अङ्ग एषः आ ह्वयति
दारु अङ्ग एषः अप अवधीत्।
वसन् अरण्यान्याम् सायम् अक्रुक्षत् इति मन्यते।।4।।
10327. न वै अरण्यानिः हन्ति
अन्यः च इत् न अभिगच्छति।
स्वादोः फलस्य जग्ध्वाय यथा-क्रामम् नि पद्यते।।5।।
10328. आञ्जन-गन्धिम् सुरभिम्
बहु-अन्नाम् अकृषि-वलाम्।
प्र अहम् मृगाणाम् मातरम् अरण्यानिम् अशंसिषम्।।6।।

## सूक्त-147

10329. श्रत् ते दधामि प्रथमाय मन्यवे
अहन् यत् वृत्रम् नर्यम् विवेः अपः।
उभे यत् त्वा भवतः रोदसी अनु
रेजते शुष्मात् पृथिवी चित् अद्रिवः।।1।।
10330. त्वम्मायाभिः अनवद्य मायिनम्
श्रवस्यता मनसा वृत्रम् अर्दयः।
त्वाम् इत् नरः वृणते गो-इष्टिषु
त्वाम् विश्वासु हव्यासु इष्टिषु।।2।।
10331. आ एषु चाकन्धि पुरुहूत सूरिषु
वृधासः ये मघवन् आनशुः मघम्।
अर्चन्ति तोके तनये परिष्टिषु
मेध-साता वाजिनम् अह्नये धने।।3।।
10332. सः इत् रायः सुभृतस्य चाकनत्
मदम् यः अस्य रंह्यम् चिकेतति।
त्वा-वृधः मघवन् दाशु-अध्वरः
मक्षु सः वाजन् भरते धना नृभिः।।4।।
10333. त्वम् शर्धाय महिना गृणानः
उरु कृधि मघवन् शग्धि रायः।
त्वम् नः मित्रः वरुणः न मायी
पित्वः न दस्म दयसे विभक्ता।।5।।

## सूक्त-148

10334. सुस्वानासः इन्द्र स्तुमसि त्वा
सस-वांसः च तुवि-नृम्ण वाजम्।
आ नः भर सुवितम् यस्य चाकन्
त्मना तना सनुयाम त्वा-ऊताः।।1।।
10335. ऋष्वः त्वम् इन्द्र शूर जातः
दासीः विशः सूर्येण सत्द्याः।
गुहा हितम् गुह्यम् गूहडम् अप्सु
बिभृमसि प्रस्रवणे न सोमम्।।2।।
10336. अर्यः वा गिरः अभि अर्च विद्वान्
ऋषीणाम् विप्रः सुमतिम् चकानः।

ते स्याम ये रणयन्त सोमैः एना
उत तुभ्यम् रथ-ओह्ड भक्षैः।।3।।
10337. इमा ब्रह्म इन्द्र तुभ्यम् शंसि
दाः नृभ्यः नृणाम् शूर शवः।
तेभिः भव सक्रतुः येषु चाकन्
उत त्रायस्व गृणतः उत स्तीन्।।4।।
10338. श्रुधि हवम् इन्द्र शूर पृथ्याः
उत स्तवसे वेन्यस्य अर्कैः।
आ यः ते योनिम् घृत-वन्तम् अस्वाः
ऊर्मिः न निम्नैः द्रवयन्त वक्वाः।।5।।

## सूक्त-149

10339. सविता यन्त्रैः पृथिवीम् अरम्णात्
अस्कम्भने सविता द्याम् अदृंहत्।
अधुक्षत् धुनिम् अन्तरिक्षम्
अतूर्ते बद्धम् सविता समुद्रम्।।1।।
10340. यत्र समुद्रः स्कभितः वि औनत्
अपाम् नपात् सविता तस्य वेद।
अतः भूः अतः आः उत्थितम् रजः
अतः द्यावापृथिवी अप्रथेताम्।।2।।
10341. पश्चा इदम् अन्यत् अभवत्
यजत्रम् अमर्त्यस्य भुवनस्य भूना।
सुपर्णः अङ्ग सवितुः गरुत्मान्
पूर्वः जातः सः ऊँ अस्य अनु धर्म।।3।।
10342. गावः-इव ग्रामम् यूयुधिः-इव
अश्वान् वाश्राइव वत्सम् सुमनाः दुहाना।
पतिः-इव जायाम् अभि नः नि
एतु धर्ता दिवः सविता विश्ववारः।।4।।
10343. हिरण्य-स्तूपः सवितः यथा त्वा
आङ्गिरसः जुह्वे वाजे अस्मिन्।
एव त्वा अर्चन् अवसे वन्दमानः
सोमस्य-इव अंशुम् प्रति जागर अहम्।।5।।

## सूक्त-150

10344. सम्-इद्धः चित् सम् इध्यसे देवेभ्यः हव्य-वाहन।
आदित्यैः रुद्रैः वसु-भिः नः आ
गहि मृडकाय नः आ गहि।।1।।
10345. इमम् यज्ञम् इदम् वचः जुजुषाणः उप-आगहि
मर्तासः त्वा सम्-इधान हवामहे मृडकाय हवामहे।।2।।
10346. त्वाम् ऊँ जातवेदसम् विश्ववारम् गृणे धिया।
अग्ने देवान् आ वह नः प्रिय-व्रतान्
मृडकाय प्रिय-व्रतान्।।3।।
10347. अग्निः देवः देवानाम् अभवत्
पुरः-हितः अग्निम् मनुष्याः ऋषयः सम् ईधरे।
अग्निम् महः धनसातौ अहम्
हुवे मृडकम् धन-सातये।।4।।
10348. अग्निः अत्रिम् भरत्-वाजम् गविष्ठिरम्
प्र आवत् नः कण्वम् त्रसदस्युम् आहवे।
अग्निम् वसिष्ठः हवते पुरः-हितः मृडकाय पुरः-हितः।।5।।

## सूक्त-151

10349. श्रद्धया अग्निः सम् इध्यते श्रद्धया हूयते हविः।
श्रद्धाम् भगस्य मूर्धनि वचसा आ वेदयामसि।।1।।
10350. प्रियम् श्रद्धे ददतः प्रियम् श्रद्धे दिदासतः।
प्रियम् भोजेषु यज्वसु इदम् मे उदितम् कृधि।।2।।
10351. यथा देवाः असुरेषु श्रद्धाम् उग्रेषु चक्रिरे।
एवम् भोजेषु यज्वसु अस्माकम् उदितम् कृधि।।3।।
10352. श्रद्धाम् देवाः यजमानाः वायुगोपाः उप आसते।
श्रद्धाम् हृदय्यया आकूत्या श्रद्धया विन्दते वसु।।4।।
10353. श्रद्धाम् प्रातः हवामहे श्रद्धाम् मध्यिन्दनम् परि।
श्रद्धाम् सूर्यस्य नि-मुचि श्रद्धे श्रत् धापय इह नः।।5।।

## सूक्त-152

10354. शासः इत्था महान् असि अमित्रखादः अद्भुतः।
न यस्य हन्यते सखा न जीयते कदा चन।।1।।
10355. स्वस्ति-दाः विशः पतिः वृत्रहा विमृधः वशी।
वृषा इन्द्रः पुरः एतु नः सोमपाः अभयम्-करः।।2।।
10356. वि रक्षः वि मृधः जहि वि वृत्रस्य हनू रुज।
वि मन्युम् इन्द्र वृत्रहन् अमित्रस्य अभिदासतः।।3।।
10357. वि नः इन्द्र मृधः जहि नीचा यच्छ पृतन्यतः।
यः अस्मान् अभि-दासति अधरम् गमय तमः।।4।।
10358. अप इन्द्र द्विषतः मनः अप जिज्यासतः वधम्।
वि मन्योः शर्म यच्छ वरीयः यवय वधम्।।5।।

## सूक्त-153

10359. ईङ्खयन्तीः अपस्युवः इन्द्रम् जातम् उप आसते।
भेजानासः सुवीर्यम्।।1।।
10360. त्वम् इन्द्र बलात् अधि सहसः जातः ओजसः।
त्वम् वृषन् वृषा इत् असि।।2।।
10361. त्वम् इन्द्र असि वृत्रहा वि अन्तरिक्षम् अतिरः।
उत् द्याम् अस्तभ्नाः ओजसा।।3।।
10362. त्वम् इन्द्र सजोषसम् अर्कम् बिभर्षि बाह्वोः।
वज्रम् शिशानः ओजसा।।4।।
10363. त्वम् इन्द्र अभिभूः असि विश्वा जातानि ओजसा।
सः विश्वाः भुवः आ अभवः।।5।।

## सूक्त-154

10364. सोमः एकेभ्यः पवते घृतम् एके उप आसते।
येभ्यः मधु प्र-धावति तान् चित् एव अपि गच्छतात्।।1।।

10365. तपसा ये अनाधृष्याः तपसा ये स्वः ययुः।
तपः ये चक्रिरे महः तान् चित् एव अपि गच्छतात्।।2।।
10366. ये युध्यन्ते प्र-धनेषु शूरासः ते तनू-त्यजः।
ये वा सहस्र-दक्षिणाः तान् चित् एव अपि गच्छतात्।।3।।
10367. ये चित् पूर्वे ऋतसापः ऋतवानः ऋतवृधः।
पितृन् तपस्वतः यभ तान् चित् एव अपि गच्छतात्।।4।।
10368. सहस्रनीथाः कवयः ये गोपायन्ति सूर्यम्।
ऋषीन् तपस्वतः यम तपःजान् अपि गच्छतात्।।5।।

## सूक्त-155

10369. अरायि काणे विकटे गिरिम् गच्छ सदान्वे।
शिरिम्बठस्य सत्वभिः तेभिः त्वा चातयामसि।।1।।
10370. चत्तो इतः चत्ता अमुतः सर्वा भ्रूणानि आरुषी।
अराय्यम् ब्रह्मणः पते तीक्ष्ण शृङ्ग उत्-ऋषन् इहि।।2।।
10371. अदः यत् दारु प्लवते सिन्धोः पारे अपुरुषम्।
तत् आ रभस्व दुर्हनो तेन गच्छ परःतरम्।।3।।
10372. यत् ह प्राचीः अजगन्त उरः मण्डूर-धाणिकीः।
हताः इन्द्रस्य शत्रवः सर्वे बुद्बुद-याशवः।।4।।
10373. परि इमे गाम् अनेषत परि अग्निम् अहृषत।
देवेषु अक्रत श्रवः कः इमान् आ दधर्षति।।5।।

## सूक्त-156

10374. अग्निम् हिन्वन्तु नः धियः
सप्तिम् आशुम्-इव आजिषु।
तेन जेष्म धनम्-धनम्।।
10375. यया गाः आ-करामहे सेनया अग्ने तव ऊत्या।
ताम् नः हिन्व मघत्तये।।2।।
10376. आ अग्ने स्थूरम् रयिम् भर
पृथुम् गोमन्तम् अश्विनम्।
अङ्गि खम् वर्तय पणिम्।।3।।
10377. अग्ने नक्षत्रम् अजरम् आ सूर्यम् रोहयः दिवि।
दधत् ज्योतिः जनेभ्यः।।4।।
10378. अग्ने केतुः विशाम् असि प्रेष्ठः श्रेष्ठः उपस्थ-त्।
बोध स्तोत्रे वयः दधत्।।5।।

## सूक्त-157

10379. इमा नु कम् भुवना सीसधाम
इन्द्रः च विश्वे च देवाः।।1।।
10380. यज्ञम् च नः तन्वम् च प्रजाम् च
आदित्यैः इन्द्रः सह चीक्लृपाति।।2।।
10381. आदित्यैः इन्द्रः सगणः मरुत्-भिः
अस्माकम् भूतु अविता तनूनाम्।।3।।
10382. हत्वाय देवाः असुरान् यत् आयन्
देवाः देवत्वम् अभि-रक्षमाणाः।।4।।
10383. प्रत्यञ्चम् अर्कम् अनयन् शचीभिः आत्
इत् स्वधाम् इषिराम् परि अपश्यन्।।5।।

## सूक्त-158

10384. सूर्यः नः दिवः पातु वातः अन्तरिक्षात्।
अग्निः नः पार्थिवेभ्यः।।1।।
10385. जोष सवितः यस्य ते हरः शतम् सवान् अर्हति।
पाहि नः दिद्युतः पतंत्याः।।2।।
10386. चक्षुः नः देवः सविता चक्षुः नः उत पर्वतः।
चक्षुः धाता दधातु नः।।3।।
10387. चक्षुः नः धेहि चक्षुषे चक्षुः विख्यै तनूभ्यः।
सम् च इदम् वि च पश्येम।।4।।
10388. सु-सन्दृशम् त्वा वयम् प्रति पश्येम सूर्य।
वि पश्येम नृचक्षसः।।5।।

## सूक्त-159

10389. उत् असौ सूर्यः अगात् उत् अयम् मामकः भगः।
अहम् तत् विद्वला पतिम् अभि असाक्षि विससहिः।।1।।
10390. अहम् केतुः अहम् मूर्धा अहम् उग्रा वि-वाचनी।
मम इत् अनु क्रतुम् पतिः सेहानायाः उप-आचरेत्।।2।।
10391. मम पुत्राः शत्रु-हनः अथो मे दुहिता विराट्।
उत अहम् अस्मि सम्-जया
पत्यौ मे श्लोकः उत्-तमः।।3।।
10392. येन इन्द्रः हविषा कृत्वी
अभवत् द्युम्नी उत्-तमः।
इदम् तत् अक्रि देवाः असपत्नाः किल अभुवम्।।4।।
10393. असपत्ना सपत्न-घ्नी जयन्ती अभिभूवरी।
आ अवृक्षम् अन्साम् वर्चः राधः अस्थेयसाम्-इव।।5।।
10394. सम् अजैषम् इमाः अहम् सपत्नीः अभिभूवरी।
यथा अहम् अस्य वीरस्य विराजानि जनस्य च।।6।।

## सूक्त-160

10395. तीव्रस्य अभिवयसः अस्य
पाहि सर्वरथा वि हरी इह मुञ्च।
इन्द्र मा त्वा यजमानासः अन्ये
नि रीरमन् तुभ्यम् इमे सुतासः।।1।।
10396. तुभ्यम् सुताः तुभ्यम् ऊ सोत्वासः
त्वाम् गिरः श्वात्र्याः आ ह्वयन्ति।
इन्द्र इदम् अद्य सवनम् जुषाणः
विश्वस्य विद्वान् इह पाहि सोमम्।।2।।
10397. यः उशता मनसा सोमम् अस्मै
सर्व-हृदा देव-कामः सुनोति।
न गाः इन्द्रः तस्य परा ददाति
प्रशस्तम् इत् चारुम् अस्मै कृणोति।।3।।
10398. अनुस्पष्टः भवति एषः अस्य
यः अस्मै रेवान् न सुनोति सोमम्।

निः अरत्नौ मघवा तम् दधाति
ब्रह्म-द्विषः हन्ति अननुदिष्टः।।4।।
10399. अश्वयन्तः गव्यन्तः वाजयन्तः
हवामहे त्वा उप-गन्तवै ॐ।
आभूषन्तः ते सुमतौ नवायाम्
वयम् इन्द्र त्वा शुनम् हुवेम।।5।।

## सूक्त-161

10400. मुञ्चामि त्वा हविषा जीवनाय
कम् अज्ञात-यक्ष्मात् उत राज-यक्ष्मात्।
ग्राहिः जग्राह यदि वा एतत एनम्
तस्याः इन्द्राग्नी प्र मुमुक्तम् एनम्।।1।।
10401. यदि क्षित-आयुः यदि वा पराइतः
यदि मृत्योः अन्तिकम् नि-इतः एव।
तम् आ हरामि निः-ऋते उपस्थात्
अस्पार्षम् एनम् शत-शारदाय।।2।।
10402. सहस्र-अक्षेण श-शारदेन
शत-आयुषा हविषा आ अहार्षम् एनम्।
शतम् यथा इमम् शरदः नयाति
इन्द्रः विश्वस्य दुःइतस्य पारम्।।3।।
10403. शतम् जीव शरदः वर्धमानः
शतम् हेमन्तान् शतम् ऊ वसन्तान्।
शतम् इन्द्राग्नी सविता बृहस्पतिः
शत-आयुषा हविषा इमम् पुनः दुः।।4।।
10404. आ अहार्षम् त्वा अविदम्
त्वा पुनः आ अगाः पुनः-इव।
सर्व-अङ्ग सर्वम् ते चक्षुः सर्वम् आयुः च ते अविदम्।।5।।

## सूक्त-162

10405. ब्रह्मणा अग्निः सम्-विदानः
रक्षः-हा बाधताम् इतः।
अमीवा यः ते गर्भम् दुःनामा योनिम् आशये।।1।।
10406. यः ते गर्भम् अमीवा दुः-नामा योनिम् आशये।
अग्निः तम् ब्रह्मणा सह निः क्रव्य-अदम् अनीनशत्।।2।।
10407. यः ते हन्ति पतयन्तम्
नि-सत्स्नुम् यः सरीसृपम्।
जातम् यः ते जिघांसति तम् इतः नाशयामसि।।3।।
10408. यः ते ऊरू विहरति अन्तरा दम्पती शये।
योनिम् यः अन्तः आ-रेड तम् इतः नाशयामसि।।4।।
10409. यः त्वा भ्राता पतिः भूत्वा
जारः भूत्वा नि-पद्यते।
प्र-जाम् यः ते जिघांसति तम् इतः नाशयामसि।।5।।
10410. यः त्वा स्वप्नेन तमसा मोहयित्वा नि-पद्यते।
प्रजाम् यः ते जिघांसति तम् इतः नाशयामि।।6।।

## सूक्त-163

10411. अक्षीभ्याम् ते नासिकाभ्याम्
कर्णाभ्याम् छुबुकात् अधि।
यक्ष्मम् शीर्षण्यम् मस्तिष्कात्
जिह्वायाः वि वृहामि ते।।1।।
10412. ग्रीवाभ्यः ते उष्णिहाभ्यः कीकसाभ्यः अनूक्यात्।
यक्ष्मम् दोषण्यम् अंसाभ्याम् बाहुभ्याम् वि वृहामि ते।।2।।
10413. आन्त्रेभ्यः ते गुदाभ्यः वनिष्ठोः हृदयात् अधि।
यक्ष्मम् मतस्नाभ्याम् यक्नः
प्लाशिभ्यः वि वृहामि ते।।3।।
10414. उरुभ्याम् ते अष्ठीवत्-भ्याम्
पार्ष्णिभ्याम् प्रपदाभ्याम्।
यक्ष्मम् श्रोणिभ्याम् भासदात् भंससः वि वृहामि ते।।4।।
10415. मेहनात् वनम्-करणात् लोमभ्यः ते नखेभ्यः।
यक्ष्मम् सर्वस्मात् आत्मनः तम् इदम् वि वृहामि ते।।5।।
10416. अङ्गात्-अङ्गात् लोम्नः-लोम्नः
जातम् पर्वणि-पर्वणि।
यक्ष्मम् सर्वस्मात् आत्मनः तम् इदम् वि वृहामि ते।।6।।

## सूक्त-164

10417. अप इहि मनसः पते अप क्राम परः चर।
परः निः-ऋत्यै आ चक्ष्व बहुधा जीवतः मनः।।1।।
10418. भद्रम् वै वरम् वृणते भद्रम् युञ्जन्ति दक्षिणम्।
भद्रम् वैवस्वते चक्षुः बहुत्रा जीवतः मनः।।2।।
10419. यत् आ-शसा निःशसा अभिशसा
उप-आरिम् जाग्रतः यत् स्वपन्तः।
अग्निः विश्वानि अप दुःकृतानि
अजुष्टानि आरे अस्मत् दधातु।।3।।
10420. यत् इन्द्र ब्रह्मणः पते अभि-द्रोहम् चरामसि।
प्रचेताः नः आंगिरसः द्विषताम् पातु अंहसः।।4।।
10421. अजैष्म अद्य असनाम च
अभूम अनागसः वयम्।
जाग्रत्-स्वप्नः सम्-कल्पः पापः यम् द्विष्मः
तम् सः ऋच्छतु यः नः द्वेष्टि तम् ऋच्छतु।।5।।

## सूक्त-165

10422. देवाः कपोतः इषितः यत् इच्छन्
दूतः निः-ऋत्याः इदम् आजगाम।
तस्मै अर्चाम् कृणवाम् निः-कृतिम्
शम् नः अस्तु द्वि-पदे शम् चतुःपदे।।1।।
10423. शिवः कपोतः इषितः नः अस्तु
अनागाः देवाः शकुनः गृहेषु।
अग्निः हि विप्रः जुषताम् हविः नः
परि हेतिः पक्षिणी नः वृणक्तु।।2।।

10424. हेतिः पक्षिणी न दभाति अस्मान्
आष्ट्र्याम् पदम् कृणुते अग्निधाने।
शम् नः गोभ्यः च पुरुषेभ्यः च अस्तु
मा नः हिंसीत् इह देवाः कपोतः।।3।।
10425. यत् उलूकः वदति मोघम् एतत्
यत् कपोतः पदम् अग्नौ कृणोति।
यस्य दूतः प्रहितः एषः एतत्
तस्मै यमाय नमः अस्तु मृत्यवे।।4।।
10426. ऋचा कपोतम् नुदत प्रनोदम्
इषम् मदन्तः परि गाम् नयध्वम्।
सम्-योपयन्तः दुः-इतानि विश्वा
हित्वा नः ऊर्जम् प्र पतात् पतिष्ठः।।5।।

## सूक्त-166

10427. ऋषभम् मा समानानाम् सपत्नानाम् विससहिम्।
हन्तारम् शत्रूणाम् कृधि विराजम् गो-पतिम् गवाम्।।1।।
10428. अहम् अस्मि सपत्नहा इन्द्रः-इव अरिष्टः अक्षतः।
अधः सपत्नाः मे पदोः इमे सर्वे अभिस्थिताः।।2।।
10429. अत्र एव वः अपि नह्यामि उभे आर्त्नी इव।
ज्यया वाचः पते नि सेध
इमान् यथा मत् अधरम् वदान्।।3।।
10430. अभिभूः अहम् आ अगमम् विश्वकर्मेण धाम्ना।
आ वः चित्तम् आ वः व्रतम्
आ वः अहम् सम्-इतम् ददे।।4।।
10431. योग-क्षेमम् वः आदाय अहम् भूयासम्
उत्-तमम् आ वः मूर्धानम् अक्रमीम्।
अधः-पदात् मे उत् वदत मण्डूकाः-इव
उदकात् मण्डूकाः उदकात-इव।।5।।

## सूक्त-167

10432. तुभ्य इदम् इन्द्र परि सिच्यते
मधु त्वम् सुतस्य कलशस्य राजसि।
त्वम् रयिम् पुरु-वीराम् ऊँ नः कृधि
त्वम् तपः परितप्य अजयः स्वः।।1।।
10433. स्वः-जितम् महि मन्दानम् अन्धसः
हवामहे परि शक्रम् सुतान् उप।
इमम् नः यज्ञम् इह बोधि आ गहि
स्पृधः जयन्तम् मघवानम् ईमहे।।2।।
10434. सोमस्य राज्ञः वरुणस्य धर्मणि
बृहस्पतेः अनुमत्याः ऊ शर्मणि।
तव अहम् अद्य मघवन् उपस्तुतौ धातः
विधातः कलशान् अभक्षयम्।।3।।
10435. प्रसूतः भक्षम् अकरम् चरौ अपि
स्तोमम् च इमम् प्रथमः सूरिः उत् मृजे।
सुते सातेन यदि आ अगमम् वाम्
प्रति विश्वामित्रजमदग्नी दमे।।4।।

## सूक्त-168

10436. वातस्य नु महिमानम् रथस्य
रुजन् एति स्तनयन् अस्य घोषः।
दिवि-स्पृक् याति अरुणानि कृण्वन्
उतो एति पृथिव्या रेणुम् अस्यन्।।1।।
10437. सम् प्र ईरते अनु वातस्य विस्थाः
आ एनम् गच्छन्ति समनम् न योषाः।
ताभिः सयुक् सरथम् देवः ईयते
अस्य विश्वस्य भुवनस्य राजा।।2।।
10438. अन्तरिक्षे पथिभिः ईयमानः
न नि विशते कतमत् चन अहः।
अपाम् सखा प्रथमजाः ऋतवा क्व
स्वित् जातः कुतः आ बभूव।।3।।
10439. आत्मा देवानाम् भुवनस्य गर्भः
यथावशम् चरति देवः एषः।
घोषाः इत् अस्य शृण्विरे न रूपम्
तस्मै वाताय हविषा विधेम।।4।।

## सूक्त-169

10440. मयः-भूः वातः अभि वातु उस्राः
ऊर्जस्वतीः ओषधीः आ रिशन्ताम्।
पीवस्वतीः जीवधन्याः पिबन्तु
अवसाय पत्-वते रुद्र मृड।।1।।
10441. याः सरूपाः विरूपाः एकरूपाः
यासाम् अग्निः इष्ट्या नामानि वेद।
याः अङ्गिरसः तपसा इह चक्रुः ताभ्यः
पर्जन्य महि शर्म यच्छ।।2।।
10442. याः देवेषु तन्वम् ऐरयन्त
यासाम् सोमः विश्वा रूपाणि वेद।
ताः अस्मभ्यम् पयसा पिन्वमानाः
प्रजावतीः इन्द्र गोस्थे रिरीह।।3।।
10443. प्रजापतिः मह्यम् एताः रराणः
विश्वैः देवैः पितृभिः सम्-विदानः।
शिवाः सतीः उप नः गोस्थम् आ अकः
तासाम् वयम् प्रजया सम् सदेम।।4।।

## सूक्त-170

10444. विभ्राट् बृहत् पिबतु सोम्यम् मधु
आयुः दधत् यज्ञपतौ अवि-ह्नुतम्।
वातजूत- यः अभिरक्षति त्मना
प्रजाः पुपोष पुरुधा वि राजति।।1।।
10445. विभ्राट् बृहत् सुभृतम् वाज-सातमम्

धर्मन् दिवः धरुणे सत्यम् अर्पितम्।
अमित्रहा वृत्रहा दस्युहम्-मतमम्
ज्योतिः जज्ञे असुरहा सपत्नहा।।2।।
10446. इदम् श्रेष्ठम् ज्योतिषाम् ज्योतिः
उत्-ततम् विश्वजित् धन-जित् उच्यते बृहत्।
विश्वभ्राट् भ्राजः महि सूर्यः दृशे
उरु पप्रथे सहः ओजः अच्युतम्।।3।।
10447. विभ्राजन् ज्योतिषा स्वः अगच्छः रोचनम् दिवः।
येन इमा विश्वा भुवनानि आभृता
विश्वकर्मणा विश्वदेव्यवता।।4।।

## सूक्त-171

10448. त्वम् त्यम् इटतः रथम् इन्द्र प्र आवः सुतवतः।
अशृणोः सोमिनः हवम्।।1।।
10449. त्वम् मखस्य दोधतः शिरः अव त्वचः भरः।
अगच्छः सोमिनः गृहम्।।2।।
10450. त्वम् त्यम् इन्द्र मर्त्यम् आस्त्र-बुध्नाय वेन्यम्।
मुहुः श्रथ्नाः मनस्यवे।।3।।
10451. त्वम् त्यम् इन्द्र सूर्यम् पश्चा सन्तम् पुरः कृधि।
देवानाम् चित् तिरः वशम्।।4।।

## सूक्त-172

10452. आ याहि वनसा सह गावः
सचन्त वर्तनिम् यत् ऊधभिः।।1।।
10453. आ याहि वस्व्या धिया मंहिष्ठः
जारयत्-मखः सुदानुभिः।।2।।
10454. पितुभृतः न तन्तुम् इत्
सुदानवः प्रति दध्मः यजामसि।।3।।
10455. उषाः अप स्वसुः तमः सम्
वर्तयति वर्तनिम् सुजातता।।4।।

## सूक्त-173

10456. आ त्वा अहार्षम् अन्तः
एधि ध्रुवः तिष्ठ अवि-चाचलिः।
विशः त्वा सर्वाः वाञ्छन्तु
मा त्वत् राष्ट्रम् अधि भ्रशत्।।1।।
10457. इह एव एधि मा अप च्योष्ठाः
पर्वतः-इव अवि-चाचलिः।
इन्द्रःइव इह ध्रुवः तिष्ठ इह राष्ट्रम् ॐ धारय।।2।।
10458. इमम् इन्द्रः अदीधरत् ध्रुवम् ध्रुवेण हविषा।
तस्मै सोमः अधि ब्रवत् तस्मै ॐ ब्रह्मणः पतिः।।3।।
10459. ध्रुवा द्यौः ध्रुवा पृथिवी ध्रुवासः पर्वताः इमे।
ध्रुवम् विश्वम् इदम् जगत् ध्रुवः राजा विशाम् अयम्।।4।।
10460. ध्रुवम् ते राजा वरुणः ध्रुवम् देवः बृहस्पतिः।
ध्रुवम् ते इन्द्रः च अग्निः च राष्ट्रम् धारयताम् ध्रुवम्।।5।।
10461. ध्रुवम् ध्रुवेण हविषा अभि सोमम् मृशामस।
अथो ते इन्द्रः केवलीः विशः बलि-हृतः करत्।।6।।

## सूक्त-174

10462. अभि-वर्तेन हविषा येन इन्द्रः अभिववृते।
तेन अस्मान् ब्रह्मणः पते अभि राष्ट्राय वर्तय।।1।।
10463. अभिवृत्य सपत्नान् अभि याः नः अरातयः।
अभि पृतन्यन्तम् तिष्ठ अभि यः नः इरस्यति।।2।।
10464. अभि त्वा देवः सविता अभि सोमः अवीवृतत्।
अभि त्वा विश्वा भूतानि अभिवर्तः यथा अससि।।3।।
10465. येन इन्द्रः हविषा कृत्वी
अभवत् द्युम्नी उत्-तमः।
इदम् तत् अक्रि देवाः असपत्नः किल अभुवम्।।4।।
10466. असपत्नः सपत्नहा अभिराष्ट्रः वि-ससहिः।
यथा अहम् एषाम् भूतानाम् वि-राजानि जनस्य च।।5।।

## सूक्त-175

10467. प्र वः ग्रावाणः सविता देवः सुवतु धर्मणा।
धूःसु युज्यध्वम् सुनुत।।1।।
10468. ग्रावाणः अप दुच्छुनाम् अप सेधत दुःमतिम्।
उस्राः कर्तन भेषजम्।।2।।
10469. ग्रावाणः उपरेषु आ महीयन्ते सजोषसः।
वृष्णे दधतः वृष्ण्यम्।।3।।
10470. ग्रावाणः सविता नु वः देवः सुवतु धर्मणा।
यजमानाय सुन्वते।।4।।

## सूक्त-176

10471. प्र सूनवः ऋभूणाम् बृहन्त नवन्त वृजना।
क्षाम् ये विश्वधायसः अश्नन् धेनुम् न मातरम्।।1।।
10472. प्र देवम् देव्या धिया भरत जातवेदसम्।
हव्या नः वक्षत् आनुषक्।।2।।
10473. अयम् ॐ स्यः प्र देवयुः होता यज्ञाय नीयते।
रथः न योः अभिवृतः घृणिवान् चेतति त्मना।।3।।
10474. अयम् अग्निः उरुष्यति अमृतात् इव जन्मनः।
सहसः चित् सहीयान् देवः जीवातवे कृतः।।4।।

## सूक्त-177

10475. पतङ्गम् अक्तम् असुरस्य मायया
हृदा पश्यन्ति मनसा विपः-चितः।
समुद्रे अन्तः कवयः वि चक्षते
मरीचीनाम् पदम् इच्छन्ति वेधसः।।1।।
10476. पतङ्गः वाचम् मनसा बिभर्ति
ताम् गन्धर्वः अवदत् गर्भे अन्तः।
ताम् द्योतमानाम् स्वर्यम् मनीषाम्

ऋतस्य पदे कवयः नि पान्ति।।2।।
10477. अपश्यम् गोपाम् अनि-पद्यमानम्
आ च परा च पथिभिः चरन्तम्।
सः सध्रीचीः सः विषूचीः वसानः
आ वरीवर्ति भुवनेषु अन्तः।।3।।

## सूक्त-178

10478. त्यम् ऊ सु वाजिनम् देव-जूतम्
सह-वानम् तरुतारम् रथानाम्।
अरिष्टनेमिम् पृतनाजम् आशुम्
स्वस्तये तार्क्ष्यम् इह हुवेम।।1।।
10479. इन्द्रस्य-इव रातिम् आजोहुवानाः
स्वस्तये नावम्-इव आ रुहेम।
उर्वी न पृथ्वी बहुले गभीरे मा
वाम् आ-इतौ मा परा-इतौ रिषाम।।2।।
10480. सद्यः चित् यः शवसा पञ्च कृष्टीः
सूर्यःइव ज्योतिषा अपः। ततान।
सहस्रसाः शतसाः अस्य रंहिः
न स्म वरन्ते युवतिम् शर्याम्।।3।।

## सूक्त-179

10481. उत् तिष्ठत अव पश्यत
इन्द्रस्य भागम् ऋत्वियम्।
यदि श्रातः जुहोतन यदि अश्रातः ममत्तन।।1।।
10482. श्रातम् हविः ओ सु इन्द्र प्र याहि
जगाम सूरः अध्वनः वि-मध्यम्।
परि त्वा आसते निधिभिः सखायः
कुल-पाः न व्राज-पतिम् चरन्तम्।।2।।
10483. श्रातम् मन्ये ऊधनि श्रातम् अग्नौ
सु-श्रातम् मन्ये तत् ऋतम् नवीयः।
माध्यन्दिनस्य सवनस्य दध्नः
पिब इन्द्र वज्रिन् पुरु-कृत् जुषाणः।।3।।

## सूक्त-180

10484. प्र ससहिषे पुरुहूत शत्रून्
ज्येष्ठः ते शुष्मः इह रतिः अस्तु।
इन्द्र आ भर दक्षणेन वसूनि
पतिः सिन्धूनाम् असि रेवतीनाम्।।1।।
10485. मृगः न भीमः कुचरः गिरिस्थाः
परावतः आ जगन्थ परस्याः।
सृकम् सम्-शाय पविम् इन्द्र तिग्मम्
वि शत्रून् ताड व मृधः नुदस्व।।2।।
10486. इन्द्र क्षत्रम् अभि वामम् ओजः
अजायथाः वृषभ चर्षणीनाम्।
अप अनुदः जनम् अमित्र-यन्तम्
उरुम् देवेभ्यः अकृणोत् ॐ लोकम्।।3।।

## सूक्त-181

10487. प्रथः च यस्य सप्रथः च नाम
आनुष्तुभस्य हविषः हविः यत्।
धातुः द्युतानात् सवितुः च विष्णोः
रथम्-तरम् आ जभार वसिष्ठः।।1।।
10488. अविन्दन् ते अति-हितम् यत् आसीत्
यज्ञस्य धाम परमम् गुहा यत्।
धातुः द्युतानात् सवितुः च विष्णोः
भरत्-वाजः बृहत् आ चक्रे अग्नेः।।2।।
10489. ते अविन्दन् मनसा दीध्यानाः
यजुः स्कन्नम् प्रथमम् देव-यानम्।
धातुः द्युतानात् सवितुः च विष्णोः
आ सूर्यात् अभरन् घर्मम् एते।।3।।

## सूक्त-182

10490. बृहस्पतिः नयतु दुः-गहा तिरः
पुनः नेषत् अघ-शंसाय मन्म।
क्षिपत् अशस्तिम् अप दुः-मतिम् हन्
गअथ करत् यजमानाय शम् योः।।1।।
10491. नराशंसः नः अवतु प्रयाजे
शम् नः अस्तु अनुयाजः हवेषु।
क्षिपत् अशस्तिम् अप दुःमतिम् हन्
अथ करत् यजमानाय शम् योः।।2।।
10492. तपुः-मूर्धा तपतु रक्षसः ये
ब्रह्म-द्विषः शरवे हन्तवै ॐ।
क्षिपत् अशस्तिम् अप दुःमतिम् हन्
अथ करत् यजमानाय शम् योः।।3।।

## सूक्त-183

10493. अपश्यम् त्वा मनसा चेकितानम्
तपसः जातम् तपसः वि-भूतम्।
इह प्र-जाम् इह रयिम रराणः
प्र जायस्व प्रजया पुत्र-काम।।1।।
10494. अपश्यम् त्वा मनसा दीध्यानाम्
स्वायाम् तनू ऋत्व्ये नाधमानाम्।
उप माम् उच्चा युवतिः बभूयाः
प्र जायस्व प्रजया पुत्र-कामे।।2।।
10495. अहम् गर्भम् अदधाम् ओषधीषु
अहम् विश्वेषु भुवनेषु अन्तः।
अहम् प्रजाः अजनयम् पृथिव्याम्
अहम् जनिभ्यः अपरीषु पुत्रान्।।3।।

## सूक्त-184

10496. विष्णुः योनिम् कल्पयतु त्वष्टा रूपाणि पिंशतु।
आ सिञ्चतु प्रजा-पतिः धाता गर्भम् दधातु ते।।1।।
10497. गर्भम् धेहि सिनीवालि गर्भम् धेहि सरस्वति।
गर्भम् ते अश्विनौ देवौ आ धत्ताम् पुष्कर-स्रजा।।2।।
10498. हिरण्ययी अरणी यम् निः-मन्मतः अश्विना।
तम् ते गर्भम् हवामहे दशमे मासि सतवे।।3।।

## सूक्त-185

10499. महि त्रीणाम् अवः अस्तु
द्युक्षम् मित्रस्य अर्यम्णः।
दुःआधर्षम् वरुणस्य।।1।।
10500. नहि तेषाम् अमा चन न अध्वसु वारणेषु।
ईशे रिपुः अघशंसः।।2।।
10501. यस्मै पुत्रासः अदितेः प्र जीवसे मर्त्याय।
ज्योतिः यच्छन्ति अजस्रम्।।3।।

## सूक्त-186

10502. वातः आ वातु भेषजम् शम्-भु मयःभु नः हृदे।
प्र नः आयूंषि तारिषत्।।1।।
10503. उत् वात पिता असि नः उत भ्राता उत नः सखा।
सः नः जीवातवे कृधि।।2।।
10504. यत् अदः वात ते गृहे अमृतस्य निधिः हितः।
ततः नः देहि जीवसे।।3।।

## सूक्त-187

10505. प्र अग्नये वाचम् ईरय वृषभाय क्षितीनाम्।
सः नः पर्षत् अति द्विषः।।1।।
10506. यः परस्याः परावतः तिरः धन्व अति-रोचते।
सः नः पर्षत् अति द्विषः।।2।।
10507. यः रक्षांसि नि-जूर्वति वृषा शुक्रेण शोचिषा।
सः नः पर्षत् अति द्विषः।।3।।
10508. यः विश्वा अभि वि-पश्यति
भुवना सम् च पश्यदि।
सः नः पर्षत् अति द्विषः।।4।।
10509. यः अस्य पारे रजसः शुक्रः अग्निः अजायत।
सः नः पर्षत् अति द्विषः।।5।।

## सूक्त-188

10510. प्र नूनम् जात-वेदसम् अश्वम् हिनोत वाजिनम्।
इदम् नः बर्हिः आसदे।।1।।
10511. अस्य प्र जात-वेदसः विप्र-वीरस्य मीडषः।
महीम् इयर्मि सु-स्तुतिम्।।2।।
10512. याः रुचः जात-वेदसः देवत्रा हव्य-वाहनीः।
ताभिः नः यज्ञम् इन्वतु।।3।।

## सूक्त-189

10513. आ अयम् गौः पृश्निः अक्रमीत्
असदत् मातरम् पुरः।
पितरम् च प्रयन् स्वः।।1।।
10514. अन्तः चरति रोचना अस्य प्राणात् अप-अनती।
वि अख्यत् महिषः दिवम्।।2।।
10515. त्रिंशत् धाम वि राजति वाक् पतङ्गाय धीयते।
प्रति वस्तोः अह द्युभिः।।3।।

## सूक्त-190

10516. ऋतम् च सत्यम् चाभीद्धात्तपसो अध्यजायत।
ततो रात्र्यजायत ततः समुद्रो अर्णवः।।1।।
10517. समुद्रादर्णवादधि संवत्सरो अजायत।
अहोरात्राणि विदधद्विश्वस्य मिषतो वशी।।2।।
10518. सूर्याचन्द्रम् असौ धाता यथापूर्वम् अकल्पयत्।
दिवम् च पृथिवी च अन्तरिक्षम् अथो स्वः।।3।।

## सूक्त-191

10519. सम्-सम् इत् युवसे वृषन्
अग्ने विश्वानि अर्यः आ।
इड पदे सम्-इध्यसे सः नः वसूनि आ भर।।1।।
10520. सम् गच्छध्वम् सम् वदध्वम्
सम् वः मनांसि जानताम्।
देवा भागम् यथा पूर्वे सम्-जानानाः उप-आसते।।2।।
10521. समानः मन्त्रः सम्-इतिः समानी,
समानम् मनः सह चित्तम् एषाम्।
समानम् मन्त्रम् अभि मन्त्रये वः
समानेन वः हविषा जुहोमि।।3।।
10522. समानी वः आकूतिः समाना हृदयानि वः।
समानम् अस्तु वः मनः यथा वः सु-सह असति।।4।।

## ।। इति दशमम् मण्डलम् ।।

